| कृष्णेन तमदृष्ट्वा प्रभोः पृच्छा, तन्मोक्षं ज्ञात्वा कृष्णमूर्च्छा, संज्ञां लब्ध्वा तेन भ्रातृवधकपृच्छनं, भगवता 'सोमशर्मणे मा कुपः स त्वद्भ्रातुर्मोक्षसाधने सहायः' इति कथनं, कृष्णेन भ्रातुः संस्कारादिकरणं, पुरीं प्रविशता च सोमं भयेन मृतं दृष्ट्वा तद्देहं बन्धयित्वा नगरे च भ्रमयित्वा गृध्रादीनां बलितया क्षेपणम् | १३४-१४५ | १३५ |
| गजसुकुमालशोकेन वसुदेवं विना दशार्हाणां, शिवादेव्याः, प्रभोः सप्तसोदर्याणां, राजीमत्याः, एकनाशायाः, बहूनां कृष्णपुत्राणां यदूनां च परिव्रज्या, वसुदेवस्य कनकवती-रोहिणी-देवकीर्भिविना सर्वासां पत्नीनां प्रव्रज्या, कृष्णस्य च कन्योद्वाहप्रत्याख्यानाभिग्रहः, ततः कनकवत्याः गृहे स्थिताया अपि कैवल्योत्पत्तिः, स्वयं प्रव्रज्याग्रहणं, स्वामिनं दृष्ट्वा च मासिकानशनेन निर्वाणम् | १४६-१५३ | १३५ |
| सागरचन्द्रस्याऽणुव्रतधरस्य प्रतिमाधरस्य श्मशाने कायोत्सर्गं कुर्वाणस्य शिरसि नभःसेनेन चिताङ्गाराणां न्यसनं, तस्य मृत्वा स्वर्गमनम् | १५४-१५८ | १३५ |
| शक्रेण स्वःसदसि कृष्णवर्णनं, देवस्य कस्यचिद् द्वारवतीमागत्य कृष्णपरीक्षा, वरदानं च | १५९-१६८ | १३५-१३६ |
| कृष्णेन द्वारकायां रोगोपसर्गशान्तिः स्यादिति वरयाचनं, देवेन तस्मै भेरीदानं, भेरीवादनेन रोगाद्युपशान्तिः, अथाऽर्थलुब्धेन भेरीरक्षकेण भेर्याः कन्थीकरणम्, भेरीरक्षककुकृत्यज्ञानेन हत्वा तं कृष्णेनाऽष्टमं कृत्वाऽमरात् पुनरपि भेरीप्राप्तिः | १६९-१७९ | १३६ |
| कृष्णेन भेरीवादनेनाऽशिवोपशान्तिकरणं, वैद्यद्वयस्य च चिकित्सायै योजनं, तत्र वैतरणेर्यथोचितं चिकित्सा धन्वन्तरेस्तु पापसंयुता चिकित्सा, भगवता धन्वन्तरेः सप्तमपृथ्वीगमनकथनं, वैतरणेश्च विन्ध्यवने कपित्वप्राप्तिकथनं, ततः साधुचिकित्सां कृत्वाऽनशनेन च तस्य सहस्रारे सुरत्वप्राप्तिकथनं, श्रुत्वैतत् कृष्णस्य धर्मश्रद्धावृद्धिः | १८०-१९९ | १३६ |
| अन्यदा भगवतः पार्श्वे वर्षास्वविहारकारणं श्रुत्वा कृष्णेनाऽपि स्वगेहादनिःसरणाभिग्रहग्रहणं, स्वगृहे च सर्वेषां प्रवेशनिषेधनं, वीरकुविन्दस्य प्रतिज्ञां ज्ञात्वा कृष्णेन सकृपेन तस्य स्वगृहागमनानुज्ञा | २००-२१० | १३७ |
| कृष्णेन देशनायां यतिधर्मं श्रुत्वाऽन्यदीक्षाग्राहणानुमोदनादिनियमग्रहणं, स्वकन्यानां युक्त्या प्रव्राजनम्, अथैकदा मातृशिक्षितायाः केतुमञ्जर्याः वचः श्रुत्वा कृष्णेन युक्त्या तस्या वीरकेण सह विवाहकरणं, प्रव्राजनं च | २११-२३० | १३७ |
| अन्यदा कृष्णस्य वीरकस्याऽपि सर्वेषां साधूनां द्वादशावर्तवन्दनं, कृष्णस्य भगवता क्षायिकसम्यक्त्वाद्यर्जनकथनं, पुनरपि वन्दनोद्यतस्य च भगवता निवारणम्, | २४०-२४८ | १३८ |
| कृष्णस्य ढण्ढणनामपुत्रस्य वैराग्याद्दीक्षा, तस्याऽन्यदाऽन्तरायकर्मोदयेन भिक्षाया अलाभे साधुभिश्च भगवतस्तत्कारणे पृष्टे भगवता ढण्ढणपूर्वभवदुष्कृतकथनं, तच्छ्रुत्वा ढण्ढणस्य परलब्ध्या भोजनाग्रहणाभिग्रहः, अलाभपरीषहसहनं च | २४९-२६० | १३८ |
| कृष्णेन भगवतो 'दुष्करकारकमहर्षिः क' इति पृष्टे भगवता 'ढण्ढण' इति कथनं, निवर्तमानेन कृष्णेन ढण्ढणं दृष्ट्वा तद्वन्दनं, श्रेष्ठिनैकेन ढण्ढणं समाकार्यं मोदकेन तत्प्रतिलाभनं, ढण्ढणेन भगवत्पार्श्वे गत्वा पृष्टे भगवता 'हरेर्लब्धिरिय' मिति कथिते ढण्ढणस्य तां भिक्षां परिष्ठापयतः शुद्धभावेन केवलोत्पादः | २६१-२७० | १३८-१३९ |
| अन्यदा स्वामिपार्श्वे गच्छति रथनेमावकस्माद् वृष्टिं जातां दृष्ट्वा गुहायां प्रवेशः, इतो राजीमत्या अपि वृष्टिवशात्तस्यामेव गुहायां प्रवेशः, वस्त्रमोचनं, रथनेमेः कामातुरतया भोगप्रार्थनं, तया तस्य सम्यक् प्रतिबोधनं, तस्य च पश्चात्तापपरस्य तीव्रव्रतपालनं, प्रभोरग्रे स्वदुश्चरितालोचनं, वत्सरान्ते च केवलोत्पादः | २७१-२८६ | १३९ |
| अन्यदा रैवतकाचले समवसृते स्वामिनि कृष्णेन पालक-शाम्बादिपुत्राणां परीक्षणं प्रभोः सकाशात् द्रव्य-भावयोर्भव्याभव्ययोश्च भेदं ज्ञात्वा कृष्णेन पालकनिर्वासनं शाम्बसत्कृतिश्च | २८७-२९४ | १३९ |
| **एकादशः सर्गः** | | १४० |
| अन्यदा प्रभोर्देशनान्ते कृष्णेन द्वारकाया यदूनां स्वस्य च क्षयस्य हेतोः पृच्छा, भगवताऽपि च 'द्वारका- | | |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | श्लोकाः | पृष्ठम् |
|---|---|---|
| यदूनां क्षयो द्वैपायनात् तव स्वभ्रातुर्जरत्कुमारात् क्षयः' इति कथिते जराकुमारस्य द्वैपायनस्य च वनवासित्वं, कृष्णेन च मद्यनिवारणं त्याजनं च | १-१३ | १४० |
| सिद्धार्थस्य प्रव्रज्या, बलदेवस्य तस्मै काले सम्बोधनार्थं विज्ञप्तिः | १४-१८ | १४० |
| अन्यदा वनेऽटतः स्वपुरुषान्मद्यं प्राप्य शाम्बस्य कुमारैः सह सुरापानं, मद्यपानान्धैः कुमारैस्तत्र ध्यानरतस्य द्वैपायनर्षेस्ताडनं, द्वैपायनस्य निदानकरणं, क्रोधानुपशमनं च | १९-४० | १४०-१४१ |
| द्वारकायां गत्वा कृष्णस्य लोकेभ्यो धर्मनिरतत्वाय सूचनं, शाम्ब-प्रद्युम्नादीनां कुमाराणां जाम्बवती-रुक्मिण्यादीनां च यदुयोषितां प्रव्रज्या, भगवता 'द्वादशेऽब्दे द्वैपायनो द्वारकां धक्ष्यती'ति कथनम् | ४१-४७ | १४१ |
| कृष्णखेदं ज्ञात्वा भगवता तस्य वालुकाप्रभागमनकथनं, तेन विधुरस्य कृष्णस्य भगवता भाविनिकाले भरतेऽममतीर्थकृत्त्वकथनं बलदेवस्य च तस्यैव तीर्थे मुक्तेः कथनम् | ४८-५५ | १४१ |
| द्वैपायनस्य मृत्वाऽग्निकुमारेषूत्पादः, तस्य धर्मप्रभावेण तत्रोपसर्गं कर्तुमक्षमत्वं, छिद्रान्वेषणं च | ५६-५९ | १४१ |
| द्वादशेऽब्दे प्राप्ते जनैः स्वैराचरणं, तदाऽवकाशमुपलभ्य द्वैपायनेन विविधोत्पातकरणं, पुरीं काष्ठ-तृणादिभिरापूर्य प्रणश्यतो जनांश्चाऽऽनीय कुलकोटीनां द्वात्रिंशेन शतेन सह द्वारकाया ज्वालनम् | ६०-७३ | १४१-१४२ |
| वसुदेव-देवकी-रोहिणीनां त्राणाय गतयो राम-कृष्णयोर्द्वैपायनेन निषेधनं, तेषां चाऽऽहारप्रत्याख्यानं कृत्वा चतुःशरणं च कृत्वा द्वैपायनवर्षितेनाऽग्निना च मृत्वा स्वर्गमनम् | ७४-८८ | १४२ |
| राम-कृष्णाभ्यां पुर्या बहिर्गत्वा दह्यमानपुरीदर्शनं, कृष्णस्य शोकः, द्वयोश्च पाण्डुमथुरां प्रति प्रयाणम् | ८९-१०० | १४२-१४३ |
| रामसूनोः कुब्जवारकस्य जृम्भकदेवैः स्वामिपार्श्वे नीतस्य प्रव्रज्याग्रहणम्, द्वारकायाश्च षण्मासीं यावद्दहनम् | १००-१०६ | १४३ |
| हस्तिकल्पपुरं गच्छतो राम-कृष्णयोः दर्शनेनाऽऽरक्षैस्तत्रत्यनृपाय धृतराष्ट्रपुत्राय विज्ञप्तिः, तस्य च सबलस्य बलं हन्तुमागमनं, बलेनाऽऽलानमुन्मूल्य तेषां हननं, तत्क्ष्वेडां च श्रुत्वा कृष्णेनाऽप्यागत्य द्वारपरिघेन सैन्यहननं, ततो वशंवदं नृपं क्षमयित्वा द्वयोरुद्याने गत्वा भोजनकरणं, ततः कौशाम्बवनं प्राप्तयोः कृष्णस्य तृषाऽऽकुलत्वं, तत्कृते च बलभद्रेन जलानयनाय गमनं, कृष्णस्य च पीताम्बरेण स्वं प्रच्छाद्य स्वपनम् | १०७-१२८ | १४३ |
| तावता जराकुमारस्य तत्राऽऽगत्य कृष्णं दृष्ट्वा मृगबुद्ध्या शरेण हननं, तेन 'जराकुमारोऽह' मित्यादिकथनं, कृष्णोऽयमिति च ज्ञात्वा तस्य मूर्च्छा, रोदनं च, कृष्णेन तस्मै स्वकौस्तुभं दत्त्वा तस्य पाण्डवपार्श्वे प्रेषणम् | १२९-१५३ | १४३-१४४ |
| ततः कृष्णस्य शुभध्यानं, वायुकोपेन च द्वैपायनमारणचिन्तया रौद्रध्यानं, मृत्वा च तृतीयनरके गमनम् | १५४-१६५ | १४४-१४५ |
| **द्वादशः सर्गः** | | **१४६** |
| जलमादायाऽऽगतस्य रामस्य कृष्णं मृतं ज्ञात्वा मूर्च्छनं, रोदनं च, भ्रातरं स्कन्धे समारोप्य वनादिषु भ्रमणम् | १-१४ | १४६ |
| तदाऽवधिना तद् दृष्ट्वा सिद्धार्थजीवेन देवेनाऽऽगत्य युक्त्या तत्प्रतिबोधनं, ततो निजरूपं प्रकटयित्वा कृष्णमरणकारणादिकथनं, रामेणाऽपि प्रव्रज्यानिश्चयकरणं, देवसाहाय्येन कृष्णशरीरसंस्कारकरणम् | १५-३५ | १४६-१४७ |
| बलस्य दीक्षानिश्चयं ज्ञात्वा नेमिनाथेन विद्याधरर्षिप्रेषणं, तत्पार्श्वे दीक्षां गृहीत्वा बलस्य तीव्रतपःकरणम्, अन्यदा पारणे पुर्यां प्रविष्टेन निजरूपाज्जायमानमनर्थं विलोक्य वने गमनं, तत्र च काष्ठहारकैर्दत्तैराहारादिभिः पारणकरणम् | ३६-४८ | १४७ |
| बलस्य धर्मदेशनया नैकेषां व्याघ्र-सिंहादीनां प्रशान्तत्वं, श्रावकत्वादिभजनं च, जातिस्मरस्य चैक-मृगस्याऽतिसंवेगेन सदा बलमुनिसाहचर्यं, तत्तपःपारणार्थं च काष्ठहारकादीनामन्वेषणं च, बलर्षेः भिक्षार्थं नयनं च, अन्यदा रथकारकानागतान् ज्ञात्वा मृगेण बलर्षेस्तत्राऽऽनयनं, रथकारेणाऽपि मुनेर्नमस्करणम् | ४९-६१ | १४७ |
| बलर्षिणा च रथकारान्तरायापास्तये भिक्षाग्रहणं, मृगस्याऽपि तद् दृष्ट्वाऽनुमोदनम्, एवं त्रयाणामपि धर्मध्यानपरायणानामुपरि वाताहतस्याऽर्धच्छिन्नस्य तरोः पतनात् त्रयाणामपि मृत्युः ब्रह्मलोके पद्मोत्तरविमाने च सुरत्वम् | ६२-७० | १४७-१४८ |
| अथ रामजीवेन देवेनाऽवधिना कृष्णं तृतीयनरकगतं विलोक्य तत्स्नेहात् तदुद्धरणाय तत्पार्श्वे गमनं, कर्मनियन्त्रितं च तं विलोक्य तत्सन्निधौ वसनाय निर्णयनं, तदा कृष्णेन तस्य भरते गत्वा द्वयोरपि महिमानं कर्तुं सूचनं, रामेणाऽपि तथा करणम् | ७१-८९ | १४८ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | श्लोकाः | पृष्ठम् |
|---|---|---|
| जराकुमारस्य पाण्डवसमीपे गमनं द्वारका दाहादिवृत्तकथनं, कौस्तुभार्पणं च, शोकमग्नैः पाण्डवैः कृष्णस्य प्रेतकार्यकरणं, ततस्तेषां प्रव्रज्येच्छां ज्ञात्वा नेमिनाथेन धर्मघोषमुनैस्तत्र प्रेषणं, तैरपि जराकुमारं राज्ये न्यस्य द्रौपद्यादिसहितैः प्रव्रज्याग्रहणं, साभिग्रहतपःकरणं च, नेमिनाथवन्दनार्थं ततो विहारश्च | ९०-९५ | १४८ |
| नेमिनाथभगवतो विविधदेशेषु विहारः, नैकजीवप्रतिबोधनं च | ९६-९९ | १४८ |
| भगवतः परिवारवर्णनं, निर्वाणसमयं ज्ञात्वा प्रभो रैवतके गमनम् | १००-१०५ | १४८-१४९ |
| समवसरणे रचिते भगवतः पर्यन्तदेशना, पादपोपगमनानशनं, षट्त्रिंशैः पञ्चभिः शतैश्च साधूनां सहितैः आषाढशुक्लाष्टम्यां निर्वाणं च | १०६-१०९ | १४९ |
| प्रद्युम्न-शाम्बादीनां कुमाराणां, कृष्णस्याष्टानां महिषीणां, भगवतो बन्धूनां, राजीमती-रथनेमिप्रभृतिव्रति-व्रतिनीनां च मोक्षगमनं, शिवा-समुद्रविजयोर्माहेन्द्रकल्पे गमनं, दशार्हाणां च विविधदेवलोकगमनम्, इन्द्रादिभिः प्रभोर्देहस्याऽग्निसंस्कारकरणं, तत्स्थाने च नेमिनाथप्रतिमायुतस्य चैत्यस्य रचनं, इतो हस्तिकल्पपुरं प्राप्तैः पाण्डवैः जनेभ्यो नेमिनाथनिर्वाणं श्रुत्वा शोकेन विमलाद्रौ गमनं, तत्र चाऽनशनेन केवलं प्राप्य निर्वाणगमनं च, द्रौपद्यास्तु ब्रह्मलोकगमनम् | ११०-१२८ | १४९-१५० |
| ॥ अष्टमं पर्व समाप्तम् ॥ | | |
| **<u>नवमं पर्व</u>** | | |
| **प्रथमः सर्गः**, ब्रह्मदत्तचक्रिचरितम् | | १५१ |
| ब्रह्मदत्तचक्रिणः पूर्वभवानां वर्णनं, यथा, जम्बूद्वीपे भारते साकेतनगरे चन्द्रावतंसपुत्रस्य मुनिचन्द्रनाम्नो वैराग्यात् सागरचन्द्रमुनि पार्श्वे व्रतग्रहणम्, अन्यदा गुरुणा सह विहरतस्तस्य सार्थाद् भ्रष्टत्वात् अटव्यामटनं, तत्र चतुर्भिर्गोपैस्तत्प्रतिचरणं, मुनिनाऽपि तान् प्रतिबोध्य दीक्षार्पणं, तत्र द्वाभ्यां सम्यक्व्रतपालनं द्वयोश्च जुगुप्सा, सर्वेषां स्वर्गमनं, जुगुप्साकारिणोस्ततश्च्युत्वा दासपुत्रत्वं, सर्पदंशेन तत्र विपद्याऽनन्तरजन्मनि मृगत्वं, ततो मृतगङ्गायां हंसत्वं, ततश्च वाराणस्यां भूतदत्ताभिधस्य महर्द्धिमातङ्गस्य चित्र-सम्भूतिनामपुत्रत्वम् | १-२१ | १५१ |
| अत्राऽपि निमित् प्राप्य व्रतं गृहीत्वा सम्यक् पालयतोस्तयोः वन्दनार्थमागतस्य चक्रिणः स्त्रीरत्नस्य केश-संस्पर्शेन सम्भूतमुनेश्चक्रित्वप्रापणाय निदानकरणं, द्वयोर्मृत्वा सौधर्मे सुरत्वम् | २२-१०२ | १५१-१५४ |
| ततश्च्युत्वा चित्रजीवस्य पुरिमताले महेभ्यतनयत्वं, सम्भूतस्य च काम्पिल्ये ब्रह्म-चुलन्योर्ब्रह्मदत्तनामपुत्रत्वेन जन्म, ब्रह्मदत्तस्य द्वादशे वयसि तत्पितुर्मरणं, ब्रह्ममित्रैश्च दीर्घराजस्य ब्रह्मराजराज्यत्राणाय नियोजनं, दीर्घस्य राज्यसम्पद्धरणं चुलन्या सह रमणं च | १०३-१२२ | १५४-१५५ |
| सर्वमिदं ब्रह्मराजमन्त्रिणा धनुषा ज्ञात्वा ब्रह्मदत्तरक्षणाय स्वसुतवरधनोर्नियोजनं, तस्माच्च स्वमातुर्वृत्तं ज्ञात्वा ब्रह्मदत्तस्य कोपः | १२३-१२८ | १५५ |
| तेन शुद्धान्तमध्ये गत्वा स्वकोपप्रकाशनं, तदाकूतं ज्ञात्वा दीर्घेण चुलन्यास्तन्मारणाय सज्जीकरणं, तस्यो-द्वाहं कृत्वा जतुगृहे ज्वालनीयोऽसावित्युपायकरणं च | १२९-१४४ | १५५ |
| तज्ज्ञात्वा धनुषोपायेन गङ्गातीरे सत्रमण्डपकरणं, पान्थेभ्योऽन्नपानादिदानं च, ततः प्रत्ययितनरैस्तेन जतुगृहावधि सुरङ्गाकरणम् ततो युक्त्या राजकन्यास्थाने दासीमानाय्य ब्रह्मदत्तस्य विवाहकरणम् | १४५-१५७ | १५५-१५६ |
| जतुगृहे वरधनुना सह प्रविष्टे ब्रह्मदत्ते निशार्धे चुलन्यादिष्टपुरुषैस्तज्ज्वालनं, वरधनुना च सुरङ्गाद्वार-मुद्घाट्य ततो ब्रह्मदत्तेन सह निष्क्रमणम् | १५८-१७७ | १५६ |
| ब्राह्मणगृहे भोजनार्थं प्रविष्टस्य ब्रह्मदत्तस्य ब्राह्मणेन स्वपुत्र्या विवाहकरणम् | १७८-१८४ | १५६ |
| ततोऽग्रेगतयोस्तयोर्दीर्घपुरुषैर्मार्गरोधेन वरधनुषि गृहीते ब्रह्मदत्तस्य पलायनम् | १८५-१९२ | १५६-१५७ |
| गच्छतस्तस्याऽऽश्रमं दृष्ट्वा कुलपतिपार्श्वे गमनं, स्ववृत्तकथनं च, तच्छ्रुत्वा हृष्टेन तेन स्वस्य तत्पितु-र्लघुभ्रातृत्वकथनं, ब्रह्मदत्तस्य चाऽऽश्रम एव स्थापयित्वा कलाशिक्षणम् | १९३-२०२ | १५७ |
| अन्यदा वनं गतेन ब्रह्मदत्तेन मत्तहस्तिनं दृष्ट्वा तेन सह खेलनं, हस्तिनि च नष्टे तस्य वने भ्रष्टत्वम् | २०३-२१३ | १५७ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | श्लोकाः | पृष्ठम् |
|---|---|---|
| अथाऽग्रे गतेन तेन नदीमुत्तीर्य उद्वसे पुरे वंशजालिकायामसि-वसुनन्दौ दृष्ट्वा ग्रहणं, असिना च वंशजालच्छेदने कस्यचिन्मस्तके छिन्ने तेन सम्यक् दृष्ट्वा शोककरणं, ततो नगरे प्रविष्टस्य तस्य सप्तभूमिकं प्रासादं दृष्ट्वा तत्राऽऽरोहणं, तत्र च निषण्णामेकां नारीं वीक्ष्य तस्यै पृच्छनम् | २१४-२२३ | १५७-१५८ |
| तया च पृष्टे तेन स्ववृत्तकथनं, तच्छ्रुत्वा तस्या हर्षः, स्वपरिचयं च दत्त्वा ततो द्वयोरपि गान्धर्वविवाहः | २२४-२३५ | १५८ |
| प्रभाते ब्रह्मदत्तस्य पुष्पवत्या सङ्केतेन ततो निर्गमनं, तत एकं महासरस्तीर्त्वा तत्तटे च पुष्पाणि विचिन्वत्याः कन्याया रूपं दृष्ट्वा विस्मितस्य तस्य नृपेण स्वपुत्र्या तद्विवाहकरणम् | २३६-२६८ | १५८-१५९ |
| अथाऽन्यदा पल्लीपतिना सह ग्रामघातार्थं ब्रह्मदत्ते गते तत्र सरस्तटे वरधनुमेलनं, तेन च स्ववृत्तान्तकथनम् | २६९-३०१ | १५९-१६० |
| ततो दीर्घराजस्य भटानायातान् ज्ञात्वा द्वयोस्ततः पलायनं, ततोऽटतोस्तयोः ब्रह्मदत्तस्याऽन्यान्यकन्या-परिणयनं वरधनुं च कुत्रचिद् गतं मृतं ज्ञात्वा राजगृहे तत्प्रेतकार्यकरणप्रवृत्ते ब्रह्मदत्ते वरधनोस्तत्राऽऽगमनं स्ववृत्तकथनं च | ३०२-४०९ | १६०-१६३ |
| अन्यदोन्मत्तहस्तिनं वशं कुर्वतस्तस्याऽऽकृत्यादि दृष्ट्वा विस्मितेन राज्ञा तत्परिचयज्ञानेन बह्वीभिः कन्याभिस्तत्परिणयकरणं, वरधनोश्च मन्त्रिकन्यया परिणयः | ४१०-४२५ | १६३-१६४ |
| तयोर्बलं संचित्य वाराणसीगमनं, वाराणसीशेन ब्रह्मदत्तस्य स्वकन्यया विवाहकरणं, सेनादानं च, ततो धनुर्मन्त्रिणोऽन्येषां च नृपाणां साहाय्यं लब्ध्वा ब्रह्मदत्तस्य दीर्घं पराभवितुं प्रयाणं, दूतस्य चोत्तरदानं, काम्पील्यरोधनं च | ४२६-४३६ | १६४ |
| दीर्घस्य युद्धायाऽऽगमनं, चुलन्या वैराग्याद्दीक्षा, युद्धे च ब्रह्मदत्तेन दीर्घस्य हननं, काम्पील्यं प्रविश्य कुरुमत्या स्त्रीरत्नत्वेन प्रतिष्ठापनम् | ४३७-४४८ | १६४-१६५ |
| ततस्तस्य षट्खण्डभरतक्षेत्रसाधनं, काम्पील्यमागतस्य तस्य चक्रित्वेनाऽभिषेकः | ४४९-४७० | १६५ |
| अभिषेके च प्रवर्तमाने पूर्वपरिचितद्विजस्य तत्राऽऽगतस्याऽन्तः प्रवेशमलभमानस्य द्वारे स्थित्वैव नृपं सेवमानस्य प्रत्यभिज्ञानेन ब्रह्मदत्तेन तस्मै सर्वत्र भरतक्षेत्रे भोजनादि दापनम् | ४७१-४८४ | १६५-१६६ |
| अन्यदा जातिस्मृतिं प्राप्य पूर्वजन्मसहोदरशुद्धिकृते ब्रह्मदत्तेन जनेभ्यः श्लोकार्धसमस्यार्पणं, चित्रजीवमुनिना तत्पूरणे तस्य पार्श्वे गमनं, देशनाश्रावणं, मुनये च भोगार्थमामन्त्रणदानं, मुनिना च तस्य प्रतिबोधनं, ब्रह्मदत्तस्याऽबुद्धत्वं, मुनेश्च क्रमशः केवलज्ञान-निर्वाणादि | ४८५-५१२ | १६६-१६७ |
| अन्यदा यवनेशेन प्रेषितस्याऽश्वस्य परीक्षार्थं गतस्य ब्रह्मदत्तस्य तेनाऽश्वेनाऽतिदूरे नयनं, तत्रैकसरस्तटे एकस्या नागकन्याया नागरूपेण व्यन्तरेण साकं रमणं वीक्ष्य तयोः शिक्षादानं, नगर्यां निवर्तनं, नागकन्यया च स्वपतयेऽलीककथनं, तच्छ्रुत्वा ब्रह्मदत्तमारणेच्छयाऽऽगतेन नागकुमारेण ब्रह्मदत्त-तन्महिष्योः संलापं श्रुत्वा प्रकटीभूय तत्प्रशंसनं, 'किञ्चिद् याचस्वे'ति कथनं च, ब्रह्मदत्तेन 'सर्वप्राणिभाषामहं जानीया'मिति याचनं, तदा नागेना'ऽन्येषां न शंस्य'मिति कथयित्वा तस्मै वरदानम् | ५१३-५५१ | १६७-१६८ |
| प्रसाधनगृहे गृहगोलदम्पत्योर्वार्तां श्रुत्वा हसतो राज्ञो महिष्या तत्कारणपृच्छनं, राज्ञा 'अकथनीयं तद्, अन्यथा मरिष्येऽह'मिति कथितेऽपि तस्या दुराग्रहेण राज्ञा स्मशाने चितां कारयित्वा 'तत्रैव कथयिष्ये' इति तस्यै कथनं, तदा राज्ञः कुलदेवतया छागदम्पत्यो रूपं कृत्वा राज्ञः प्रतिबोधनं | ५५२-५७० | १६८ |
| अन्यदा प्राक्परिचितेन द्विजेनाऽऽगत्य 'सकुटुम्बं मां भोजये'ति याचिते राज्ञा 'मदीयान्नं ते न जीर्यते' इति कथितेऽपि तदाग्रहेण सकुटुम्बस्य तस्य स्वगृहे भोजनकराणं, तद्भोजनमदेन स्मरातुरस्य द्विजकुटुम्बस्य पशुवदाचरणं, द्वितीयदिने द्विजेनाऽमर्षेण राज्ञो वैरसाधनायाऽजापालद्वारा तदक्षिस्फोटने कृते राज्ञा तस्य द्विजस्य सपरिवारस्य घातनं, ततः पुरोधःप्रभृतीनां सर्वेषां विप्राणां घातनं, 'तेषां नेत्राणां स्थालमापूर्य निधातव्य' इति आज्ञाकरणं च, अमात्यैस्तद्रौद्राध्यवसायं विज्ञाय श्लेष्मातकफलैः स्थालमापूर्य तत्पुरतो निधानं, ब्रह्मदत्तस्य नित्यं तेषां स्पर्शनमर्दनै रौद्राध्यवसायवृद्धिः, एवं षोडशवर्षाणि कृत्वा 'कुरुमती'ति ब्रुवाणस्य तस्य मृत्वा सप्तमनरकपृथिवीगमनम् | ५७१-६०० | १६९ |


Jain Education International For Private & Personal Use Only www.jainelibrary.org

| विषयः | श्लोकाः | पृष्ठम् |
|---|---|---|
| **द्वितीयः सर्गः** - श्रीपार्श्वनाथचरितम् (श्रीपार्श्वनाथस्य पूर्वभवाः) | | १७० |
| जम्बूद्वीपे भरते पोतनपुरे अरविन्दराजा, तत्पुरोहितो विश्वभूतिः परमश्रावकः अनुद्धरा तद्भार्या कमठ-मरुभूती तत्पुत्रौ, वरुणा कमठभार्या, वसुन्धरा मरुभूतिभार्या, विश्वभूतेरनशनेन मृत्वा सौधर्मे सुरत्वं, तद्वियोगेनाऽनुद्धराया अपि नमस्कारपराया मृत्युः, कमठस्य गृहकार्यकर्मठत्वं, मरुभूतेस्तु संसारासारत्वज्ञस्य धर्मरतत्वं विषयपराङ्मुखत्वं च, कमठस्य परस्त्री-द्यूतादिष्वासक्तिः, वसुन्धरायाः पत्याऽस्पृष्टाया विषयेच्छा, कमठेन मुग्धायास्तस्याश्छलेन विप्लवकरणं, तया सह रमणं च, वरुणया तत् मरुभूतये कथनं, मरुभूतिना तद् दृष्ट्वा राज्ञे कथनं, राज्ञा कमठस्य सविडम्बनं निर्वासनं, तेनाऽपि वने गत्वा तापसदीक्षाग्रहणम्, इतः पश्चात्तापपरस्य मरुभूतेस्तत्क्षमायाचनाय गतस्य मूर्धनि शिलाक्षेपणेन कमठेन तद्धननं, तस्य मृत्वा (द्वितीयभवे) विन्ध्ये इभत्वं, वरुणाया अपि मृत्वा तस्यैवेभस्य करिणीत्वम् | १-५८ | १७०-१७१ |
| अरविन्दस्य दीक्षा, अन्यदा सार्थेन सहाऽष्टापदयात्रायै तद्गमनं, क्रमेण सार्थस्य मरुभूतीभसेविताटवीप्राप्तिः, तान् दृष्ट्वा कोपान्धेनेभेन तान् प्रति धावनं गर्जनं च, तेन सर्वेषां पलायनं, केवलमवधिज्ञानिनोऽरविन्दर्षेः कायोत्सर्गरतत्वं, तं दृष्ट्वा हस्तिनः प्रशमः, मुनिना तत्प्रतिबोधनं, हस्तिनो जातिस्मरणं, वरुणाकरिण्या सह तस्य श्रावकव्रतग्रहणम् | ५९-९८ | १७२-१७३ |
| कुञ्जरस्य तपोरतत्वं, शुभध्यानं च, कमठस्य मृत्वा कुक्कुटसर्पत्वं, भ्रमता तेन प्रासुकं पयः पिबन्तं पङ्के मग्नं च मरुभूतीभं दृष्ट्वा दशनं, समाहितस्य तस्य मृत्वा (तृतीयभवे) सहस्रारे सुरत्वं, करिण्या अपि तीव्रतपश्चरणेन विपद्य द्वितीयकल्पे देवीत्वं; गजजीवदेवेन तस्याः स्वकल्पे नयनं, द्वयोश्च सुखभोगः, कुक्कुटाहेस्तु मृत्वा पञ्चमनरके गमनम् | ९९-११७ | १७३ |
| (चतुर्थभवे) प्राग्विदेहे सुकच्छे विजये वैताढ्यपर्वते तिलकापुरे गजजीवस्य विद्युद्गतिखेचरेश-कनकतिलकयोः पुत्रतया जन्म, किरणवेग इति तन्नाम, यौवने पित्रा तं राज्ये न्यस्य दीक्षाग्रहणं, तस्याऽपि किरणतेजाः पुत्रः, अन्यदा सुरगुरुमुनेर्देशनया विरक्तस्य किरणवेगस्य प्रव्रज्या, अन्यदा पुष्करद्वीपं गत्वा शाश्वतार्हतो नत्वा हैमशैलस्य प्रदेशे तस्य प्रतिमाकरणं, तदा कुक्कुटाहिजीवस्य नरकादुद्वृत्तस्य तत्रैव महाहितयोत्पन्नस्य मुनिं दृष्ट्वा कोपः, मुनिशरीरं वेष्टयित्वा च दशनं, मुनेश्च नमस्कारं स्मृत्वा समाधिनाऽनशनेन च मृत्वा (पञ्चमे भवे) द्वादशे कल्पे देवत्वं, तस्य चाऽहेर्दवाग्निना मृत्वा षष्ठे नरके उत्पत्तिः | ११८-१५० | १७३-१७४ |
| (षष्ठे भवे) प्रत्यग्विदेहे सुगन्धिविजये शुभङ्करापुर्यां किरणवेगजीवस्य स्वर्गाच्च्युत्वा वज्रवीर्यनृप-लक्ष्मीवत्योः वज्रनाभाभिधपुत्रत्वेन जन्म, यौवने पित्रोस्तं राज्येऽभिषिच्य व्रतग्रहणं, तस्य चक्रायुधः पुत्रः, वज्रनाभस्य यौवनादेव संसारभीतस्य चक्रायुधं राज्ये न्यस्य क्षेमङ्करतीर्थकृत्पार्श्वे दीक्षाग्रहणम्, अन्यदा वज्रनाभ-मुनेरेकाकिविहारप्रतिमाधरस्य सुकच्छे विजये ज्वलनाद्रौ महाटव्यां गमनं, कायोत्सर्गेणाऽवस्थानं, तस्य सर्पजीवस्याऽपि नरकादुद्वृत्तस्य तस्यामेवाऽटव्यां कुरङ्गकाभिधभिल्लत्वेन जन्म, पापर्द्धयै निर्यातस्य तस्य मुनिं दृष्ट्वा कोपः, शरेण च मुनेर्हननं, मुनेश्च समाधिना मृत्वा (सप्तमे भवे) मध्यग्रैवेयके देवत्वं, कुरङ्गकस्याऽपि महापापानि कृत्वा सप्तमे नरके उत्पत्तिः | | |
| (अष्टमे भवे) जम्बूद्वीपे प्रत्यग्विदेहे पुराणपुरे वज्रनाभजीवस्य कुलिशबाहुनृपसुदर्शनयोश्चतुर्दश-महास्वप्नदर्शनपूर्वकं पुत्रत्वेन जन्म, सुवर्णबाहुरिति तन्नाम, यौवने पित्रा तं राज्ये न्यस्य व्रतग्रहणं, तस्याऽपि रत्नपुरेशस्य पद्मानामकन्यया सह विवाहः, षट्खण्डसाधनं च, अन्यदा तीर्थकरं समवसृतं ज्ञात्वा तस्य देशनाश्रवणं, देवान् वीक्ष्य च जातिस्मरणं, सुतं च राज्ये न्यस्य विरक्तस्य तस्य दीक्षा, अर्हद्भक्त्यादिभिः स्थानैराराधितैस्तस्य तीर्थकृन्नामार्जनम्, अन्यदा तस्य क्षीरमहागिरिपार्श्वे क्षीरवणाटवीगमनं, तत्र चाऽऽतापनां कुर्वतस्तस्य प्रतिमयाऽवस्थानं, तदा कुरङ्गकजीवस्याऽपि नरकादुद्वृत्तस्य सिंहत्वेन तत्रैव जन्म, तस्य च स्वर्णबाहुमुनिं दृष्ट्वा कोपः, प्रहारकरणं, विदारणं च, मुनेश्चाऽनशनं, समाधिना क्षमापूर्वकं च मृत्वा (नवमे भवे) दशमे कल्पे महाप्रभविमाने देवत्वं, सिंहस्य च विपद्य चतुर्थनरके नरकत्वं ततो निर्गत्य च तिर्यग्योनिषु बहुविधं भ्रमणम् | १९८-३१० | १७५-१७९ |

| विषयः | श्लोकाः | पृष्ठम् |
|---|---|---|
| **तृतीयः सर्गः** | | १८० |
| ततः सिंहजीवस्य रोरद्विजकुले सुतत्वेन जन्म, तत्परिवारजनानां मृत्युः, लोकैस्तस्य 'कठ' इति नामकरणं, नित्यदुःस्थितस्य वैराग्येण तापसव्रतग्रहणं पञ्चाग्न्यादितपःसेवनं च | १-७ | १८० |
| सुवर्णबाहुजीवस्य च जम्बूद्वीपे भरते बाराणस्यामश्वसेननृपतेर्वामामहिषीकुक्षौ चैत्रकृष्णचतुर्थ्यां चतुर्दशस्वप्नदर्शनपूर्वमवतरणं, पौषकृष्णदशमीदिने च तज्जन्म, षट्पञ्चाशद्दिक्कुमारीभिस्तत्सूतिकर्मकरणं, सुरेन्द्रैश्च जन्माभिषेककरणम् | ८-४१ | १८०-१८१ |
| अश्वसेनस्याऽपि पुत्रजन्मोत्सवकरणं 'पार्श्व' इति च नामस्थापनं, क्रमेणवर्धमानस्य तस्य यौवनप्राप्तिः | ४२-५२ | १८१ |
| अन्यदा कुशस्थलपुरीय-नरवर्मनृपपुत्रप्रसेनजितनृपदूतस्य पुरुषोत्तमाख्यस्य प्रवेशः, तेन च-'प्रसेनजितः सुतायाः प्रभावत्याः किन्नरीभ्यः श्रीपार्श्वनाथगुणान् गीयमानान् श्रुत्वा पार्श्वनाथोपरि अनुरागः, तच्च ज्ञात्वा तत्पित्रा तस्याः स्वयंवरायाः प्रेषणनिर्णयनं, तच्च ज्ञात्वा कलिङ्गदेशाधिपस्य यवनस्य प्रभावती-विवाहोत्सुकस्य कुशस्थलरोधन'मिति कथनम् | ५३-१०१ | १८१-१८३ |
| तच्छ्रवणेन क्रुद्धस्याऽश्वसेनस्य युद्धाय सन्नहनं, तच्च ज्ञात्वा पार्श्वकुमारस्य पितरमुपरुध्य प्रयाणं, तदा शक्रेण ससारथिरथप्रेषणं, कुशस्थलं प्राप्य प्रभुणा यवनपार्श्वे दूतप्रेषणं, यवनस्य दूतवचनानि श्रुत्वा क्रोधः, तन्मन्त्रिणा तस्य शमनं, यवनं बोधयित्वा च पार्श्वकुमारशरणे प्रेषणं, प्रभुणाऽपि च तस्य अभयदानपूर्वकं सत्करणं, कुशस्थलीयरोधोद्वेष्टनाय चाऽऽदेशनम् | १०२-१७० | १८३-१८५ |
| प्रसेनजितो हर्षः, प्रभावत्या सहितस्य तस्य पार्श्वकुमारसमीपे गमनं, विवाहार्थं च प्रार्थनं, पार्श्वकुमारस्य निषेधः, प्रसेनजितः प्रभावतीमादाय पार्श्वनाथेन सहैव बाराणसीगमनम्, अश्वसेनेन तत्सत्करणं, तेन च प्रभावत्याः पार्श्वनाथेन सह विवाहायाऽश्वसेनस्यानुरोधनम्, अश्वसेनेनाऽपि पार्श्वकुमारस्य 'विवाहार्थ-मनुमन्यस्वे'ति कथनं, 'पितृवचोऽनुल्लङ्घ्य' मिति विचिन्त्य पार्श्वकुमारेणाऽनुमतिदानं, प्रभावत्या सह विवाहकरणं च | १७१-२११ | १८५-१८६ |
| अन्यदा कठतापसं पञ्चाऽन्यादितपोरतमागतं ज्ञात्वा पार्श्वनाथस्य तत्र गमनं, करुणया च दयाधर्मप्रकाशनं, कठेन तत्प्रतिकृते स्वामिना स्वपुरुषद्वारा कुण्डस्थकाष्ठमाकृष्य तत्स्फोटने ततो महतः सर्पस्य निर्गमनं, दह्यमानस्य च तस्य भगवता स्वसेवकेन नमस्कारदापनं प्रत्याख्यानकारणं च, सर्पस्य च समाधिना मृत्वा धरणनागराजत्वेनोत्पातः, कठस्याऽपि विशेषतपः कृत्वा मृत्वा च मेघमालितया मेघकुमारे उत्पादः | २१२-२३० | १८६-१८७ |
| इतः प्रभोर्लोकान्तिकामरैर्विज्ञप्तस्य वार्षिकदानपूर्वकं पौषकृष्णैकादश्यां दीक्षा, ततो विहरतो भगवत एकदा तापसाश्रमे गमनं, तत्र रात्रौ कूपसमीपे न्यग्रोधतरुमूले भगवतः प्रतिमयाऽवस्थानं, तदा मेघमालिनाऽवधेः पूर्वभवव्यतिकरं ज्ञात्वा प्रतिभवं वैरं च संस्मृत्य कोपात् प्रभुमुपद्रोतुमुपसर्गकरणं, प्रभौ चाऽक्षुब्धे तेन मेघान् विकुर्व्य कल्पान्तमेघवत् वर्षणं, तेनाऽल्पकालेनैव प्रभोः कण्ठं यावत् जलपूरः, आनासाग्रं यावज्जलमायाति तावद् नागराजधरणेन्द्रस्याऽऽसनकम्पनं, तेनाऽवधिज्ञानोपयोगेन प्रभोरुपसर्गं ज्ञात्वा स्वमहिषीभिस्तत्राऽऽगत्य प्रभोरुपसर्गहरणं मेघमालिनश्चाऽधिक्षेपणम् | २३१-२९५ | १८७-१८९ |
| अथ प्रभोर्दीक्षादिनाच्चतुरशीतिदिनेषु गतेषु वाराणस्यामाश्रमपदोद्याने धातकीतरुतले चैत्रकृष्णचतुर्थ्यां केवलज्ञानोत्पादः, देवैः समवसरणादिरचनं, अथेदं सर्वं वनपालाज्ज्ञात्वा सपरिच्छदस्य नृपस्य तत्राऽऽगमनं, शक्रेण सह भूत्वा प्रभोः स्तवनं च | २९६-३२० | १८९ |
| ततः प्रभोर्धर्मदेशना, बहूनां प्रव्रज्या श्रावकत्वं च, अश्वसेनस्याऽपि वामादेवी-प्रभावतीसहितस्य दीक्षा, प्रभुणा चाऽऽर्यदत्तादीनां दशानां गणधराणां स्थापनं, शासनाधिष्ठायकत्वेन च पार्श्वयक्ष-पद्मावती-देवतयोः स्थापनम् | २९७-३६६ | २८९-१९१ |
| **चतुर्थः सर्गः** | | १९२ |
| पुण्ड्रविषयेषु भगवति गते तामलिप्तीवासिनो वणिक्पुत्रस्यसागरदत्ताख्यस्य वृत्तान्तः, सागरदत्तस्य प्रभुपार्श्वे प्रव्रज्याग्रहणम् | १-४९ | १९२-१९३ |

| विषयः | श्लोकाः | पृष्ठम् |
|---|---|---|
| नागपुरीनिवासिनो बन्धुदत्तस्य वृत्तान्तः, भगवता च तत्पूर्वभववृत्तकथनम्, बन्धुदत्तस्य स्वभार्यया सह व्रतग्रहणम् | ५०-२९७ | १९३-२०१ |
| रत्नपुरे नवनिधिस्वामिनृपस्य वृत्तान्तः | २९८-३१० | २०१ |
| भगवतः परिवारस्य वर्णनं, श्रावणसिताष्टम्यां सम्मेताद्रौ मासिकानशनेन त्रयस्त्रिंशन्मुनियुतस्य प्रभोर्निर्वाणम् | ३११-३२१ | २०१ |


॥ नवमं पर्व समाप्तम् ॥



अर्हम् ॥

नमो नमः श्रीगुरुनेमिसूरये ॥

कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यगुम्फितं

# ॥ श्रीत्रिषष्टिशलाकापुरुषचरितमहाकाव्यम् ॥

## ॥ अष्टमं पर्व ॥

### ॥ श्रीअरिष्टनेमि-कृष्णवासुदेव-बलभद्र-जरासन्धप्रतिवासुदेवचरितप्रतिबद्धम् ॥

### ॥ प्रथमः सर्गः ॥

**अर्हं ॥**

ॐ नमो विश्वनाथाय जन्मतो ब्रह्मचारिणे । [1]कर्मवल्लीवनच्छेदनेमयेऽ**रिष्टनेमये** ॥१॥
श्री**नेमे**रर्हतः [2]**कृष्ण**विष्णो **राम**[3]**स्य** सीरि[4]णः । [5]**जरासन्ध**[6]प्रतिहरेश्चरि[7]तं कीर्तयिष्यते ॥२॥
**जम्बूद्वीपे** द्वीपेऽत्रैव क्षेत्रे[8]ऽत्रैवास्ति **भारते** । [9]अचलायाः शिरोरत्नं नाम्नाऽ**चलपुरं** पुरम् ॥३॥
तत्राभूद् **विक्रमधना**भिधानो [10]वसुधाधवः । यथार्थनामा समरे वि[11]क्रमाक्रान्तशात्रवः ॥४॥
कृतान्त इव [12]दुष्प्रेक्षो[13]ऽसुहृदां सुहृदां पुनः । स नेत्रानन्दजननो निशाकर इवाऽभवत् ॥५॥
कल्पद्रुमः प्रणयिनां वज्रदण्डश्च वैरिणाम् । चकासामास तस्योच्चैर्दोर्दण्डश्चण्डतेजसः ॥६॥
तं दिग्भ्यः सम्पदोऽभ्येयुः [14]स्रवन्त्य इव सागरम् । प्रादुरासन् कीर्तयश्च ततोऽद्रेरिव निर्झराः ॥७॥
[15]सधर्मचारिणी [16]तस्य धरणी[17]व सदा स्थिरा । [18]**धारिणी** नाम विशदशीलालङ्कारधारिणी ॥८॥
सर्वाङ्गरूपसुभगा पुण्यलावण्यशालिनी । सा तस्य भूपतेर्मूर्तिमतीव[19] श्रीरराजत ॥९॥ (युग्मम् ॥)
गत्या गिरा च हंसीव पद्मिनीव श्रियः पदम् । भर्तुर्हृदि पदं चक्रे सा प्रसून इवाऽलिनी[20] ॥१०॥
॥साऽन्यदा यामिनीशेषे चूतं [21]मत्तालि-कोकिलम् । उत्पन्नमञ्जरीपुञ्जं [22]फलितं [23]स्वप्न ऐक्षत ॥११॥
ते[24]न पाणिस्थितेनोचे कोऽप्येवं रूपवान् पुमान् । तवाऽङ्गणे रोप्यतेऽसावद्य चूतोऽयमुच्चकैः ॥१२॥
कियत्यपि गते काले[25]ऽन्यत्राऽन्यत्र निधास्यते[26] । उत्कृष्टोत्कृष्टफलभाग् नववारावधि ह्यसौ[27] ॥१३॥
सा भर्तुराख्यत् तं स्वप्नं सोऽपि तज्ज्ञैर्व्यचारयत् । सूनुः प्रकृष्टस्ते भावीत्याचख्युस्तेऽपि चोन्मुदः[28] ॥१४॥
अन्यत्राऽन्यत्र चूतस्य नवकृत्वस्तु रोपणम् । न जानीमः केवलं तत्[29] जानाति यदि केवली ॥१५॥
श्रुत्वा तद्वचनं देवी मुदिता तत्प्रभृत्यपि । बभार गर्भं सा [30]रत्नगर्भेव निधिमुत्तमम् ॥१६॥
[31]काले च सुषुवे पुत्रं पवित्राकारधारिणम्[32] । [33]**धारिण्य**र्कमिव प्राची[34] जगतो हर्षकारणम् ॥१७॥
सूनोर्जन्मोत्सवो[35] राज्ञा महादानपुरःसरम् । अकारि दिवसे पुण्ये **धन** इत्यभिधाऽपि च ॥१८॥
माता-पित्रोः प्रमोदेन सह प्रववृधे **धनः** । अङ्कादङ्कं नीयमानो धात्रीभिरिव पार्थिवैः ॥१९॥
कलाकलापमखिलं कलयामास स क्रमात् । अनङ्ग[36]लीलोपवनं यौवनं प्रत्य[37]पादि च ॥२०॥

---

१. कर्माणि एव वल्ल्यः, तासां वनं, तस्य च्छेदः, तस्मिन् नेमिः चक्रधारा, तस्यै । २. कृष्णवासुदेवस्य । ३. बलभद्रस्य । ४. हलधारिणः । ५. **जरासिन्धु**- खं० २, पा०, मु० । ६. प्रतिवासुदेवस्य । ७.०**श्चरित्रं** खं० १-२। ८. **क्षेत्रे भरतनाम्नि** पु० । **क्षेत्रे चैवा०** ला १, की०ला०छा० । ९. पृथ्व्याः । १०. भूपतिः । ११. विक्रमेणाक्रान्तं शात्रवं-शत्रुसमूहः येन सः । १२. **दुष्प्रेक्ष्यो०** खं० १-२, ला० विना । १३. वैरिणाम् । १४. नद्यः । १५. पत्नी । १६. **तस्य धारिणी धर्मकारिणी । शीलालङ्कारविशदा धरित्रीव सदा स्थिरा** सं० । १७. **धरित्रीव** ता० । १८. **धारणी** खं० १, सू० । १९. **०मतीयं०** ला० १ । २०. **प्रसून इव साऽलिनी** पु० । पुष्पे भ्रमरीव । २१. मत्ता अलयो-भ्रमराः कोकिलाश्च यस्मिन् । २२. **०पुञ्जफलितं** सू० । २३. **स्वप्नमैक्षत** ता० सं० खं० १-२ विना । २४. आम्रेण । २५. **ततोऽन्यत्र** सू० । २६. **०स्यति** ला० । आरोपयिष्यते । २७. **०वधिर्ह्यसौ** खं० २, सू० विना । २८. हर्षिताः । २९. **०ति केवली यदि** खं० १ । **तत्फलं जानाति केवली** खं० २, ला०, सू०, मु० । ३०. पृथ्वीव । ३१. **सिंहीव** खं० २ । ३२. **०धारिणी** खं० १। ३३. **धारण्य०** सू० । ३४. पूर्वदिक् । ३५. **०र्जन्मोत्सवं** ला० । ३६. अनङ्गस्य-कामदेवस्य लीला-क्रीडा, तस्या उपवनम् । ३७. "अङ्गीकृतवान्" इति ला० टि. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶इतश्च **कुसुमपुरे** पुरेऽभूत् पृथिवीपतिः । [1]**सिंहः** सिंह इवौजस्वी यशस्वी रणकर्मसु[2] ॥२१॥
चन्द्रलेखेव विमला **विमला** नाम तस्य तु । प्राणप्रिया महादेवी देवीवाऽभून् महीचरी ॥२२॥
[3]**तस्यां** बहूनां पुत्राणामुपर्यनुपमाकृतिः । कन्या **धनवती** नाम जज्ञे **सिंह**महीपतेः ॥२३॥
[4]रत्यादिरमणीरूपं जयन्ती रूपसम्पदा । क्रमेण ववृधे साऽथ कला जग्राह चाऽखिलाः ॥२४॥
¶अन्यदा [5]कुमुदानन्दे समये समुपस्थिते । सा सखीभिः परिवृता ययावुद्यानमीक्षितुम् ॥२५॥
[6]फुल्लसप्तच्छदोद्भ्राम्यद्[7]भ्रमरोद्गीतिबन्धुरे । [8]पञ्चबाणबाणीभूतनवबाणद्रुकोरके ॥२६॥
उन्मत्तसारसद्वन्द्वकेङ्कारमुखरीकृते । स्वच्छाम्बुसरसीक्रीडत्कलहंसकुलाकुले ॥२७॥
[9]गायदारामिकारम्यैरिक्षुवाटैर्मनोरमे । तत्रो[10]पवनदेवीव स्वच्छन्दं विजहार सा ॥२८॥ त्रिभिर्विशेषकम् ॥
¶विहरन्ती च सा कञ्चिदशोकस्य तरोस्तले । एकं चित्रकरं चित्रपट्टिकापाणिनैक्षत ॥२९॥
तां चित्रपट्टिकां तस्माद् **धनवत्याः** सखी बलात् । **कमलिन्या**ददे तत्र[11] नररूपं ददर्श च ॥३०॥
रूपेण विस्मिता तेन [12]सा प्रोचे चित्रकृन्नरम् । कस्येदमद्भुतं रूपं सुरा-ऽसुर-नरेष्वहो !? ॥३१॥
यद्वा सम्भाव्यते नेदं तेषु रूपं कदाचन । स्वकौशलं दर्शयितुं स्वबुद्ध्यैवाऽऽलिखः[13] खलु ॥३२॥
अनेकजननिर्माणश्रान्तस्य जरतो[14] विधेः । ईदृग्निर्माणनिष्णत्वं[15] कुतस्तस्य भविष्यति ? ॥३३॥
अथोचे चित्रकृत् स्मित्वा नाऽत्र मे चित्रकर्मणि । यथादृष्टलिखनीये मनागपि हि कौशलम् ॥३४॥
अयं खलु मयाऽलेखि युवा निरुपमाकृतिः । **धनोऽचलपुरा**धीशश्री**विक्रम**[16]**धना**त्मजः ॥३५॥
प्रत्यक्षं प्रेक्ष्य यस्तं हि प्रेक्षते चित्रवर्त्तिनम् । स कूटलेखक इति मां निन्दति मुहुर्मुहुः ॥३६॥
तमदृष्टवती त्वं[17] तु मयाऽपि लिखितं ननु । दृष्ट्वा विस्मयसे मुग्धे ! कूपमण्डूकसन्निभा ॥३७॥
सुरस्त्रियोऽपि मुह्यन्ति दृष्ट्वा तद्रूपमद्भुतम् । मया स्वदृग्विनोदार्थमलेखि तु यथामति ॥३८॥
¶**धनवत्य**पि तत्रस्था शुश्राव च ददर्श च । [18]मकरध्वजबाणानां गोचरत्वमियाय च ॥३९॥
**कमलिन्या**ललापैवं दृग्विनोदाय साध्विदम् । अलेखीरद्भुतं रूपं [19]तत्कल्योऽसि विवेक्यसि ॥४०॥
एवमुक्त्वा **कमलिनी** प्रारेभे गन्तुमग्रतः । तत्कालशून्यहृदया कथञ्चिद् **धनवत्य**पि ॥४१॥
[20]व्यावृत्तवृन्तपद्माभमुखी पश्चाद् विलोकिनी । पदे पदे प्रस्खलन्ती गृहं **धनवती** ययौ ॥४२॥
चित्रस्थ**धन**रूपेणाऽऽक्षिप्ता[21] **धनवती** ततः । नाऽऽससाद रतिं क्वाऽपि मरालीव [22]मरौ गता ॥४३॥
विदाञ्चकार क्षामाङ्गी न तृष्णां न क्षुधां च सा । निशायामपि नाऽशेत वनाकृष्टेव वारणी[23] ॥४४॥
स्मारं स्मारं **धन**रूपं लिखितं कीर्तितं च तत् । शिरःकम्पा-ऽङ्गुलीनृत्त-भ्रूक्षेपान् साऽकरोन् मुहुः ॥४५॥
**धन**ध्यानपरवशा यद्यत् किञ्चिदचेष्टत । जन्मान्तरकृतमिव नाऽस्मरत् तत् तदाऽपि सा ॥४६॥
विमुक्तो[24]द्वर्तन-स्नान-[25]चर्चा-ऽलङ्करणा सती । साऽहर्निशं **धनं** दध्यौ योगिनीवेष्टदेवताम् ॥४७॥
¶तामन्यदा **कमलिनी** पप्रच्छ कमलेक्षणे[26] ! । केनाऽऽधिना व्याधिना वा बाध्यसे यदसी[27]दृशी ? ॥४८॥
कृतकृत्रिमकोपा तामूचे **धनवती** ततः । बाह्यो जन इवैव त्वं किं पृच्छसि ? न वेत्सि किम् ? ॥४९॥

---

१. **सिंहो हरिरिवौ०** खं० २ । २. युद्धक्रियासु । ३. **तस्या** खं० १, ला० । ४. **रत्यादिवररूपाणि** पु० आ० । ५. कुमुदानामानन्दो-विकासो यस्मिन् समये-वसन्तऋतौ । ६. **फुल्लसप्त०** खं० १, ला० । ७. **द्भ्रामरो०** खं० १ । विकसितसप्तच्छदवृक्षेऽधिकं भ्राम्यतां भ्रमराणां उद्गीत्या-गायनेन बन्धुरं-सुन्दरं, तस्मिन् । ८. कामदेवस्य बाणीभूता नूतना बाणवृक्षकोरका कलिका यस्मिन्, तस्मिन् । ९. **गायदारामकी०** खं० १, ला० । **गायदारामकै०** की० ला १, पु० आ० सं० । गायन्त्य आरामिकाः-स्त्रियस्ताभी रम्यैः । १०. **०पवने देवीव** खं० १-२, ला० विना । ११. चित्रपट्टिकायाम् । १२. **सोचे चित्रकरं नरम्** ला० । **सोचे तं चित्रकृन्नरम्** रसंपा० । १३. **०वालिखत्** ला० । १४. वृद्धस्य । १५. निष्णत्वं-प्रवीणत्वं पारङ्गतत्वं वा । १६. **०विक्रमनृपात्मजः** खं० २ । १७. **त्वमदृष्टवती तं तु** ला० । १८. कामासक्ता बभूवेत्यर्थः । १९. **तत्कल्पो०** खं० १-२ विना । **तद्विज्ञो०** पु० । सज्जः-कुशलः । २०. म्लानपद्मतुल्यमुखीत्यर्थः । २१. आकृष्टा । २२. मरुदेशे । २३. हस्तिनी । २४. **०द्वर्त्तन-स्नान-शृङ्गाराभरणा** पु० । २५. विलेपनम् । २६. **कमलेक्षणाम्** की० पु० । २७. **यदसादृशी** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयं हृदयं मेऽसि जीवितव्यं ममाऽसि वा । नहि त्वं मे सखीमात्रं त्वत्प्रश्नेनाऽस्मि लज्जिता ॥५०॥

ऊचे **कमलिनी** युक्तमुपालब्धाऽस्मि मानिनि ! । मनःशल्यमहं जाने तवोत्तुङ्गं मनोरथम् ॥५१॥

**धनं** कामयसे नूनं तस्मादालेख्य[1]दर्शनात् । यद[2]ज्ञयेव पृष्टाऽसि मया तन्नर्म[3]मात्रकम् ॥५२॥

स्थानेऽनुरागं ते ज्ञात्वा सचिन्ता तत्प्रभृत्यपि । अपृच्छं ज्ञानिनं किं स्यान्मत्सख्याश्चिन्तितो वरः ? ॥५३॥

भावीति सोऽपि चाऽवोचद्[4] दर्शितप्रत्ययः सदा । तद्धीरा भव शीघ्रं ते सेत्स्य[5]त्येव मनोरथः ॥५४॥

तयेत्याश्वासिता धैर्यं भेजे **धनवती** तदा । पितरं वन्दितुं चागाद् दिव्यनेपथ्यधारिणी ॥५५॥

तां विसृ[6]ज्य पिता दध्यौ वरार्हेयं सुता मम । कोऽनुरूपो वरोऽमुष्या भविष्यति महीतले ? ॥५६॥

ए[7]वं चिरं चिन्तयतस्तस्य राज्ञः समाययौ । प्राक्प्रेषितो निजो दूतः श्री**विक्रमधना**न्नृपात् ॥५७॥

राजकार्यं स[8] आख्याय स्थितः सन् **सिंह**भूभुजा । तत्राऽपश्यः किमाश्चर्यमित्युक्तः सोऽवदत् पुनः ॥५८॥

तदपश्यं न यद् विद्याधरेष्वपि सुरेष्वपि । **धनस्य विक्रमधन**सूनो रूपं मनोरमम् ॥५९॥

तदैवाऽचिन्तयं योग्यो **धनवत्या** वरो ह्ययम् । स्रष्टुः सृष्टिप्रयासोऽस्तु सफलः [9]सङ्गमेऽनयोः ॥६०॥

प्रीतो राजाऽब्रवीत् साधु स्वयं मत्कार्यचिन्तक[10]! । मां कन्यावरचिन्ताब्धिमग्नमुद्धृतवानसि ॥६१॥

तद् **धनस्य धनवती**-सम्प्रदानाय बुद्धिमन्[11]! । [12]गच्छाऽद्य **विक्रमधनं** प्रार्थयस्व ममाऽऽज्ञया ॥६२॥

तदा **चन्द्रवती** नाम **धनव**त्यनुजाऽऽययौ । पितरं वन्दितुं तच्चाऽश्रौषीत् सर्वं तयोर्वचः ॥६३॥

ययौ स दूतः स्वगृहं मुदिता **चन्द्रव**त्यपि । एत्याऽऽचख्यौ **धनवत्यै** [13]तद्दिष्ट्याऽऽलापपूर्वकम् ॥६४॥

**धनव**त्यप्युवाचैवं [14]प्रत्येम्येतद्गिरा न हि । अज्ञानेन वदत्येषा परमार्थं न बुध्यते ॥६५॥

स दूतः प्रेषितो मन्ये कार्येणाऽन्येन केनचित् । इयं तु मुग्धा मत्कार्यमवबुद्धवती खलु ॥६६॥

**कमलिन्य**ब्रवीदत्र दूतः सोऽद्यापि तिष्ठति । जानीहि तन्मुखात् को हि दीपे सत्यग्निमीक्षते ? ॥६७॥

इत्युक्त्वा भावविज्ञा सा तत्र तं दूतमानयत् । अश्रौषीत् तन्मुखात् सर्वं हृष्टा **धनवती** स्वयम् ॥६८॥

अर्पणीयो **धन**स्याऽयं मल्लेख इति भाषिणी । **धनवत्या**र्पयत् तस्य लिखित्वा पत्रकं स्वयम् ॥६९॥

ततः स दूतः प्रययौ पुरेऽ**चलपुरे** द्रुतम् । अ[15]न्तरास्थानमासीनमुपतस्थे च **विक्रमम्** ॥७०॥

तमूचे **विक्रमः** कच्चित् कुशलं **सिंह**भूपतेः ? । शीघ्रंभूयस्त्वदागत्या विकल्पैः प्लाव्यते मनः ॥७१॥

सोऽप्यूचे कुशलं, **सिंह** इह मां प्राहिणोत् पुनः । सुतां **धनवतीं** दातुं त्वत्सुताय **धना**य सः ॥७२॥

यथा **धनकुमारो**ऽयं रूपोत्कृष्टस्तथैव सा । अस्तूचितोऽनयोर्योगः स्वर्ण-मण्योरिवाधुना ॥७३॥

अग्रेऽपि युवयोः स्नेहः सम्बन्धेनाऽमुना पुनः । विशिष्टो भवताद् वारि-सेकेनेव महीरुहः ॥७४॥

[16]ओमित्युदित्वा नृपतिः सत्कृत्य विससर्ज तम् । जगामोप**धनं**[17] सोऽपि द्वारपालनिवेदितः ॥७५॥

नत्वोपविश्य शंसित्वा स स्वं चाऽऽगमकारणम् । प्रैषीदं **धनव**त्येति जल्पन् पत्रकमार्पयत् ॥७६॥

तन्मुद्रां **धनकुमारः** स्फोटयित्वा स्वपाणिना । तत्पत्रं वाचयामास मदनस्येव शासनम् ॥७७॥

'विशेषितश्रीः[18] शरदा यौवनेनेव पद्मिनी । परिम्लानमुखी वाञ्छत्यादित्यकरपीडनम्[19]' ॥७८॥

दध्यौ **धनो**ऽपि काऽप्येषा तस्याश्छेकों[20]क्तिरद्भुता । स्नेहातिशयमाख्याति मयि चि[21]त्तविवर्तिनम् ॥७९॥

विमृश्येति स्वहस्तेन लिखित्वा सोऽपि पत्रकम् । **धनवत्यै** तस्य हस्ते हारेण सममार्पयत् ॥८०॥

---

१. चित्रदर्शनात्; ०दालिख्य० ला० । २. **यदा ज्ञयैव** खं० २ । ३. हास्यमात्रम् । ४. **चाचख्यौ** मु०, खं० १, सू० । ५. **सेत्स्यते च** ला० की० पु० आ० ता० । ६. **तां च दृष्ट्वा** खं० १ । ७. **एवं विचिन्तयतस्तस्य राज्ञस्तत्र समा०** खं० २ । ८. **समाख्याय** ता० पा० ला० १। ९. **सममेतयोः** खं० २ । १०. **०चिन्तकः** ला० पा० ला १-२, की० पु० । ११. **बुद्धिमान्** खं० २, ला० । १२. 'त्वं' इति ला०टि० । १३. तद् दूतवचनं, दिष्ट्या-आनन्दः । १४. विश्वसिमि । १५. सभामध्ये । १६. **आमित्युदित्वा** ला० । १७. धनसमीपे । १८. विशेषिता श्रीः शोभा यस्याः सा । १९. सूर्यस्य पाणिग्रहणम् । २०. **तस्याः श्लोकोक्ति०** ला० छा० । चातुर्योक्तिः । २१. **चित्तविवर्तनम्०** ता० सं० की० ला० खं० १, ला० २, छा० ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

¶**धने**नापि विसृष्टः सन् स दूतः शीघ्रमाययौ । आख्यच्च **विक्रमे**णाऽर्थं प्रतिपन्नं महीपतेः ॥८१॥
गत्वा नत्वा **धनवत्यै** लेखं हारं च सोऽर्पयन्[1] । ऊचे तुभ्यं **धनेनैतौ**[2] स्वहस्तलिखितार्पितौ ॥८२॥
गृह्णती पाणिपद्मेन हारमिन्दुकरामलम् । प्रस्फोट्य मुद्रां तं लेखं **धनवत्य**प्यवाचयत् ॥८३॥
'यत् प्रमोदयते सूर्यः पद्मिनीं करपीडनात् । सोऽर्थः स्वभावसंसिद्धो न हि याच्ञामपेक्षते' ॥८४॥
वाचयित्वेति सा हृष्टा दध्यौ [4]पुलकमालिनी । अन्वज्ञासीन् ममाऽर्थं स श्लोकार्थेनाऽमुना खलु ॥८५॥
[5]अयं हि कण्ठे न्यासाय मुक्ताहारः सुधोज्ज्वलः । तेन स्वदोर्लताश्लेषसत्यङ्कारो ममाऽर्पितः ॥८६॥
एवं विचिन्त्य सा हारं निदधे कण्ठकन्दले । द्राक् पारितोषिकं दत्त्वा तं दूतं विससर्ज च ॥८७॥
¶राजाऽथ तां दिने पुण्ये सहितां वृद्धमन्त्रिभिः । प्रजिघाया**ऽचलपुरे** परमर्द्धिसमन्विताम् ॥८८॥
तां यान्तीम[6]शिषन् माता **विमला** विमलाशया । भूयाः सदा श्वसुरयोर्भक्ता पत्यौ च देववत् ॥८९॥
सपत्नीष्वप्यनुकूला [7]दक्षिणा च परि[8]च्छदे । पत्युः प्रसादेऽनु[9]त्सिक्ताऽपमानेऽप्यविकारभाक् ॥९०॥ युग्मम् ॥
एवमाद्यनुशिष्याऽश्रुमुखी सा तां कथञ्चन । व्यसृजत् पौनरुक्त्येन[10] परी[11]रम्भं वितन्वती ॥९१॥
**धनवत्य**पि तां नत्वाऽध्यारुह्य शिबिकां वराम् । चचाल सपरीवारा छत्र-चामरमण्डिता ॥९२॥
सा क्रमेणा**ऽचलपुरे** पौरैः साश्चर्यमीक्षिता । साक्षाद्**धनकुमार**स्य श्रीरिवाऽऽगात् स्वयंवरा ॥९३॥
अवात्सीद् बहिरुद्याने शिबिरं विनिवेश्य सा । ऋद्ध्या महत्या [12]ववृते विवाहश्च शुभेऽहनि ॥९४॥
[13]क्रमुको नागवल्ल्येव तडितेव नवाम्बुदः । तया नवोढया रेजे **धनो**ऽभिनवयौवनः ॥९५॥
रत्या स्मर इव स्वैरं **धनवत्या** समं **धनः** । रममाणोऽनयत् कालं कमप्येकमुहूर्त्तवत् ॥९६॥
¶प्रत्यक्ष इव रै[14]वन्तश्चलत्काञ्चनकुण्डलः । [15]स विक्रमयमाणोऽश्वं ययावुद्यानमन्यदा ॥९७॥
चतुर्ज्ञानधरं तत्र पवित्रितवसुन्धरम् । **वसुन्धरं** नाम मुनिं सोऽद्राक्षीद् देशनापरम् ॥९८॥
स प्रणम्य यथास्थानमुपविश्य च भक्तिभाक् । शुश्राव देशनां तस्मात् कर्णामृतरसायनम् ॥९९॥
आगाच्च **विक्रमधनो धारिणी धनवत्य**पि । सर्वेऽपि तं मुनिं नत्वा शुश्रुवुर्धर्मदेशनाम् ॥१००॥
देशनान्ते व्यज्ञपयत् तं **विक्रमधनो** नृपः । **धने** गर्भस्थिते माता स्वप्ने चूतद्रुमैक्षत ॥१०१॥
तस्योत्कृष्टोत्कृष्टफलस्याऽन्यत्राऽन्यत्र रोपणम् । भविष्यति नवकृत्व इत्याख्यात् तत्र कोऽपि नो[16] ॥१०२॥
नववारारोपणस्य कथयाऽर्थं प्रसीद नः । कुमारजन्मनाऽप्यन्यज्ज्ञातं स्वप्नफलं मया ॥१०३॥
सम्यग्ज्ञानायोपयुज्य मनसा सोऽपि कुत्रचित् । दूरे स्थितं केवलिनं पृच्छति स्म समाहितः ॥१०४॥
केवल्यपि हि विज्ञाय तत्प्रश्नं केवलश्रिया । **अरिष्टनेमि**चरितमाख्यन् नवभवात्मकम् ॥१०५॥
मनोऽ[17]वधिभ्यां स मुनिर्ज्ञात्वाऽऽख्यत् ते सुतो **धनः** । भवेनाऽनेनैष नवोत्कृष्टोत्कृष्टान् भवान् गमी ॥१०६॥
भवे च **नवमेऽरिष्टनेमि**र्नाम्नेह **भारते** । द्वाविंशस्तीर्थकृद् भावी **यदुवंश**समुद्भवः ॥१०७॥
श्रुत्वा च तन्मुनिवचः सर्वे मुमुदिरेतराम् । जिनधर्मे च सर्वेषां भावोऽभूद् भद्रकस्तदा ॥१०८॥
तं नत्वा **विक्रमो** वेश्म ययौ सह **धना**दिभिः । विहारक्रमनिरतः सूरिरप्यन्यतोऽगमत् ॥१०९॥
¶ऋतूचिताभिः क्रीडाभि**र्धनवत्या** समं **धनः** । अन्वभूद् विषयसुखं **दोगुन्दक**[18] इवाऽमरः ॥११०॥
सोऽन्यदा मज्जनक्रीडां कर्तुं क्रीडासरस्यगात् । **धनवत्या** समं पत्या श्रीसपत्न्येव [19]रूपतः ॥१११॥
तत्राऽशोकतरोर्मूले शान्तो रस इवाऽङ्ग[20]वान् । घर्म-श्रम-तृषाक्रान्तः शुष्कतालोष्ठपल्लवः ॥११२॥

१. **सोऽर्पयत्** खं० २, ला० । २. **धनेनैव** खं० १ । ३. प्रार्थनाम् । ४. रोमाञ्चिता । ५. **अर्हति कण्ठे न्यासं मे** खं० १ । **अयं हि कण्ठन्यासाय** खं० २, ला० सू० मु० । ६. शिक्षामदात् । ७. उदारा । ८. परिवारे । ९. अगर्वा । १०. **पौनरुक्तेन** खं० २, ला० सू० मु० । ११. **परि०** पु० आ० मु० । 'आलिङ्गनं' लाटि० । १२. 'अभूत्' लाटि० । १३. पूगवृक्षः । 'सोपारी' । १४. सूर्यपुत्रः । १५. धनः खेलयन् । १६. 'नरः' लाटि० । १७. मनःपर्यवाऽवधिज्ञानाभ्याम् । १८. **दोगंगुद** खं० १ । **दोगुन्दुग** खं० २, ला० । १९. **श्रीपत्न्येव स्वरूपतः** खं० २ । २०. मूर्त्तिमान् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फुटत्पादाब्जरुधिरसिक्तोर्वीको विमूर्छितः । **धनवत्या मुनिः** कोऽपि पतन् पत्युः प्रदर्शितः ॥११३॥ युग्मम् ॥
सम्भ्रमाद[1]भिसृत्योभौ मुनिं तमुपचेरतुः[2] । शिशिरैरुपचारैस्तौ चक्रतुश्चाऽऽप्तचेतनम् ॥११४॥
तं च स्वस्थं प्रणम्योचे **धनो** धन्योऽस्मि सर्वथा । कल्पद्रुम इवाऽवन्यां मया प्राप्तोऽसि सम्प्रति ॥११५॥
पर्यन्तदेशे वसतामस्माकं त्वादृशैः समम् । संसर्गो दुर्लभ[3]श्छायाद्रुमैर्मरुनृणामिव ॥११६॥
[4]पृच्छ्यसे किन्तु भगवन्नवस्थेयं कुतोऽभवत् ? । न चेत् ते जायते खेदो न गोप्यं चाऽस्ति शंस तत् ॥११७॥
¶सोऽब्रवीद् भववासेन खेदो मे परमार्थतः । खेदस्त्वेष शुभोदर्को विहारक्रमसम्भवः ॥११८॥
नामतो **मुनिचन्द्रो**ऽहं गुरु-गच्छेन संयुतः । पुरोऽचलं विहारेण साधूनां नैकतः स्थितिः ॥११९॥
[5]सार्थाद् भ्रष्टोऽन्यदाऽरण्ये [6]दिङ्मोहीतस्ततो भ्रमन् । इहाऽऽगां क्षुत्तृषाक्रान्तो मूर्च्छितश्चाऽपतं भुवि ॥१२०॥
ततः परं यद् भवद्भिः कृतं तेनाऽऽप्तचेतनः । भूयोऽभूवं महाभाग ! धर्मलाभोऽस्तु तेऽनघः[7] ॥१२१॥
यथा क्षणान्नष्टसंज्ञोऽभूवं सर्वं तथा भवे । ईदृगेव ततो धर्मः करणीयः शुभैषिणा ॥१२२॥
इत्युदित्वा तदुचितं गृहिधर्मं जिनोदितम् । सम्यक्त्वमूलं तस्याऽऽख्यन् **मुनिचन्द्रो** मुनीश्वरः ॥१२३॥
**धनवत्या** समं सोऽथ **मुनिचन्द्रमुनेः** पुरः । गृहस्थधर्मं सम्यक्त्वप्रधानं प्रत्यपद्यत[8] ॥१२४॥
गृहे च नीत्वा तेनर्षिः पाना-ऽन्नैः [9]प्रत्यलाभि सः । तत्रैव धर्मशिक्षार्थं कञ्चित्कालं च वासितः ॥१२५॥
**धनं** मुनिरनुज्ञाप्य स्वगच्छेनाऽमिलत् पुनः । सम्यक् श्रावकधर्मौ चाऽभूतां **धनवती-धनौ** ॥१२६॥
तौ पुराऽपि मिथः प्रीतिभाजौ **धनवती-धनौ** । एकधर्मरतत्वाच्च विशेषेण बभूवतुः ॥१२७॥
¶पित्राऽन्तकाले स्वे[10] राज्येऽभिषिक्तोऽथ स्वयं **धनः** । समं श्रावकधर्मेणाऽपालयद् विधिवन्महीम् ॥१२८॥
तस्याऽन्यदोद्यानपाल [11]आख्यादुद्यानगह्वरे । [12]आयातपूर्व्यायातोऽस्ति **वसुन्धर**महामुनिः ॥१२९॥
गत्वा ववन्दे सद्यस्तं **धनवत्यन्वितो धनः** । देशनां चाऽशृणोत् तस्माद् भवाम्भोधिर्म[13]हातरीम् ॥१३०॥
भवोद्विग्नो **धनो** राज्ये सुतं **धनवती**भवम् । **जयन्तं** नाम पुण्येऽह्नि न्यधत्त तदनन्तरम् ॥१३१॥
¶**वसुन्धराद् धनो** दीक्षां **धनवत्या** सहाऽऽददे । **धन**भ्राता **धनदत्तो धनदेव**श्च पृष्ठतः ॥१३२॥
**धनर्षि**र्गुरुपादान्ते तपस्तेपे सुदुस्तपम् । गीतार्थः सन् गुरुणा [14]चाऽऽचार्यके स्थापितः क्रमात् ॥१३३॥
प्रतिबोध्य बहून् राज्ञो दीक्षया चाऽनुगृह्य सः[15] । **धनवत्या** सहाऽऽदत्त पर्यन्तेऽनशनं सुधीः[16] ॥१३४॥
मासान्ते तौ विपद्योभौ कल्पे **सौधर्म**नामनि । शक्रसामानिकौ देवावजायेतां महर्द्धिकौ ॥१३५॥
**धनबन्धू धनदेव-धनदत्तौ** तथाऽपरे । अखण्डितव्रता मृत्वा **सौधर्मे** स्वर्गिणोऽभवन्[17] ॥१३६॥
¶इतोऽत्र **भरते वैताढ्यो**त्तरश्रेणिभूषणे । **सूरतेजःपुरे सूर** इति खेचरचक्र्यभूत् ॥१३७॥
तस्य विद्युद् घनस्येव **विद्युन्मत्य**भिधानतः । [18]अतिमात्रप्रेमपात्रं बभूव सहचारिणी ॥१३८॥
आयुः प्रपूर्य **सौधर्माद् धन**जीवश्च्युतोऽथ सः । **विद्युन्मत्याः सूर**पत्न्या उदरे समवातरत् ॥१३९॥
पूर्णे च समयेऽसूत देवी **विद्युन्मती** सुतम् । शुभलक्षणसम्पूर्णं पूर्णेन्दुमिव पूर्णिमा ॥१४०॥
पुण्येऽहनि ददौ **चित्रगति**रित्यभिधां पिता । तस्य सूनोरनूनेनोत्सवेनाऽऽनन्ददायिना ॥१४१॥
वर्धमानः क्रमेणो[19]पाचार्यं स सकलाः कलाः । जग्राह यौवनं चाऽऽप पुष्पं[20]चाप इवाऽपरः ॥१४२॥
¶इतश्चाऽत्रैव **वैताढ्य**-दक्षिणश्रेणिवर्तिनि । [21]**अनङ्गसिंहो** राजाऽभून्नगरे **शिवमन्दिरे** ॥१४३॥

१. ०**दतिसृत्यो**० खं० १ । २. उपचारं चक्रतुः । ३. **दुर्लभच्छाया**० मु० । ४. **प्रच्छ्यसे** मु० । ५. **सार्थभ्रष्टो** मु०, 'र' सत्कप्रतिषु च । ६. **दिग्मोही**० खं० १-२, ला० । ७. **तेऽनघ** ! 'र' स्वीकृतपाठे, खं०१, सू०मु० । ८. **समपद्यत** ला०२, आ० । ९. **प्रत्यलाभितः** खं० २ । **प्रतिलाभितः** ला० । १०. **स्वराज्ये** खं० २ । ११. ०**पालश्चाख्या**० खं० २ । १२. पूर्वमायातः । १३. महानावम् । १४. **गुरुणाऽऽचार्यकेऽपि स्था**० खं० २ । **सूरिपदे स्था**० ला० । १५. **च** खं० २ । १६. अत्र 'प्रथमभवः सम्पूर्णः' इति लाटि. । १७. 'द्वितीयो भवः' लाटि. । १८. ०**मात्रं प्रेम**० मु० । १९. **क्रमेणाथोपाचार्यं** खं० २ । २०. कामदेवः । २१. **अनङ्गसेनो** की० ला०२, आ० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]पत्नी शशिमुखी तस्य नामतोऽभूच्छशिप्रभा । च्युत्वा **धनवती**जीवस्तस्याः कुक्षाववातरत् ॥१४४॥
समये सुषुवे पुत्रीं पवित्राङ्गीं **शशिप्रभा** । जाता बहूनां पुत्राणां [2]पश्चादित्यतिवल्लभा ॥१४५॥
तस्या **रत्नवती**त्याख्यां पिता चक्रे शुभेऽहनि । [3]सजलस्थानवल्लीव क्रमेण ववृधे च सा ॥१४६॥
अचिरेणाऽपि जग्राह सा कलाः स्त्रीजनोचिताः । यौवनं चाऽऽसदत् पुण्यममूर्तं देहमण्डनम् ॥१४७॥
अस्या योग्यो वरः कः स्यादिति पित्राऽन्यदा स्वयम् । पृष्टो नैमित्तिकः किञ्चिच्चिन्तयित्वाऽब्रवीदिति ॥१४८॥
योऽसिरत्नं तवाऽऽच्छे[4]त्ता यस्योपरि भविष्यति । सिद्धायतनवन्दा[5]रोः पुष्पवृष्टिः सुरैः कृता ॥१४९॥
नरलो[6]कशिरोरत्नं स ते **रत्नवती**मिमाम् । परिणेता दुहितरमनुरूपसमागमात् ॥१५०॥ युग्मम् ।
ममाऽपि [7]खड्गरत्नं य आच्छेत्ता सोऽद्भुतै[8]कभूः । जामाता स्यादिति प्रीतो व्यसृजत् ज्ञानिनं नृपः ॥१५१॥
¶इतश्चाऽत्रैव **भरते पुरे चक्रपुरा**भिधे । **सुग्रीव**नामा राजाऽभूदनुद्ग्रीवो[9] गुणैरपि ॥१५२॥
त[10]स्य पत्न्यां **यश[11]स्विन्यां सुमित्र**स्तनयोऽभवत् । **पद्म**नामा तु [12]**भद्रायाम**ग्रजाऽवरजौ[13] क्रमात् ॥१५३॥
**सुमित्र**स्तत्र गम्भीरो विनयी नत[14]वत्सलः । कृतज्ञोऽर्हच्छासनस्थः **पद्म**स्त्वप[15]रथाऽभवत् ॥१५४॥
अस्मिन् जीवति मत्सूनो राज्यं नैव भवेदिति । अभद्रधीर्ददौ **भद्रा सुमित्रा**योत्कटं विषम् ॥१५५॥
विषेण मूर्च्छितस्तेन **सुमित्रो** न्यपतद् भुवि । विषवेगाः [16]प्रससृपुर्लहर्य इव वारिधेः ॥१५६॥
[17]आगात् तत्र च **सुग्रीवः** सम्भ्रमात् सह मन्त्रिभिः । अकारयन्मन्त्र-तन्त्रै[18]श्चोपचारमनेकशः ॥१५७॥
विषवेगोपशान्तिस्तु तस्य नाऽभून् मनागपि । **भद्रा** ददौ विषमिति प्रवादश्चोत्थितः पुरे ॥१५८॥
नंष्ट्वा च क्वाऽप्यगाद् **भद्रा** स्वदोषपरिशङ्किता । राजाऽप्यकार्षीत् पुत्रार्थे जिनार्चां शान्तिकादि च ॥१५९॥
स्मारं स्मारं सुतगुणान् व्यलपच्च निरन्तरम् । सामन्ता मन्त्रिणोऽन्येऽपि निरुपायास्तथैव च ॥१६०॥
¶अत्रान्तरे **चित्रगतिः** क्रीडया विचरन् दिवि । विमानेनाऽऽगतस्तत्राऽपश्यच्छोकातुरं पुरम् ॥१६१॥
विषव्यतिकरं तं च ज्ञात्वोत्तीर्यविमानतः । सोऽभ्यषिञ्चत् तं कुमारं जलैर्विद्याभिमन्त्रितैः ॥१६२॥
किमेतदिति पृच्छंश्च कुमारः [19]स्फारितेक्षणः । उत्तस्थौ स्वे[20]च्छहृदयो मन्त्रशक्तेर्हि नाऽवधिः ॥१६३॥
राजाऽऽख्यात् तें[21] विषं मात्रा वैरिण्या **भद्रया** ददे । शमितं चाऽमुना वत्स ! सद्योऽकारणबन्धुना ॥१६४॥
कृताञ्जलिः **सुमित्रो**ऽपि प्रोचे **चित्रगतिं** प्रति । परोपकारबुद्ध्यैव मया ज्ञातं कुलं हि वः ॥१६५॥
तथाप्यनुगृहाण त्वं स्वकुलाख्यानतोऽद्य माम् । महतामन्वयं श्रोतुं कस्य नोत्कण्ठते मनः ? ॥१६६॥
अथ **चित्रगतेः** पारिपा[22]र्श्विकः सचिवात्मजः । सर्वं शशंस वंशादि सर्वेषां श्रुति[23]शर्मदम् ॥१६७॥
हृष्टोऽवोचत् **सुमित्र**स्तं वि[24]षदेन विषेण च । ममोपकृतमेवाऽद्य त्वया योगः कुतोऽन्यथा ? ॥१६८॥
नाऽदा जीवितमात्रं मे किं त्वहं रक्षितोऽस्मि च । प्रत्याख्यान-नमस्कारहीनमृत्यूत्थदुर्गतेः ॥१६९॥
किं प्रत्युपकरोम्येष तवाऽतुल्योपकारिणः ? । प्रावृषेण्याम्बुदस्येव जीव[25]लोककृपानिधेः ॥१७०॥
[26]इत्युक्त्वा स्थितवन्तं तं **सुमित्रं** मित्रतां गतम् । आपप्रच्छे **चित्रगति**र्गन्तुं निजपुरं प्रति ॥१७१॥
**सुमित्रो**ऽप्यब्रवीद् भ्रातः ! **सुयशा** नाम केवली । अत्राऽऽसन्नप्रदेशेषु विहरन्नस्ति सम्प्रति ॥१७२॥
क्रमेण तमिहाऽऽयातं वन्दित्वा गन्तुमर्हसि । तदागमनकालं तदत्रैव परिपालय[27] ॥१७३॥
आमेत्युक्त्वा **चित्रगतिः** क्रीडंस्तेन समं सुखम् । युग्म[28]जात इवाऽनैषीत् कियतोऽपि हि वासरान् ॥१७४॥

---

१. **तस्य पत्नी शशिमुखी** ला० । २. **पश्चादत्यन्तवल्लभा** मु० । ३. **सज्जल०** खं० २ । ४. आहर्ता-अपहर्ता । ५. सिद्धायतनं वन्दमानस्य । ६. **नररत्नशिरो०** खं० २ । ७. **असिरत्नं** खं० २ । ८. अद्भुतानामद्वितीयं स्थानम् । ९. अनुद्धतः । १०. **तस्यां** खं० १ । ११. **यशस्वत्यां** ला० ला० १, पु. खं० १, सू०मु० । १२. **सुभद्रायामग्र०** ला० ला० १ । १३. ज्येष्ठ-लघुभ्रातरौ । १४. **नयवत्सलः** खं १, ला०, मु० । १५. विपरीतः । १६. **प्रसस्रुवु०** मु० । १७. **आगाच्च तत्र** ला० । १८. **०तन्त्रैरुपचारानने०** ला० । १९. **स्फुरिते०** ला० । २०. **स्वस्थ०** खं० २ विना । २१. **तं विषं** ला० । २२. **०पार्श्वकः** मु० 'र'स्वीकृतपाठश्च । २३. कर्णसुखदम् । २४. विषदात्रा । २५. **जीवलोकं कृपानिधे** ! मु० । २६. **इत्युक्त्वोत्थितवन्तं** ला० १ । २७. 'तिष्ठ' इति लाटि. । २८. युगलिकः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶उभौ जग्मतुरन्येद्युरुद्यानं तत्र चाऽऽययौ । **सुयशाः** केवलिमुनिः कल्पद्रुरिव जङ्गमः ॥१७५॥
स्वर्णाब्जस्थं वृतं देवैश्चिरेप्सितसमागमम् । [1]तौ तं प्रदक्षिणीकृत्य वन्दित्वा च निषेदतुः ॥१७६॥
श्रुत्वा **सुग्रीव**राजोऽपि मुनिमेत्याऽभ्यवन्दत । चकार देशनां सोऽपि मोहनिद्रा[2]दिवामुखम् ॥१७७॥
देशनान्ते **चित्रगति**र्मुनिं नत्वेदमब्रवीत् । साध्वहं बोधितो धर्मं भगवद्भिः कृपा[3]परैः ॥१७८॥
कुलक्रमागतमपि श्रावकत्वमियच्चिरम् । पुरो निधिमिवाऽभाग्यो नाऽज्ञासिषमहं प्रभो ! ॥१७९॥
एषोऽतुल्योपकारी हि **सुमित्रो** येन मे[4] प्रभो ! । ईदृग्धर्मोपदेष्टारो युष्मत्पादाः प्रदर्शिताः ॥१८०॥
इत्युदित्वा तस्य मुनेः पुर**श्चित्रगतिः** सुधीः । गृहिधर्मं प्रत्यपादि सम्यक् सम्यक्त्वपूर्वकम् ॥१८१॥
मुनिं प्रणम्य **सुग्रीवः** पप्रच्छ भगवन् ! क्व सा[5] ? । महात्मनोऽस्य मत्सूनोर्विषं दत्वा ययाविति ॥१८२॥
¶मुनिः शशंस सा नंष्ट्वा गताऽरण्ये मलिम्लुचैः[6] । भूषणादिकमाच्छिद्य पल्लीभर्तुः समर्पिता ॥१८३॥
पल्लीशेन वणिक्पार्श्वे विक्रीता सा ततोऽपि हि । प्रणश्य यान्ती महता [7]परिप्लुष्टा दवाग्निना ॥१८४॥
रौद्रध्यानवती मृत्वा प्रथमे नरके ययौ । ततश्चोद्धृत्य चण्डालगृहिणी सा भविष्यति ॥१८५॥
जाते गर्भे सपत्न्या च [8]कलौ कर्त्तिकया हता । तृतीयं नरकं गत्वा तिर्यग्योनौ गमिष्यति ॥१८६॥
इत्याद्यनन्तसंसारदुःखं साऽनुभविष्यति । सम्यग्दृष्टेर्भवत्सूनोर्विषदानजपाप्मना ॥१८७॥
¶[9]राजोचे भगवन् ! यस्य कृते सा कृतवत्यदः । सोऽत्र तिष्ठति तत्पुत्रः सैका तु नरकं गता ।१८८॥
धिग् धिक् तदेष संसारो राग-द्वेषादिदारुणः । आदास्येऽहं परिव्रज्यां तत्परित्यागकारणम् ॥१८९॥
अथ प्रणम्य राजानं **सुमित्र** इदमभ्यधात् । धिग् धिङ् मां मातुरीदृक्षकर्मबन्धनिबन्धनम् ॥१९०॥
स्वामिंस्तदनुजानीहि प्रव्रजिष्यामि सम्प्रति । को वस्तुं[10]मिच्छेदीदृक्षे संसारेऽत्यन्तदारुणे ॥१९१॥
इति ब्रुवाणं तनयं प्रतिषि[11]ध्याऽऽज्ञया नृपः । राज्ये निवेशयामास स्वयं तु व्रतमाददे ॥१९२॥
समं केवलिना तेन **सुग्रीवर्षि**र्ययौ ततः । सहैव **चित्रगति**ना **सुमित्र**स्तु निजं पुरम् ॥१९३॥
**भद्रा**पुत्राय **पद्मा**य ग्रामान् सोऽदत्त कत्यपि । [12]दुर्मतिस्तैस्त्वसन्तुष्टो निःसृत्याऽगात् स कुत्रचित् ॥१९४॥
कथञ्चिदपि चाऽऽपृच्छ्य **सुमित्रं** नृपमन्यदा । पित्रो[13]रुत्कण्ठितोऽगच्छत् पुरे **चित्रगति**र्निजे ॥१९५॥
देवपूजा-गुरूपास्ति-तपः-स्वाध्याय-संयमैः । स सदा व्यापृतः पित्रोरभूदत्यन्तशर्मणे ॥१९६॥
¶इतः **सुमित्र**भगिनीं **कलिङ्ग**नृपगेहिनीम् । जह्रे **रत्नवती**भ्राता **कमलोऽनङ्गसिंहजः** ॥१९७॥
भगिनीहरणेनाथ **सुमित्रं** शोक[14]बाधितम् । अज्ञासीत् खेचरमुखात् तदा **चित्रगतिः** सुहृत् ॥१९८॥
अन्वेष्य [15]जामिमानेष्याम्यचिरादिति खेचरैः । तमाश्वास्य **चित्रगति**रुत्तस्थे स्वसृशुद्धये ॥१९९॥
[16]**कमलेन** हृता सेति प्रवृत्तिमुपलभ्य सः । ययौ सर्वाभि[17]सारेण नगरे **शिवमन्दिरे** ॥२००॥
[18]**कमलं** तत्र कमलखण्डं द्विप इव क्षणात् । लीलयोन्मूलयामास शूरः **सूर**[19]नृपात्मजः ॥२०१॥
क्रुद्धः सुतपराभूत्याऽ**नङ्गसिंहो**ऽथ सिंहवत् । सिंहनादं विदधानो दधावे सह सेनया ॥२०२॥
विद्याबलात् सैन्यबलाद् दोर्बलाच्च तयोश्चिरम् । [20]महान् रणः प्रववृते दारु[21]णो द्युस[22]दामपि ॥२०३॥
**अनङ्गो** दुर्जयं ज्ञात्वा रिपुं जेतुमनाश्च तम् । देवतादत्तमस्मार्षीत् खड्गरत्नं क्रमागतम् ॥२०४॥
ज्वालाशतदुरालोकं द्विषल्लो[23]कान्तकोपमम् । कृपाणरत्नं तत्पाणावापपात क्षणादपि ॥२०५॥

---

१. **तं त्रिः प्रद०** ला० । २. मोहनिद्राभङ्गे प्रातःसमानाम् । ३. **कृपाकरैः** ता० सं० । ४. **हे प्रभो !** ला० । ५. भद्रा । ६. 'तस्करैः' ला०सूटि. । ७. 'दग्धा' लाटि. । ८. **गले** मु०; कलहे । ९. **राज्ञोचे** खं २, सू० । १०. निवसितुम् । ११. **०षिद्धाज्ञया** खं० २ । १२. **दुर्विनीतस्त्वस०** पा० ला० १, आ० । **दुर्नीतस्तैस्त्वस०** खं० १-२, ला०सू० की.पु.छा.ला. २ । १३. पितृमातृमिलनाय । १४. **शोकवार्षिकम्** की० पु० । १५. 'लघुभगिनी' इति लाटि० । १६. **कमलेनाहृता** खं० १ । १७. सर्वसैन्येन । १८. **ततः स कमलं तत्र पद्मखण्डमिव** ला० । १९. **शूर०** खं० १; चित्रगतिः । २०. **महारणः** खं० २ । २१. **दारणो** खं० १ । २२. देवानामपि । २३. वैरिलोकानां यमसदृशम् ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

कृपाणपाणिः स प्रोचे रे रेऽपसर बालक ! । पुरतस्तिष्ठतश्छेत्स्ये शिरस्ते [1]बिसकाण्डवत् ॥२०६॥
ऊचे **चित्रगति**श्चित्रमन्यादृगिव वीक्ष्यसे । बलेन लोहखण्डस्य धिक् त्वां [2]स्वबलवर्जितम् ॥२०७॥
इत्युक्त्वा विद्यया ध्वान्तं विचक्रे तत्र सर्वतः । पुरःस्थमप्यपश्यन्तो द्विषोऽस्थुर्लिखिता इव ॥२०८॥
अथाऽऽच्छिद**च्चित्रगति**स्तं खड्गं तत्कराद् द्रुतम् । द्राक् **सुमित्र**स्य भगिनीं जग्राह च जगाम च ॥२०९॥
क्षणान्तरेण चा**ऽनङ्गो** [3]जातालोको वि[4]लोकयन् । पाणौ कृपाणं नाऽपश्यत् पुरस्तान्न च तं द्विषम् ॥२१०॥
क्षणं विषादं स प्राप स्मृत्वा च ज्ञानिनो वचः । मत्खड्गहर्ता जामाता भावीति मुमुदे च सः ॥२११॥
कथं स ज्ञास्यते ? यद्वा सिद्धायतनवन्दने । ज्ञेयः कुसुमवृष्ट्येति विमृशन् स्वगृहं ययौ ॥२१२॥
¶अखण्डशीलां तां जामिं **सुमित्र**पृथिवीपतेः । नीत्वा समर्पयामास कृती **चित्रगतिः** स्वयम् ॥२१३॥
पुराऽपि हि भवोद्विग्नः **सुमित्रः** स्वविवेकतः । [5]जातस्वस्त्रपहारादि[6]वैधुर्यान्नितरामभूत् ॥२१४॥
राज्यं न्यस्य सुते गत्वा **सुयशो**मुनिसन्निधौ । **सुमित्र**राट् **चित्रगतेः** समक्षं व्रतमाददे ॥२१५॥
¶पुरे **चित्रगतिः** स्वेऽगात् **सुमित्र**स्त्वन्तिके गुरोः । किञ्चिदूनानि पूर्वाणि नवाऽधीते स्म बुद्धिमान् ॥२१६॥
गुर्वनुज्ञां गृहीत्वैकः **सुमित्रो** विहरन् गतः । **मगधे**षु बहिर्ग्रामात् कार्योत्सर्गेण तस्थिवान् ॥२१७॥
वै[7]मात्रेयो भ्रमन् **पद्म**स्तत्राऽऽयातो ददर्श तम् । सर्वजीवहितं[8] ध्यानस्थितं गिरिमिव स्थिरम् ॥२१८॥
आकर्णाकृष्टबाणेन हृदि **पद्मो** जघान तम् । स्वमातुर्मिलनायेव नरकाभिमुखः[9] कुधीः ॥२१९॥
धर्मभ्रंशो ममाऽनेन न कृतो निघ्नताऽपि हि । कर्मच्छेदसखित्वेन प्रत्युतैष हितावहः ॥२२०॥
[10]अस्मै मया चाऽपकृतं राज्यं दत्तं न यत् तदा । तत् क्षाम्यत्वेष मे [11]सर्वे क्षाम्यन्त्वन्येऽपि जन्तवः ॥२२१॥
एवं ध्यायन् कृतप्रत्याख्यानः स्मृत[12]नमस्कृतिः । मृत्वा **सुमित्रो**ऽभूद् **ब्रह्मलोके** सामानिकः सुरः ॥२२२॥
प्रणश्य गच्छन् **पद्मो**ऽपि दष्टः कृष्णाहिना निशि । विपद्य नारको जज्ञे सप्तम्यां नरकावनौ ॥२२३॥
¶**सुमित्र**मृत्युना शोकं कृत्वा **चित्रगति**श्चिरम् । जगाम सिद्धायतने यात्रां कर्तुं महामतिः ॥२२४॥
अमिलंस्तत्र यात्रायां बहवः खेचरेश्वराः । **रत्नवत्या** समं पुत्र्या**ऽनङ्गसिंहो**ऽपि चाऽऽययौ ॥२२५॥
चक्रे **चित्रगति**श्चित्रां तत्राऽर्चां शाश्वतार्हताम् । रोमाञ्चिताङ्गः स्तोत्रं च गिरा भक्तिविचित्रया ॥२२६॥
ज्ञात्वा [13]चाऽवधिना तत्र **सुमित्रः** सुर आययौ । तस्योपरि च पुष्पाणि ववर्ष स्वामरैः[14] सह ॥२२७॥
हृष्टाश्च तुष्टुवु**श्चित्रगतिं** सर्वेऽपि खेचराः । **अनङ्गसिंहो**ऽप्यज्ञासीत् तमेव [15]दुहितुर्वरम् ॥२२८॥
¶**सुमित्र**देवः प्रत्यक्षीभूय हर्षेण भूयसा । किं मां प्रत्यभिजानासीत्यूचे **चित्रगतिं** तदा ॥२२९॥
त्वं महर्द्धिः सुर इति **चित्रग**त्युदिते सुरः । **सुमित्र**रूपं चक्रे स [16]स्वोपलक्षणहेतवे ॥२३०॥
तं **चित्रगति**रालिङ्ग्य जगादेति मया ह्ययम् । धर्मः प्राप्तस्त्वत्प्रसादादनवद्यो महामते ! ॥२३१॥
**सुमित्रो**ऽप्यब्रवीदेवमियमृद्धिर्मयाऽपि हि । आसेदे त्वत्प्रसादेन तदा जीवितदानतः ॥२३२॥
प्रत्याख्यान-नमस्कारविहीनोऽहं तदा मृतः । नाऽभविष्यं मनुष्योऽपि [17]प्राणयिष्यो न चेद्धि माम् ॥२३३॥
तयोः कृतज्ञयोरेवं मिथः सुकृतशंसिनोः । श्री**सूर**चक्रिप्रमुखा जहृषुः खेचरेश्वराः ॥२३४॥
¶तत्र **चित्रगतिं** रूप-चरित्राभ्याम[18]नुत्तरम् । प्रेक्षमाणा **रत्नवती** [19]विविधे मन्मथेषुभिः ॥२३५॥
स्वपुत्रीं विधुरां प्रेक्ष्या**ऽनङ्गसिंहो** व्यचिन्तयत् । ज्ञानिनः संवदं[20]त्येतत् [21]तत्पूर्वकथितं वचः ॥२३६॥
मम**ाऽसिरत्नं** जह्रेऽसौ पुष्पवृष्टिरिहाऽभवत् । इहाऽभवन्मत्सुताया अनुरागश्च तत्क्षणात् ॥२३७॥

१. **विश०** ला०पा.की.पु.सं.ता.; कमलनालवत् । २. **स्वबलगर्वितम्** मु०, खं० १, ला० सू० । ३. जातप्रकाशदर्शनः । ४. **व्यलोकयत** ला० । ५. '**जातः स्वस्त्र०**' इति मुद्रितः पाठः । स च न योग्यः प्रतिभाति । ६. वैधुर्यं-दुःखम् । ७. अपरमातुः पुत्रः । ८. **०हितध्यान०** खं० २ । ९. **क्रुधा** ला० । १०. **अस्मिन् मया** मु० । ११. **सर्वं** खं० १ । १२. स्मृतनवकारमन्त्रः । १३. अवधिज्ञानेन । १४. **च सुरैः** ला० । **चामरैः** मु० । १५. दुहितुः **पतिम्, पु०** । १६. **स्वस्योपल०** ला० । १७. **प्राणयिष्ये** खं० २ । क्रियातिपत्तौ द्वितीयपुरुषैकवचनरूपमिदम् । १८. श्रेष्ठम् । १९. **विव्यधे** ला०सू० । २०. 'मिलति' इति लाटि. । २१. **त्येव तत्पूर्व०** ला० । **०पूर्वं क०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रत्नवत्यां**[1]श्चाऽनुरूपो वरोऽयं ज्ञानिनोदितः । श्लाघ्योऽस्यमूभ्यां दुहितृ-जामातृभ्यां जगत्यपि ॥२३८॥
देवस्थानेऽत्र[2] सम्बन्धादिकं वक्तुं न युज्यते । चिन्तयित्वेति सपरिवारः स स्वगृहं ययौ ॥२३९॥
**सुमित्र**देवं सत्कृत्य व्यसृजत् खेचरानपि । तत**श्चित्रगतिः** पित्रा समं [3]निजगृहं ययौ ॥२४०॥
¶प्रहितोऽ**नङ्गसिंहेन** मन्त्र्येकः **सूर**चक्रिणम् । प्रणम्य व्याज[4]हारैवमव्या[5]जविनयक्रमः ॥२४१॥
स्वामि**श्चित्रगति**स्तेऽसौ कुमारो मार[6]सन्निभः । अतुल्यरूप-लावण्यः कस्य चित्रीयते न हि ? ॥२४२॥
पुत्री चाऽ**नङ्गसिंह**स्य रत्नं **रत्नवती** प्रभो ! । रत्नेन **चित्रगति**ना युज्यतां भवदाज्ञया ॥२४३॥
द्वयोरपि त्व[7]मीशोऽसि विवाहाय तदेतयोः । **अनङ्गसिंहं** मन्यस्व नृसिंह ! विसृजाऽद्य माम् ॥२४४॥
**सूरो**ऽप्युचितयोगेच्छुः प्रत्यपद्यत तद्वचः । तयोर्विवाहं[8] चाऽकार्षीन् महोत्सवपुरःसरम् ॥२४५॥
तया समं **चित्रगति**र्भेजे वैषयिकं सुखम् । अर्हत्पूजादिकं धर्मं चकार च तया सह ॥२४६॥
**धनदेव-धनदत्त**जीवौ च्युत्वा बभूवतुः । **मनोगति-चपलगत्या**ख्यौ तस्याऽनुजावुभौ ॥२४७॥
ताभ्यां च **रत्नवत्या** च समं **नन्दीश्वरा**दिषु । चक्रे **चित्रगति**र्यात्रामतिमात्रां सुरेन्द्रवत् ॥२४८॥
अर्हतामन्तिके धर्मं शुश्राव च समाहितः । कलत्र-भ्रातृसहितः साधुशुश्रूषणोद्यतः ॥२४९॥
तमन्यदा न्यधाद्राज्ये **सूर**चक्री स्वयं पुनः । उपाददे परिव्रज्यां प्रपेदे च परं पदम् ॥२५०॥
¶स साधितानेकविद्यः **सूर**चक्रीव नूतनः । शशास खेचरपतीन् पत्तीकुर्वन्ननेकशः ॥२५१॥
अन्यदा तस्य सामन्तो [9]**मणिचूलो** व्यपद्यत । **शशि-**[10]**शूरा**वयुध्येतां राज्यार्थे तत्सुतावथ ॥२५२॥
तयोर्विभज्य तद्राज्यं चक्री **चित्रगति**र्ददौ । पथि च स्थापयामास धर्मवाग्भिः [11]स युक्तिभिः ॥२५३॥
तौ तथाऽप्यन्यदा युद्ध्वा विपेदाते [12]वनेभवत् । ¶श्रुत्वा **चित्रगति**स्तच्च दध्याविति महामतिः ॥२५४॥
विनश्वर्याः श्रियोऽर्थेऽमी धिग् जना मन्दबुद्धयः । युध्यन्तेऽथ विपद्यन्ते निपतन्ति च दुर्गतौ ॥२५५॥
श्रिये यथोत्सहन्तेऽमी निरपेक्षा वपुष्यपि । तथोत्सहेरन्मोक्षाय चेत् किं न्यूनं तदा भवेत् ? ॥२५६॥
विमृश्यैवं भवोद्विग्नः सुतं **रत्नवती**भवम् । ज्येष्ठं **पुरन्दरं** नाम राज्ये **चित्रगति**र्न्यधात् ॥२५७॥
**रत्नवत्या** कनिष्ठाभ्यां [13]ताभ्यां च स समाददे । व्रतं **दम**[14]**धरा**चार्यपार्श्वे **चित्रगति**स्ततः ॥२५८॥
चिरं तप्त्वा विधायाऽन्ते पादपोपगमं च सः । विपद्य कल्पे **माहेन्द्रे** [15]सुरोऽभूत् परमर्द्धिकः[16] ॥२५९॥
**रत्नवत्य**पि तत्रैव कनिष्ठौ तौ च बान्धवौ । संजज्ञिरे सुरवराः प्रीतिभाजः परस्परम्[17] ॥२६०॥
¶इतश्च प्रत्य[18]ग्विदेहे विजये **पद्म**नामनि । अस्ति **सिंहपुरं** नाम पुरं सुरपुरोपमम् ॥२६१॥
तत्राऽऽसीज्जगदानन्दी **हरिणन्दी**ति भूपतिः । मन्दीकृतान्यतेजस्कोऽधि[19]पतिस्तेजसामिव ॥२६२॥
बभूव महिषी तस्य नामतः **प्रियदर्शना** । दर्शनेनाऽपि पीयूष[20]स्यन्दिनी कौमुदीव या ॥२६३॥
जीव**श्चित्रगतेः** सोऽथ च्युत्वा **माहेन्द्र**कल्पतः । कुक्षाववातरत् तस्या महास्वप्नोपसूचितः ॥२६४॥
पूर्णे च काले सुषुवे सा देवी **प्रियदर्शना** । [21]पाण्डुकोर्वीव कल्पद्रुं तनयं प्रियद[22]र्शनम् ॥२६५॥
**अपराजित** इत्याख्यां तस्य चक्रे महीपतिः । धात्रीभिर्लाल्यमानश्च स क्रमेण व्यवर्धत ॥२६६॥
क्रमात् कलाः स जग्राह यौवनं प्राप च क्रमात् । मूर्त्या मीनध्वजः[23] पुण्यलावण्यजलवारिधिः ॥२६७॥
सहपांशुक्रीडितश्च सहाध्यायी च वल्लभः । अभूद् **विमलबोधा**ख्यस्तस्याऽमात्यसुतः सुहृत् ॥२६८॥

१. **०वत्या अनु०** ला० । २. **०स्थाने च स०** सू० । ३. **स्वभवनं** पु० । ४. उवाच । ५. निष्कपटविनयान्वितः । ६. कामसदृशः । ७. **तदीशो०** खं० १-२, ला० सू० सं. । ८. **०विवाहमका०** सू० । ९. **मणिचूडो** मु० । १०. **०सूरा०** खं० १-२, ला० सू० । ११. **सुयुक्ति०** र०स्वीकृतपाठः, मु० । १२. वनगजवत् । १३. **भ्रातृभ्यां सममाददे** खं० २ । **०च सममाददे** सू० । **०चाऽथ समा०** ला० । १४. **दमवरा०** ला०पा.ला० १, पु. छा. सं. ता. । १५. **स सुरोऽभून्महर्द्धिकः** खं० १ । १६. 'तृतीयः भवः' इति लाटि. । १७. 'चतुर्थः भवः' इति लाटि. । १८. पश्चिम-विदेहक्षेत्रे । १९. सूर्यः । २०. **०स्पन्दिनी** मु०, र०स्वीकृतपाठश्च । **०स्यन्दनी** खं० २ । २१. **पाण्डकोर्वीव** खं० १-२, सू०ला० ला १-२, पा. सं. ता. । **पण्डको.** ला० । पाण्डुकवनभूमिः । २२. **दर्शिनम्** मु० । २३. कामः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶तावन्यदा हयारूढौ क्रीडया जग्मतुर्बहिः । हृत्वाऽश्वाभ्यां च निन्याते महारण्ये दवीयसि[1] ॥२६९॥
तत्राऽश्वयोः श्रान्तयोस्तौ वृक्षमूलेऽवतेरतुः । ऊचे **विमलबोधं** च राजपुत्रोऽ**पराजितः** ॥२७०॥
दिष्ट्याऽश्वाभ्यामपहृतावावामाभ्यां कुतोऽन्यथा । अनेकाश्चर्यपूर्णेयं द्रष्टव्या स्याद् वसुन्धरा ॥२७१॥
गन्तुमापृच्छ्यमानौ हि पितरौ विरहासहौ । विसृजेतां न [2]नौ जातु जातं सम्प्रति साध्विदम् ॥२७२॥
आवयोरश्वहृतयोः पित्रोर्दुःखमभूदिदम् । तेनैव वि[3]हरिष्यावो वि[4]सोढं पतितं हि तत्[5] ॥२७३॥
¶एवमस्त्वित्यभाषिष्ट यावत् स सचिवात्मजः । तावन्ना[6] तत्र कोऽप्यागाद् रक्ष रक्षेत्युदीरयन् ॥२७४॥
प्रवे[7]पमानसर्वाङ्गमस्थिरीभूतलोचनम् । मा भैषीरिति तं प्रोचे कुमारः शरणागतम् ॥२७५॥
कुमारं [8]मन्त्रिसूः स्माऽऽह नाऽविमृश्यैवमभ्यधाः । अन्यायकारी यद्येष तदा स्यान्न हि शोभनम् ॥२७६॥
ऊचेऽ**पराजितो**ऽप्युच्चैः क्षत्रधर्मो ह्यसौ सदा । अन्यायी यदि वा न्यायी त्रातव्यः शरणागतः ॥२७७॥
एवं कुमारे वदति हत हतेति वादिनः । एयुरारक्षपुरुषा आकृष्टनि[9]शितासयः ॥२७८॥
[10]अपयातं युवां पान्थौ ! मुषिताशेषपत्तनम् । हनिष्यामोऽमुमित्यूचुरारक्षा दूरतोऽपि ते ॥२७९॥
स्मित्वा स्माऽऽह कुमारोऽपि [11]शरणं मामुपागतः । शक्रेणाऽपि न [12]शक्योऽसौ हन्तुमन्यैस्तु का कथा ? ॥२८०॥
क्रुद्धाः प्रजह्रुरारक्षा यावत् तावदधावत । आकृष्टासिः कुमारस्तान्निघ्नन् द्वीपी[13] मृगानिव ॥२८१॥
¶नंष्ट्वा **कोसल**राजायाऽऽचख्युः स्वस्वामिने च ते । राजाऽपि सैन्यं स प्रैषीद् वधैषी चोररक्षिणः ॥२८२॥
तदप्यनीकं तरसा[14] पराजिग्येऽ**पराजितः** । आययौ च स्वयं राजा वृत्तः सादि[15]-निषादिना ॥२८३॥
तस्करं मन्त्रिपुत्राय समर्प्याऽथाऽ**पराजितः** । द्रढयित्वा परिक[16]रमभ्य[17]मित्रो[त्र्यो]ऽभवद् युधि ॥२८४॥
एकस्य दन्तिनो दन्ते पादं न्यस्य स सिंहवत् । आरुह्य कुम्भमवधीत् स्कन्धारूढं निषादिनम्[18] ॥२८५॥
तमेवाऽऽरुह्य करिणं युयुधे **चापराजितः** । उपलक्ष्य नृपायैकेनाऽऽचख्ये मन्त्रिणार्थे[19] सः ॥२८६॥
निषिध्य स्वाज्ञया युद्धात् सैनिकान् **कोसले**[20]श्वरः । तमूचे मद्वयस्यस्य सुतोऽसि **हरिणन्दिनः** ॥२८७॥
साधु मन्मित्रपुत्रोऽसि विक्रमेणाऽमुना खलु । विना सिंहकिशोरेण को ह्यलं हन्त दन्तिने ? ॥२८८॥
स्वगृहात् स्वगृहं दिष्ट्या त्वमायासीर्महाभुजः । इत्युक्त्वा परिरेभे स गजस्थस्तं गजस्थितम् ॥२८९॥
[21]लज्जाविनमदास्याब्जं राजा स्वेभेऽधिरोह्य[22] तम् । निजे निनाय सदने स्वपुत्रमिव वत्सलः[23] ॥२९०॥
विसृज्य तस्करं मन्त्रिपुत्रोऽप्यन्व**पराजितम्** । आययौ तस्थतुश्चोभौ सुखं **कोस**[24]**ल**वेश्मनि ॥२९१॥
कन्यां **कनकमालाख्यां** स्वां **कोस**[25]**ल**महीपतिः । जातानन्दो **हरिणन्दि**नन्दनायाऽन्यदा ददौ ॥२९२॥
¶दिनानि कत्यपि स्थित्वा मा भूद् विघ्नो गतेरिति । अनाख्यायाऽन्यदा रात्रौ समित्रोऽपि स निर्ययौ ॥२९३॥
व्रजंश्च **कालिका**देव्यायतनस्याऽविदूरतः[26] । हाँ[27] हा ! नि[28]ष्पुरुषोर्वीति शुश्राव रुदितं निशि ॥२९४॥
काऽप्येषा रोदिति स्त्रीति निश्चित्य स कृपानिधिः । अनुशब्दं ययौ वीरः शब्दापातीव सायकः[29] ॥२९५॥
ज्वलितज्वलनाभ्यर्णे स्त्रियमेकां निषादिनीम्[30] । आकृष्टतीक्ष्ण[31]निस्त्रिंशं पुरुषं च ददर्श सः ॥२९६॥
विद्याधराधमादस्मात् पातु मां कोऽपि यः पुमान् । इति भूयोऽपि चक्रन्द सौनिका[32]न्तच्छ(श्छ)गीव सा ॥२९७॥
आचिक्षेप कुमारस्तमुत्तिष्ठस्व रणाय रे ! । अबलायां किमेतत् ते पुरुषाधम ! पौरुषम् ? ॥२९८॥

१. दूरतरे । २. **तौ** ला २. । मु० ३. **०रिष्यामो** ला०पा.ला १, की. आ. । ४. **विसोढुं** सं. मु० । ५. **यत्** खं० २ । ६. नानरः । ७. **प्रकम्पमानसर्वाङ्गं** छा० । ८. **मन्त्रिसूरुचे माऽवि०** पु० । ९. आकृष्टतीक्ष्णखड्गाः । १०. **अर्पयत** खं० २ । ११. **मामेष शरणागतः** ला० । १२. **शक्योऽयं** पु० । १३. 'चित्रकः'-'चित्तो' । १४. पराक्रमेण वेगेन वा । १५. **सादि-निषादिभिः** मु०, खं० १, ला० । १६. कटिवेष्टनम् । १७. शत्रुसन्मुखः । १८. हस्तिपकम् । १९. **मन्त्रिणा च सः** खं० १ । २०. **कौसले०** ला० । २१. लज्जाविनम्रमुखकमलम् । २२. **०धिरुह्य** खं० २ । २३. **वत्सलम्** खं० २ । २४-२५. **कोशल०** खं० १-२, सू० । **कौसल०** ला० । २६. **०स्याऽतिदूर०** खं० २, ला० । २७. **हहा** ! खं० २, सू० । २८. **निःपु०** मु० । २९. शब्दवेधी बाण इव ॥ ३०. **निषादितां** खं० १-२, सू० ता.सं. ला० २। **विषादिनी** पु० । **विषादितां** ला० । ३१. खड्ग । ३२. सौनिकं-सूनास्थानं, तस्यान्तः मध्ये छगी-अजा इव ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

[1]त्वय्यप्यस्यामि चेदं मे पौरुषं [2]नन्विति ब्रुवन् । आकृष्टासिरढौकिष्ट समराय स खेचरः ॥२९९॥
वञ्चयमानावन्योऽन्यघातांस्तौ कुशलावुभौ । खड्गाखड्गि चिरं कृत्वाऽयुध्येतां दोर्युधोद्धतौ ॥३००॥
दोर्युद्धेऽप्यपराजय्यं मन्यमानोऽ**पराजितम्** । बबन्ध नागपाशेन स विद्याधरकुञ्जरः ॥३०१॥
कुमारस्त्रोटयामास तं पाश**मपराजितः** । [3]व्यालद्विप इवाऽऽलानरज्जुं कोपेन भूयसा ॥३०२॥
विद्याप्रभावतो विद्याधरः स विविधायुधैः । प्रजहार कुमाराय क्रुद्धोऽसुरकुमारवत् ॥३०३॥
पूर्वपुण्यप्रभावाच्च देहसामर्थ्यतोऽपि च । कुमारे प्राभवंस्तस्य प्रहारा न मनागपि ॥३०४॥
अत्रान्तरे च मार्त्तण्डो ययावुदयमूर्धनि[4] । मूर्ध्नि चाऽताडयद् राजपुत्रः खड्गेन खेचरम् ॥३०५॥
पपात मूर्च्छितः पृथ्व्यां तेन घातेन खेचरः । कुमारस्पर्द्धयैव[5] स्त्रीं तां जघान स्मरः शरैः ॥३०६॥
भूयः प्रापय्य चैतन्यमुपचारैर्नभश्चरम् । ऊचे कुमारो युध्यस्व सहो[6]ऽसि यदि सम्प्रति ॥३०७॥
विद्याधरोऽप्यभाषिष्ट सुष्ठ्वहं निर्जितस्त्वया । रक्षितः स्त्रीवधात् साधु नरकाच्चापि तद्भवात्[7] ॥३०८॥
मम वस्त्राञ्चलग्रन्थौ विद्येते मणि-मूलिके । मणेस्तस्याऽम्भसा घृष्ट्वा मूलिकां देहि मद्व्रणे ॥३०९॥
तथा चक्रे कुमारेण सज्जाङ्गोऽभूच्च खेचरः । कुमारपृष्टश्चाऽऽचख्यावेवं व्यतिकरं निजम् ॥३१०॥
¶**रथनूपुर**नाथस्य विद्याधरपतेरियम् । दुहिताऽ**मृतसेन**स्य **रत्नमाले**ति नामतः ॥३११॥
वरोऽस्या ज्ञानिनाऽऽचख्ये **हरिणन्दि**नृपात्मजः । युवाऽ**पराजितो** नाम गुणरत्नैकसागरः ॥३१२॥
तत्रै[8]षाऽप्यनुरक्ताऽभून्नाऽन्यस्मिन्नकरोन्मनः । मया च वीक्षिताऽन्येद्युर्विवाहाय च याचिता ॥३१३॥
एषाऽप्युवाच मत्पाणिं गृह्णीया**दपराजितः** । दहेद् वा दहनो मेऽङ्गं नाऽपरा काऽप्यतो गतिः ॥३१४॥
[9]इत्यस्या [10]वचसा कुप्यन्नहं **श्रीषेण**नन्दनः । **सूर्यकान्ता**भिधानोऽस्याः पाणिग्रहे[11]कृताग्रहः ॥३१५॥
निर्गत्य नगरा[12]द् विद्या दुः[13]साध्या अप्यसाधयम् । भूयोऽपि विविधोपायैरमूमर्थितवानहम् ॥३१६॥ युग्मम् ॥
नैषा केनाऽप्युपायेन मामियेष यदा तदा । हृत्वाऽऽनीता[14] मया[15]ऽप्यत्र कामान्धाः किं न कुर्वते ? ॥३१७॥
अग्निरङ्गे लगत्वस्याः पूर्यतां स प्रति[16]श्रवः । इत्यमूं खण्डयित्वाऽहमग्नौ प्रक्षेप्तुमुद्यतः ॥३१८॥
मत्तस्त्वया रक्षितेयं रक्षितोऽहं च दुर्गतेः । द्वयोरप्युपकर्ताऽसि शंस कोऽसि महाभुज[17] !? ॥३१९॥
¶आख्यच्च मन्त्रिसूस्तस्मै कुमारस्य कुलादिकम् । मुमुदे **रत्नमाला**ऽपि सद्योऽभीष्टसमागमात् ॥३२०॥
पितरौ **रत्नमाला**याः पृष्ठ[18]तश्च प्रधाविनौ[19] । **कीर्तिमत्यमृतसेनौ** तदानीं तत्र चेयतुः ॥३२१॥
पृष्टश्चाऽऽख्यन् मन्त्रिपुत्रो यथावृत्तं तयोरपि । त्राताऽभूत् परि[20]णेतैवेत्यमोदेतामुभावपि ॥३२२॥
ताभ्यां दत्तां **रत्नमाला**मुपयेमेऽ**पराजितः** । तयोरेव गिरा[21]ऽदत्त **सूरकान्ता**य चाऽभयम् ॥३२३॥
कुमारे निःस्पृहे **सूरकान्त**स्ते मणि-मूलिके । आर्पयन् मन्त्रिपुत्रस्य गुटिकाश्चाऽन्यवेषदाः[22] ॥३२४॥
आनेतव्या स्वपुत्रीयं निजस्थाने गतस्य मे । इत्युदीर्याऽ**मृतसेनं** प्राचाली**दपराजितः** ॥३२५॥
समं पुत्र्याऽ**मृतसेनः सूरकान्त**श्च खेचरः । स्वं स्वं [23]प्रेययतुः स्थानं स्मरन्ता**वपराजितम्** ॥३२६॥
¶कुमारोऽप्यग्रतो गच्छन्नटव्यां विधुरस्तृषा । उपाविशच्चूततले मन्त्रिपुत्रोऽम्भसेऽ[24]न्वगात् ॥३२७॥
दूरे गत्वा गृहीत्वाऽम्भो यावदागादमात्यसूः । तस्मिंश्चूततले तावन्नाऽपश्यद**पराजितम्** ॥३२८॥
दध्यौ च नेदं तत्स्थानं भ्रान्त्याऽन्यत्र किमागमम् ? । किं वा कुमारोऽतितृषा स्वयमप्यम्भसे ययौ ? ॥३२९॥

---

१. ननु त्वय्यपि (विषये) इदं मे पौरुषं अस्यामि-क्षिपामि-काकुः । २. **न त्विति** मु० । ३. दुष्टगजः । ४. ०**वुदयमूर्ध्नि च** ता.सं.छा.ला २; उदयाचले । ५. ०**स्पर्धया नूनं तां** ला० । ६. समर्थः । ७. स्त्रीवधप्रभवात् । ८. **तत्रैवात्यन्तरक्ता०** ता० सं० । ९. **एतस्या** सू० । १०. **वचसाऽकुप्यमहं** मु० । ११. ०**ग्रहकृतादरः** ला० ला १ । **पाणिग्राह०** खं० २ । १२. **विविधा विद्या** सू० । १३. **दुःसाधा** खं-२, सू० । १४. ०**नीत्वा मयात्र क्षुत्कामा०** खं० १-२, ला० सू० । १५. **मया त्वत्र** ला० । १६. प्रतिज्ञा । १७. ०**भुजः** खं० १-२ । १८. **पृष्ठे तस्य** खं० २ । १९. **प्रधावितौ** मु०, र.स्वीकृतपाठश्च । २०. **परिणेता चे०** ला० । २१. **गिरा दत्तं** मु०, र.स्वीकृतपाठश्च । २२. वेषपरावर्तनगुटिकाः । २३. **प्रजग्मतुः** ता० । २४. **त्वगात्** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विमृश्येति कुमारस्याऽन्वेषणाय प्रतिद्रुमम् । बभ्रामाऽनीक्षमाणस्तं मूर्च्छितश्चापतद् भुवि ॥३३०॥
लब्धसंज्ञः समुत्थाय सोऽरोदीत् करुणस्वरम् । कुमार ! दर्शयाऽऽत्मानं किं खेदयसि मां मुधा ? ॥३३१॥
[१]नाऽपहर्तुं **प्रहर्तुं** वा[२] त्वामलं **को**ऽपि मानवः[३] । न तवाऽदर्शने हेतुरमङ्गलमयः सखे ! ॥३३२॥
एवं विलप्य बहुधा तं गवेषयितुं पुनः । ग्रामादिषु परिभ्राम्यन् सोऽगा**न्नन्दिपुरं** पुरम् ॥३३३॥
¶मन्त्रिसूर्बहिरुद्याने यावदस्थाच्च दुर्मनाः । उभौ विद्याधरौ तावत् तमुपेत्यैवमूचतुः ॥३३४॥
विद्याधरेन्द्रो **भुवनभानु**र्नाम्ना महावने । आस्ते विकृत्य प्रासादं परमर्द्धिर्महाबलः ॥३३५॥
तस्य च[४] स्तः **कमलिनी-कुमुदि**न्यावुभे सुते । तयोश्च ज्ञानिनाऽऽख्यातो वरः प्रियसुहृत् स ते ॥३३६॥
तस्याऽऽनयनहेतोश्च स्वामिनाऽऽवां नियोजितौ । वने तस्मिन्नागताभ्यामावाभ्यां वीक्षितौ युवाम् ॥३३७॥
त्वं जलानयनायाऽगाः कुमारं **चापराजितम्** । हृत्वाऽऽनयाव **भुवनभानोः** स्वस्वामिनोऽन्तिके ॥३३८॥
तमभ्युदस्थाद्[५] **भुवनभानु**र्भानुमिवोदितम् । [६]सम्भ्रमाच्चाऽऽसयामास रत्नभद्रासनोत्तमे ॥३३९॥
सत्ययाऽपि गुणस्तुत्या ह्रेपयन्न[७]**परा**जितम् । पुत्र्योस्तयोर्विवाहार्थे ययाचे खेचरेश्वरः ॥३४०॥
कुमारस्त्वद्वियोगार्तो न प्रत्युत्तरमप्यदात् । मौनी मुनिरिवाऽस्थाच्च त्वामेव परिचिन्तयन् ॥३४१॥
ततश्च स्वामिनाऽऽदिष्टौ त्वामानेतुमितस्ततः । विमार्गन्तौविहाऽऽयावः[८] दिष्ट्या दृष्टोऽसि सम्प्रति ॥३४२॥
तदुत्तिष्ठ महाभाग ! गन्तुं तत्र चल द्रुतम् । कुमारस्य कुमारीभ्यां विवाहस्त्वयि तिष्ठते[९] ॥३४३॥
इत्युक्त्या मुदितस्ताभ्यां सह मन्त्रिसुतो ययौ । सद्योऽभ्यर्णे कुमारस्य प्रमोद इव मूर्तिमान् ॥३४४॥
उपयेमे कुमार्यौ ते कुमारोऽपि शुभेऽहनि । कालं कञ्चिदपि स्थित्वा निर्जगाम च पूर्ववत् ॥३४५॥
¶**श्रीमन्दिरे** प्रापतुश्च पुरे तत्रै[१०] च तस्थतुः । **सूरकान्त**दत्तमणिपूर्यमाणेप्सितौ सदा[११] ॥३४६॥
तस्मिन् पुरेऽन्यदोत्तस्थावतुलस्तुमुलध्वनिः । अदृश्यन्त भ्रमन्तश्च सन्नद्धोद्यायुधा[१२] भटाः ॥३४७॥
किमेतदिति पृष्टश्च राजपुत्रेण मन्त्रिसूः । ज्ञात्वा लोकाच्छशंसैवमत्र राजाऽस्ति **सुप्रभः** ॥३४८॥
स प्रविश्यैकेन पुंसा हतश्छुरिकया च्छलात् । राज्ञो राज्यधरश्चास्य पुत्रादिर्नास्ति कोऽपि हि ॥३४९॥
आत्मरक्षीभवन्नद्य तेनाऽयमखिले पुरे । भ्राम्यति व्याकुलो लोकस्तस्याऽयं तुमुलो महान् ॥३५०॥
दुःक्षत्रियेण केनापि धिगयं घातितो द्विषा । इत्युक्त्वा करुणाम्लानमुखोऽस्थाद**पराजितः** ॥३५१॥
¶अरोहेति[१३] प्रहारे तु राज्ञः संरोहणैरपि । प्रधानगणिका **कामलता**ऽऽख्याद् [१४]राजमन्त्रिणाम् ॥३५२॥
वैदेशिकः पुमानात्मद्वितीयोऽत्रास्ति पत्तने । उदारो धार्मिकः सत्यो मूर्त्या कश्चिदिवाऽमरः ॥३५३॥
सर्वसम्पद्यमानार्थो निर्व्यापारोऽप्यसौ यतः । महाप्रभावस्तदिह सम्भाव्यं किञ्चिदौषधम् ॥३५४॥
निन्युश्च मन्त्रिणोऽभ्यर्थ्य कुमारमुपपार्थिवम् । राजा तद्दर्शनेनाऽपि [१५]सुस्थंमन्यो बभूव सः ॥३५५॥
कृपावान् राजपुत्रः प्रागपि घातं विलोक्य तु । कृपाभागधिकं मित्रादाददे मणि-मूलिके ॥३५६॥
मणिप्रक्षालनजलं स भूपतिमपाययत् । [१६]मूलिकां तज्जलैर्घृष्ट्वा नृपघाते[१७] न्यधत्त च ॥३५७॥
सज्जाङ्गो भूपतिश्चाऽभूद्राजपुत्रमुवाच च । कुतोऽकारणबन्धुस्त्वमिहाऽऽयासीः कृपानिधे[१८] ! ॥३५८॥
शशंस मन्त्रिसूः सर्वं राजा भूयोऽप्यभाषत । पुत्रोऽयं मद्वयस्यस्य भूपते**र्हरिणन्दिनः**[१९] ॥३५९॥
अहो ! प्रमादो नाऽबोधं यद्भ्रातुः पुत्रमप्यमुम् । यद्वा प्रमादस्य फलं प्रहारोऽप्येष मेऽभवत् ॥३६०॥
इत्युक्त्वा कन्यकां **रम्भां** रूपाद्रम्भामिवाऽपराम् । उपरोध्य ददौ तस्मै गुणक्रीतो नरेश्वरः ॥३६१॥

१. **नापकर्तुं** मु०, र.स्वी.पाठश्च । २. **च.** खं० २ । ३. **मानद** ! खं० १-२, ता.ला०छा.आ. । ४. **च सूः** मु० । ५. अभिमुखं उत्थितः । ६. **संभ्रमात् स्थापयामास** ला० । ७. लज्जां प्रापयन् । ८. **०न्ताविहाऽऽयातौ** ला० ला १, मु०; खं० २, ला० । ९. **तिष्ठति** ला० । १०. **तत्राऽवत०** ला० । ११. **च तौ** खं० २ । १२. **सन्नद्धाः सायुधा** ला० । १३. **आरोहति** खं० १, ला०, मु०, ता.विना च । १४. **राजमन्त्रिणम्** ला०की.छा.सं.ता. । १५. **स्वस्थंमन्यो** खं० २ । स्वस्थ इव । १६. **मूलिकान्तर्ज्जलैः०** खं १ । १७. **नृपाघाते** खं० २ । १८. **कृपानिधिः** खं० २ । १९. **०र्हरिनन्दिनः** खं० १, ला० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रममाणस्तया कालं कञ्चिदप्यतिवाह्य सः । पूर्ववन्निर्ययौ राजपुत्रो मन्त्रिसुतान्वितः ॥३६२॥

¶पुरे **कुण्डपुरे**ऽगाच्च तत्रोद्याने महामुनिम् । दिव्यस्वर्णाम्बुजासीनं स केवलिनमैक्षत ॥३६३॥

तं त्रिः प्रदक्षिणीकृत्य नमस्कृत्य निषद्य च । शुश्राव देशनां तस्मात् श्रुत्योः पीयूषवर्षिणीम् ॥३६४॥

देशनान्ते [1]तु तं नत्वा पप्रच्छेत्य**पराजितः** । किं भव्योऽहमुताऽभव्यः ? आचख्यौ चेति केवली ॥३६५॥

भव्योऽसि भविता चाऽर्हन् द्वाविंशः पञ्चमे भवे । त्वन्मित्रं गणभृच्चाऽयं **जम्बूद्वीप**स्य **भारते** ॥३६६॥

श्रुत्वेति मुमुदाते तौ सेवमानौ च तं मुनिम् । धर्मस्थौ तस्थतुः [2]सुस्थौ तत्र कत्यपि वासरान् ॥३६७॥

गते विहर्तुमन्यत्र मुनौ तत्र तु तावपि । स्थाने स्थाने च चैत्यानि वन्दमानौ विचेरतुः ॥३६८॥

¶इतश्चाऽऽसी**ज्जनानन्दे जितशत्रु**र्नृपः पुरे । तस्याऽभूत्[3] महिषी नाम्ना **धारिणी** शीलधारिणी ॥३६९॥

स्वर्गाच्च्युत्वा **रत्नवती** तस्याः कुक्षाववातरत् । पूर्णे च[4] काले साऽसूत नाम्ना **प्रीतिमतीं** सुताम् ॥३७०॥

ववृधे सा क्रमेणोपाददे च सकलाः कलाः । आसादयामास चोच्चैर्यौवनं स्मरजीवनम् ॥३७१॥

तस्याश्चाऽतिकलाज्ञाया विज्ञोऽ[5]प्यज्ञः पुरोऽभवत् । दृष्टिर्न तस्याः कुत्राऽपि तदरंस्त मनागपि ॥३७२॥

पिताऽपि दध्यौ यद्येतां विदग्धां येन केनचित् । वरेणोद्वाहयिष्यामि प्राणांस्त्यक्ष्यत्यसौ तदा ॥३७३॥

ध्यात्वैवं तां रहो[6]ऽपृच्छत् पुत्रि ! कस्ते वरो मतः । साऽप्यूचे स वरो मेऽस्तु यो विजेता कलासु माम् ॥३७४॥

तत्प्रत्यपादि राजाऽपि सा प्रतिज्ञा च पप्रथे । राजानो राजपुत्राश्च कलाभ्यासं भृशं व्यधुः ॥३७५॥

¶**जितशत्रु**र्नृपोऽन्येद्युर्बहिर्मञ्चानकारयत् । राज्ञश्च राजपुत्रांश्चाऽऽजूहवत् तत्स्वयं[7]वरे ॥३८६॥

भूचराः खेचराश्चेयुः कुमारैः सह भूभुजः । स्वनन्दनवियोगार्तं विनैकं **हरिर्णन्दिनम्**[8] ॥३७७॥

निषेदु[9]स्ते च मञ्चेषु विमानेष्विव [10]नाकिनः । इतश्च पर्यटन् दैवात् तत्राऽऽगाद**पराजितः** ॥३७८॥

सोऽवोचद् **विमलबोधं** समये स्म समागताः । कलाविचारं तज्ज्ञानां द्रक्ष्यामस्तां च कन्यकाम् ॥३७९॥

मा नः परिचितोऽज्ञासीदिति तेन सहैव सः । गुटिकायाः प्रयोगेण प्राकृतं रूपमादधे ॥३८०॥

तावुभौ जग्मतुस्तत्र स्वयंवरणमण्डपे । क्रीडया विकृताकारधारिणौ त्रिदशाविव ॥३८१॥

अनर्घ्यनेपथ्यधरा धरामिव गताऽमरी । चामराभ्यां वीज्यमाना सखी-दासीजनावृता ॥३८२॥

आर्त्म[11]रक्ष-प्रतीहारोत्सार्यमाणपुरोजना । देवी लक्ष्मीरपरेव तत्राऽऽगात् **प्रीतिमत्य**द्य ॥३८३॥ युग्मम् ॥

¶ऊचे च **मालती**नामाऽङ्गुल्या निर्दिशती सखी । भूचराः खेचराश्चाऽमी गुणिमन्या इहाऽऽययुः ॥३८४॥

असौ **कदम्बदेशस्य** राजा भुवनविश्रुतः । वीरो **भुवनचन्द्राख्यः** पूर्वदिग्मुखमण्डनम् ॥३८५॥

प्रकृत्या दक्षिणश्चाऽयं दक्षिणाशाविशेषकः । नामतः **समर[12]केतु**र्मीनकेतुर्वपुःश्रिया ॥३८६॥

उत्तराशाकुबेरोऽयं **कुबेर** इति नामतः । वैरीनारीजनास्राम्भः[13]-स्फीत[14]कीर्तिलतावनः ॥३८७॥

अयं **सोमप्रभः** कीर्त्या जितसोमप्रभो नृपः । अन्येऽपि **धवल-शूर[15]-भीमाद्या** पार्थिवा अमी ॥३८८॥

अयं च खेचराधीशो **मणिचूडो** महाभुजः । **रत्नचूड**स्त्वसावेष **महाबाहुर्मणिप्रभः** ॥३८९॥

एते च **सुमनः-सोम[16]-सूराद्याः** खेचरेश्वराः । तदीक्षस्व परीक्षस्व सर्वेऽप्येते कलाविदः ॥३९०॥

तयेत्युक्ता **प्रीतिमती** यं यमैक्षि[17]ष्ट चक्षुषा । तयाऽऽदिष्ट इवाऽनङ्गस्तं तं बाणैरताडयत् ॥३९१॥

म[18]धुमत्तान्यपुष्टस्त्रीस्वरमालम्ब्य साऽकरोत् । विचारं पूर्वपक्षस्था वाग्देवीव विवा[19]दिनी ॥३९२॥

[20]निहतप्रतिभाः सर्वे भूचराः खेचरा अपि । गले गृहीता इव ते नाऽशकन् दातुमुत्तरम् ॥३९३॥

---

१. ०न्ते **मुनिं नत्वा** खं० २ । २. **स्वस्थौ** खं० २, सं.ता.की. । ३. ०भूद् **गेहिनी ना०** खं० २ । ४. **पूर्णे काले च** खं० २ । ५. **विज्ञोऽप्यविदुरोऽभ०** खं० १ । ६. **रहे०** खं० २ । ७. **०वच्च स्वयं०** मु० । ८. **०नन्दिनम्** ला० । ९. **निषेदुस्तत्र** खं० १ । १०. देवाः । ११. **आत्मरक्षा** मु० । १२. **स्मरकेतुर्यो मीन०** ला० । १३. **जनाश्रान्तः** मु० । १४. **०स्फीति०** ला०सू० । १५. **०सूर०** खं० १-२ । **धवलभीमसूरा०** ला० । १६. **०सूरसोमा०** ला० । १७. **यमैषिष्ट** खं० १ । १८. वसन्तोन्मत्ता अन्यपुष्टस्त्री-कोकिला, तस्याः स्वरम् । ० **पुष्टास्त्री** मु० । १९. **प्रवादिनी** ला० । २०. **निहित०** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रीसम्बन्धात् पक्षमस्याश्चक्रे [1]वाग्देव्यतो वयम् । अनया निर्जिता नूनं पुरा केनाऽप्यनिर्जिताः ॥३९४॥
इत्यादि विविधं प्रोचुर्विलक्षास्ते[2] परस्परम् । राजानो राजपुत्राश्च त्रपाऽवनमदाननाः ॥ ३९५॥ युग्मम् ॥
दध्यौ च **जितशत्रुः** किं सर्वायासादिमां[3] विधिः । विधाय खिन्नः ? एतस्या नाऽनुरूपं पतिं व्यधात् ? ॥३९६॥
इयन्त एव राजानो मत्पुत्र्या एषु वोचितः[4] । [5]न कोऽपि कोऽपि हीनोऽन्यो भावी चेत् का गतिस्तदा ? ॥३९७॥
तन्मन्त्र्यूचे च भावज्ञो विषादेन कृतं प्रभो ! । प्रकृष्टेभ्यः प्रकृष्टाः स्युर्बहुरत्ना हि भूरियम् ॥३९८॥
राजा वा राजपुत्रो वा [6]परो वा य इमां जयेत् । स एव हि वरोऽमुष्या घोषणा कार्यतामियम् ॥३९९॥
[7]साध्वेतदिति जल्पंश्च तथैवाऽकारयन्नृपः । आकर्ण्य[8] घोषणां तां च दध्याविव्यत्य**पराजितः** ॥४००॥
स्त्रिया सह विवादे स्यान्नोत्कर्षो विजयेऽपि हि । पुंस्पक्षो विजितः सर्वोऽप्यविवादे भवेत् पुनः ॥४०१॥
तदुत्कर्षोऽस्तु मा[9] वाऽस्तु जेतव्या सर्वथाऽप्यसौ । विमृश्येति कुमारो द्राक् **प्रीतिमत्याः** पुरोऽभवत् ॥४०२॥
अभ्रच्छन्नमिवाऽऽदित्यं दुर्वेषमपि वीक्ष्य तम् । प्राग्जन्मस्नेहसम्बन्धात् प्रीतिं **प्रीतिमती** दधौ ॥४०३॥
पूर्वपक्षं **प्रीतिमती** प्राग् जग्राह तथैव हि[10] । तां द्राग् निरुत्तरीकृत्य पराजिग्ये**ऽपराजितः** ॥४०४॥
स्वयंवरस्रजं सद्यः सा चिक्षेपा**ऽपराजिते** । चुकुपुश्च नृपास्तस्मै भूचराः खेचराश्च ते ॥४०५॥
क एष वाचा वातूलस्तूलवल्लाघवास्पदम् । इमां [11]कार्पटिकोऽस्मासु सत्सूद्वोढेति[12] भाषिणः ॥४०६॥
भूपाः[13] [14]संवर्मयामासुः समं सादि-निषादिना[15] । उदस्तशस्त्राः[16] सङ्ग्रामं संरम्भादारभन्त[17] च ॥४०७ ॥ युग्मम् ॥
कुमारोऽपि समुत्पत्य हत्वा कञ्चिन्निषादिनम् । [18]तत्कुञ्जरस्थो युयुधे तदस्त्रैः शारिवर्तिभिः[19] ॥४०८॥
क्षणाच्च रथिनं हत्वा प्राहरत् तद्रथस्थितः । क्षणाद् भूमौ क्षणाद् भूयोऽपीभस्थः स युधं व्यधात् ॥४०९॥
एकोऽप्यनेकधाभूत इवाऽशनिरिवं[20] स्फुरन् । अभाङ्क्षीद् विद्विषत्सैन्यमुन्मन्युर[21]**पराजितः** ॥४१०॥
स्त्रियाऽपि प्राग्जिताः शास्त्रैः शस्त्रैरेकाकिनाऽधुना । इति ह्रीणा[22] नृपा योद्धुं सम्भूयाऽपि[23] डुढौकिरे ॥४११॥
¶अथ **सोमप्रभस्ये**भमारुरोहा**ऽपराजितः** । तं चोपालक्षयत् **सोमो** लक्षणैस्तिलकेन च ॥४१२॥
भुजोपपीडं तं **सोमः** परिरेभे महाभुजम्[24] । दिष्ट्या ज्ञातोऽसि जामेयाऽमेयवीर्येत्युवाच च ॥४१३॥
आख्यच्च राज्ञां सर्वेषां ते सर्वे व्यरमन् रणात् । तैरेव स्वजनीभूतैरध्यास्युद्वाहमण्डपः ॥४१४॥
ततो**ऽपराजित-प्रीतिमत्यो**रन्योऽन्यरक्तयोः । चक्रे विवाहः[25] पुण्येऽह्नि भूभुजा **जितशत्रुणा** ॥४१५॥
चक्रे नैसर्गिकं रूपं मनोज्ञम**पराजितः** । विक्रमेण[26] च रूपेण तस्याऽरं[27]ज्यज्जनोऽखिलः ॥४१६॥
सत्कृत्य व्यसृजत् सर्वान् **जितशत्रु**र्महीपतीन् । रममाणः **प्रीतिमत्या** तत्राऽस्थाच्चा**पराजितः** ॥४१७॥
**जितशत्रु**नृपामात्यः कन्यां **रूपवतीं** निजाम् । ददौ **विमलबोधाय** सोऽपि रेमे तया सह ॥४१८॥
¶अन्येद्युराययौ तत्र दूतः श्री**हरिणन्दिनः**[28] । ददृशे च कुमारेण [29]परिरेभे च सम्भ्रमात् ॥४१९॥
कुशलं तातपादानामम्बायाश्चेति तेन सः । पृष्टो दूतो जगादैवमश्रुपूर्णविलोचनः ॥४२०॥
शरीरधारणामात्रं कुशलं केवलं तयोः । त्वत्प्रवासदिनादेव तौ ह्यनुद्वानलोचनौ[30] ॥४२१॥
श्रुत्वा श्रुत्वा जनश्रुत्या त्वच्चरित्रं[31] नवं नवम् । [32]प्रमोदेते क्षणं तौ त्वद्वियोगेन च मूर्च्छतः ॥४२२॥ युग्मम् ॥

१. **वाग्देवता स्वयम्** खं० १ । २. **०विलक्ष्या०** खं० १ । ३. **०दिना विधिः** खं० २ । विधिः सर्वायासाद् इमां विधाय किं खिन्नः ? ४. **चोचितः** खं० १, ला० । ५. **नरो न कोऽपि ही०** मु०, खं० १, ला० । ६. **पौरो** सू० । **पुरो** खं० २ । ७. **साधु साध्विति** मु०, खं० १ । ८. **०र्ण्याघोषणां** खं० २, सू० । ९. **वा माऽस्तु** खं० २ । १०. **च** ला० । ११. भिक्षुकः । १२. **सत्सु वोढे०** खं० १ । १३. **नृपाः** खं० १-२, ला० सू०मु० । १४. युद्धार्थं सज्जीबभूवुः । १५. **निषादिभिः** खं० १, ला०, मु० । १६. **उदस्त्र०** खं० २ । १७. कोपात् । १८. **तद्गजस्थोऽपि युयुधे** खं० २, मु० । १९. **शारवर्ति०** ला० । शारिः गजकवचम् । २०. **०रिवाऽस्फुरत्** मु०, र.स्वीकृतपाठश्च । २१. अतिकोपवान् । २२. लज्जिताः । २३. **सम्भूयाऽथ** खं० २ । २४. **महाभुजः** ला० । २५. **विवाहं** मु०, र.स्वीकृतपाठश्च । २६. **०णेव रू०** खं० १-२, सू० । २७. **तस्याऽरञ्जज्जनो०** मु०, र.स्वीकृतपाठश्च । २८. **०नन्दिनः** ला० । २९. आलिलिङ्गे । ३०. **अनुद्वान्तलोचनौ** ला० २ । 'आर्द्रनयनौ' इति लाटि. । ३१. **त्वच्चरितं** खं० १, सू०, र.स्वीकृतपाठः । ३२. **प्रमोदेन** सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुत्वा वृत्तान्तमेतं[1] ते सम्यग् ज्ञातुमहं प्रभो ! । प्रेषितोऽद्यापि पितरौ न खेदयितुमर्हसि ॥४२३॥
कुमारोऽप्य[2]श्रुपूर्णाक्षः सगद्गदमभाषत । ईदृग्दुःखप्रदं पित्रोर्धिग् धिग् मामधमं सुतम् ॥४२४॥
¶**जितशत्रुम**थाऽऽपृच्छ्य प्राचालीद**पराजितः** । आगाच्च **भुवनभानुः** सु[3]ताद्वययुतस्तदा ॥४२५॥
अन्याश्च तेन पूर्वोढास्तत्राऽऽनिन्युः स्वनन्दनाः । राजानः **सूरकान्तो**ऽपि तत्राऽऽगादभ[4]यार्जितः ॥४२६॥
**प्रीतिमत्या** तथाऽन्याभिः पत्नीभिर**पराजितः** । [5]भूचरैः खेचरैश्चापि राजभिः परिवारितः ॥४२७॥
[6]रोदसी छादयन् सैन्यैर्भूचरैः खेचरैरपि । स्तोकैरपि दिनैरुत्कः[7] प्राप **सिंहपुरं** पुरम् ॥४२८॥ युग्मम् ॥
**हरिणन्दी** तमभ्येत्य लुठन्तमवनीतले । परिरभ्याऽङ्कमारोप्य मूं[8]र्ध्न्यचुम्बन् मुहुर्मुहुः ॥४२९॥
माताऽपि प्रणमन्तं तं बाष्पायितविलोचना । पृष्ठे पस्पर्श पाणिभ्यां चुचुम्ब[9] च शिरस्तले ॥४३०॥
पादान् श्वशुरयोर्नेमुः **प्रीतिमत्यादयो**ऽपि ताः । स्नु[10]षा **विमलबोधेन** नामग्राहं प्रदर्शिताः ॥४३१॥
भूचरान् खेचरांश्चाथ विससर्जा**ऽपराजितः** । पित्रोर्नेत्रोत्सवं कुर्वन् चाऽस्थात् क्रीडन् यथासुखम् ॥४३२॥
तौ **मनोगति-चपलगती माहेन्द्र**तश्च्युतौ । अभूतामनुजौ तस्य **सूरः सोमश्च** नामतः ॥४३३॥
अथाऽन्यदा **हरिणन्दी** राज्यं न्यस्या**ऽपराजिते** । प्रवव्राज तपस्तप्त्वा प्रपेदे च परं पदम् ॥४३४॥
¶**अपराजित**राजस्य महिषी **प्रीतिमत्य**भूत् । मन्त्री **विमलबोधश्च** तौ बन्धू मण्डलेश्वरौ ॥४३५॥
पुराऽप्याक्रान्तभूपालः पृथ्वीं सुखमपालयत् । भोगांश्चाऽभुङ्क्ते[11] निर्विघ्न**मपराजित**भूपतिः ॥४३६॥
चैत्यानि च विचित्राणि रथयात्राश्च लक्षशः । कुर्वाणोऽगमत् कालं स पुमर्थै[12]रवञ्चितः ॥४३७॥
¶स गतोऽन्येद्युरुद्याने ददर्शैकं महर्द्धिकम् । मूर्त्याऽनङ्गमिवा**ऽनङ्गदेवं** सार्थपतेः सुतम् ॥४३८॥
[13]तैमावृतं स[14]वयोभिर्दिव्यनेपथ्यधारिभिः । क्रीडन्तं रमणीयाभी रमणीभिश्च भूरिशः ॥४३९॥
ददानमर्थिनामर्थं स्तूयमानं च बन्दिभिः । गीतासक्तं प्रेक्ष्य राजाऽपृच्छत् कोऽसाविति स्वकान् ? ॥४४०॥युग्मम्॥
असौ **समुद्रपाल**स्य सार्थवाहस्य नन्दनः । महेभ्यो**ऽनङ्गदेवाख्य** इत्याख्यन् पार्थिवाय ते ॥४४१॥
धन्योऽस्मि यस्य वणिजोऽपीत्युदारा महर्द्धयः । एवं प्रशंसन् वेश्माऽऽगात् पुनरप्य**पराजितः** ॥४४२॥
¶द्वितीयेऽह्नि बहिर्गच्छन् **सो**ऽपश्यन् मृतकं व्र[15]जत् । नृभिश्चतुर्भिरुत्क्षिप्तं रसद्भिरसडिण्डिमम् ॥४४३॥
अन्वीयमानं रामाभिरा[16]घ्नानाभिरुरः[17]स्थलम् । मुक्तकेशं रु[18]दन्तीभिर्मूर्च्छन्तीभिः पदे पदे ॥४४४॥ युग्मम् ॥
कोऽयं मृत इति राज्ञा पृष्टेऽशंसंश्च सेवकाः । स एवा**ऽनङ्गदेवो**ऽयं द्राग् विसूचिकतया मृतः ॥४४५॥
अहो ! असारः संसारो धिग् धिग् वि[19]श्वस्तध्रुग् विधिः । [20]हा प्रमादः प्राणभाजां मोहनिद्रान्धचेतसाम् ॥४४६॥
एवं महान्तं संवेगं धारयन्न**पराजितः** । जगाम स्वगृहं खिन्नस्तस्थौ चाऽहानि कत्यपि ॥४४७॥
¶यः प्राक् **कुण्डपुरे** दृष्टः केवली तत्र सोऽन्यदा । आगात् तस्योपकाराय योग्यं ज्ञानेन तं विदन् ॥४४८॥
श्रुत्वा धर्मं च तत्पार्श्वे पुत्रं **प्रीतिमतीभवम् । पद्मं** निधाय राज्ये स्वे प्राव्राजीद**पराजितः** ॥४४९॥
सा च प्रिया **प्रीतिमती सूरः सोमश्च** बान्धवौ । मन्त्री **विमलबोधश्च** सर्वेऽनुप्राव्रजंस्तदा ॥४५०॥
ते [21]सर्वेऽपि तपस्तप्त्वा मृत्वा कल्पेऽ**युराणे**[22]। इन्द्रसामानिकाः प्रीतिभाजोऽभूवन् परस्परम्[23] ॥४५१॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् वर्षे च **भ[24]रते** पुरम् । इहाऽस्ति [25]**हास्तिनपुरं कुरु**मण्डलमण्डनम् ॥४५२॥
**श्रीषेण**स्तत्र राजाऽभूद् रजनीजानिसन्निभः । श्रीरिव **श्रीमती** नाम्ना महिषी तस्य चाऽभवत् ॥४५३॥

---

१. ०**मेतत् ते** ला० । ०**मेवं ते** खं० १ । २. **कुमारोऽथाश्रु०** ला० । ३. **समं स्वसुतया तया** सू० । ४. ०**दभयोर्जितः** ला० । अभयदानेन सेवकत्वेन अर्जितः । ५. **खेचरैर्भूचरै०** खं० २ । ६. आकाश-पृथिव्यौ । ७. **दिनैर्दक्षः** खं० २ । उत्कण्ठितः । ८. **मूर्ध्नाऽचुम्बन्** खं० १ । ९. **चुचुम्ब शिरसस्तले** मु० । १०. पुत्रवध्वः । ११. ०**श्चाभुङ्क्त** खं० २ । १२. धर्मार्थकामैः पुरुषार्थैः । १३. **समन्वितं** ला० । १४. मित्रैः । १५. **व्रजन्** मु०, २. । १६. ०**राजघ्नाभि०** खं० २ । ०**राघ्नन्तीभि०** सू० । १७. ०**रुरुस्थलम्** ला० । १८. **रुदती०** खं० १, सू० । १९. **विश्वस्तद्रु०** खं० २ । विश्वस्तद्रोही । २०. **धिग् चेष्टितं** की. पु. । २१. **ते च सर्वे** खं० १ । २२. 'पञ्चमभवः समाप्तः' लाटि. । २३. 'षष्ठो भवः' लाटि. । २४. **भारते** ला० । २५. **हस्तिन०** ला० ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

शङ्खावदातं पूर्णेन्दुं सा विशन्तं मुखाम्बुजे । स्वप्नेऽपश्यन्निशाशेषे पत्ये चाऽख्याद् दिवामुखे ॥४५४॥
नृपो निर्णीतवांस्तज्ज्ञैः स्वप्नेनाऽनेन चन्द्रवत् । ध्वस्ताशेषद्विषद्ध्वान्तो देव्यां सूनुर्भविष्यति ॥४५५॥
¶[1]इतोऽ**पराजित**जीवश्च्युत्वा तत्कुक्षिमागमत् । काले च साऽसूत सुतं पवित्रं सर्वलक्षणैः ॥४५६॥
पिता तस्याऽकरोच्**छङ्ख** इत्याख्यां पूर्वजाख्यया । धात्रीभिः पञ्चभिः सोऽथ लाल्यमानो व्यवर्धत ॥४५७॥
साक्षिमात्रीकृत्य गुरुं लीलया चाऽऽददे कलाः । प्रतिजन्म समभ्यस्तास्तस्य सन्निहिता हि ताः ॥४५८॥
**मतिप्रभो** नाम गुणनिधि[2]: **श्रीषेण**मन्त्रिणः । सुतोऽभूद् **विमलबोध**जीवः प्रच्युत **आरणात्** ॥४५९॥
सहपांशुक्रीडितश्च सहाध्यायी च सोऽभवत् । स्निग्धः **शङ्ख**कुमारस्य मन्मथस्येव माधवः[3] ॥४६०॥
स तेन सुहृदा सार्धं राजपुत्रैस्तथाऽपरैः । नानाविधाभिः क्रीडाभिः क्रीडन् यौवनमासदत् ॥४६१॥
¶अथ **श्रीषेण**मन्येद्युरुच्चैः पूत्कारकारिणः । एत्य विज्ञपयामासुर्दूराज्जानपदा जनाः ॥४६२॥
अस्ति त्वद्देशसीमायामत्यन्तविषमोन्नतिः[4] । **विशालशृङ्गो**ऽद्रि**श्चन्द्र**[5]**शिशिरा**सरिताङ्कितः ॥४६३॥
तत्रा[6]ऽद्रिदुर्गे **समरकेतुः** पल्लीपतिः स्थितः । अस्मांल्लुण्टति निःशङ्कस्तस्मात् त्रायस्व नः प्रभो ! ॥४६४॥
तद्वधाय प्रतिष्ठासू[7] राजा भम्भामवीवदत् । नत्वा **शङ्ख**कुमारस्तं सप्रश्रयमुवाच च ॥४६५॥
क एष स्वयमाक्षेपस्तत्र पल्लीशमात्रके । नेभः प्रहन्या(ण्या)न्[8]मशकं शशकं चं[9] हरिः क्वचित् ॥४६६॥
त्वदाज्ञयाऽहं तं बद्ध्वा ताताऽऽनेष्ये ममाऽऽदिश । स्वयं प्रयाणाद् विरम त्रपाकरमिदं हि वः ॥४६७॥
राज्ञाऽपि तद्वचः श्रुत्वा तदैव सह सेनया । विसृष्टः **शङ्ख**कुमारस्तां पल्लीं निकषा[10] ययौ ॥४६८॥
श्रुत्वा कुमारमायान्तं दुर्गं शून्यं विमुच्य सः । पल्लीशो गह्वरेऽन्यत्र प्राविशन् मायिनां वरः ॥४६९॥
कुशाग्रीयमतिः **शङ्ख**कुमारो **दुर्गपत्तने** । एकं प्रवेशयामास सामन्तं सारसैनिकम् ॥४७०॥
स्वयं निकुञ्जे चैकस्मिन्निलीयाऽस्थात् ससैनिकः । पल्लीपतिस्तु तं दुर्गं रुरोध च्छलकृत् सदा ॥४७१॥
क्व भोः कुमार ! यासीति यावत् तत्र जगर्ज सः । तावत् कुमारस्तं [11]सैन्यैरववेष्टदनेकशः ॥४७२॥
इतश्च दुर्गवप्रस्थै राजसैन्यैरघा[12]नि सः । इतः कुमारसैन्यैश्च पल्लीनाथोऽन्तरास्थितः ॥४७३॥
कण्ठे कुठारं स क्षिप्त्वा कुमारं शरणं ययौ । ऊचे च मायामन्त्राणां प्रतिकर्ता त्वमेव मे ॥४७४॥
स्वामिन् ! दासीभविष्यामि सिद्धो भूतं[13] इवैष ते । सर्वं मम गृहाणेदं [14]प्रसत्त्याऽनुगृहाण माम् ॥४७५॥
ततः कुमारस्तेनाऽऽत्तं लोप्त्रं[15] यद्यस्य तस्य तत् । सर्वं समार्पयत् तस्माद्दण्डं च स्वयमग्रहीत् ॥४७६॥
पल्लीपतिं [16]तमादाय कुमारोऽपि न्यवर्तत । पथि सायमवात्सीच्च स्कन्धावारं निवेश्य सः ॥४७७॥
सोऽथाऽर्धरात्रे तल्पस्थः शुश्राव करुणस्वरम् । ययौ [17]चाऽसिसखा तस्य स्वरस्यैवाऽनुसारतः ॥४७८॥
ददर्श चाऽग्रे रुदतीं महिलामर्धवार्धकाम्[18] । ऊचे च मृदु मा रोदीर्ब्रूहि दुःखस्य कारणम् ॥४७९॥
¶तस्य मूर्त्या च वाचा च लब्धाश्वासा जगाद सा । अस्त्यङ्गदेशे **चम्पायां जितारि**र्नाम भूपतिः ॥४८०॥
तस्य **कीर्तिमती**पत्न्यां पश्चाद् बह्वात्मजन्मनाम्[19] । जाता **यशोमती** नाम सुताऽस्ति स्त्रीशिरोमणिः ॥४८१॥
स्वानुरूपं वरं तस्या अपश्यन्त्या मनागपि । [20]अरोचकिन्या नाँ[21]ऽरंस्त दृष्टिः कुत्रापि [22]पूरुषे ॥४८२॥
कदाऽप्यगात् कर्णपथं **शङ्खः श्रीषेण**नन्दनः । तस्याश्चक्रे हृदि पदं युगपन्मन्मथोऽपि च ॥४८३॥
मां **शङ्ख** एवोद्वोढेति प्रत्यज्ञासीद् **यशोमती** । स्थानेऽनुरक्तेयमिति मुमुदे [23]चाऽति तत्पिता ॥४८४॥

---

१. **इतोऽपराजितश्च्युत्वा तस्याः कुक्षाववातरत्** मु० । २. **गुणनिधेः** खं० १, सू० । ३. वसन्तऋतुः । ४. **०मोन्नतः** मु० ला०, र० । ५. चन्द्रशिशिरा नाम्नी सरित्, तयाऽङ्कितः । ६. **तत्रास्ति दुर्गे** मु० र० । ७. गन्तुकामः । ८. **न्मशके शशके** ता. सं. पु., विना । ९. **वा** खं० १-२, ला० सू० । १०. समीपे । ११. **सैन्यैरविवेष्टदने०** की० पु० ला० । **सैन्यैरवेष्टयदने०** मु० । १२. **०रघाति** खं० १, ला०, मु०, र० । १३. **भूतमिवैक्षते** खं० २ । **भूतमिवैष** खं० १, ला० । १४. **प्रसीदाऽनु०** पु० । १५. चौर्येण संगृहीतं धनम् । १६. **समादाय** सं० । १७. असिः-खड्गः सखा यस्य, खड्गमात्रेण सहेत्यर्थः । **चासिसखस्तस्य** खं० १ । १८. **०वार्द्धिकाम्** खं० २ । १९. बहूनां पुत्राणां पश्चात् । २०. **अरोचिकिन्या** खं० १-२, ला०सू० । २१. **नो रेमे** मु० । २२. **पौरुषे** ला० । २३. **चापि** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यावत् तदर्थे **श्रीषेणा**न्तिके प्रैषीन्नरान् नृपः । तावद् ययाचे तां विद्याधरेन्द्रो **मणिशेखरः** ॥४८५॥
नेच्छत्येषा विना **शङ्ख**मित्यूचे तं **जितारि**राट् । ततोऽन्येद्युरहार्षीत् तां स विद्या[1]धरपांशनः ॥४८६॥
अहं तु धात्रिका तस्यास्तद्दोर्लग्ना समागता । इहोज्झिता तेन दुष्टखेचरेण बलादपि ॥४८७॥
संसारसारभूतां तां बालां कुत्राऽपि सोऽनयत् । तेनाऽहं विलपाम्येवं जीविष्यति कथं हि सा ? ॥४८८॥
धीरा भवाऽऽनयाम्येष तां कुमारीं विजित्य तम् । इत्युक्त्वाऽन्वेष्टुमारेभे कुमारोऽटन् महाटवीम् ॥४८९॥
¶अत्रान्तरे च चण्डांशुरारुरोहोदयाचलम् । **विशालशृङ्ग**मचलं कुमारोऽप्याससाद सः[2] ॥४९०॥
एकस्मिन् गह्वरे तस्य तां सोऽपश्यद् **यशोमती**म् । [3]विवाहायाऽर्थयन्तं च खेचरं ब्रुवतीमिति ॥४९१॥
शङ्खोज्ज्वलगुणः **शङ्खो** भर्ता मे नाऽपरः पुनः । अप्रार्थितप्रार्थक ! रे ! स्वं [4]खेदयसि किं मुधा ? ॥४९२॥
ताभ्यां दृष्टः कुमारोऽपि दुष्टश्चोवाच **खेचरः** । कालाकृष्टोऽयमायातस्त्वत्प्रियो मद्वशं जडे ! ॥४९३॥
अमुं त्वदाशया सार्धं हत्वा बाले ! बलादपि । एष त्वां परिणेष्यामि नेष्यामि च निजौकसि ॥४९४॥
इत्युक्तवन्तं तं **शङ्खो**ऽप्युवाचोत्तिष्ठ पाप ! रे ! । परनारीहर ! हराम्येष खड्गेन ते शिरः ॥४९५॥
¶उद्यतासी ततश्चोभौ युयुधाते [5]महाभुजौ । वल्गन्तौ चारु[6]चारीभिः कम्पयन्ताविवाचलम् ॥४९६॥
कुमारं दोर्बलाज्जेतुं नाऽशकत् स यदा तदा । तप्तायोगोलमुख्यास्त्रैर्युयुधे विद्यया कृतैः ॥४९७॥
पुण्योत्कर्षात् कुमारस्य कानिचित् प्राभवन्नहि । कुमारः खण्डयामास खड्गेनाऽस्त्राणि कानिचित् ॥४९८॥
ततः खिन्नान्निषण्णाच्च खेचराद्धनुराच्छिदत् । कुमारस्तच्छरेणैव तं विव्याध च वक्षसि ॥४९९॥
मूर्च्छितः सोऽपतत् पृथ्व्यां कृत[7]बुध्न इव द्रुमः । **शङ्खो** वातादिना सञ्जीकृत्याऽऽह्वत युधे पुनः ॥५००॥
उवाच खेचरेन्द्रस्तमनिर्जित[8]चरो ह्यहम् । निर्जितोऽस्मि त्वया दोष्मन्नसामान्योऽसि सर्वथा ॥५०१॥
इयं यथा त्वया वीर ! गुणक्री[9]ता **यशोमती** । तथा पराक्रमक्रीतोऽस्म्यपराधं सहस्व मे ॥५०२॥
कुमारोऽप्यब्रवीत् ते दोर्वीर्येण विनयेन च । रञ्जितोऽस्मि महाभाग ! ब्रूहि किं करवाणि ते ? ॥५०३॥
सोऽप्यूचे चेत् प्रसन्नोऽसि **वैताढ्ये** तर्हि गम्यताम् । सिद्धायतनयात्रा ते[10] मम च स्यादनुग्रहः ॥५०४॥
**शङ्खो**ऽनुमेने तद्वाचं मुमुदे च **यशोमती** । एवंविधो मया[11] वव्रे वर इत्यु[12]च्छ्वसन्मनाः ॥५०५॥
खेचराश्च तदाऽभ्येयु**र्मणिशेखर**पत्तयः । ज्ञातोदन्ता नमश्चक्रुः कुमारमुपकारिणम् ॥५०६॥
प्रेष्य द्वौ खेचरौ सैन्ये स्ववृत्तान्तमजिज्ञपत् । कुमारः प्राहिणोच्चाशु तत्सैन्यं **हस्तिनापुरे** ॥५०७॥
तां च धात्रीं **यशोमत्या**स्तत्राऽऽनाय्य नभश्चरैः । धात्री-**यशोमतीयुक्तः शङ्खो वैताढ्य**मभ्यगात् ॥५०८॥
तत्र सि[13]द्धायतनस्थान् ववन्दे शाश्वतार्हतः । चक्रे च विविधाः पूजा **यशोमत्या** सहैव सः ॥५०९॥
¶निन्ये च **कनकपुरे** कुमारं **मणिशेखरः** । देवतामिव चाऽऽनर्चोपवेश्य निजवेश्मनि ॥५१०॥
**वैताढ्य**वासिनः सर्वेऽप्याश्चर्यमिव चाऽऽगतम् । एत्य **शङ्ख-यशोमत्यौ** भूयो भूयो व्यलोकयन् ॥५११॥
द्विषज्जयादिमूल्येन प्रीतास्तत्राऽपरेऽपि हि । खेचराः पत्तयोऽभूवन् कुमारस्य महर्द्धयः ॥५१२॥
तेऽदुर्निजनिजाः पुत्रीस्तस्मै स प्रत्यवोचत । परिणेष्याम्यमूरेतां परिणीय **यशोमती**म् ॥५१३॥
**मणिशेखर**मुख्यास्ते गृहीत्वा स्वस्वकन्यकाः । **शङ्खं** सह **यशोमत्या चम्पायां** [14]निन्यिरे तदा ॥५१४॥
**जितारि**र्ज्ञातवृत्तान्तो वरं पुत्र्या सहाऽऽगतम् । [15]समावृतं खेचरेन्द्रै[16]रभ्यागान् मुदितो भृशम् ॥५१५॥
सम्भ्रमाच्छङ्खमाश्लिष्य पुर्यां प्रावेशयन्नृपः । पुत्र्या चोद्वाहयामास महोत्सवपुरःसरम् ॥५१६॥

---

१. अधमविद्याधरः । २. तम् सू० । ३. **विवाहार्थार्थयन्तं** खं० १ । **विवाहायार्थकं** ता. सं. ला० १, छा० । ४. **त्वं खेद०** खं० २, ला० सू० । ४. **त्वं खेद०** मु० । ५. **महाबलौ** ता०सं० । ६. मनोज्ञगतिभिः । ७. **छिन्नमूल** मु० । ८. **०निर्जितवरो०** मु० । **निर्जितपुरो०** खं० २। ९. **गुणक्रीती** खं० १-२, सू० । १०. **वो मम** खं०१ । ११. **मया भर्ता वृत०** खं०२, पा०सं०ता०की०ला१, आ० । १२. **इत्युच्छ्वसत् पुनः** ला० । **इत्युत्थसन्मनाः** मु०, र. । १३. **सिद्धायतनेषु** ला०पु.खं० २, सू०मु० । १४. **निन्युरन्यदा** खं० १ । **निन्यिरेऽन्यदा** खं० २, ला०सू० ता.सं.पा.ला० । १५. **परिवृतं** ला० । १६. **०रभ्यगा०** मु०, र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विद्याधरसुतास्ताश्च तदा **शङ्खं**[1] उपायत । **श्रीवासुपूज्य**चैत्यानां [2]यात्रां चक्रे च भक्तितः ॥५१७॥
॥विसृज्य खेचरान् स्थित्वा तत्र [3]चाऽहानि कत्यपि । **यशोमत्यादिपत्नीभिः शङ्खोऽ**गाद् **हस्तिनापुरे**[4] ॥५१८॥
च्युत्वाऽऽ**रणात् सूर-सोमा**वभूतामथ तस्य तु । **यशोधर-गुणधरा**वनुजौ पूर्वजन्मवत् ॥५१९॥
**श्रीषेण**राजाऽप्यन्येद्युर्दत्त्वा **शङ्खाय** मेदिनीम् । **गुणधर**गणधरपादान्ते व्रतमाददे ॥५२०॥
**श्रीषेणः** पालयामास दुस्तपं स यथा तपः । वसुन्धरां तथा **शङ्खः** शङ्खोज्ज्वलयशाश्चिरम् ॥५२१॥
उत्पन्नकेवलोऽन्येद्युः श्री**श्रीषेणो** महामुनिः । विहरन्नाययौ तत्र सुरसान्निध्यशोभितः ॥५२२॥
उपेत्य **शङ्ख**भूपालस्तं ववन्देऽतिभक्तितः । सं[5]साराम्भोधिनौदेश्यां देशनां च ततोऽशृणोत् ॥५२३॥
देशनान्तेऽवद**च्छङ्खो** वेद्मि त्व[6]च्छासनादहम् । भवे न कोऽपि कस्याऽपि सम्बन्धी किं तु केवलः ॥५२४॥
तथाऽप्यस्यां **यशोमत्यां** ममत्वं मेऽधिकं कुतः ? । प्रसीदाऽऽख्याहि सर्वज्ञाऽनभिज्ञमनु[7]शाधि माम् ॥५२५॥
केवल्याख्यद् **धन**भवे पत्नी ते **धनवत्य**सौ । **सौधर्मे** च सुहृद् **चित्रगते रत्नवती** प्रिया ॥५२६॥
**माहेन्द्रे** च सुहृद् भार्या त्व**पराजित**जन्मनि । इयं **प्रीतिमती** कल्पे **त्वारणे** ते सुहृत्सुरः ॥५२७॥
सप्तमेऽस्मिन् भवे भार्या भूयस्तेऽभूद् **यशोमती** । तेनाऽस्यां स्नेहसम्बन्धो भवान्तरभवस्तव[8] ॥५२८॥
इतोऽ**पराजिते** गत्वा च्युत्वा **वर्षे**[9]ऽत्र **भारते** । द्वाविंशस्तीर्थनाथस्त्वं **नेमिनाथो** [10]भविष्यसि ॥५२९॥
इयं [11]**राजीमती** नाम त्वयाऽनूढाऽनुरागिणी । त्वत्पार्श्वात्तपरिव्रज्यो[12] व्रजिष्यति परं पदम् ॥५३०॥
**यशोधर-गुणधरौ** भ्रातरौ प्राग्भवेषु ते । मन्त्री **मतिप्रभ**श्चैते सेत्स्यन्त्याप्य **गणेश**[13]ताम् ॥५३१॥
**पुण्डरीकं** सुतं राज्ये न्यस्य **शङ्खोऽ**ग्रहीद् व्रतम् । तत्पार्श्वे सह बन्धुभ्यां **यशोमत्यो**[14]ऽथ मन्त्रिणा ॥५३२॥
गीतार्थोऽभूत् क्रमा**च्छङ्ख**स्तपस्तेपे च दुस्तपम् । अर्हद्भक्त्यादिभिः स्थानैस्तीर्थकृत्कर्म चाऽऽर्जयत् ॥५३३॥

पादपोपगमनं स विधाया-
न्तेऽ**पराजित**मगान्मुनि**शङ्खः** ।
तेऽपि तेन विधिनैव **यशोम-**
**त्यादयो**ऽयुर**पराजित**मेव ॥५३४॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरित्रे
महाकाव्ये [15]अष्टमे पर्वणि श्री**अरिष्टनेमि**[16]पूर्वभववर्णनो नाम प्रथमः सर्गः ॥

---

१. **शङ्खमुपायत** ला० । २. **पूजां** पु० । ३. दिनानि । ४. **०पुरम्** ला० । ५. संसारसमुद्रे नौकासमानाम् । ६. त्वत्प्रवचनतः । ७. अनुशासनं कुरु । ८. **०भवस्ततः** सू० । ९. **वर्षे तु** ला० । १०. **भविष्यति** खं० २, मु०, र० । ११. **राजमती** र० । १२. **०परिव्रज्यां** मु० र० । १३. गणधरत्वम् । १४. **०मत्या** च ला० । १५. **०ऽष्टमपर्वणि** खं० १-२ । १६. **०नेमिचरिते पूर्व०** खं० २।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ द्वितीयः सर्गः ॥

इतश्च **भरते**ऽत्राऽस्ति **मथुरे**ति वरा पुरी । नद्या **यमुनया** नील[1]संव्यानेनेव शोभिता ॥१॥
तस्यां पुर्यां **हरिवंश्याद् वसुपुत्राद् बृहद्ध्वजात्** । गतेषु भूयःसु नृपेष्वभून्नाम्ना **यदुर्नृपः** ॥२॥
**यदो**रप्य[2]भवत् सूनुः [3]**शूरः** सूरसमद्युतिः । [4]**शूर**स्यापि सुतौ **शौरि-सुवीरौ** वीरकुञ्जरौ ॥३॥
**शौरिं** राज्ये यौवराज्ये **सुवीरं** न्यस्य **शूर**राट् । जातसंसारवैराग्यः परिव्रज्यामुपाददे ॥४॥
¶**शौरिस्तु मथुरा**राज्यं **सुवीरा**याऽनुजन्मने । दत्त्वा **कुशार्त**देशेऽगात् तत्र **शौर्य[5]पुरं** न्यधात् ॥५॥
सूनवोऽ**न्धकवृष्ण्या**द्या जज्ञिरे **शौरि**भूभुजः । **सुवीर**स्य पुन**र्भोजवृष्ण्या**द्या अमितौजसः ॥६॥
**सुवीरो मथुरा**राज्यं [6]स्वं दत्त्वा **भोजवृष्ण**ये । पुरं **सिन्धुषु सौवीरं** नि[7]धायाऽस्थान्महाभुजः ॥७॥
[8]विन्यस्याऽ**न्धकवृष्णिं** स्वे राज्ये **शौरि**र्महाभुजः । **सुप्रतिष्ठ**मुनेः[9] पार्श्वे प्रव्रज्य प्रययौ शिवम् ॥८॥
¶**भोजवृष्णेर्मथुरा**यां राज्यं पालयतः सतः । **उग्रसेनो**ऽभवत् सूनुरुदग्रभुजविक्रमः ॥९॥
जज्ञिरेऽ**न्धकवृष्णे**श्च **समुद्रायां** दशाऽऽत्मजाः[10] । [1]**समुद्रविजयो**ऽ**क्षो[2]भ्यः** [3]**स्तिमितः** [4]**सगरो**ऽपि च ॥१०॥
**हिमवान[6]चल**श्चैव **धर[7]णः पूर[8]ण**स्तथा । **अभि[9]चन्द्रो** [10]**वसुदेवो दशार्हाख्या** दशाऽपि ते ॥११॥ युग्मम् ॥
तेषामभूतामनुजे **कुन्ती मद्री** च नामतः । **पाण्डवे**ऽदात् पिता **कुन्तीं दमघोषाय** चाऽपराम् ॥१२॥
अन्येद्यु**रन्धकवृष्णि**रवधिज्ञानिनं मुनिम् । **सुप्रतिष्ठं** प्रणम्यैवमपृच्छद्रचिताञ्जलिः ॥१३॥
स्वामिन् ! सूनुर्मे दशमो **वसुदेवो**ऽभिधानतः । अत्यन्तरूप-सौभाग्यः कलावान् विक्रमी च किम् ? ॥१४॥
¶आख्यच्च **सुप्रतिष्ठर्षि**रासीन् **मगधमण्डले** । **नन्दिग्रामे** द्विजो रोर[11]स्तस्य भार्या च **सोमिला** ॥१५॥
**नन्दिषेण**स्तयोः सूनुर्बालस्यापि हि तस्य तु । पितरौ तौ विपेदाते मन्दभाग्यशिरोमणेः ॥१६॥
[12]तुन्दिलो दन्तु[13]र[14]श्चिल्लश्च[15]तुरस्रशिरास्तथा । कुरूपोऽन्येषु चाङ्गेषु सोऽत्याजि स्वजनैरपि ॥१७॥
जीवन्मूल्येनाऽपरेद्युर्जगृहे मातुलेन सः । मातुलस्य तु तस्याऽऽसन्नुद्वाह्याः[16] सप्त कन्यकाः ॥१८॥
एकां दास्यामि ते कन्यामित्यूचे मातुलश्च तम् । तद्वेश्मकर्म तल्लोभादशेषं च चकार सः ॥१९॥
तत्राऽद्यो[17]द्यौवना कन्या तज्ज्ञात्वोवाच मां यदि । प्रदास्यति पिताऽमुष्मै तन्मरिष्यामि निश्चितम् ॥२०॥
शुश्राव **नन्दिषेण**स्तद्विषण्णो मातुलेन तु । ऊचे सुतां द्वितीयां ते दास्ये मा खेदमुद्वह ॥२१॥
श्रुत्वा द्वितीयपुत्र्याऽपि तद्वच्चक्रे प्रति[18]श्रवः । अन्यपुत्रीभिरप्येवं प्रतिषिद्धः क्रमेण सः ॥२२॥
ततस्तं मातुलोऽवोचत् पुत्रीमन्यस्य कस्यचित् । याचित्वा ते प्रदास्यामि वत्स ! मा भूस्त्वमाकुलः ॥२३॥
¶**नन्दिषेण**स्ततो दध्यौ निजा नेप्सन्ति माममूः । ईप्सिष्यन्ति कथं त्वन्यकन्या मां रूपदूषितम् ? ॥२४॥
इति निःसृत्य वैराग्याद् ययौ **रत्नपुरे** पुरे । दम्पतीन् क्रीडतस्तत्र [19]निरीक्ष्य स्वं निनिन्द सः ॥२५॥
मुमूर्षुः सोऽथ वैराग्याद् ययावुपवनान्तरे । **सुस्थितं** नाम तत्रर्षिं ददर्श प्रणनाम च ॥२६॥
ज्ञात्वा ज्ञानेन तद्भावं स साधुस्तमवोचत । मा मृत्युसाहसं कार्षीरधर्मस्य फलं ह्यदः ॥२७॥
कार्यः सुखार्थिना धर्म आत्मघातात् सुखं न हि । स तु प्रव्रज्यया धर्मः सुखहेतुर्भवे भवे ॥२८॥
श्रुत्वैवं च प्रतिबुद्धस्तत्पादान्तेऽग्रहीद् व्रतम् । गीतार्थश्चाभिजग्राह वैया[20]वृत्त्यं स साधुषु ॥२९॥
¶बाल-ग्लानादिसाधूनां वैया[21]वृत्त्यकरं च तम् । [22]अनिर्विण्णं सभामध्ये प्रशशंस पुरन्दरः ॥३०॥

---

१. नीलोत्तरीयवस्त्रेणेव । २.**यदोरथाभवत्** मु० । ३. **सूरः** खं०२, ता०सं० । ४. **सूर०** खं० २ । ५. **शौरिपुरं** सू० । ६. **दत्त्वा भोजकवृष्णाये** मु० । ७. **विधाया०** ता०सं० । ८. **निधायान्धक०** मु० । ९. **०मुनिपार्श्वे** खं० २ । १०. पुत्राः । ११. दरिद्रः । १२. बृहदुदरवान् । १३. **दन्तुरश्चिल्ल०** पु० दीर्घदन्तः । १४. 'क्लिन्ननेत्रः' लाटि. । १५. **०श्चतुरश्र०** खं० १ । चतुष्कोणशिराः । १६. परिणयनयोग्याः । १७. **तत्राद्या यौवना** मु० । १८.प्रतिज्ञा । १९. **निरूप्य** की० पु० । २०. **वैयावृत्ति** सं० । **वैयावृत्तं** की० । २१. **वैयावृत्तिकरं** सं० । २२. **उपविष्टः** पु०; खेदरहितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अश्रद्दधत् **शक्र**वचो ग्लानसाधुवपुर्धरः । सुरो **रत्नपुरा**भ्यर्णे[1]ऽरण्ये कोऽपि समाययौ ॥३१॥
द्वितीय[2]साधुवेषं च कृत्वा तद्वसतिं ययौ । कवले पारणायाऽऽत्ते[3] **नन्दिषेणं** जगाद च ॥३२॥
वैयावृत्त्यं[4] प्रतिज्ञाय कथं भो ! भोक्ष्यसेऽधुना ? । यद्बहिः क्षुत्तृषाक्रान्तो मुनिरस्त्यतिसारकी[5] ॥३३॥
मुक्त्वाऽन्नं[6] पानमन्वेष्टुं **नन्दिषेणो**ऽथ निर्ययौ । अनेषणीयं तच्छक्त्या देवः कर्तुं प्रचक्रमे ॥३४॥
मुनेर्लब्धिमतस्तस्य प्रभावात् तद्विजृम्भितम् । न प्राभवत् ततः प्राप शुद्धं पानं स कुत्रचित् ॥३५॥
जगाम **नन्दिषेणश्च** ग्लानर्षेस्तस्य सन्निधौ । स तेन मायामुनिना चुक्रुशे परुषाक्षरम् ॥३६॥
अहमीदृगवस्थोऽस्मि त्वं तु भोजनलम्पटः । न शीघ्रमागास्तद्धिक् ते वैयावृत्त्यप्रतिश्रवम्[7] ॥३७॥
**नन्दिषेणो**ऽप्यवोचत् तं सहस्वाऽऽगं[8] इदं मम । सज्जं त्वां विदधाम्येष इदं पानं तवोचितम् ॥३८॥
पाययित्वा[9] स तं पानमुत्तिष्ठेति जगाद च । ग्लानोऽप्युवाच धिग् मुण्ड ! किं मां नाऽक्षम[10]मीक्षसे ? ॥३९॥
¶अथ मायामुनिं स्कन्धमारोप्य प्रचलंस्ततः । आचुक्रुशे **नन्दिषेणः** स तेनैवं पदे पदे ॥४०॥
अरे ! शीघ्रं व्रजन् किं मां दुनोर्ष्यन्दोलनैर्भृशम्[11] ? । शनैः शनैर्गच्छ सत्यं वैयावृत्त्यकरोऽसि[12] चेत् ॥४१॥
इत्युक्तोऽतिशनैः सोऽगात् तस्योपरि च सोऽमरः । वर्चश्चक्रे[13]ऽब्रवीच्चैवं वेगभङ्गं करोषि किम् ? ॥४२॥
अयं महर्षिरुल्लाघः[14] कथं स्यादिति चिन्तयन् । नाऽजीगणत् तद्वचांसि **नन्दिषेणः** कटून्यपि ॥४३॥
वर्चोऽपहृत्याऽथ मुनौ पुष्पवृष्टिं व्यधात् मुदा । त्रिस्तं[15] प्रदक्षिणीकृत्य दिव्यरूपोऽनमच्च सः ॥४४॥
तां प्रशंसां शक्रकृतां तस्मै देवः शशंस सः । क्षमयित्वा तुभ्यमहं किं ददामीत्युवाच च ॥४५॥
ऊचे मुनिर्मया लब्धो धर्मः परमदुर्लभः । सारं[16] नाऽतः परं किञ्चिदिह त्वत्तो यदर्थये ॥४६॥
इत्युक्तो द्यां ययौ देवः स्वाश्रयं मुनिरप्यगात् । पृष्टश्च साधुभिः सर्वमनुत्सिक्तः[17] शशंस सः ॥४७॥
द्वादशाब्दसहस्राणि तपस्तेपे स दुस्तपम् । विहितानशनश्चाऽन्ते निजं दौर्भाग्यमस्मरत् ॥४८॥
तपसाऽनेन भूयासं रमणीजनवल्लभः । एवं निदानं कृत्वा स **महाशुक्रे** सुरोऽभवत् ॥४९॥
ततश्च्युत्वा[18] **नन्दिषेणस्त**व सूनुरभूदसौ । **वसुदेव**स्तन्निदानाद् रमणीनां मनोहरः ॥५०॥
ततो राज्येऽ**न्धकवृष्णिः समुद्रविजयं** न्यधात् । स्वयं तु[19] **सुप्रतिष्ठा**न्ते प्रव्रज्य प्रययौ शिवम् ॥५१॥
¶प्राव्राजीद् **भोजवृष्णिश्च मथुरायां** ततोऽभवत् । **उग्रसेनो** नृपस्तस्य महिषी **धारिणी** पुनः ॥५२॥
**उग्रसेनो**ऽन्यदा गच्छन् बहिः कमपि तापसम् । स्थितं क्वाऽपि रहोदेशे[20]ऽद्राक्षीन्मासोपवासिनम् ॥५३॥
तस्य चैषोऽभिग्रहोऽभून्मासोपवासपारणम् । करिष्याम्येकवेश्मात्तभिक्षया नाऽन्यथा पुनः ॥५४॥
मासे मासे पारणं स कृत्वैकगृहभिक्षया । रहःप्रदेशं तमगान्न पुनः सदनान्तरे ॥५५॥
पारणा**योग्रसेन**स्तं निमन्त्र्य प्रययौ गृहम् । अन्वागात् तापसः सोऽपि विस्मृतश्च महीपतेः ॥५६॥
अभुक्त एव स मुनिर्निजमेवाऽऽश्रयं[21] ययौ । तथैव मासक्षर्मणं[22] भूयोऽपि प्रत्यपद्यत ॥५७॥
कथञ्चित् तत्र चाऽऽयातो राजाऽपश्यत् पुनश्च तम् । स्मृत्वा निमन्त्रणं तच्च क्षमयामास चाटुभिः ॥५८॥
पुनर्निमन्त्रयामास विसस्मार पुनस्तथा । आगत्याऽभुक्त एव स्वं स्थानं स पुनरभ्यगात् ॥५९॥
स्मृत्वा भूयोऽपि तं राजा क्षमयामास पूर्ववत् । न्यमन्त्रयत भूयोऽपि चुकोपाऽथ स तापसः ॥६०॥
तपसाऽनेन भूयासं वधायाऽस्य भवान्तरे । एवं कृत्वा निदानं सोऽनशनेन व्यपद्यत ॥६१॥
¶सोऽ**थोग्रसेन**भार्याया **धारिण्या** उदरेऽभवत् । तस्याश्च दोहदो जज्ञे पत्युः पलल[23]भक्षणे ॥६२॥

---

१. ०**भ्यर्णारण्ये** मु० र० । २. **द्वितीयः** खं०२, ला०, र० । **द्वितीयं** खं० १ । ३. **पारणायत्ते** मु० । ४. **वैयावृत्तिं** सं० । ५. अतिसार-रोगी । ६. **पानं गवेषयामीति** ला० सू० । ७. ०**प्रतिग्रहम्** ला० र० । ०**प्रतिश्रुतम्** की० । ८. आगः-अपराधम् । ९. **पाययिष्याम्यहं** ला० । १०. नाऽसमर्थम् । ११. **दुनोष्यान्दो०** मु० । १२. **वैयावृत्यं करोषि** मु० । १३. विष्ठाम् । १४. नीरोगः । १५. **तं त्रिः** खं० २ । १६. **वरं** ता.सं. । १७. निर्गर्वः । १८. **ततश्च्युत्वा सूर्यपुरे रूपसौन्दर्यभूरसौ** की० पु० । १९. **च** खं०२ । २०. एकान्ते । २१. ०**वाश्रमं** खं० १,ला०,मु० । २२.०**क्षपणं** खं० २, सू० । २३. मांसभक्षणे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिने दिने क्षीयमाणा लज्जमाना च **धारिणी** । कथञ्चित् कथयामास तं पत्येऽधमदोहदम् ॥६३॥
राज्ञो ध्वान्त[1]स्थितस्याऽथोदरे न्यस्य शशा[2]मिषम् । छित्वा छित्वा प्रपश्यन्त्या देव्यास्तन्मन्त्रिणो ददुः ॥६४॥
सा पूर्णदोहदा [3]मूलप्रकृतिं पुनरागता । ऊचे किं जीवितव्येन ? किं गर्भेण विना पतिम् ? ॥६५॥
मर्तुकामां मन्त्रिणस्तामूचुर्यत्प्राप्तजीवितम् । स्वामिनं दर्शयिष्यामः सप्तरात्रेण ते पुनः ॥६६॥
इत्थं [4]स्वस्थीकृतायाश्च तस्या अहनि सप्तमे । तेऽदर्शयन्नुग्रसेनं सा चक्रे च महोत्सवम् ॥६७॥
पौषकृष्णचतुर्दश्यां भद्रा[5]यां [6]मूलगे विधौ । शर्वर्यां सुषुवे सूनुं **सोग्रसेन**महिष्यथ ॥६८॥
दोहदेनापि सा गर्भाद् भीता तं जातमात्रकम् । चिक्षेप कांस्यपेटायां कारितायां पुराऽपि हि ॥६९॥
राजस्वनामाङ्कमुद्राद्वययुक्तां सपत्रिकाम् । सा दास्याऽक्षेपयद्रत्नपूर्णां तां **यमुना**जले ॥७०॥
सूनु[7]र्जातो मृतश्चेति राज्ञे राज्ञी शशंस च । नद्या निन्ये च मञ्जूषा द्वारे **शौर्यपुर**स्य सा ॥७१॥
¶प्रातः शौचार्थमायातः **सुभद्रो** रसवाणिजः । ददर्श कांस्यपेटां तां चकर्ष च बहिर्जलात् ॥७२॥
पत्रिका-रत्नमुद्राभिः सहितं तं च बालकम् । [8]बालेन्दुमिव तन्मध्ये स ददर्श सविस्मयः ॥७३॥
पेटादिना सहाऽऽदाय बालं नीत्वा च वेश्मनि । पुत्रत्वेनाऽऽर्पयन्निन्दोः[9] स्वपत्न्या मुदितो वणिक् ॥७४॥
**कंस** इत्यभिधां तस्य चक्रतुस्तौ तु दम्पती । वर्धयामासतुस्तं च मधु-क्षीर-घृतादिभिः ॥७५॥
स वर्धमानः कलहशीलो डिम्भा[10]नकुट्टयत् । एयुश्च लोकोपालम्भा वणिजोः प्रत्यहं तयोः ॥७६॥
ततस्ताभ्यां दशवर्षः सेवकत्वेन सोऽर्पितः । **वसुदेव**कुमारस्य सोऽभूत् तस्याऽप्यतिप्रियः ॥७७॥
सोऽपठद् **वसुदेवेन** सहैव सकलाः कलाः । सममेव च चिक्रीड सममाप च यौवनम् ॥७८॥
**वसुदेव**कुमारश्च **कंस**श्च सहवर्तिनौ । एकराशिगतौ सौम्य[11]-भौमाविव विरेजतुः[12] ॥७९॥
¶इतः **शुक्तिमती**[13]पुर्यां **सुव**[14]**सुर्वसुनन्दनः** । नंष्ट्वा **नागपुरे** यो[15]ऽगात् तत्पुत्रोऽभूद् **बृ**[16]**हद्रथः** ॥८०॥
पुरे **रा**[17]**जगृहे** सोऽगात् तत्र तत्सन्ततावभूत् । **बृ**[18]**हद्रथो** नाम नृपो **जरासन्ध**[19]**श्च** तत्सुतः ॥८१॥
प्रतिविष्णुः प्रचण्डाज्ञस्त्रिखण्ड**भरतेश्वरः** । स दूतेनैवमादिक्षत् **समुद्रविजयं** नृपम् ॥८२॥
¶**वैताढ्य**पर्वताभ्यर्णे पुरे **सिंहपुरे** नृपम् । दुःसहं सिंहवत् **सिंहरथं** बद्ध्वा समा[20]नय ॥८३॥
तदानेतुश्च दास्यामि स्वां **जीवयशसं** सुताम् । अभीप्सितं किञ्चिदेकं पुरं च प्रवरर्द्धिकम् ॥८४॥
**समुद्रविजयं** नत्वा **वसुदेवो**ऽभ्ययाचत । तत्कर्तुं दुष्करमपि **जरासन्धस्य** शासनम् ॥८५॥
**समुद्रविजयो**ऽप्यूचे न युद्धावसरस्तव । कुमार ! सुकुमारस्य तदलं याच्ञयाऽनया ॥८६॥
भूयोऽपि **वसुदेवेन** नि[21]र्बन्धाद् याचितो नृपः । बह्वीभिः सह सेनाभिः कथञ्चिद् विससर्ज तम् ॥८७॥
¶द्रुतं च **वसुदेवो**[22]ऽगादभ्यागात् सोऽपि सम्मुखः । [23]राजा सिंहरथो युद्धं द्वयो[24]श्च ववृते महत् ॥८८॥
[25]व्यद्रावयत् **सिंहरथो वसुदेव**स्य तां चमूम् । **वसुदेवः** स्वयं योद्धुं ढुढौके **कंस**सारथिः ॥८९॥
युयुधाते ततश्चोभौ विविधैरायुधैश्चिरम् । सुरा-ऽसुराविवाऽमर्षादन्योऽन्यं[26] जयकाङ्क्षिणौ ॥९०॥
हित्वाऽथ **कंसः** सारथ्यं परिघेन[27] महीयसा । दृढं **सिंहरथरथं**[28] मङ्क्ष्वभाङ्क्षीन् महाभुजः ॥९१॥

---

१. अन्धकारे स्थितस्य । २. शशमांसम् । ३. पूर्णप्रकृतिं खं० १ । ४. **सुस्थीकृतायास्तु** खं० १ । ५. **भद्रया** ला० । ६. मूलनक्षत्रगते चन्द्रे । ७. **पुत्रो जातो** पु० । ८. **जालेन्दु०** सू० । ९. निन्दुः मृतापत्यजननी । १०. बालान् । ११. बुध-मङ्गलग्रहौ । १२. **विचेरतुः** खं० १ । १३. **०पुर्याः** खं० १, ला० । १४. **नवमो वसुनन्दनः** खं० १, ला०पा०ला० २,आ०,मु० । १५. **सो०** खं० २ । १६. **०महारथः** ला० । १७. **राजपुरे** ला०पा. । १८. **जयद्रथो०** मु० । **जयरथो०** ता.सं.ला० २ । १९. **०सन्धोऽस्य चात्मजः** खं० २, ला० मु० । २०. **तमानय** खं० २ । २१. आग्रहात् । २२. **०गादथागात्** खं० २; ला०आ.मु० ला १ विना च । २३. **राजसिंहरथो०** सं. ता०पु०छा० । २४. **द्वयोः प्रववृते** खं० २ । **०श्च ववृधे** ता०सं०ला० १-२ । २५. 'अत्रासयत्' लाटि. । २६. **०ऽन्यजय०** खं० २ । २७. **परिघेण** मु० । २८. **०रथमभाङ्क्षीच्च** ला० । **खं० २** संज्ञकप्रतौ टिप्पणी - यदु, सूर, शौरि, अन्धगवृष्णि, समुद्रविजयाद्या; नेमि; वसुदेव, वासुदेव ॥ यदु, सूर, सुवीर, भोजवृष्णि, उग्रसेन, राजीमती ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कंसं** हन्तुं **सिंहरथश्चकर्षा**ऽसिं ज्वलन् क्रुधा । [1]त्सरुदेशे क्षुरप्रेण **वसुदेवश्चकर्त्त** च ॥९२॥

छागं वृक इवोत्क्षिप्य बद्ध्वा **सिंहरथं** ततः । **वसुदेवरथे**ऽक्षैप्सीत् **कंसश्छलबलोत्कटः** ॥९३॥

भग्ने **सिंहरथानीके** [2]**वार्ष्णेयो**ऽपि ततो जयी । आदाय तं **सिंहरथं** क्रमेण स्वपुरं ययौ ॥९४॥

¶**वसुदेवं** रहस्यूचे **समुद्रविजयो** नृपः । यद् ज्ञानी **क्रोष्टुकि**[3]र्नामाऽशंसन् मम हितं ह्यदः ॥९५॥

**जरासन्धस्य** [4]कन्येयं नाम्ना **जीवयशा** इति । अलक्षणा पति-पितृकुलक्षयकरी खलु ॥९६॥

**जरासन्धः सिंहरथानयने** पारितो[5]षिके । तां ते दास्यति तत्त्यागोपायः कोऽपि विभाव्यताम् ॥९७॥

प्रत्यूचे **वसुदेवो**ऽपि **कंसः सिंहरथं** रणे । बद्ध्वाऽनैषीत् ततस्तस्मै देया **जीवयशाः**[6] खलु ॥९८॥

राजाऽप्यूचे वणिक्पुत्र इति तां स न लप्स्यते[7] । विक्रमात् क्षत्रिय इव परमेष विभाव्यते ॥९९॥

धर्मं[8] दत्त्वा[9]ऽन्तरे राज्ञा पृष्टो[10]ऽथ रसवाणिजः । **कंसस्य** शृण्वतोऽप्याख्यात्[11] **कंसवृत्तान्त**मादितः ॥१००॥

ते **उग्रसेन-धारिण्यो**[12]र्मुद्रिके पत्रिकामपि । **सुभद्रो**ऽथाऽऽर्पयद्राज्ञे पत्रिकां सोऽप्यवाचयत् ॥१०१॥

'**उग्रसेनसधर्मिण्या**[13] **धारिण्या** दोहदादपि । भीतया स्वपतिं त्रातुं त्यक्तः प्राणप्रियः सुतः ॥१०२॥

नाममुद्रासमेतोऽसौ सर्वाभरणभूषितः । क्षिप्त्वाऽन्तःकांस्यमञ्जूषं **यमुनायां** प्रवाहितः' ॥१०३॥

वाचयित्वेति [14]राज्ञोचे **यादवो**ऽयं महाभुजः । **औग्रसेनि**[15]रितरथा वीर्यं स्यात् कथमीदृशम् ? ॥१०४॥

**कंसेन** सह राजाऽथ **जरासन्धार्धचक्रिणे** । गत्वाऽर्पयत् **सिंहरथ**मथाऽऽख्यत् **कंसविक्रमम्** ॥१०५॥

**कंसायाऽदाज्जरासन्धः** स्वां **जीवयशसं** सुताम् । [16]पुरीं च **मथुरां** तेन पितृरोषेण याचिताम् ॥१०६॥

**जरासन्धार्पितबलो मथुरायामुपेत्य** च । **कंसो** नृशंसः पितरं बद्ध्वा चिक्षेप पञ्जरे ॥१०७॥

**उग्रसेनस्य** चाऽभूवन्नतिमुक्तादयः सुताः । **अतिमुक्तः** पितृदुःखात् प्रव्रज्यामाददे तदा ॥१०८॥

आनाय्य **शौर्यनगरात्**[17] **सुभद्रं** रसवाणिजम् । कृतज्ञमानी सच्चक्रे **कंसः** स्वर्णादिदानतः ॥१०९॥

[18]अबद्धा **धारिणी** [19]तूचे **कंसं** स्वपतिमुक्तये । कथञ्चिदपि तद्वाचा पितरं व्यमुचन्न सः ॥११०॥

मयाऽयं कांस्यपेटायां क्षिप्त्वा नद्यां प्रवाहितः । **नोग्रसेनो** विवेदेदं निरागा[20] सर्वथा ह्यसौ ॥१११॥

सापराधाऽहमेवेह मोच्यतामेष मे पतिः । इत्यन्वहं **कंसमान्यान्** गृहेष्वेत्य जगाद सा ॥११२॥ युग्मम् ॥

तेषामपि गिरा **कंस उग्रसेनं** मुमोच न । पूर्वजन्मनिदानं हि नाऽन्यथा जातु जायते ॥११३॥

¶**जरासन्धेन** सत्कृत्य विसृष्टः स्वपुरं ययौ । राजा **समुद्रविजयो**ऽप्यन्वितो भ्रातृभिर्निजैः ॥११४॥

**वसुदेवं शौर्यपुरे** [21]भ्राम्यन्तं सर्वदाऽन्वयुः । मन्त्राकृष्टा इव भृशं पौर्यः[22] सौभाग्यमोहिताः ॥११५॥

[23]स्त्रैणकार्मणसौभाग्यः क्रीडयेतस्ततो भ्रमन् । निनाय कालं कमपि **समुद्रविजयानुजः** ॥११६॥

अन्येद्युरेत्य राजानं रहस्यूचे महाजनः । **वसुदेवस्य** रूपेणाऽमर्यादः स्त्रीजनोऽभवत् ॥११७॥

**वसुदेवं** यैकदाऽपि पश्येत् सा विवशैव हि । भूयो भूयः सञ्चरन्तं याः पश्यन्ति कथं नु[24] ताः ? ॥११८॥

ईप्सितं वः करिष्यामीत्युक्त्वा तान् व्यसृजन्नृपः । **वसुदेवाय** नाऽऽख्येयमित्यूचे च[25] परिच्छदम् ॥११९॥

अपरेद्यु**र्वसुदेवं** नमस्कर्तुमुपागतम् । निजोत्सङ्गं समारोप्य **समुद्रविजयो**ऽवदत् ॥१२०॥

क्रीडापर्यटनेनाऽपि कृशीभूतोऽसि तद्दिवा । बहिर्न गम्यं भवता स्थेयं मद्गृह एव हि ॥१२१॥

कला गृहाणाऽभिनवाः प्रागधीताश्च संस्मर । भविष्यति विनोदस्ते वत्स ! गोष्ठ्या कलाविदाम् ॥१२२॥

---

१. त्सरुः खड्गमुष्टिः । २. वसुदेवः । ३. ०**किर्नामाचख्यौ** खं० १, ला०मु० । ४. **कन्यैषा** खं० २ । ५. ० **तोषिकम्** ला० आ० मु० विना; खं० २ विना । ६. ०**यशास्ततः** ला०आ.मु० खं० १ विना । ७. **लिप्सते** मु० । ८. **धनं** ता०सं० । ९. धर्मस्य शपथं दत्त्वा इत्यर्थः । १०. **पृष्टोऽसौ** ता.सं. । ११.०**ऽप्याख्यत्** खं० २, ला०सू० । १२. **धारिण्यामु०** मु० । १३. पत्न्या । १४. **राजोचे** पा०ला १-२, आ०खं० १-२, ला० विना । १५. कंसः । १६. **पुरं** ला० । १७. **सौर्य०** खं०२ । १८. **अन्यदा** पु० । १९. **ऊचे** खं० १ । ०**त्यूचे** ला० । २०. निरपराधः । २१. **भ्रमन्तं** ला०मु०खं० १-२, ला० सू० । २२. नगरस्त्रियः । २३. स्त्रीणां कार्मणे-आकर्षणे सौभाग्यवान् । २४. **तु** मु० । २५. **वः** ला०मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आमेत्युक्त्वा **वसुदेवो** विनीतोऽस्थात् तथैव हि । विनोदैर्गीत[1]नृत्ताद्यैर्दिवसानतिवाहयन् ॥१२३॥
तत्राऽऽपतन्तीं सोऽन्येद्युः **कुब्जिकां** गन्धधारिणीम् । पप्रच्छाऽयं कस्य कृते गन्धः ? साऽप्येवमब्रवीत् ॥१२४॥
गन्धद्रव्यं कुमारेदं **शिवादेव्या**ऽधुना स्वयम् । श्रीमत्**समुद्रविजय**निमित्तं प्रेषितं खलु ॥१२५॥
ममाऽप्युपकरोत्येतदिति जल्पन् जहार तत् । गन्धद्रव्यं **वसुदेव**कुमारो नर्मलीलया ॥१२६॥
सरोषा साऽप्युवाचैवं चरितेनाऽमुनैव हि । नियन्त्रितस्तिष्ठसीह तेना[2]ऽप्यूचे कथं न्विति ? ॥१२७॥
साऽऽचख्यौ भीतभीता च पौरवृत्तान्तमादितः । रहस्यं खलु नारीणां हृदये न चिरं स्थिरम् ॥१२८॥
पौरीभ्यः स्वं रोचयितुं **वसुदेवो** भ्रमत्यसौ । एवं मां मन्यते राजा कृतं वासेन मेऽत्र तत् ॥१२९॥
एवं विचिन्त्य तां दासीं विसृज्य च दिनात्यये । कृत्वा गुटिकया वेषान्तरं स निरगात् पुरात् ॥१३०॥ युग्मम् ॥
बहिर्गत्वाऽकरोच्चित्यां श्मशानासन्नदारुभिः । अनाथं मृतकं कं[3]चिज्ज्वालयामास तत्र च ॥१३१॥
गुरूणां क्ष[4]मणार्थं तु स्तम्भे चैकत्र पत्रकम् । लिखित्वा निजहस्तेन **वसुदेवो** व्यलम्बयत् ॥१३२॥
'दोषत्वेनाऽभ्यधीयन्त गुरूणां यद्गुणा जनैः । इति जीवन्मृतंमन्यो **वसुदेवो**ऽनलेऽविशत् ॥१३३॥
ततः सन्तमसन्तं वा दोषं मे स्ववितर्कितम् । सर्वे सहध्वं गुरवः ! पौरलोकाश्च मूलतः' ॥१३४॥
इति कृत्वा [5]**वसुदेवं** वि[6]प्रवेषमवर्त्मना । भ्रान्त्वा सन्मार्गगं दृष्ट्वा रथस्था काचिदङ्गना ॥१३५॥
पितृवेश्म व्रज[7]न्त्यम्बामूचे श्रान्तममुं द्विजम् । आरोपय रथे, साऽपि तत्कृत्वा ग्राममासदत् ॥१३६॥ युग्मम् ॥
तत्र च स्नात-भुक्तः स सायं यक्षगृहं गतः । **वसुदेवः** प्रविष्टोऽग्निमिति विज्ञाय यादवाः ॥१३७॥
[8]क्रन्दन्तः सपरीवाराः प्रेतकार्याणि चक्रिरे । श्रुत्वेति वार्तां निश्चिन्तो **विजयखेटे**ऽगात्पुरे ॥१३८॥
**सुग्रीव**स्तत्र राजाऽभूत् तस्य चोभे कलाविदौ[9] । **श्यामा-विजयसेना**ख्ये कन्ये अतिमनोरमे ॥१३९॥
पर्यणैषीद् **वसुदेवः** कला[10]जयपणेन ते । रममाणः समं ताभ्यां तत्र चाऽस्थाद् यथासुखम् ॥१४०॥
पत्न्यां **विजयसेना**याम**क्रूरो** नाम नन्दनः । तत्राऽभूद् **वसुदेवस्य वसुदेव** इवाऽपरः ॥१४१॥
ततोऽपि प्रस्थितः प्रापदतिघोरां महाटवीम् । जलार्थी तत्र **वार्ष्णेयो जलावर्तं** ययौ सरः ॥१४२॥
दधावे तत्र कोऽपीभो **विन्ध्याद्रि**रिव जङ्गमः । खेदयित्वा कुमारस्तमारुरोह मृगेन्द्रवत् ॥१४३॥
गजारूढं च तं दृष्ट्वाऽ**र्चिर्मालि-पवनञ्जयौ** । खेचरौ **कुञ्जरावर्तो**द्याने नीत्वा व्यमुञ्च[11]ताम् ॥१४४॥
तत्र विद्याधराधीशोऽ**शनिवेगः** स्वकन्यकाम् । **श्यामां** नाम ददौ तस्मै रेमे च स तया सह ॥१४५॥
वीणावाद्येन **वार्ष्णेय**स्तस्यास्तुष्टो ददौ वरम् । अवियोगस्त्वया मे स्तादित्ययाचत साऽपि हि ॥१४६॥
¶[12]किंकारणो वरोऽसावित्युदिते तेन साऽब्रवीत् । **वैताढ्ये किन्न[13]रगीते** पुरेऽ**र्चिर्माल्य**भून्नृपः ॥१४७॥
तस्याऽभू**ज्ज्वलनवेगो**-ऽ**शनिवेग**श्च नन्दनौ । विन्यस्य **ज्वलनं** राज्येऽ**र्चिर्माली** व्रतमाददे ॥१४८॥
[14]**ज्वलनस्य विमलायां** सूनुर**ङ्गारको**ऽभवत् । अहं त्व**शनिवेग**स्य दुहिता **सुप्रभा**भवा ॥१४९॥
**ज्वलनो**ऽप्य**शनिवेगं** राज्ये न्यस्य दिवं ययौ । विद्याबलात् तं निर्वास्य राज्य**मङ्गारको**ऽग्रहीत् ॥१५०॥
मत्पिताऽ**ष्टापदे**ऽथाऽगात् तत्रैकं चारणं मुनिम् । पप्रच्छाऽ**ऽङ्गिरसं** नाम राज्यं मे भावि किं न वा ? ॥१५१॥
¶मुनिराख्यत् त्वद्दुहितृ**श्यामा**भर्तृप्रभावतः । राज्यं ते भावि स ज्ञेयो **जलावर्ते**भनिर्जयात् ॥१५२॥
मुनिवाक्प्रत्ययादस्थौ[15]न्निवेश्याऽत्र पुरं पिता । प्रैषीद् द्वौ खेचरौ तत्र **जलावर्ते** सदैव हि ॥१५३॥
जित्वाऽऽरूढो गजं ताभ्यां प्रेक्ष्याऽऽनीतस्त्वमत्र च । मत्पित्राऽ**शनिविगे**न मया चोद्वाहितः प्रभो ! ॥१५४॥
¶पुरा च **धरणेन्द्रेण** नागेन्द्रेण महात्मना । विद्याधरैश्च सम्भूय [16]समयोऽयं प्रतिष्ठितः ॥१५५॥

१. **०नृत्या०** मु० र० । २. **तामप्यूचे** सं. १ । ३. **किञ्चि०** खं० १-२ । ४. **क्षामणार्थं** ला० । ५. **वसुदेवो** ला०सू० । ६. **०वेषोऽन्य वर्त्मना** सू० । अवर्त्मना-उन्मार्गेण । ७. **व्रजन्ती स्वानूचे** सू० । ८. **रुदन्तः** पा०ला०१, आ. । ९. **कलाविदे** खं० १ । १०. कलासु जय एव पणः-प्रतिज्ञा,तेन । ११. **व्यमुञ्चतम्** खं०२,सू० । १२. एतादृशवरयाचने किं कारणम् । १३. **किन्नरागीते** खं० २ । १४. **ज्वलनस्यार्चिमालायां** ला १ । १५. **०प्रत्ययात्तस्थौ** मु० । १६. आचारः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हच्चैत्यसमासन्नं सस्त्रीकं साधुपार्श्वगम् । यो हनिष्यति सद्विद्योऽप्यविद्यः स भविष्यति ॥१५६॥
इत्यस्मात् कारणात् स्वामिन्नवियोगो वृतो मया । मा[1] व एकाकिनः पापोऽङ्गारकः [2]प्रमथीदिति ॥१५७॥
प्रतिपद्येति तद्वाचं दशमोऽन्धक[3]वृष्णिभूः । तया सह कलाभ्यासविनोदैः कालमत्यगात् ॥१५८॥
॥तया सहाऽन्यदा सुप्तं तं जह्रेऽङ्गारको निशि । प्रबुद्धो वसुदेवोऽपि को मां हर्तेत्यचिन्तयत् ॥१५९॥
अङ्गारकं स प्रैक्षिष्ट श्यामा[4]ननसमाननम् । श्यामां च तिष्ठ तिष्ठेति जल्पन्तीमसिधारिणीम् ॥१६०॥
तामङ्गारो द्विधाऽकार्षीद् वसुदेवश्च पीडितः । द्वे श्यामे अभितोऽङ्गारं युद्ध्यमाने ददर्श च ॥१६१॥
इयं मायेति निश्चित्य वसुदेवोऽथ मुष्टिना । जघानाऽङ्गार[5]कं मूर्ध्नि पविनेवाऽचलं [6]हरिः ॥१६२॥
प्रहारार्त्तेन वार्ष्णेयस्तेन मुक्तो नभस्तलात् । पपात पुर्याश्चम्पाया बहिः सरसि विस्तृते ॥१६३॥
तत्सरो हंसवत् तीर्त्वा तत्तीरोपवनस्थितम् । वसुदेवो वासुपूज्यायतनं प्राविशत् सुधीः ॥१६४॥
श्रीवासुपूज्यं वन्दित्वा निशाशेषमतीत्य च । ययौ स चम्पामेकेन मिलितेन द्विजन्मना ॥१६५॥
वीणापा[7]णींस्तत्र यूनः स्थाने स्थाने निरीक्ष्य सः । द्विजं पप्रच्छ तद्धेतुं द्विजोऽप्येवमभाषत ॥१६६॥
श्रेष्ठीह चारुदत्तोऽस्ति तस्य रूपवती सुता । नाम्ना गन्धर्वसेनेति कलानामेकमास्पदम् ॥१६७॥
गा[8]न्धर्वे यो विजेता मे स भर्तेति प्रतिश्रवः । तस्यास्तेनैष सर्वोऽपि गा[9]न्धर्वनिरतो जनः ॥१६८॥
मासे मासे च सुग्रीव-यशोग्रीवाभिधानयोः । गा[10]न्धर्वाचार्ययोरग्रेऽ[11]नुयोगोऽत्र प्रवर्तते ॥१६९॥
प्रकृ[12]ष्टं तत्र सुग्रीवं [13]विप्ररूपेण वृष्णि[14]सूः । गत्वोवाच स्कन्दिलोऽहं विप्रो गौतमगोत्रजः ॥१७०॥
अहं गन्धर्वसेनार्थी गान्धर्वं तव सन्निधौ । अध्येष्ये प्रतिपद्यस्व शिष्यं मां दूरदेशिनम् ॥१७१॥
तं मूर्ख इति सुग्रीवोऽनादरेण समीपगम् । चकार मन्दधीर्धूलिच्छ[15]न्नैरत्नमिवाऽविदन् ॥१७२॥
वार्ष्णेयो हासयन् लोकान् ग्राम्योक्त्या स्वं च गोपयन् । गा[16]न्धर्वाध्ययनव्याजात् तस्थौ सुग्रीवसन्निधौ ॥१७३॥
सुग्रीवभार्यया वाददिने शौरेः समर्पितम् । वासोयुग्मं सुतस्येव स्नेहाद् विशदशोभनम् ॥१७४॥
प्राक्श्यामादत्तनेपथ्यं तच्च वासोद्वयं नवम् । [17]पर्यधत्त वसुदेवो जनयन् जनकौतुकम् ॥१७५॥
एहि मन्येऽद्य गन्धर्वसेनां जे[18]ष्यसि विद्यया । अतिगान्धर्व[19]विज्ञोऽसीत्यहस्यत स नागरैः ॥१७६॥
[20]तन्नर्मभिः प्रीयमाणः स ययौ तत्र पर्षदि । सोपहासैर्नरैरुच्चासनमध्यास्यते स्म [21]च ॥१७७॥
॥गन्धर्वसेना तत्राऽऽगाद् भूचरीव [22]द्युसद्वधूः । सा [23]गन्धर्वविदोऽजैषीद् बहून् स्व-परदेशिनः ॥१७८॥
स्वस्य वादक्षणे प्राप्ते समुद्रविजयानुजः । आविश्चक्रे निजं रूपं का[24]मरूपसुरोपमः[25] ॥१७९॥
गन्धर्वसेना तद्रूपं प्रेक्ष्य चुक्षोभ तत्क्षणात् । जनो विसिष्मिये सर्वः कोऽसाविति वितर्कयन् ॥१८०॥
लोकैर्या याऽर्पिता वीणा तां तां सोऽदूषयत् सुधीः । गन्धर्वसेना स्वां वीणां ततस्तस्याऽऽर्पयत् स्वयम् ॥१८१॥
सज्जयित्वा च तां वीणां स ऊचे सुभ्रु ! किं मया । अनया वीणया गेयं ? साऽप्येवं प्रत्यवोचत ॥१८२॥
मुनेर्विष्णुकुमारस्य प[26]द्मचक्र्य[27]ग्रजन्मनः । त्रिविक्रमाभिसम्बद्धं गीतं गीतज्ञ ! वादय ॥१८३॥
तथा जगौ च वार्ष्णेयः पुंवेषेव सरस्वती । यथा जिगाय गन्धर्वसेनां [28]पार्षद्यसम्मतम् ॥१८४॥
चारुदत्तस्ततः श्रेष्ठी व्यसृजद् वादिनोऽखिलान् । स्वगृहे वसुदेवं च गौरवेणाऽनयत् स्वयम् ॥१८५॥
विवाहकाले श्रेष्ठ्यूचे गोत्रमुद्दिश्य वत्स ! किम् ? । स्वकन्यासम्प्रदानं ते करोमि ब्रूहि सुन्दर ! ॥१८६॥

१. **मैवमेका०** ला० । २. **स वधीदिति** मु० । ३. **०वृष्णिसूः** मु० सं. १, ला० । ४. श्यामाननः कपिः, तेन समं आननं यस्य । ५. **०ङ्गारकमूर्ध्नि** खं० १, ला०, मु० । ६. इन्द्रः । ७. **०पाणीन् जनांस्तत्र** ला० । ८. **गन्धर्वे** ता. सं. ला० १, पु. । ९. **गान्धर्वे नि०** खं० २ । सङ्गीते । १०. **गन्धर्वा०** खं० २ । ११. परीक्षा । १२. **प्रकृष्टस्तत्र** खं० २ । १३. **विप्रवेषेण** ला०मु०, खं० १-२, ला० सू० । १४. **वृष्णिभूः** सू० । १५. **०र्धूलिच्छन्नं** रत्न० खं० २, ला० । १६. **गन्धर्वा०** खं० २ । १७. **पर्यधात्** की० । १८. **जेष्यति** खं० १ । १९. **०र्वविद्योऽसी०** ता. सं. । २०. उपहासैः । २१. **सः** मु० । २२. देवाङ्गना । २३. **गान्धर्व०** ला० । २४. **कामरूपं** मु० । २५. **०पमम्** ता० सं०की०ला०पा०मु० । २६. पद्मनामकस्य चक्रिणो ज्येष्ठबन्धोः । २७. **०नुजन्मनः** ता०सं०की० । २८. **पार्षद्यसंयुताम्** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्मित्वोचे **वसुदेवो**ऽपि वद यत् ते मतं कुलम् । श्रेष्ठ्यप्यूचे वणिक्पुत्रीत्यदस्ते स्मितकारणम् ॥१८७॥
समये कथयिष्यामि पुत्र्या वृत्तान्तमादितः । इत्युक्त्वाऽकारयच्छ्रेष्ठी विवाहं वर-कन्ययोः ॥१८८॥
तौ **सुग्रीव-यशोग्रीवौ** स्वे **श्यामा-विजया**द्वये । कन्यके **वसुदेवाय** ददतुर्गुणरञ्जितौ ॥१८९॥
अपरेद्युर्**वसुदेवं चारुदत्तो**ऽब्रवीदिति । शृणु **गन्धर्वसेनायाः** सर्वमद्य कुलादिकम् ॥१९०॥
¶इहैव पुर्यां श्रेष्ठ्यासीद् **भानु**र्नाम[1] महाधनः । तस्य भार्या **सुभद्रे**ति तावपुत्रत्वदुःखितौ ॥१९१॥
सुतजन्माऽन्यदा पृष्टस्ताभ्यां चारणो मुनिः । भावीत्याख्याय स ययौ क्रमा[2]च्चाऽहं सुतोऽभवम् ॥१९२॥
मित्रैः सहैकदा क्रीडन्नपश्यं सि[3]न्धुरोधसि । आकाशगामिनः कस्याऽप्यंह्रिन्यासं मनोहरम् ॥१९३॥
स्त्रीपदैः सप्रिय इति ज्ञातोऽसावग्रतोऽपि च । रम्भागृहं पुष्पतल्पं फलका-ऽसी च दृष्ट[4]वान् ॥१९४॥
तत्राऽदूरे लोहकीलैः खेचरं कीलितं द्रुणौ[5] । अद्राक्षं तदसेः कोशे चौषधीवलयत्रयम् ॥१९५॥
स तु तास्वेकयौषध्या स्वबुद्ध्या मोचितो मया । संरोहि[6]तोऽन्यया‌ऽकारि चेतनस्तु तृतीयया ॥१९६॥
¶स मामवोचद् **वैताढ्ये** नगरे **शिवमन्दिरे** । **महेन्द्रविक्रम**नृपात्मजो‌ऽ**मितगति**र्ह्यहम् ॥१९७॥
सुहृदा **धूमशिखेन गौरमुण्डेन** चाऽन्वितः । अहं क्रीडन्नेकदाऽगां **ह्रीमन्तं** वरपर्वतम् ॥१९८॥
**हिरण्यरोम्न**[7]स्तत्राऽहं स्वमातुलतपस्विनः । कुमारीं दृष्टवान् रम्यां नामतः **सुकुमालिकाम्** ॥१९९॥
गतः स्मरार्त्तः [8]स्वं स्थानं मित्राद् ज्ञात्वा च मां तथा । पित्रा सद्यः समानाय्य तयाऽहं परिणायितः ॥२००॥
रममाणस्तया सार्धमहमस्थामथाऽन्यदा । अभिलाषी **धूमशिख**स्तस्यां ज्ञातो मयेङ्गितैः ॥२०१॥
तथाऽप्यहं तेन सह व्यहार्षमिह चाऽऽगतः । प्रमत्तः कीलितस्तेन हृता च **सुकुमालिका** ॥२०२॥
भवता मोचितश्चा[9]स्मि ब्रूहि किं कर[10]वाणि ते ? । तवाऽकारणमित्रस्य येन स्यामनृणः सखे ! ॥२०३॥
अहं त्वद्दर्शनेनाऽपि कृतकृत्योऽस्मि सुन्दर ! । एवं मया भाषितोऽथ सोऽगादुत्पत्य खेचरः ॥२०४॥
¶अहं च गतवान् वेश्म मित्रैः क्रीडन् यथासुखम् । क्रमाच्च यौवनं प्राप्तः पित्रोर्नेत्रोत्सवं ददत् ॥२०५॥
**सर्वार्थ**मातुलसुतां नाम्ना **मित्रवती**महम् । ततः पित्रोर्निदेशेन शुभेऽह्नि परिणीतवान् ॥२०६॥
कलासक्तश्च तस्यां नाऽभूवं भोगपरायणः । तथा दृष्ट्वा पितृभ्यां च मुग्धोऽसाविति तर्कितः ॥२०७॥
ललितायां ततो गोष्ठ्यामहं वैदग्ध्यहेतवे । क्षिप्तः पि[11]तृभ्यां व्यचरं स्वैरं चोपवनादिषु ॥२०८॥
**कलिङ्गसेना**दुहितुः सदने विलसन्नहम् । **वसन्तसेना**वेश्याया द्वादशाब्दानि तस्थिवान् ॥२०९॥
व्ययितास्तत्र चाऽज्ञानात् षोडश स्वर्णकोटयः । **कलिङ्गसेन**या निःस्वं[12] इति निर्वासितोऽस्मि च ॥२१०॥
मृत्युं ज्ञात्वा ततः पित्रोर्दुःस्थो धैर्यं प्रपद्य च । [13]वाणिज्यार्थं स्वभार्याया भूषणानि गृहीतवान् ॥२११॥
¶मातुलेन सहाऽन्येद्युश्चलितो भूषणैस्तु तैः । [14]**उशीरवर्ति**नगरे कर्पासं क्रीतवानहम् ॥२१२॥
**ता[15]मलिप्त्यां** गच्छतो मे स कर्पासो दवाग्निना । दग्धो निर्भाग्य इति च मातुलेनाऽहमुज्झितः ॥२१३॥
¶अश्वारूढस्ततश्चैकोऽप्यचलं पश्चिमां-प्रति । विपन्नः सोऽपि चाऽश्वो मे पादचारी [16]ततोऽभवम् ॥२१४॥
[17]द्राघीयसाऽध्वना क्लान्तः क्षुत्-पिपासाकरालितः । अगां **प्रियङ्गुनगरं** वणिग्जनसमाकुलम् ॥२१५॥
दृष्टः **सुरेन्द्रदत्तेन** पितृमित्रेण तत्र च । पुत्रवद् वस्त्र-भोज्याद्यैः सत्कृतोऽस्थां यथासुखम् ॥२१६॥
[18]वृद्ध्याऽऽदाय द्रव्यलक्षं वार्यमाणोऽपि तेन[19] च । धनायोपात्तभाण्डोऽहं [20]यानेनाऽविशमम्बुधौ[21] ॥२१७॥
प्राप्याऽथ **यमुनाद्वीप**मन्तर्द्वीप-पुरादिषु । कुर्वन् गतागतं स्वर्णकोटिरष्टाऽहमार्जयम् ॥२१८॥
¶ततः स्वदेशाभिमुखं चलितोऽहं जलाध्वना । स्फुटितं यानपात्रं च फलकं चैकमासदम् ॥२१९॥

---

१. ०र्नामा खं० १ । २. **क्रमात्त्वहं** मु० । ३. समुद्रतीरे । ४. **वीक्षिताः** खं० २, सू०, ता.सं.ला० । **वीक्षितम्** पा०आ० । ५. वृक्षेण । ६. व्रणरहितः । ७. **०रोम्णा०** खं० २ । ८. **स्वस्थानं** खं० १ । ९. **०श्चास्मिन्** खं० १ । १०. **करवाण्यतः** छा० की० ला २, मु० । ११. **व्यचरं पितृभ्यां** खं० १ । १२. निर्धनः । १३. **वाणिज्यार्थं** मु० । १४. **उसीरवर्ते न०** खं० २ । १५. **ताम्र०** मु० । १६. **ततोऽचरम्** ता०सं० । १७. अतिदीर्घेण । १८. 'व्याज' इति भाषायाम् । १९. **तत्र** खं० २ । २०. **पोतेना०** ला० । २१. **०मम्बुधिम्** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तभिर्वासरैस्तेन तीर्णवानहमम्बुधिम् । **उदुम्बरावतीवेलं**[1] नाम तीरमुपागमम्[2] ॥२२०॥
तत्र [3]**राजपुरं** नाम कथमप्याप्तवान् पुरम् । बहिस्तस्याऽऽश्रमपदे गतोऽस्म्युद्दामपादपे ॥२२१॥
त्रिदण्डिनं **दिनकरप्रभ** इत्यभिधानतः । तत्राऽद्राक्षं परिव्राजं तस्याऽऽख्यं स्वकुलादिकम्[4] ॥२२२॥
¶तेन चाऽस्म्युपचरितः पुत्रवत् प्रीतचेतसा । अन्येद्युर्भणितश्चाऽहं धनार्थीव[5] विभाव्यसे ॥२२३॥
तदेहि वत्स ! गच्छावः पर्वतं तत्र ते रसम् । दास्यामि येन कनककोटयः स्युर्यथारुचि ॥२२४॥
एवं चोक्तस्तेन समं चलितोऽहं प्रमोदभाक् । अनेकसाधकां[6] प्राप्तोऽस्म्यपरेऽह्नि[7] महाटवीम् ॥२२५॥
गच्छन्तौ तस्य शैलस्य नितम्बेऽथ महाबिलम् । बहुयन्त्रशिलाकीर्णं गतौ यममुखोपमम् ॥२२६॥
मन्त्रेणोद्धाटयामास तद् द्वारं स त्रिदण्डिकः । प्रविष्टौ[8] **दुर्गपाताला**भिधानं तन्महाबिलम् ॥२२७॥
भ्रान्त्वा तत्र बहु प्राप्तौ[9] कूपं रसनिकेतनम् । चतुर्हस्तप्रविस्तारं नरकद्वारदारुणम् ॥२२८॥
कूपान्तः प्रविशाऽऽदत्स्वाऽलाबुना[10] रसमित्यहम् । उक्तस्तद्धृतरज्ज्वाऽथ कूपे मञ्चिकयाऽविशम् ॥२२९॥
चतुष्पुरुषपर्यन्ते मेखलापरिवारितः । दृष्टो मया रसस्तत्र निषिद्धश्चाऽस्मि केनचित् ॥२३०॥
अवोचमहमप्येवं **चारुदत्तो**ऽस्मि वाणिजः । प्रवेशितो भगवता रसार्थं[11] किं निषेधसि ? ॥२३१॥
सोऽप्यवोचद् वणिगस्मि धनकाङ्क्षी त्रिदण्डिना । तेन क्षिप्तो रसकूपे बलये पशुमांसवत् ॥२३२॥
सोऽगात् पापोऽपरकायो[12] भक्षितश्च रसेन मे । मा विशस्तदिहाऽलाबुन्यहं क्षेप्स्यामि ते रसम् ॥२३३॥
ततो मयाऽर्पितालाबु पूरयित्वा रसेन सः । अबध्नान् मञ्चिकाधस्ताद् रज्जुं चाऽहमकम्पयम् ॥२३४॥
रज्जुमकर्षद्[13] भगवांस्तटासन्नगतं[14] स[15] माम् । अयाचद्रसपात्रं तत्र चोत्तारयति स्म सः[16] ॥२३५॥
तं च लुब्धं द्रोहिणं च ज्ञात्वा कूपेऽक्षिपं रसम् । समञ्चिकं सोऽक्षिपन् मां तत्र वेद्यामथाऽपतम् ॥२३६॥
स चाकारणबन्धुर्मामभाषत[17] विषीद मा । रसान्तर्न गतोऽसि त्वं साधु वेदौ स्थितोऽसि च ॥२३७॥
यदा तदाऽत्रैति गोधा तत्पुच्छमवलम्ब्य भोः ! । गन्तव्यं भवता द्वारे प्रतीक्षस्व तदागमम् ॥२३८॥
कालं कियन्तमप्यस्थां नमस्कारं[18] गुणन्मुहुः[19] । स्वस्थस्तद्वचसा चाऽहं पुमान् सोऽपि व्यपद्यत ॥२३९॥
¶अन्यदा शब्दमश्रौषं भीषणं चकितस्त्वहम् । स्मृत्वा च तद्वचोऽवेदं[20] सा गोधाऽऽयाति निश्चितम् ॥२४०॥
साऽऽगात् पातुं रसं तस्यां[21] वलिताया महौजसः । उभाभ्यामपि हस्ताभ्यां लाङ्गूले लग्नवानहम् ॥२४१॥
गोपाल इव गोपुच्छलग्नो नद्यास्ततोऽवटात्[22] । तत्पुच्छलग्नो निरगां तत्पुच्छं चाऽमुचं बहिः ॥२४२॥
मूर्च्छितश्चाऽपतं भूमौ लब्धसंज्ञोऽथ पर्यटन् । प्राप्तोऽस्म्यरण्ये[23]महिषेणाऽऽरूढश्च शिलामहम् ॥२४३॥
ताडयंस्तुङ्गशृङ्गेण[24] तां शिलां महिषोऽथ सः । गृहीतो वाहसेनाऽऽशु[25] कीनाशस्येव[26] बाहुना ॥२४४॥
तयोर्युद्व्यग्रयोश्चाहं समुत्तीर्य पलायितः । वेगेन गतवान् ग्राममटवीप्रान्तवर्त्तिनम् ॥२४५॥
¶तत्र मातुलमित्रेण **रुद्रदत्तेन** वीक्षितः । पालितश्चाथ भूयोऽपि पुनर्नव इवाऽभवम् ॥२४६॥
गृहीत्वाऽलक्तकप्रायं[27] भाण्डं तुच्छमहं ततः । अचालिषं तेन सह **स्वर्णभूमिं** प्रति द्रुतम् ॥२४७॥
**इषुवेगवतीं** नाम पथि चोत्तीर्य निम्नगाम् । **गिरिकूटे** गतावावां ततो **वेत्रवने** क्रमात् ॥२४८॥
प्राप्तौ **टङ्कण**[28]देशं च गृहीत्वा द्वौ च मेषकौ । तदारूढा-**वजपथं**[29] क्रान्तवन्तौ ततः परम् ॥२४९॥

---

१. **उदम्बरा०** पा.की.आ.पु.मु० । २. **०मुपागतः** खं० २ । ३. **राजपुरीं** खं० १, ला० । ४. **स्वं कुलादि च** सू० । **स्वकुलादि च** खं० १, ला० । ५. **धनार्थीति** खं० २ । ६. **अनेकश्वापदां** ला० । ७. ० **स्म्यपराह्णे** ला० । ८. **प्रविष्टो** खं० २, ला० । ९. **प्राप्तो** खं० १ । **प्राप्तः** ला० । १०. तुम्बिकया । ११. **रसार्थे** खं० २, सू० । १२. **०पापः परं कायो** ला० । मम अधःशरीरम् । १३. **रज्जुं चकर्ष** ला०आ., खं० १, ला० सू०मु० । १४. **०स्तटासन्नं** ला०पा०ला० २ मु० । १५. **च** खं०१, ला० । १६. **माम्** मु० । १७. **०र्मां वणिगूचे** खं० १, सू०मु० । १८. **नमस्कारपरायणः** ता. । १९. **गुणन्** मु०र० । २०. **तद्वचो दध्यौ** ला० । २१. **तस्याश्चलि०** ला० । २२. कूपात् । २३. **प्राप्तोऽस्म्यरण्यं** मु० । २४. **०स्तुण्ड०** ता०सं०छा०ला० २, खं० १-२, ला०सू० । २५. 'अजगरेण' लाटि. । २६. यमराजस्य । २७. **गृहीत्वा लक्षक०** मु० । २८. **ढङ्कण०** ला १, पा० । २९. अजेन गम्यते यस्मिन् मार्गे सोऽजपथः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो **रुद्रोऽ**वदन्नाऽतो विषयः पादचारिणाम् । हत्वाऽजौ कुर्वहे भस्त्रे अन्तर्लोमे बहिष्पले[1] ॥२५०॥
प्रविशावस्तयोरन्तरिह भारण्ड[2]पक्षिभिः । मांसभ्रमाद् गृहीतौ तैर्यास्याव: **स्वर्णमेदिनीम्** ॥२५१॥
अवोचमहमप्यावामुत्तीर्णौ दुर्गमां भुवम् । यकाभ्यां तावजावेतौ कथं हन्वः स्वबन्धुवत् ? ॥२५२॥
न तावत् तावकावेतौ कथं मां त्वं निषेधसि ? । इत्युक्त्वा सोऽवधीदादौ क्रुद्धो निजमजं द्रुतम् ॥२५३॥
मामपश्यद् द्वितीयोऽजो दीर्घ[3]कातरया दृशा । तं चाऽवोचमहं त्रातुं त्वां नेशोऽस्मि करोमि किम् ? ॥२५४॥
तथापि तेऽस्तु शरणं जैनो धर्मो महाफलः । स एव विधुरे बन्धुः पिता माता प्रभुश्च सः ॥२५५॥
ततो मत्कथितं धर्मं शिरसा प्रतिपन्नवान् । मया दत्तं नमस्कारं सोऽश्रौषीच्च समाहितः ॥२५६॥
हतश्च **रुद्रदत्तेन** देवभूयं[4] जगाम सः । अन्तस्तद्भस्त्रयोरावां प्रविष्टौ च क्षुरीधरौ ॥२५७॥
भारु[5]ण्डाभ्यामुद्धृतौ च द्वयोश्चैकाऽऽमिषेच्छ[6]या । आयुध्यमानयोर्मार्गे पतितोऽहं सरोवरे ॥२५८॥
भस्त्रां क्षुरिकया दीर्त्वा तीर्त्वा च निरगामहम् । गच्छन्नग्रेऽटवीमध्येऽद्राक्षमेकं महागिरिम् ॥२५९॥
तत्रा[7]ऽऽरूढेन दृष्टश्च कायोत्सर्गस्थितो मुनिः । वन्दितश्च मया धर्मलाभं दत्त्वेति[8] सोऽवदत् ॥२६०॥
¶कथं त्वं **चारुदत्ते**हाऽभ्यागाद् दुर्गक्षितावहो ?! । सुर-विद्याधर-खगानृते नाऽन्यस्य यद्गतिः ॥२६१॥
एषोऽ**मितगतिः** सोऽहं यस्त्वया मोचितः पुरा । तदा ह्युत्पतितः प्रापं तमु**पाष्टापदे** द्विषम् ॥२६२॥
त्यक्त्वा मम प्रियां नंष्ट्वा सोऽगा**दष्टापदा**चले । तां[9] पतन्तीं गृहीत्वाऽहं स्वस्थानमगमं पुनः ॥२६३॥
राज्ये मां स्थापयित्वा च मत्पिता व्रतमात्तवान् । पार्श्वे चारणयतिनो**र्हिरण्य-स्वर्णकुम्भयोः** ॥२६४॥
पत्न्यां **मनोरमायां** मेऽभवत् **सिंहयशाः** सुतः । **वराहग्रीव** इत्यन्यो मत्तुल्यबलविक्रमः ॥२६५॥
पत्न्यां **विजयसेनायां** सर्वगान्धर्वकोविदा । पुत्री **गन्धर्वसेने**ति रूपशालिन्यजायत ॥२६६॥
राज्यं च यौवराज्यं च दत्वा विद्याश्च पुत्रयोः । पितृ-गुर्वोस्तयोः पार्श्वेऽहमपि व्रतमात्तवान् ॥२६७॥
**लवणाम्भोधिमध्यस्थो** द्वीपोऽयं **कुं[10]म्भकण्ठकः** । **कर्कोटकश्च** शैलोऽयं तप्ये[11] यत्र स्थितस्तपः ॥२६८॥
अत्र त्वं कथमायासीरिति तस्याऽभिपृच्छतः । क्रमादाख्यातवानात्म[12]व्यसनं सर्वमप्यहम् ॥२६९॥
¶अत्रान्तरे च नभसा तत्तुल्यौ रूपसम्पदा । विद्याधरवरौ तत्रेयतुस्तं च प्रणेमतुः ॥२७०॥
तत्सादृश्यान्मया ज्ञातौ तत्सुताविति तौ ततः । **चारुदत्तं** प्र[13]णमतमित्यवोचन्महामुनिः ॥२७१॥
तात ! तातेति जल्पन्तौ तौ मां नत्वा निषेदतुः । अत्राऽन्तरे च दिविषद्विमानं द्योरवातरत् ॥२७२॥
ततोऽवतीर्य त्रिदशो महर्द्धिर्मां नमोऽकरोत् । ततः प्रदक्षिणीकृत्य तं महर्षिमवन्दत ॥२७३॥
पृष्टस्ताभ्यां खेचराभ्यां तं वन्दनविपर्ययम् । आ[14]ख्यद् देव**श्चारुदत्तो** धर्माचार्यो ह्ययं मम ॥२७४॥
¶तथाहि **काशीपुर्यां** द्वे परि[15]व्राजौ बभूवतुः । **सुभद्रा-सुलसे** जामी वेद-वेदाङ्गपारगे ॥२७५॥
तदा च वादिनस्ताभ्यां बहवोऽपि पराजिताः । परिव्राट् **याज्ञवल्क्यस्तु** वादायाऽन्येद्युराययौ ॥२७६॥
जितः शुश्रूषको जेतुर्भवितेति प्रतिश्रवम् । विधाय तेन **सुलसा** जिता दासीकृता च सा ॥२७७॥
**याज्ञवल्क्यः सुलसया** तया शुश्रूषमाणया । त[16]रुण्या नवतारुण्यो जज्ञे कामवशंवदः ॥२७८॥
पुर्या अदूरे निवसंस्तया चिक्रीड सोऽन्वहम् । अजायत सुतस्तस्यां **याज्ञवल्क्य**त्रिदण्डिनः ॥२७९॥
लोकोपहासभीतौ च पिप्पलस्य तले सुतम् । वि[17]हाय नंष्ट्वा **सुलसा-याज्ञवल्क्यौ** प्रजग्मतुः ॥२८०॥
तद्विज्ञाय **सुभद्रा**ऽऽगात् तं च जग्राह बालकम् । अ[18]दन्तं पिप्पलफलं मुखे निपतितं स्वयम् ॥२८१॥

१. बहिर्मांसं ययोस्ते । २. **भारुण्ड०** खं० २, सू० । ३. भयत्रस्तया दृष्ट्या । ४. देवत्वम् । **देवीभूयं** खं० २ । ५. **भारण्डा०** मु० । ६. **द्वयोश्चाथामिषे०** ला० । ७. **अत्रा०** ला० । ८. **दत्वेत्युवाच सः** ला० मु० । **दत्त्वेति सोऽब्रवीत्** पा. । ९. **पतन्तीं तां** खं० २ । १०. **कुम्भकण्टकः** र.स्वीकृतपाठः । ११. 'तपिच् ऐश्वर्ये वा' (सि. १२६७) दिवादिषु आत्मने० धातुः । १२. निजदुःखम् । १३. **प्रणमतमित्यूचे च** खं० १, ला० मु० । १४. **आख्याद्** खं० १ । १५. **परिव्राजे** ला० १। **परिव्राज्यौ** की. पा. पु. छा. ला० । १६. **तारुण्यात्** की० । १७. **विधाय** ला० । १८. भक्षयन्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पिप्पलाद** इति नाम यथार्थं तस्य साऽकरोत् । यत्नादवर्धयत् तं च वेदाद्यं चाऽध्यजीगपत् ॥२८२॥
महाप्राज्ञः सोऽतिविद्वान् [१]वादिदर्पापहोऽभवत् । तद्वादहेतोः **सुलसा-याज्ञवल्क्यौ** समेयतुः ॥२८३॥
स द्वावप्यजयद् वादे ज्ञात्वा च पितरौ निजौ । त्यक्तोऽमूभ्यामहमिति क्रोधं परमुपाययौ ॥२८४॥
सम्यक् प्रतिष्ठाप्य **माता-पितृमेधादिकान्** मखान् । **पितृमेधे मातृमेधे** चाऽवधीत् पितरौ स तौ ॥२८५॥
**पिप्पलादस्य** शिष्योऽहं **वाग्बलिर्**नामत[४]स्तदा । पशुमेधादिकान् कृत्वा नरकं घोरमासदम् ॥२८६॥
[५]उद्वृत्य नरकाज्जातः पञ्चवारानहं पशुः । यज्ञे द्विजन्मभिः क्रूरैर्भूयो भूयो विनाशितः ॥२८७॥
ततोऽज**ष्टङ्कणे**ऽभूवं **चारुदत्तेन** चाऽमुना । आख्यातधर्मो **रुद्रेण** हतः **सौधर्म**माप्नुवम् ॥२८८॥
धर्माचार्यो ममाऽयं [६]त**च्चारुदत्तः** कृपानिधिः । नमोऽकारि ततः पूर्वं न क्रमो लङ्घितो मया ॥२८९॥
इत्युक्तौ तेन देवेन तावप्येवमवोचताम् । उपकारी तवेवाऽस्मत्पितुरप्येष जीवदः[७] ॥२९०॥
स देवो मामथाऽवोच**च्चारुदत्त** ! वदाऽनघ ! । किमैहलौकिकं [८]ते प्रत्युपकारं करोम्यहम् ॥२९१॥
समये त्वं समागच्छेरित्युक्तः स मयाऽमरः । तिरोऽधात् खेचराभ्यां तु नीतोऽहं **शिवमन्दिरे** ॥२९२॥
ताभ्यां च तज्जनन्या च तत्राऽस्थां कृतगौरवः । तद्बन्धुभिः खेचरैश्च पूज्यमानोऽधिकाधिकम् ॥२९३॥
इमां **गन्धर्वसेनां** तौ निजजामिं प्रदर्श्य मे । [९]आख्यतां प्र[१०]व्रजंस्तातस्तदाऽऽवामेवमादिशत् ॥२९४॥
आख्यातं ज्ञानिनाऽस्माकं यद्विजित्य कलास्वमूम् । युष्मज्जामिं **वसुदेव**कुमारः परिणे[११]ष्यति ॥२९५॥
मद्बन्धो**श्चारुदत्त**स्याऽर्पणीया भूचरस्य तत् । इमां यथा **वसुदेवो** भूचरः सुखमुद्वहेत् ॥२९६॥
[१२]स्वं पुत्रीं तद्गृहीत्वेमां गच्छेति तदुदीरिते । यावत् पर्यचलं तावत् सोऽपि देवः स[१३]मागमत् ॥२९७॥
सोऽमरः खेचरौ तौ च तद्गृह्याश्चाऽन्यखेचराः । मामिहाऽऽनैषुरक्षेपाद् व्योमयानेन लीलया ॥२९८॥
स्वर्ण-माणिक्य-मुक्तानां कोटिकोटीः प्रदाय मे । अगात्[१४] स देवः स्वं स्थानं ते च विद्याधरोत्तमाः ॥२९९॥
[१५]**सर्वार्थं** मातुलं प्रातर्भार्यां **मित्रवतीमपि** । **वसन्तसेनां** वेश्यां चाऽपश्यमाबद्धवेणिकाम् ॥३००॥
इयं **गन्धर्वसेना**या उत्पत्तिर्**वसुदेव** ! ते । कथिताऽद्य वणिक्पुत्रीत्यवज्ञासीः स्म जातु मा ॥३०१॥
**चारुदत्ता**दिति श्रुत्वा वृत्तान्तं **वृष्णिनन्दनः** । अधिकं मुदितो रेमे समं **गन्धर्वसेन**या ॥३०२॥
चैत्रे स गच्छन्नुद्यानं रथारूढस्तया सह । मातङ्गवेषां मातङ्गावृतामैक्षिष्ट कन्यकाम् ॥३०३॥
**गन्धर्वसेना** [१६]तौ प्रेक्ष्य सविकारौ परस्परम् । उवाच सारथिं रथ्यां[१७]स्त्वरयेत्यरुणेक्षणा[१८] ॥३०४॥
द्रुतं गत्वा चोपवने क्रीडित्वा च तया समम् । भूयोऽपि **चम्पानगरीं वसुदेवः** समाययौ ॥३०५॥
तं मातङ्गगणादेत्य जरन्मातङ्गिका तदा । दत्त्वाऽऽशीरुपविश्यैवं **वसुदेवम**वोचत ॥३०६॥
पुरा स्वे[१९]षां विभज्याऽऽदात् स्वं [२०]राज्य**मृषभध्वजः** । तदा तु **नमि-विनमी** नाऽभूतां तत्र दैवतः ॥३०७॥
राज्यार्थिनौ सिषेवाते तौ व्रत[२१]स्थमपि प्रभुम् । **धरणेन्द्र**स्तयोश्चाऽदाद् राज्यं श्रेण्योर्द्वयोः पृथक् ॥३०८॥
राज्यं सुतेभ्यः कालेन दत्त्वा तौ स्वामिसन्निधौ । प्रव्रज्य जग्मतुर्मोक्षं मुक्तौ द्रष्टुमिव प्रभुम् ॥३०९॥
**नमिसूनुस्तु मातङ्गः** परिव्रज्य दिवं ययौ । तद्वंशेऽस्ति **प्रहसितो** नामतः खेचरेश्वरः ॥३१०॥
तस्य जायाऽस्मि **हिरण्यवती** मम तु नन्दनः । **सिंहदंष्ट्रो नीलयशा**स्तत्सुता प्रैक्षि या त्वया ॥३११॥
तामुद्वह त्वं कुमार ! [२२]मारार्त्तां त्वन्निरीक्षणात् । क्षणः शुभो वर्ततेऽसौ विलम्बं सहते न सा ॥३१२॥
ऊचे शौरिर्विचिन्त्याऽहं वक्ष्यामि पुनरापतेः[२३] । साऽवोचत् तत्रा[२४]ऽऽगामी त्वमहं [२५]वेहेति वेत्ति कः ? ॥३१३॥

---

१. **वादिदर्पासहो०** ला० मु० । २. यज्ञान् । ३. **च** खं० १ । ४. **०स्ततः** खं० १-२, ला० । ५. **उद्धृत्य** मु० र० । ६. **च चारु०** ला० । ७. **जीवकः** खं० १ । ८. **तेऽहं प्रत्युपकारमादधे** खं० १, ला०की०पु०छा० ला० २ । ९. **आख्यातां** खं० १, मु० र० । १०. **प्राव्रज०** खं० १ । ११. **०णेष्यते** खं० २ । १२. **स्वां पुत्रीं** ला० । १३. **समाययौ** ला० मु० । १४. **ययौ** खं० १, ला० मु० । १५. **सर्वार्थमातुलं** खं० २, ला० मु० र० । १६. वसुदेव-मातङ्गकन्ये । १७. अश्वान् । १८. रक्तेक्षणा । १९. आत्मीयजनानाम् । २०. **राज्यं वृषभ०** की० । २१. **व्रतस्थमपि तं प्रभुम्** मु० । २२. कामार्त्ताम् । २३. आगच्छेः । २४. **तत्र गामी** खं० १, मु० र० । २५. **चेहे०** खं० १, ला० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्युक्त्वा सा ययौ क्वाऽपि ग्रीष्मे **शौरि**रथाऽन्यदा । क्रीडित्वाऽम्भसि सुष्वाप समं **गन्धर्वसेनया** ॥३१४॥
तं गृहीत्वा करे गाढमुत्तिष्ठेति वदन् मुहुः । तेन मुष्ट्या ताड्यमानो भूत एकोऽहरद् द्रुतम् ॥३१५॥
चितासमीपे नीतश्च सोऽपश्यज्ज्वलितानलम् । घोररूपां खेचरीं च तां **हिरण्यवतीं** पुरः ॥३१६॥
स्वागतं चन्द्रवदनेत्युक्तः प्रेतस्तयाऽऽदरात् । तस्यै समर्प्य **वार्ष्णेयं** क्षणेनाऽपि तिरोदधे ॥३१७॥
स्मित्वा **वार्ष्णेय**मूचे सा त्वयाऽचिन्ति कुमार ! किम् ? । तां [1]वृण्वस्मदुपरोधादिदानीमपि सुन्दर ! ॥३१८॥
तदा पूर्वेक्षिता **नीलयशाः** साऽपि सखीवृता । तत्राऽऽजगाम श्रीदेवीवाऽप्सरःपरिवारिता ॥३१९॥
गृहाण [2]स्वंप्रियमिति पितामह्योदिता [3]तया । **वसुदेव**मुपादाय व्योम्ना **नीलयशा** ययौ ॥३२०॥
¶**हिरण्यवत्य**पि प्रातर्**वसुदेव**मभाषत । **मेघप्रभवना**कीर्णो **ह्रीमा**नेष महागिरिः ॥३२१॥
चारणाधिष्ठिते चाऽत्राऽ**ङ्गारको ज्वलनात्मजः** । भ्रष्टविद्यः खेचरेन्द्रो विद्या भूयोऽस्ति साधयन् ॥३२२॥
विद्याश्चिरेण सेत्स्यन्ति तस्य त्वद्दर्शनात् पुनः । आशु सिध्यन्ति तत् तस्योपकर्तुं गन्तुमर्हसि ॥३२३॥
अलमेतेन दृष्टेनेत्युक्ता सा **वृष्णिसूनुना** । **वैताढ्या**द्रावनैषीत् तं नगरे **शिवमन्दिरे** ॥३२४॥
**सिंहदंष्ट्र**नरेन्द्रेण नीत्वा स्वौकसि याचितः । तां **नीलयशसं** कन्यां **दशार्हः** परिणीतवान् ॥३२५॥
¶तदा च तुमुलं श्रुत्वा **शौरिः** पप्रच्छ कारणम् । [4]द्वाःस्थाऽऽख्यदिह **शकटमुखं** नामाऽस्ति पत्तनम् ॥३२६॥
तत्र राट् **नीलवा**न्नाम तस्य **नीलवती** प्रिया । तयोर्**नीलाञ्जना** पुत्री **नील**नामा च नन्दनः ॥३२७॥
भ्रातुः स्वस्रा समं पूर्वं सङ्केत इति चाऽभवत् । सार्धं दुहित्रा पुत्रस्य कार्यः पाणिग्रहोत्सवः ॥३२८॥
**नीलाञ्जनायाः** पुत्री त्वत्प्रिया **नीलयशा** इयम् । अभून्**नीलकुमार**स्य **नीलकण्ठाभिधः** सुतः ॥३२९॥
**नीलः** सुतार्थे सङ्केतदत्तामेतामयाचत । एतत्पित्रा पृष्ट आख्यन् मुनिरेवं **बृहस्पतिः** ॥३३०॥
पिता **भरतवर्षा**र्धभर्तुर्**विष्णो**र्यदूत्तमः । **वसुदेवो** वरोऽमुष्या भावी सौभाग्यमन्मथः ॥३३१॥
आनीतो विद्यया त्वं तद्राज्ञेमां परिणीतवान् । तदर्थे चाऽऽगतो **नीलो** जितश्च तुमुलस्ततः ॥३३२॥
¶श्रुत्वेति मुदितः **शौरि**स्तया क्रीडन् ददर्श च । विद्यौषधीभ्यो **ह्रीमन्तं** यातः शरदि खेचरान् ॥३३३॥
विद्यादाने तव शिष्यो भवामीत्यवदत् स ताम् । आमेत्युक्त्वा तमादाय **ह्रीमत्य**द्रौ ययौ च सा ॥३३४॥
तत्र **शौरिं** रन्तुकामं ज्ञात्वा सा कदलीगृहम् । विकृत्य रमयामासाऽपश्यच्चैकं [5]कलापिनम् ॥३३५॥
अहो ! पूर्णकलापोऽयं कलापीति सविस्मया । स्वयमेव तमानेतुं दधावे मदिरेक्षणा ॥३३६॥
गतामुपमयूरं च [6]मयूरैर्व्यंसकः स तु । [7]स्वांसमारोप्य तां जह्रे व्योम्नि [8]तार्क्ष्यवदुत्पतन् ॥३३७॥
**शौरि**स्तमनुधावंश्च [9]घोषेऽगाद् गोपिकार्चितः । तत्रोषित्वा निशां प्रातः प्राचालीद् दक्षिणां प्रति ॥३३८॥
¶सोऽगाद् **गिरितटग्रामं** [10]तत्र वेदध्वनिं गुरुम् । श्रुत्वा पप्रच्छ कमपि द्विजं तत्पाठकारणम् ॥३३९॥
ऊचे द्विजो **दशग्रीव**समये **नारदर्षये** । **दिवाकरः** खेचरोऽदात् स्वसुतां रूपशालिनीम् ॥३४०॥
तद्वंश्योऽस्ति **सुरदेवो** ग्रामेऽत्र ग्रामणीर्द्विजः । तस्य पत्न्यां क्षत्रियायां **सोमश्री**र्वेदवित् सुता ॥३४१॥
पित्रा पृष्टस्तद्वरार्थे **करालो** ज्ञान्यभाषत । एतां वेदे [11]यो विजेता स एनां परिणेष्यति ॥३४२॥
तां विजेतुमयं लोको वेदाभ्यासपरोऽनिशम् । वेदोपाध्याय इह च **ब्रह्मदत्तो**ऽस्ति नामतः ॥३४३॥
वेदाचार्यं तमित्यूचे विप्रीभूयाथ **यादवः** । **गौतमः**[12] **स्कन्दिलो** विप्रोऽध्येष्ये वेदास्त्वदन्तिके ॥३४४॥
अनुज्ञातस्ततस्तेनाऽपठद् वेदांस्तदग्रतः । [13]वेदे **सोमश्रियं** जित्वा पर्यणैषीच्च **यादवः** ॥३४५॥
¶विलसन् स तया तत्र ययावुद्यानमन्यदा । तत्रे**न्द्रशर्म**नामानमद्राक्षी[14]दैन्द्रजालिकम् ॥३४६॥

---

१. **चिन्तयाऽस्म०** खं० २, ला० मु० र० । २. **स्वं प्रिय०** ला० । ३. **०ऽनया** ता०सं०पा० । ४. **द्वाःस्थोऽख्यदिह** मु० र० । ५. मयूरम् । ६. कृत्रिममयूरः । ७. **स्कन्धमारोप्य** ला० । **स्वंसमा०** सू० विना सर्वत्र, मु०, र० । ८. गरुडवत् । ९. आभीरपल्ल्याम् । १०. **तदा** खं० १ । ११. **विजेता यः** खं० १ । १२. गौतमगोत्रीयः स्कन्दिलनामकः । १३. **वादे** खं० १, ला० । १४. **०दैन्द्रजालकम्** खं० १ । **०दिन्द्रजालिकम्** ला० । **०च्चेन्द्रजालिकम्** मु० ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

तस्याऽऽश्चर्यकरीं विद्यां दृष्ट्वा **शौरिरयाचत** । सोऽप्युवाच गृहाणेमां विद्यां **मानसमोहिनीम्** ॥३४७॥
विद्येयं सायमारब्धा सिध्यत्यभ्युदये रवेः । परं बहूपसर्गेति [1]सखा कोऽपि विधीयताम् ॥३४८॥
न मे सखा विदेशस्याऽस्तीत्युक्तस्तेन सो[2]ऽवदत् । भ्रातः ! सखाऽस्मि ते भ्रा[3]तुर्जाया च **वनमालिका** ॥३४९॥
इत्युक्तश्चाऽग्रहीद् विद्यां **शौरिस्तां** विधिवज्जपन् । मायाविना शिबिकया[4]ऽपजह्रे **चेन्द्रशर्मणा** ॥३५०॥
विमृशन्नुपसर्गं तं **शौरिर्विद्यां** जजाप च । प्रातर्ज्ञात्वा च त[5]न्मायां शिबिकाया अवातरत् ॥३५१॥
धावत्सु **चेन्द्रशर्मा**दिष्वतिगच्छन् स यादवः । दिनशेषे प्राप[6] **तृणशोष[7]कं** सन्निवेशनम् ॥३५२॥
¶तत्र चाऽऽयतने सुप्तो नरादे[8]नैत्य च द्रुतम् । उत्थापितो **वसुदेवः** प्रज[9]ह्रे मुष्टिभि[10]श्च तम् ॥३५३॥
बाहूबाहवि कृत्वा च पुरुषादं चिराय तम् । **शौरिः** संयमयामास प्रोते[11]न क्रीतमेषवत् ॥३५४॥
भू[12]मावास्फाल्य रजक इव क्षौमं शिलातले । अवधीत् पुरुषादं तं प्रातर्लोकोऽप्युदैक्षत ॥३५५॥
लोकः प्रीतो रथे **शौरिमा**रोप्याऽन्तर्निवेशन[13]म् । वाद्यमानेन तूर्येण वर्यं वे[14]रमिवाऽनयत् ॥३५६॥
पञ्च कन्याशतान्यस्मै लोकस्तूर्णमढौकयत् । तन्निषिध्याऽब्रवी**च्छौरिर्नरादः** को न्वसाविति ? ॥३५७॥
तत्रैकः कश्चिदाचख्यौ **श्रीकाञ्चनपुरे** पुरे । **कलिङ्गे**ष्वभवद् राजा **जितशत्रुर्**महाभुजः ॥३५८॥
**सोदासस्तस्य** पुत्रोऽयं प्रकृत्या मांसलोलुपः । राजा [15]स तु निजे देशे प्राणिनामभयं ददौ ॥३५९॥
दिने दिने चैक[16]बर्हिमांसं ते[17]न सुतेन तु । याचितः प्रतिपेदे सोऽनभीष्टमपि भूपतिः ॥३६०॥
प्रत्यहं बर्हिणं **वंशगिरेः** सूदाः समानयन् । पाकाय तु हतोऽन्येद्युर्मार्जारेण हृतोऽथ सः ॥३६१॥
त[18]तः सूदा मृ[19]तार्भस्य पक्त्वा तस्मै पलं ददुः । अद्याऽतिस्वादु किं मांसमित्यपृच्छच्च सोऽपि तान् ॥३६२॥
यथातथे तदाऽऽख्याते **सोदासो**ऽप्येवमादिशत् । दिने दिने शि[20]खिस्थाने संस्कार्योऽतः परं नरः ॥३६३॥
इत्युदित्वा स्वयं डिम्भान्नित्यं लोके जहार सः । ज्ञातश्च भूभुजा कोपात् स दे[21]शान्निरवास्यत ॥३६४॥
पितृभीतः सोऽत्र दुर्गे निवसन् प्रत्यहं नरान् । विनिघ्नन् पञ्चषान् पापः साधु[22] साधु हतस्त्वया ॥३६५॥
इत्युक्तस्तैर्मुदा **शौरिस्ताः** कन्याः परिणीतवान् । उषित्वा च निशां सोऽगा**दचलग्राम**मुत्तमम् ॥३६६॥
¶तत्र **मित्रश्रियं** सार्थवाहपुत्रीमुपायत । **यादवो** ज्ञानिना तस्या वरत्वेनोदितः पुरा ॥३६७॥
**वेद[23]सामपुरं** गच्छन् स तया **वनमालया** । एह्येहि देवरेत्युक्त्वा निन्ये निजनिकेतने ॥३६८॥
तया च **वसुदेवो**ऽयमित्याख्यातेऽथ तत्पिता । पृष्ट्वा स्वागतमित्याख्यदत्रास्ति **कपिलो** नृपः ॥३६९॥
**कपिला** नाम कन्याऽस्य त्वं तस्या ज्ञानिना वरः । तिष्ठन् **गिरितट**ग्रामे महात्मन् ! कथितः पुरा ॥३७०॥
**स्फुलि[24]ङ्गवदनं** नाम सोऽश्वं प्रद[25]मयिष्यति । तवोपलक्षणोपायस्तेनै[26]ष ज्ञानिनोदितः ॥३७१॥
त्वामानेतुं प्रैषि राज्ञा मज्जामातेन्द्रजालिकः । **इन्द्रशर्मा**ऽन्तरा तु त्वं गत इत्याख्यदत्र सः ॥३७२॥
दिष्ट्याऽऽयासीर्दमयाऽश्वमित्युक्तस्तेन **वृष्णिसूः** । तं राज्ञोऽश्वमदमयत् **कपिलामु**[27]दुवाह च ॥३७३॥
प्रतीक्षितस्तेन राज्ञा श्यालेनां**ऽशुमता**ऽपि च । सोऽजीजनत् **कपिलायां कपिलं** नाम नन्दनम् ॥३७४॥
हस्तिबन्धे गतोऽन्येद्युर्बद्ध्वाऽरोह[28]त् स हस्तिनम् । तं वियत्युत्पतन्तं च जघानैकेन मुष्टिना ॥३७५॥
सरस्तीरे पतन्नी**लकण्ठाख्य**श्च स खेचरः । बभूव यो **नीलयशो**विवाहेऽप्याययौ युधि[29] ॥३७६॥
¶ततो भ्राम्यन् ययौ **शौरिः** पुरे **सालगुहाह्वये** । **भाग्यसेनं** नृपं तत्र धनुर्वेदमशिक्षयत् ॥३७७॥
योद्धुं च **भाग्यसेनेन मेघसेनं** तदग्रजम् । तत्राऽऽयातं **वसुदेवः** पराजिग्ये महाभुजः ॥३७८॥

१. सहायकारी । २. **सोऽब्रवीत्** पा०आ० । ३. **भ्रातृजाया** सू० । ४. **०कया स जह्रे** पु० । ५. **तां मायां** मु० । ६. **०शेषेऽप्याप** ला० । ७. **०शोधकं** सू० । ८. नरानत्तीति नरादः, मनुष्यराक्षसः । ९. **प्रजघ्ने** मु० । १०. **मुष्टिभिर्भृशम्** मु० । ११. वस्त्रेण । १२. **भूमौ चा०** ला० । १३. ग्रामे । १४. **वेश्म समानयत्** ला० । १५. **पुनर्निजदेशे** खं० १ । १६. मयूरमांसम् । १७. **तेन तु याचितः। प्रतिपेदे सोऽतिभीष्टोऽन०** खं० २ । १८. **ततस्तदा** मु० । १९. मृतबालकस्य । २०. मयूरस्थाने । २१. **स्वदेशा०** मु० । २२. **साधुरेष हत०** ला० । २३. **वेदसामपुरे** खं० २ । **वेदसोम०** र. । २४. **स्फुलिङ्गवहनं** मु० । २५. **प्रमदयि०** खं० २ । २६. **०स्तेनैव** ला० । २७. **०मुदवाह** खं० १, ला०र० । २८. **०रोहत हस्ति०** ला० । २९. **युधे** खं० २, सू० ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**भाग्यसेन**नृपः पद्मोपमां **पद्मावतीं** सुताम् । **मेघसेनस्त्वश्वसेनां वार्ष्णेयाय** ददौ तदा ॥३७९॥
**पद्मावत्यश्वसेनाभ्यां** रन्त्वा तत्र चिराय सः । जगाम **भद्दिल**[१]**पुरे** नगरे **वृष्णिनन्दनः** ॥३८०॥
॥तत्राऽपुत्रविपन्नस्य **पुण्ड्र**[२]**राजस्य** कन्यकाम् । [३]**पुंण्ड्रां** नृरू[४]पामौषध्या राज्यं पौ[५]न्तीं ददर्श सः ॥३८१॥
**वार्ष्णेयः** स्त्रीति तां ज्ञात्वा सानुरागामुपायत । [६]**पुंण्ड्रो** नाम सुतस्तस्यां जज्ञे राजा च सोऽभवत् ॥३८२॥
॥खेचरो**ऽङ्गारक**स्तत्र रात्रौ हंसा[७]पदेशतः । हृत्वा चिक्षेप **गङ्गायां समुद्रविजया**नुजम् ॥३८३॥
प्रातः **शौरि**र्ददर्श**लावर्धनं** नामतः पुरम् । तत्राऽट्टे सार्थवाहस्योपाविशत् तदनुज्ञया ॥३८४॥
तत्प्रभावात् तस्य [८]लाभे हेमलक्षमजायत । सोऽपि ज्ञात्वा तत्प्रभावं गौरवादाललाप तम् ॥३८५॥
तं स्वर्णरथमारोप्य सार्थवाहोऽनयद् गृहे । अथ **रत्नवतीं** कन्यां तेन[९] स्वां पर्यणाययत् ॥३८६॥
॥जाते शक्र[१०]महेऽन्येद्युः श्वशुरेण सहैव सः । दिव्यं स्यन्दनमारूढो **महापुर**पुरे ययौ ॥३८७॥
बहिः पुराच्च प्रासादान् नूतनान् प्रेक्ष्य **यादवः** । पप्रच्छ श्वशुरं किं नु द्वितीय[११]कमिदं पुरम् ? ॥३८८॥
सार्थवाहोऽवदत् **सोमदत्तो**ऽत्राऽस्ति महीपतिः । मुखश्रियाऽतिसोमश्रीः **सोमश्री**स्तस्य कन्यका ॥३८९॥
तस्याः स्वयंवरकृते प्रासादाः कारिता इमे । आहूताश्च नृपा भूयो विसृष्टास्तद[१२]पाटवात् ॥३९०॥
श्रुत्वेति **यादवो** गत्वा शक्रस्तम्भं नमोऽकरोत् । तं नत्वा राजशु[१३]द्धान्तोऽप्यचलत् पूर्वमागतः ॥३९१॥
तदा चाऽऽलानमुन्मूल्य तत्राऽऽगाद् भूपतेर्द्विपः । रथाद्राजकुमारीं च पातयामास भूतले ॥३९२॥
दीनामशरणां **शौरि**स्तां प्रेक्ष्य शरणार्थिनीम् । स्थित्वाऽग्रेऽतर्जयदिभं प्रतिकार इव स्वयम् ॥३९३॥
तां त्यक्त्वा **यादवा**येभो दधावे क्रोधदुर्धरः । खेदयामास तमिभं **यादवो**ऽपि महाबलः ॥३९४॥
मोहितेभो **यादव**स्तामादायैकत्र वेश्मनि । नीत्वा [१४]चाऽऽश्वासयामासोत्तरीयपवनादिना ॥३९५॥
धात्रीभिः सा गृहे निन्ये **शौरि**स्तु श्वशुरान्वितः । **कुबेर**सार्थवाहेन गौरवान्निजवेश्मनि ॥३९६॥
तत्र **शौरिः** स्नात-भुक्तोऽस्थाद्यावत्तावदागता । जयाशीःपूर्वकं राजप्रतीहारीदमब्रवीत् ॥३९७॥
भूपतेः **सोमदत्त**स्य **सोमश्री**र्वरकन्यका । स्वयंवरे वरस्तस्याः किल स्यादित्यभूत् पुरा ॥३९८॥
परं **सर्वाणयति**नोऽभ्यागतान् केवलोत्सवे । पश्यन्त्यास्त्रिदशांस्तस्या जातिस्मृतिरजायत ॥३९९॥
ततः प्रभृत्यसौ मौनमालम्ब्याऽस्थान्मृगेक्षणा । मया रहसि चाऽन्येद्युः पृष्टा सत्येवमब्रवीत् ॥४००॥
॥आसीद् देवो **महाशुक्रे** भोगास्तेन मया सह । अतिवल्लभया भुक्ताः सुचिरं तत्र जन्मनि ॥४०१॥
मयैव सह सोऽन्येद्युर्यात्रां **नन्दीश्वरा**दिषु । कृत्वाऽर्हज्जन्मोत्सवं च स्वस्थानाय न्यवर्तत ॥४०२॥
यावच्च **ब्रह्मलोके**ऽगात् तावदच्योष्ट सोऽमरः । शोकार्त्ता तं च मार्गन्ती **भरते**ऽत्र **कुरुष्व**गाम् ॥४०३॥
केवलज्ञानिनौ तत्र दृष्ट्वाऽपृच्छं दिवश्च्युतः । क्व मे पतिः समुत्पन्नः ? ततस्तावेवमूचतुः ॥४०४॥
**हरिवंशे** तव पतिः प्रादुर्भूतो नृपा[१५]लये । त्वमपि प्रच्युता स्वर्गाद् रा[१६]जपुत्री भविष्यसि[१७] ॥४०५॥
यदा शक्रमहे च त्वां कुञ्जरान्मोचयिष्यति । स तदानीं पुनरपि पतिस्तव भविष्यति ॥४०६॥
तौ वन्दित्वा भक्तिपूर्वं स्वस्थानमगमं तदा । क्रमाच्च्युत्वाऽहमुत्पन्ना **सोमदत्तस्य** कन्यका ॥४०७॥
**सर्वाण**केवले देवान् दृष्ट्वा जातिस्मृतिं गता । एतदज्ञासिषं तस्मात् कृतं मौनमिदं मया ॥४०८॥
एतत् तस्या वचः सर्वं मया राज्ञे निवेदितम् । राज्ञा विसृष्टाश्च नृपाः स्वयंवरसमागताः ॥४०९॥
प्रत्ययश्चाऽभवत् तस्या मोचितायास्त्वया द्विपात् । त्वामानेतुं प्रेषिताऽस्मि तदेह्युद्वह [१८]वीर ! ताम् ॥४१०॥
तया सह ततो गत्वा **वसुदेवो** नृपौकसि । **सोमश्रिय**मुपायंस्त रेमे च[१९] स तया समम् ॥४११॥

१. **भद्रिल०** खं० १, ला० । २. **पुंढ्र०** मु० । ३. **पुंढ्रां** मु० । ४. **नृरूपेणौ०** खं० २ । **नृरूपामोष०** मु०र. । ५. **पार्ती** खं० १-२, ला०सू० । ६. **पुंढ्रो** मु० । ७. हंसरूपं गृहीत्वा । ८. **लाभो** मु० । ९. **तेनासौ** सू० । १०. इन्द्रमहोत्सवे । ११. **द्वितीयीक०** खं० १-२ । **द्वैतीयीक० सू०** । **द्वितीयं किमिदं** मु० । १२. तेषां नृपाणां अपाटवात्-अनैपुण्यात् । १३. राज्ञोऽन्तःपुरस्त्रियः । १४. **नीत्वा सा०** मु० । १५. **नृपान्वये** की०पु० । १६. **०राज्ञः पुत्री** मु० । १७. **भविष्यति** खं० २ । १८. **धीर** खं० १ । १९. **तत्र तया सह** मु० । **च स तया सह** सू० ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

¶**शौरिः** सुप्तोत्थितोऽन्येद्युर्नाऽपश्यत् तां मृगेक्षणाम् । करुणं च रुदंस्तस्थौ शून्यचित्तो दिनत्रयम् ॥४१२॥
स्थितामुपवनेऽद्राक्षीद् **वार्ष्णेय**स्तामुवाच च । केनाऽऽगसे[1]यच्चिरं त्वं नष्टाऽसि वद मानिनि ! ॥४१३॥
साऽप्यूचे त्वत्कृतेऽकारि विशिष्टो नियमो मया । मौनव्रते[2] स्थिता चाऽस्मि प्राणनाथ ! दिनत्रयम् ॥४१४॥
अर्चित्वा देवतां चैतां भूयः पाणिग्रहं कुरु । अयं हि विधिरत्रेति **शौरि**श्चक्रे च तत् तथा ॥४१५॥
देव्याः शेषेति मदिरां **यादवः** पायितस्तया । भेजेतरां रतिसुखं कान्दर्पिक इवाऽमरः ॥४१६॥
सुप्तो निशि तया सार्धं निद्राच्छेदे स तां पुनः । अन्यरूपामुदैक्षिष्ट सुभ्रु ! काऽसीत्युवाच च ॥४१७॥
¶साऽप्यूचे दक्षिणश्रेण्यां **सुवर्णाभा**भिधे पुरे । **चित्राङ्गो** नाम राजाऽभूत् तस्याऽ**ङ्गारवती** प्रिया ॥४१८॥
तयो**र्मानसवेग**स्तुक्[3] कन्या **वेगवती** त्वहम् । **चित्राङ्गः** परिवव्राज राज्ये विन्यस्य तं सुतम् ॥४१९॥
मद्भ्रात्रा तेन ते भार्या स्वामिन् ! जह्रे गतह्रिया । रतये चाटुभिश्चित्रैर्भणिता[4] मन्मुखेन च[5] ॥४२०॥
महासती तु ते पत्नी प्रत्यपद्यत तन्नहि । अमंस्त मां सखीत्वेन[6] त्वामानेतुं च[7] साऽऽदिशत् ॥४२१॥
आयाता त्वामहं दृष्ट्वा स्मरार्ताऽकार्षमीदृशम् । ममाऽसि कुलकन्यायाः पतिरुद्वाहपूर्वकः[8] ॥४२२॥
प्रात**र्वेगवतीं** दृष्ट्वा लोकः सर्वो विसिष्मिये । **सोमश्री**हरणं लोके साऽऽचख्यौ पत्यनुज्ञया ॥४२३॥
¶रतश्रान्तस्तया सुप्तो **वसुदेवो**ऽन्यदा निशि । जह्रे **मानसवेगेन** वेगादतिगरुत्मता ॥४२४॥
ज्ञात्वा च **वसुदेवेन** जघ्ने मुष्ट्या स खेचरः । प्रहारार्त्तश्च तं सद्योऽमुञ्चद् **भागीरथी**जले ॥४२५॥
विद्यां साधयत**श्चण्डवेगस्य** व्योमचारिणः[9] । तत्रस्थस्याऽपतत् स्कन्धे स विद्यासिद्धिकारणम् ॥४२६॥
विद्या सिद्धा त्वत्प्रभावान्महात्मन् ! किं ददामि ते? । तेनेत्युक्तो **वृष्णि**[10]पुत्रोऽमार्गद् विद्यां खगामिनीम् ॥४२७॥
तां विद्यां खेचरः सोऽदाद् द्वारे **कनखलस्य** च । समारेभे साधयितुं **वसुदेवः** समाहितः ॥४२८॥
¶ततो गते **चण्डवेगे विद्युद्वेग**नृपात्मजा । खेचरी **मदनवेगा** तत्राऽऽयाता ददर्श तम् ॥४२९॥
हृत्वा स्मरार्ता सा **शौरिं** नीत्वा **वैताढ्य**पर्वते । उद्याने **पुष्पशयने** पुष्प[11]चापमिवाऽमुचत् ॥४३०॥
नगरेऽ**मृतधाराख्ये** स्वयं तु प्रविवेश सा । प्रातः **शौरिं** नमोऽकार्षुरेत्य तद्भ्रातरस्त्रयः ॥४३१॥
आद्यो **दधिमुख**स्तेषु **दण्डवेगो** द्वितीयकः । तृतीय**श्चण्डवेगो** यस्तस्य विद्याप्रदोऽभवत् ॥४३२॥
नीत्वा **शौरिं** पुरे[12] ते[13] तु तया **मदनवेगया** । विधिनोद्वाहयामासुः सुखं रेमे तया च सः ॥४३३॥
तोषयित्वा तयाऽन्येद्युः **शौरिर्मदनवेगया** । याचितः प्रददौ तस्यै वरं भुजभृतां वरः ॥४३४॥
**शौरिं दधिमुखो**ऽन्येद्युर्नमस्कृत्येदमब्रवीत् । **दिवस्तिलक**नाम्न्यस्ति पुरे **त्रिशिखरो** नृपः ॥४३५॥
**सूर्पकस्य** सुतस्यार्थे मत्पितुः कन्यकामिमाम् । सोऽयाचिष्ट न चाऽदत्त **विद्युद्वेग**स्तु मत्पिता ॥४३६॥
पित्रा पुत्रीवरं पृष्टश्चारणर्षिरदोऽवदत् । **हरिवंश्यो वसुदेवो** भावी त्वद्दुहितुर्वरः ॥४३७॥
**चण्डवेगस्य** गङ्गायां विद्यां साधयतः स[14] तु । स्कन्धे पतिष्यति निशि विद्याः सेत्स्यन्ति तत्क्षणात्[15] ॥४३८॥
श्रुत्वेति मत्पिता नाऽदात् तस्मै पुत्रीं विशेषतः । बद्ध्वा च बलिना नीतो राज्ञा[16] **त्रिशिखरे**ण सः ॥४३९॥
पत्न्या **मदनवेगा**याः स्वयं दत्तं वरं स्मरन् । श्वशुरं मोचयेदानीं मां[17] श्वशुर्यं[18] च मानय ॥४४०॥
¶**नमिर्वंशादि**[19]कन्दो नः **पुलस्त्य**स्तस्य नन्दनः । तद्वंशे **मेघनादो**ऽभूद**रिञ्जयपुरे**श्वरः ॥४४१॥
**सुभूम**चक्री जामाता तस्मै श्रेणिद्वयश्रियम् । ददावस्त्राणि दिव्यानि **ब्राह्माऽऽग्नेया**दिकानि च ॥४४२॥
तस्य वंशेऽभवद् राजा **रावणो**ऽथ **बिभीषणः** । **बिभीषण**स्याऽन्वयेऽभूद् **विद्युद्वेगः** पिता मम ॥४४३॥
तान्यस्त्राणि क्रमायातान्यादत्स्व सफलानि ते । महाभाग्यस्य भावीनि निर्भाग्याणां[20] मुधा तु नः[21] ॥४४४॥
इत्युक्त्वा तेन दत्तानि जग्राहाऽस्त्राणि **वृष्णिसूः**[22] । असाधयच्च विधिना पुण्यैः किं न हि सिध्यति ? ॥४४५॥

१. आगसा-अपराधेन । २. **०व्रतस्थिता** खं० २ । ३. **०वेगः सूः** मु० । तुक्-पुत्रः । ४. **०र्भाणिता** सू० । ५. **सा** मु० । ६. **सखीत्वे सा** सू० । ७. **समादिशत्** सू० । ८. **०सार्थकः** खं० २ । ९. **ब्रह्मचारिणः** खं० १ । विद्याधरस्य । १०. **०वार्ष्णेयोऽमार्गयद्०** ला० । ११. कामदेवम् । १२. **गृहे** खं० २ । १३. **तत्र** ला० । १४. **सतः** सू० । १५. **च क्षणात्** खं० २, सू० । १६. **राजा** ला० । १७. **मा** खं० १ । १८. श्यालम् । १९. **०र्वंश्यादि०** की०पु० । २०. **निर्भाग्यस्य** खं० २ । २१. **पुनः** मु० । २२. **वृष्णिभूः** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶श्रुत्वा **मदनवेगां** च प्रदत्तां भूचराय ताम् । क्रोधाध्मात**स्त्रिशिखर:** स्वयं योद्धुमुपाययौ ॥४४६॥
[1]मायामयं स्वर्णतुण्डं स्यन्दनं खेचरार्पितम् । आरूढो युयुधे **शौरिर्वृ**तो **दधिमुखादिभि:** ॥४४७॥
**ऐन्द्रेणाऽस्त्रेण वार्ष्णेयस्त्रिशिखर**शिरो[2]ऽच्छिदत् । अमोचयच्च श्वशुरं **दिवस्तिलक**मेत्य तम् ॥४४८॥
एत्य च श्वशुरपुरे **शौरे**र्विलसत: सत: । पत्न्यां **मदनवेगायामनाधृष्टि:** सुतोऽभवत् ॥४४९॥
¶सिद्धायतनयात्रां सोऽन्येद्युश्चक्रे सखेचर: । खेचरीभि[3]र्वीक्ष्यमाण: सरा[4]गाभिर्मुहुर्मुहु: ॥४५०॥
यात्रायाश्चाऽऽययौ **शौरि**रेहि **वेगवती**ति च । व्याहार्षीन् **मदनवेगां** तल्पं साऽपि जहौ[5] क्रुधा ॥४५१॥
तदा **त्रिशिखर**पत्न्या **सूर्पण[6]ख्या** तदालयम् । निर्दह्य **मदनवेगा**रूप[7]याऽहारि **वृष्णिसू:** ॥४५२॥
तया जिघांसया व्योम्नो मुक्तो **राजगृहा**न्तिके । तृणपुञ्जस्योपरिष्टात् पपात च **यदूद्वह:** ॥४५३॥
गीयमाने **जरासन्धे** ज्ञात्वा **राजगृहं** पुरम् । गत: **शौरि:** स्वर्णकोटिं जित्वाऽक्षै[8]रर्थिनां ददौ ॥४५४॥
बद्ध्वाऽऽरक्षैर्नृपगृहं तत: **शौरि**रनीयत । विनाऽपराधं किं बद्धोऽस्मीत्यपृच्छच्च तान् महान् ॥४५५॥
तेऽप्यूचुर्ज्ञानिनाऽऽख्यातं **जरासन्धस्य** य: प्रगे[9] । कोटिं जित्वाऽर्थिनां दाता तत्सूनुर्वधकस्तव ॥४५६॥
[10]सोऽसि राजा[11]ज्ञया तेन निराग[12]स्कोऽपि मार्यसे । इत्युक्त्वा **वसुदेवं** ते मध्येभस्त्रं प्रचिक्षिपु: ॥४५७॥
अपवादभयात् छन्नं ते **वार्ष्णेयं** जिघांसव: । [13]अद्रेरलोठयन् **वेगवत्या** धात्र्य[14]ग्रहीच्च तम् ॥४५८॥
नीयमानस्तया **शौरि**र्दध्यावित्यहमप्यहो ! । मन्ये गृहीतो भारुण्डै**श्चारुदत्त** इवाऽम्बरे ॥४५९॥
मुक्तश्च पर्वते[15]ऽपश्यद् **वेगवत्या:** पदद्वयम् । उपलक्ष्य च भस्त्राया निर्ययौ **यदुपुङ्गव:** ॥४६०॥
नाथ ! नाथेति रुदतीं[16] सुदती[17]मालिलिङ्ग ताम् । त्वया कथमहं प्राप्त इत्यपृच्छच्च **यादव:** ॥४६१॥
अश्रूण्युन्मृज्य साऽवोचच्छ[18]यनोत्थितया मया । तदा तल्पे न दृष्टोऽसि स्वामिन् ! भाग्यविपर्ययात् ॥४६२॥
सम[19]मन्त:पुरस्त्रीभी रुदत्[20]या: करुणं मम । **प्रज्ञप्त्या** विद्ययाऽऽख्यातं हरणं पतनं च ते ॥४६३॥
तत: परमजानाना व्यमृशं यत्पतिर्मम । पार्श्वे कस्याऽप्यृषेर्विद्या नो[21]ऽऽचष्टे तत्प्रभावत: ॥४६४॥
ततश्च त्वद्वियोगार्त्ता स्थि[22]त्वा कालं कमप्यहम् । त्वामन्वेष्टुं जगद् भ्रान्ता स्वामिन् ! भूपत्यनुज्ञया ॥४६५॥
दृष्टोऽसि सिद्धायतने समं **मदनवेगया** । तच्चैत्याच्च पुरे प्राप्तं[23] त्वामनुप्रापमाश्वहम् ॥४६६॥
तत्र चा[24]ऽन्तर्हिताऽश्रौषं मन्त्रामोदीरितं त्वया । चिरं विर[25]हजं क्लेशं चाऽमुं[26]चं स्नेहतस्तव ॥४६७॥
[27]क्रुद्धा **मदनवेगा** द्राक् प्रविवेशाऽन्तरालयम्[28] । [29]कृतं प्रदीपनं चाऽथ **सूर्पण[30]ख्यौ**षधीबलात् ॥४६८॥
हृतश्च **मदनवेगा**रूपया त्वं तया तत: । [31]तयोज्झ्यमानं त्वां धर्तुमन्वधावमहं द्रुतम् ॥४६९॥
कल्पित**मानसवेगा**रूपाऽधस्तात् स्थिता तया । अहं दृष्टा तर्जिता[32] च विद्यौषधिसमर्थया ॥४७०॥
तस्याश्च नंष्ट्वा[33] चैत्याय यान्ती मुनिमलङ्घयम् । मम विद्यास्ततो भ्रष्टा धात्री च मिलिता तदा ॥४७१॥
चिन्तयन्ती क्व मे भर्तेत्यहं धात्रीं न्ययोजयम् । तया भ्रमन्त्या दृष्टस्त्वं निपतन् पर्वताग्रत: ॥४७२॥
गृहीतश्च तया वेगात् त्वं भस्त्रान्त:स्थित: प्रभो ! । [34]**ह्रीमत्तीर्थे पञ्चनदे** समानीय व्य[35]मुच्यथा: ॥४७३॥
इति श्रुत्वा सह तया तत्स्थे[36]ऽस्थात् तापसाश्रमे । कन्यां ददर्श सोऽन्ये[37]द्युर्नद्यां पाशनियन्त्रिताम् ॥४७४॥
भणितो **वेगवत्या** च स स्वयं च कृपापर: । कन्यकां तां नागपाशबन्धाच्**छौरि**रमोचयत् ॥४७५॥

---

१. **अयोमयं** ला० । २. **०शिरोऽच्छिनत्** ता.सं. । ३. **०प्रेक्ष्यमाण:** ला०२। ४. **सादराभि०** खं० २ । ५. **ययौ** मु०, खं० १ ला० २ । ६. **०नख्या** खं० १-२, ला०सू० । ७. **०रूपायाऽहारि** खं० १ । ८. द्यूतपाशै: । ९. प्रात: । १०. **सोऽपि** ला० । ११. **राज्ञाऽऽज्ञया** की.पा.ला० । १२. निरपराधी । १३. **अद्रेरलोट०** ता.सं.की.पा.ला २। १४. **धात्र्या०** खं० २, सू० । १५. **पुरतोऽपश्य०** की. । १६. **रुदन्तीं** ला० । १७. **सुदन्ती** मु० । १८. **०च्छ्यानो०** खं० १ । १९. **समं तत: पुर०** ता०सं० २०. **रुदन्त्या:** खं० २ । २१. **०विद्यामाचष्टे** मु० । २२. **स्थिता** मु० । २३. **प्राप्ते त्वय्यनु०** ला० । २४. अदृश्या । २५. **विरहजक्लेशं** खं० १ । २६. **चामुञ्चं** ला० । २७. **क्रुधा** मु० र० । २८. **०रालये** ला० । २९. **चक्रे** सू० । ३०. **सूर्पनख्यौ०** खं १-२, ला०सू० । ३१. **तयोह्यमानं** पा०मु० । **उत्पाट्यमानं** ला० । ३२. **तर्किता** खं० १-२, ला०, ता.सं.पा.आ. । ३३. **नष्टा** खं० १ विना । ३४. **श्रीमत्तीर्थे** ला० । **ह्रीमन्ताद्रे:** पु० । ३५. **विमु०** ला० । ३६. **ततोऽस्था०** पु०ला० २ । **तत्रास्था०** खं० १-२, ला० सू०मु० । ३७. **चाऽन्येद्यु०** ला०मु०, खं० १-२, ला०सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मूर्च्छितोत्थापिता सा च **शौरिणा** जलसेकतः । ततः प्रदक्षिणीकृत्य **वसुदेव**मवोचत ॥४७६॥

¶सिद्धा विद्यास्त्वत्प्रभावान्ममाद्य शृणु चापरम् । **वैताढ्या**द्रावस्ति पुरं नाम्ना **गगनवल्लभम्** ॥४७७॥

**विद्युद्दंष्ट्रो नमि**वंश्यो राजाऽभूत् तत्र सोऽन्यदा । [1]प्रत्यग्विदेहे प्रतिमास्थितं मुनिमुदैक्षत ॥४७८॥

भोः ! कोऽप्ययमुत्पातस्तन्नीत्वैनं **वरुणाचले** । [2]हतेत्युक्त्वाऽताडयत् तं **विद्युद्दंष्ट्रो** नभश्चरैः ॥४७९॥

शुक्लध्यानजुषस्तस्य मुनेर्जज्ञे **च केवलम्** । [3]केवलिमहिमार्थं च **धरणेन्द्रः** समाययौ ॥४८०॥

तस्यर्षेः प्रत्यनीकांस्तान् विलोक्य **धरणः** क्रुधा । भ्रष्टविद्यांश्चकाराऽऽशु दीनास्ते चैवमूचिरे ॥४८१॥

कोऽप्येष इति नो विद्मो **विद्युद्दंष्ट्रेण** केवलम् । उत्पातोऽसाविति प्रेर्य कर्मेदं कारिता मुनौ ॥४८२॥

**धरणेन्द्रो**ऽप्युवाचाऽस्य केवलोत्सवहेतवे । अहमागामरे पापा ! [4]अज्ञानान्धाः ! करोमि किम् ? ॥४८३॥

भूयः क्लेशेन विद्या वः सेत्स्यन्ति परमार्हताम् । साधूनां तच्छ्रितानां च [5]द्विषं मोक्ष्यन्ति ताः क्षणात् ॥४८४॥

**रोहिण्याद्या** महाविद्या **विद्युद्दंष्ट्र**स्य दुर्मतेः । न सेत्स्यन्त्यस्य सन्ताने पुरुषस्य स्त्रिया अपि ॥४८५॥

अथ सेत्स्यन्ति ताः साधोर्महापुंसश्च दर्शनात् । इत्युदित्वा **धरणेन्द्रो** ययौ निजनिकेतनम् ॥४८६॥

¶इह विद्याः साधयन्ती कन्या तद्वंशसम्भवा । विष्णुना **पुण्डरीके**णोदूढा **केतुमती** पुरा ॥४८७॥

[6]सिद्धविद्या त्वत्प्रभावात् तद्वंश्याऽहं च कन्यका । **बालचन्द्रे**ति चन्द्रास्य ! मामुद्वह वशंवदाम् ॥४८८॥

किं विद्यासिद्धिहेतोस्ते यच्छामीति तयोदितः । **वेगवत्यै** देहि विद्यामित्यूचे **वृष्णिनन्दनः** ॥४८९॥

सा गृहीत्वा **वेगवतीं** ययौ **गगनवल्लभे** । जगाम **वसुदेव**स्तु तापसाश्रममेव तम् ॥४९०॥

सद्य आत्तव्रतौ भूपौ निन्दन्तौ निजपौरुषम् । तत्राऽऽयातौ प्रेक्ष्य **शौरिः** पप्रच्छोद्वेगकारणम् ॥४९१॥

¶तावूचतुश्च **श्रावस्त्या**मस्ति राजा महाभुजः । **एणीपुत्रः** पवित्रात्मा चरित्रैरतिनिर्मलैः ॥४९२॥

पुत्र्याः **प्रियङ्गुसुन्दर्याः** स्वयंवरकृते नृपाः । तेनाऽऽहूता न चैकोऽपि तद्दुहित्रा वृतो नृपः[7] ॥४९३॥

ततः सङ्ग्राम [8]आरम्भि क्रुद्धैः सम्भूय पार्थिवैः । एकेनाऽपि हि तत्पित्रा जिताः सर्वेऽपि विद्रुताः ॥४९४॥

गिरिषु प्राविशन् केऽपि केऽप्यरण्येऽप्सु केऽपि च । आवां तु तापसौ भूतौ धिग् नौ क्लीबौ वृथाभुजौ ॥४९५॥

श्रुत्वेत्यबोधयत् तौ च जैनधर्मं **यदूद्वहः** । [9]ततः प्राव्रजतां **शौरिः श्रावस्त्यां** तु स्वयं ययौ ॥४९६॥

तत्रोद्याने देवगृहं त्रिद्वारं **प्रेक्षते** स्म सः । दुष्प्रवेशं मुखद्वारे दत्तद्वात्रिंशदर्गले ॥४९७॥

पार्श्वद्वारा प्रविष्टः स प्रतिमास्तत्र चैक्षत । एकस्यर्षेर्गृहिणश्च त्रिपदो महिषस्य च ॥४९८॥

किमेतदिति तेनैकः पृष्टो विप्रोऽब्रवीदिति । **जितशत्रु**नृपोऽत्राऽऽसीत् तस्य सूनु**र्मृगध्वजः** ॥४९९॥

श्रेष्ठी च **कामदेवो**ऽभूत् [10]स्वगोष्ठे सोऽन्यदा ययौ । जगदे **दण्डकाख्येन** गोपालेन निजेन च ॥५००॥

अस्या **महिष्यास्तनयाः** पञ्च पूर्वं मया हताः । अयं तु षष्ठस्तनयो जातो भद्रतराकृतिः ॥५०१॥

जातमात्रोऽपि मत्पादौ [11]नमति स्म चलेक्षणः । भयाद् वेपथुमांस्तेन त्रातोऽयं कृपया मया ॥५०२॥

त्वमप्यस्याऽभयं देहि कोऽपि जातिस्मरो ह्ययम् । [12]इत्युक्तो महिषं श्रेष्ठी **श्रावस्त्यां** कृपयाऽनयत् ॥५०३॥

राजा तस्याऽभयं तेन याचितः **श्रेष्ठिना** ददौ । **श्रावस्त्यां** निर्भयमसौ सर्वत्रापि भ्रमत्विति ॥५०४॥

**मृगध्वज**कुमारेणांऽह्रिरेकस्तस्य चिच्छिदे । स तु निर्वासितो राज्ञा प्रव्रज्यां प्रत्यपद्यत ॥५०५॥

[13]व्यापादि महिषः [14]सोऽष्टादशे च दिवसे ततः । **मृगध्वजस्य** द्वाविंशे दिने जज्ञे तु केवलम् ॥५०६॥

देवा-ऽसुर-नृपा-ऽमात्यास्तमागत्य ववन्दिरे । **जितशत्रु**र्नृपस्तूचे किं वैरं महिषेण वः ? ॥५०७॥

¶शशंस केवली पूर्व**मश्वग्रीवो**ऽर्धचक्र्यभूत् । तस्याऽमात्यो **हरिश्मश्रुः** [15]कौलो धर्मं निनिन्द सः ॥५०८॥

राजा समर्थयामास सदा धर्मं स आस्तिकः । एवं विरोधो ववृधे तयोर्नृपति-मन्त्रिणोः ॥५०९॥

१. पश्चिममहाविदेहक्षेत्रे । २. **हरे०** ला० । ३. **केवल०** ला० २ । ४. **अज्ञानान् वः** पा० । **अज्ञानां वः** मु० । ५. 'द्वेषकर्तारं' लाटि. । ६. **विद्यासिद्धा** सं० । ७. **वरः** मु० । ८. **आरेभे** खं० १, सू०ला० । ९. **तौ च प्रा०** खं० १, सू०ला० । १०. **स्वगोष्ठं** ला० । ११. **नमते** खं० १ । १२. **इत्युक्त्वा** ला० । १३. **विपेदे** पु.ला० । **व्यापादितो महिषः सोऽष्टादशदिवसे मृतः** ता०सं० । १४. **०ष्टादशमे दि०** ला० । १५. कौलसम्प्रदायानुयायी । 'नास्तिकः' लाटि. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ **त्रिपृष्ठा-ऽचलाभ्यां** च हतौ सप्तमीयतुः । नरकं तत [1]उद्वृत्तौ भ्रेमतुर्बहुधा भवम् ॥५१०॥
**अश्वग्रीवस्ततः** सोऽहमभूवम् तव नन्दनः । **हरिश्मश्रुर्महिषो**ऽभूत् तद्वैराच्च हतो मया ॥५११॥
मृत्वाऽभवल्लो**हिताक्षा**भिधोऽयमसुराग्रणीः । वन्दितुं मां समायातो भवनाटकमीदृशम् ॥५१२॥
तं नत्वर्षि **लोहिताक्षस्तस्यर्षेः** श्रेष्ठिनोऽपि च । त्रिपदो महिषस्यापि रत्नमूर्तीरिहाऽकरोत् ॥५१३॥
¶श्रेष्ठिनः **कामदेवस्य** वंशे [2]तस्यांऽस्ति सम्प्रति । **कामदत्त** इति श्रेष्ठी तस्य **बन्धुमती** सुता ॥५१४॥
श्रेष्ठिना [3]तद्वरार्थे च पृष्टो ज्ञान्याख्यदत्र यः । उद्घाटयेन् मुखद्वारं स भावी त्वत्सुतावरः ॥५१५॥
**वसुदेवस्त**दाकर्ण्य तद्द्वारमुदघाटयत् । श्रेष्ठी तत्रैत्य तां कन्यां ददौ तस्मै तदैव हि ॥५१६॥
तं द्रष्टुं कौतुकाद् राजपुत्री पित्रा सहाऽऽगता । **प्रियङ्गुसुन्दरी दृष्ट्वा** चाऽनङ्गार्त्ताऽभवत् क्षणात् ॥५१७॥
द्वाःस्थः **प्रियङ्गुसुन्दर्या**स्तां दशां **वृष्णि**जन्मने । **एणीपुत्र**चरित्रं चाऽकीर्तयद् रचिताञ्जलिः ॥५१८॥
गृहे **प्रियङ्गुसुन्दर्या** अवश्यं प्रातरापतेः । इत्युक्त्वा स ययौ द्वाःस्थः **शौरि**स्त्वैक्षिष्ट नाटकम् ॥५१९॥
¶तत्राऽश्रौषीन्नमिपुत्रो **वासवः** खेचरोऽभवत् । तद्वंश्या [4]**वासवाश्चां**ऽन्ये **पुरुहूतश्च** तद्भवः ॥५२०॥
पर्यटन् द्विपमारूढः **पुरुहूतो**ऽन्यदैक्षत । **अहल्यां** [5]**गौतम**भार्यां रमयामास चाऽऽश्रमे ॥५२१॥
तदा [6]तस्यांऽपविद्धस्य पुल्लिङ्गं [7]**गौतमो**ऽच्छिदत् । तच्छ्रुत्वा **यादवो** भीतो नाऽगात् **प्रियङ्गुसुन्दरीम्** ॥५२२॥
**बन्धुमत्या** समं **शौरिः** सुप्तो निद्रात्यये च सः । निशि देवीं ददर्शैकां काऽसाविति विचिन्तयन् ॥५२३॥
किं चिन्तयसि वत्सेति जल्पन्ती साऽपि देवता । पाणौ गृहीत्वाऽनैषीत् **तमशोकवनिकान्त**रे ॥५२४॥
¶इत्यूचे चाऽत्र **भरते श्रीचन्दनपुरे** पुरे । **अमोघरेता** भूपोऽभूत् तस्य **चारुमती** प्रिया ॥५२५॥
**चारुचन्द्रः** सुतो वेश्याऽ**नङ्गसेने**ति नामतः । तस्याः **कामपताके**ति पुत्री चाऽऽसीत् सुलोचना ॥५२६॥
राज्ञो यज्ञेऽथ [8]तस्येयुस्तापसास्तेषु **कौशिकः** । **तृणबिन्दु**श्चोपाध्यायौ फलान्यापर्यतामुभौ ॥५२७॥
कुतः [9]फलानीदृशानि पृष्टौ राज्ञोचतुश्च तौ । [10]**हरिवंशो**त्पत्त्यानीतकल्पद्रोरादितः कथाम् ॥५२८॥
[11]छुर्या तदा च नृत्यन्ती जहे **कामपताकिका** । **चारुचन्द्र**कुमारस्य **कौशिकर्षे**श्च मानसम् ॥५२९॥
यज्ञे वृत्ते कुमारस्तामात्मसादकरोद् द्रुतम् । स तापसः **कौशिकस्तु** पार्थिवात् तामयाचत ॥५३०॥
ऊचे राजा कुमारेण गृहीता श्राविका त्वसौ । प्रतिपन्ने सति पत्यौ न द्वितीयं पतिं भजेत् ॥५३१॥
एवं राज्ञा प्रतिषिद्धः सङ्क्रुद्धः **कौशिको**ऽशपत् । रमयिष्यति चेन्नारीं तत् तदैव मरिष्यति ॥५३२॥
राजाऽथ **चारुचन्द्रा**य दत्त्वा राज्यं स्वसूनवे । प्रपेदे तापसीभूय वनवासं [12]महामतिः ॥५३३॥
अज्ञातगर्भा तद्राज्ञी वनं तेन [13]समं ययौ । कालेन प्रकटे गर्भे पत्युः शङ्काच्छिदेऽवदत् ॥५३४॥
तया च सुषुवेऽन्येद्युर्**ऋषिदत्ते**ति कन्यका । क्रमेण श्राविका [14]साऽभूच्चारणश्रमणान्तिके ॥५३५॥
सा प्राप यौवनं तस्या मातृ-धात्र्योऽम्रियन्त च । तत्राऽन्येद्युर्[15]मृगव्येनाऽऽययौ राजा **शिलायुधः** ॥५३६॥
तद्दर्शनात् कामवशस्तदातिथ्यं प्रपद्य च । नीत्वैकान्तेऽरमयत् तां नानाभङ्ग्या **शिलायुधः** ॥५३७॥
साऽप्यूचेऽहमृतुस्नाता गर्भः स्याच्चेत् कथञ्चन । आख्याहि कुलकन्यायास्तदा का नाम मे गतिः ? ॥५३८॥
सोऽप्युवाचाऽहमै**क्ष्वाकः श्रावस्त्यां** पुरि पार्थिवः । **शिलायुधो** [16]नामधेयात् **शतायुध**नृपात्मजः ॥५३९॥
यदि ते जायते पुत्रः **श्रावस्त्यां** स ममान्तिके । त्वयाऽऽनेयो मया कार्यः स एव नृपतिस्तदा ॥५४०॥
इत्युक्ते तद्बलान्येयुस्तामापृच्छ्य ययौ च सः । तत् साऽपि पितुराचख्यौ क्रमाच्च सुषुवे सुतम् ॥५४१॥
तेन प्रसवरोगेण **ऋषिदत्ता** व्यपद्यत । **ज्वलनप्रभनाग**स्याऽग्रमहिषी बभूव [17]च ॥५४२॥

---

१. **उद्धृतौ** मु०र. । २. **तत्रास्ति** ला० । ३. **तद्वरार्थेन** खं० १ । ४. **वासवा जज्ञे पुरु०** ला० । ५. **गोतम०** खं० १-२, सू० । ६. **तस्याप्यविद्धस्य** सू० । **तस्योप०** खं० २ । **तस्योपविष्टस्य** ला० । ७. **गोतमो०** खं० १-२, सू० । **०मोऽच्छिनत्** ता०सं० । ८. **तस्यैयु०** मु० । ९. **फलानीदृशीति** ता.सं. खं० २, ला० । १०. **०वंश्योत्पन्नानीतिकल्प०** ला० । ११. **छुर्यां की०** र० । १२. **समाहितः** खं० १ । १३. **समाययौ** की० । १४. **०काऽथाभू०** ला० । १५. **०मृगयया०** ला० । १६. **०धेयच्छत्रायुध०** ला० । **०धेयच्छता०** खं० २ । १७. **सा** ता० सं० ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

तत्पिताऽ**मोघरेता**स्तं पाणिनाऽऽदाय दारकम्[1] । रुरोद तापसः शोकादस्तोकं सोऽन्यलोकवत् ॥५४३॥
**ज्वलनप्रभ**भार्या तु साऽहं ज्ञात्वाऽवधेः स्वयम् । तत्रैत्य तं मृगीरूपा[2] स्तन्येनाऽवर्धयं सुतम्[3] ॥५४४॥
**एणीपुत्र** इति नाम्ना विख्यातस्तेन सोऽभवत् । मृत्वाऽभूत् **कौशिको**ऽहिर्दृग्विषो मत्पितुराश्रमे ॥५४५॥
मत्तातं सोऽदशत् क्रूरो हतं[4] तस्य मया विषम् । बोधितः सोऽप्यहिर्मृत्वा **बलो** नाम सुरोऽभवत् ॥५४६॥
**ऋषिदत्ता**वपुः कृत्वा **श्रावस्त्या**मेत्य भूपतेः । तस्याऽऽर्पयं सुतं तच्चाऽसंस्मरन् सोऽग्रहीन्न हि ॥५४७॥
मुक्त्वा तस्यान्तिके पुत्रं स्थित्वाऽऽकाशेऽहमभ्यधाम् । वने त**दृषिदत्ता**ख्या कन्याऽहं रमिता त्वया ॥५४८॥
त्वत्तः सुतोऽसौ [5]जज्ञेऽस्मिन् जायमाने मृता त्वहम् । देवत्वं प्रापवत्येणीभूय चैनमवर्धयम् ॥५४९॥
**एणीपुत्रः** सुतस्तेऽसावित्युक्ते तु **शिलायुधः** । राज्ये निधाय तं पुत्रं प्रव्रज्य त्रिदिवं ययौ ॥५५०॥
¶**एणीपुत्रेणा**ऽपत्यार्थेऽष्टमभक्तेन तोषिता । [6]अदां पुत्रीमहं जज्ञे चैषा **प्रियङ्गुसुन्दरी** ॥५५१॥
अस्याः स्वयंवरे राज्ञाऽनेना[7]ऽऽहूता महीभुजः । न चैकोऽप्यनया वव्रे युद्धं चाऽऽरम्भि राजभिः ॥५५२॥
मत्सान्निध्याज्जिताः सर्वेऽप्ये**णीपुत्रेण** भूभुजः । **प्रियङ्गुसुन्दरी** सा तु त्वां दृष्ट्वाऽद्य वुवूर्षति ॥५५३॥
त्वदर्थेऽष्टमभक्तेन तयाऽस्याराधिताऽनघ ! । मयाऽऽदिष्टस्त्वामवोचद् वेत्र**भृद्दन्धररक्षितः**[8] ॥५५४॥
अज्ञानात् त्वमवाज्ञासीरधुना तु ममाऽऽज्ञया । तेनाऽऽहूतः परिणये**रेणीपुत्र**स्य तां सुताम् ॥५५५॥
याचस्व च वरं कञ्चिदित्युक्तो **यादवो**ऽवेदत्[9] । मया स्मृता समागच्छेः प्रतिपेदे च सा तथा ॥५५६॥
**शौरिं बन्धुमती**गेहे मुक्त्वा देवी तिरोदधे । प्रातर्द्वाःस्थेन सहित शौरिरायतने ययौ ॥५५७॥
**प्रियङ्गुसुन्दरीं** तत्र पूर्वायातामुपायत । [10]गान्धर्वेण विवाहेन **यादवः** परया मुदा ॥५५८॥
देवीदत्तवरं **शौरिं** स द्वाःस्थोऽष्टादशे दिने । [11]राज्ञे व्यजिज्ञपद् राजाऽप्यानैषीत् तं **स्ववेश्मनि** ॥५५९॥
¶इतश्च **वैताढ्यगिरौ** पुरे **गन्धसमृद्धके** । **गन्धारपिङ्गलो** राजा तस्य कन्या **प्रभावती** ॥५६०॥
सा भ्रमन्ती **सुवर्णाभे** नगरेऽगाद् ददर्श च । **सोमश्रियं** सखीत्वेन सपदि प्रत्यपादि च ॥५६१॥
तस्याश्च पतिविरहं ज्ञात्वोवाच **प्रभावती** । मा ताम्य सखि ! भर्तारमानयामि तवाऽधुना ॥५६२॥
ऊचे निःश्वस्य **सोमश्रीर्वेगवत्या**नयद् यथा । [12]आनेष्यसि तथैव त्वं नाथं मे रूपमन्मथम् ॥५६३॥
न ह्यहं **वेगवत्य**स्मीत्युदित्वा च **प्रभावती** । **श्रावस्त्या**मेत्य **वार्ष्णेयं** गृहीत्वा तत्र चाऽऽनयत् ॥५६४॥
कृतान्यरूपस्तत्राऽस्थात् **शौरिः सोमश्रिया** समम् । ज्ञातो **मानसवेगेन** बद्धश्चाऽन्येद्युरेत्य सः ॥५६५॥
जाते कलकले **शौरि**र्मोचितो वृद्धखेचरैः । तेन **मानसवेगेन** विवादश्च प्रचक्रमे ॥५६६॥
**वैजयन्त्यां** ततः पुर्यां **बलसिंह**नृपान्तिके । [13]तौ वादेऽधिष्ठितौ तत्र ते चैयुः[14] **सूर्पकादयः** ॥५६७॥
ऊचे **मानसवेगः** *प्राक्* **सोमश्री**र्मम *कल्पिता । अनेन हि च्छैलादूढा[15] मददत्ता च मत्स्वसा ॥५६८॥*
उवाच **शौरिः सोमश्री**र्मयोढा पितृकल्पिता । तां जह्रेऽसौ **वेगवत्याः**[16] सर्वं वेत्ति जनोऽपि तत् ॥५६९॥
एवं **मानसवेग**स्तु जितो युद्धार्थमुत्थितः । **नीलकण्ठोऽङ्गारकश्च सूर्पका**द्याश्च खेचराः ॥५७०॥
ददौ **वेगवती**माताऽ**ङ्गारवत्य**थ **शौरये** । दिव्यं धनुर्निषङ्गौ च **प्रज्ञप्तीं** तु **प्रभावती** ॥५७१॥
विद्या-दिव्यास्त्रपुष्टौजा बिडौजा इव **यादवः** । एकोऽपि खेचरान् सर्वानजैषील्लीलयैव तान् ॥५७२॥
बद्ध्वा **मानसवेगं** चाऽक्षिपत् **सोमश्रियः** पुरः । श्वश्र्वा **अङ्गारवत्या**श्च गिरा **शौरि**र्मुमोच तम् ॥५७३॥
वृतो **मानसवेगा**द्यैर्भृत्यी[17]भूतैः स खेचरैः । **सोमश्री**युग् विमानस्थो **महापुर**पुरं ययौ ॥५७४॥
तत्र **सोमश्रिया** सार्धं विललास **यदूद्वहः** । अन्येद्युः **सूर्पकेणा**ऽश्वीभूय जह्रे स मायिना ॥५७५॥
ज्ञात्वा च मुष्टिना **शौरि**स्ताडयामास **सूर्पकम्** । **सूर्पकेण** ततो मुक्तः सोऽपत**ज्जाह्नवी**जले ॥५७६॥

१. **बालकम्** पा० आ० । २. **एणीरूपा** खं० २ । ३. **स्वयम्** पु०सं० । ४. **जह्रे** सू० । ५. **जातोऽस्मिन्** खं० १ । ६. **आदां** खं० १ । ७. **राज्ञा तेना०** ला० । ८. **०दङ्गरक्षितः** खं० १ ला० । **०दङ्गरक्षितः** खं० २ । ९. **०वदीत्** खं० १ । १०. **गन्धर्वेण** खं० २ । ११. **राज्ञो०** खं० २ । १२. **अन्विष्यसि** ला० । १३. वसुदेव-मानसवेगौ । १४. **चैयुः** मु० । १५. **बला०** ला० । १६. **वेगवत्या सर्वं** र. । १७. **०भृत्यभूतैः** खं० १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स उत्तीर्य च **गङ्गायाः** प्रययौ तापसाश्रमम् । तत्रैक्षिष्ट स्त्रियं चैकां कण्ठन्यस्तास्थिमालिकाम् ॥५७७॥
पृष्टाश्च तापसा आख्यन् जितशत्रुनृपप्रिया । **जरासन्धस्य** पुत्रीयं **नन्दिषेणे**ति नामतः ॥५७८॥ [युग्मम्]
वशीकृता परिव्राजैकेनैषा स च भूभुजा । हतस्तदस्थीन्यद्यापि धत्तेऽसौ[1] दृढ[2]कार्मणा ॥५७९॥
ततो मन्त्रबला**च्छौरि**स्तां चक्रे गतकार्मणाम् । **जितशत्रु**र्ददौ तस्मै जामिं **केतुमतीं** निजाम् ॥५८०॥
एत्य **डिम्भो जरासन्धद्वाः**स्थस्तं नृपमब्रवीत् । **नन्दिषेणा**प्राणदाता प्रेष्यतामुप[3]कार्ययम् ॥५८१॥
राज्ञाऽपि युक्तमित्युक्ते तेनैव वेत्रिणा । रथारूढो ययौ **शौरि**र्मगधेश्वरपत्तनम् ॥५८२॥
बद्धस्तत्र स आरक्षैरपृच्छद् बन्धकारणम् । तें[4]ऽप्याचख्यु**र्जरासन्ध**स्याऽऽख्यातं ज्ञानिना ह्यदः ॥५८३॥
**नन्दिषेणां** दुहितरं यस्ते सज्जीकरिष्यति । हन्ता ते तत्सुतोऽवश्यं ज्ञातश्चाऽऽसीति हन्य[5]से ॥५८४॥
इत्युक्त्वा **यादवं** वध्यस्थाने पशुमिवाऽनयन् । असज्जन् **मुष्टिकाद्या**श्च ते दशार्हं निबर्हितुम् ॥५८५॥
तदा **गन्धसमृद्धे**शोऽपृच्छद् **ग[6]न्धारपिङ्गलः** । **प्रभावत्या** वरं विद्यां **वसुदेवं** च साऽवदत् ॥५८६॥
तेन प्रैषि तमानेतुं तत्र धात्री **भगीरथी** । सा निन्ये तेभ्य आच्छिद्य **शौरिं गन्धसमृद्धके** ॥५८७॥
पर्यणैषीत् तत्र **शौरिः** पितृदत्तां **प्रभावतीम्** । रममाणस्तया सार्धं चावतस्थे यथासुखम् ॥५८८॥

विद्याधरस्त्रीरपराश्च **शौरिः**,
गत्वोपयेमेऽथ **सुकोश[7]लां** च ।
**सुको[8]शला**याः सदने स्थितश्च,
प्रत्यूहहीनं[9] विषयानभुङ्क्त ॥५८९॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये अष्टमपर्वणि **श्यामादि-सुकोश[10]लान्तं** मानुषी-विद्याधरी[11]परिणयनो नाम
द्वितीयः सर्गः ॥

१. **धत्ते सा** सू० । २. **दृढकर्मणा** मु० । दृढं कार्मणं यस्यां सा । ३. **०मुपकारिणम्** ता०सं० । ४. **तस्याचख्यु०** खं० १ । ५. **हन्यते** खं० १ । ६. **०येमेऽथ सुरेन्द्ररूपः** खं० १ । **०येमे च सुको०** मु० । ७. **सुकोसलां** खं० १। ८. **सुकोसलायाः** खं० १-२, सू०। ९. **०हीने** ला० । १०. **सुकोसला०** खं० १-२, सू० । ११. **०शलान्तकन्यापरि०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ तृतीयः सर्गः ॥

इतश्चाऽत्रैव **भरते** विद्याधरपुरोपमम् । **पेढालपुर**मित्यस्ति सर्वा[1]द्भुतनिधानभूः ॥१॥
[2]तत्रोत्फुल्लगृहोद्यानानिलो भवति शर्मणे । वस्त्राधिवासनागन्धकारी यूनामहर्निशम् ॥२॥
[3]तत्रौको[4]रत्नबद्धोर्वीसङ्क्रान्तोडु[5]षु बालिकाः । क्षिपन्ति पाणीन् यामिन्यां दन्त[6]ताडङ्कशङ्कया ॥३॥
[7]तद्गृहेषूत्पताकेषु दृश्यन्ते निधिशालिषु । [8]प्रचलत्पताकाच्छायारक्षा विषधरा इव ॥४॥
[9]तन्निवासी जनः सर्वः सर्वतः स[10]मंपृच्यत । दृढेन जिनधर्मेण नीलीरागेण वस्त्रवत् ॥५॥
¶तत्र राजा **हरिश्चन्द्र**श्चन्द्रवन्निर्मलो गुणैः । बभूवाऽद्भुतया ऋद्ध्या बिडौज[11]स इवाऽनुजः ॥६॥
[12]सूत्थानस्येन्द्रियजये नय-विक्रमशालिनः । तस्य भ्रूवल्लरीदास्यमनिशं शिश्रियुः श्रियः ॥७॥
तस्य श्रियामपाराणां स्पर्धयेव यशांस्यपि । अपारीभूय भुवने व्यजृम्भन्त निरर्गलम् ॥८॥
तस्याऽमलयशोराशेर्भागधेयमगीयत । सुर-खेचरनारीभि**र्वैताढ्या**धित्य[13]कास्वपि ॥९॥
तस्याऽग्रमहिषी प्राणवल्लभा रू[14]पशालिनी । अभू[15]**ल्लक्ष्मीवती** नाम लक्ष्मीर्लक्ष्मीपतेरिव ॥१०॥
शीलेन लज्जया प्रेम्णा दाक्ष्येण विनयेन च । बभूव सा पतिमनः-कुमुदानन्दचन्द्रिका ॥११॥
आलपन्ती [16]प्रणयिनः प्रीतिकोमलया गिरा । सा सुधासार[17]णिमिवाऽऽदधे तत्कर्णरन्ध्रयोः ॥१२॥
सा कलाभिः पल्लविता पुष्पिता [18]ह्रियादिभिर्गुणैः । पतिभक्त्या च फलिता [19]बभौ वल्लीव जङ्गमा ॥१३॥
¶कालेन गच्छता **लक्ष्मीवत्या** प्रसुषुवे सुता । सूतिकागृ[20]हमङ्गल्यदीपिकेव [21]स्वरोचिषा ॥१४॥
सर्वलक्षणया जातमात्रयाऽपि तया तदा । श्रियेव गृहमेयुष्या पितरौ तावहृष्यताम् ॥१५॥
पूर्वजन्मपतिस्तस्या **धनदो**ऽभ्येत्य तत्क्षणम् । तत्राऽत[22]निष्ट कनकवृष्टिं प्राक्स्नेहमो[23]हितः ॥१६॥
तया कनकवृष्ट्या च हृष्टो **लक्ष्मीवती**पतिः । तस्याः सुतायाः **कनकवती**ति विदधेऽभिधाम् ॥१७॥
अङ्कादङ्कं सञ्चरन्ती सा धात्रीणां स्तनन्धयी । क्रमाद् बभूव हंसीव पादचङ्क्रमणक्षमा ॥१८॥
तां पद्भ्यामुपसर्पन्तीं दृष्ट्वा प्रक्रान्ततालिकाः । उल्ला[24]पनैर्नवनवैर्गायन्ति स्मोपमा[25]तरः ॥१९॥
शनैः शनै[26]स्तां जल्पन्तीं [27]लल्ल-मन्मनया गिरा । मुहुरालापयन् धात्र्यः शारि[28]कामिव कौतुकात् ॥२०॥
आबद्धकुन्तला लोलकुण्डला [29]क्वाणिनूपुरा । सा रत्नकन्दुकै रेमे रमेवाऽपरमूर्तिभाक् ॥२१॥
कृत्रिमैः पुत्रकैर्नित्यं रममाणा [30]ववर्ष सा । हर्षप्रकर्षमुद्दामं मातुरुन्निद्रचक्षुषः ॥२२॥
उज्झन्ती मौग्ध्यमधुरां क्रमेण क्षी[31]रकण्ठताम् । कलाकलापग्रहणयोग्या **कनकव**त्यभूत् ॥२३॥
शुभेऽह्नि **कनकवतीं** कलाग्रहणहेतवे । उचितस्य कलाचार्यस्याऽर्पयामास भूपतिः ॥२४॥
अष्टादशाऽपि च लिपीर्लिपि[32]स्त्रष्ट्रीव [33]साऽबुधत् । शब्द[34]पारायणं चक्रे कण्ठस्थं निजनामवत् ॥२५॥
तर्काभ्यासादलमभूत् [35]पत्रदाने गुरोरपि । छन्दोऽलङ्कारशास्त्राब्धिपारदृश्वर्यजायत ॥२६॥

---

१. आश्चर्यम् । २.३. **यत्रो०** मु० । ४. ओकः-गृहम् । ५. तारासु । ६. हस्तिदन्तघटितकर्णाभूषणशङ्कया । ७. **यद्गृहे०** मु० । ८. **चलत्पताकिकाच्छाया०** पु० मु० । **चिरं पताकाच्छयापदेशाद् विष०** वि० ला० सू० । ९. **तत्र वासी** सू० । **यत्र** मु० । १०. **सममृज्यत** खं० २ । **समविध्यत** सू० । **समरज्यत** मु० । 'वासितः' लाटि० । ११. इन्द्रस्य । १२. **सुध्यान०** खं० १ सू० । **सोत्साह०** ला० । **सुस्थान०** मु० । उद्यमवतः । १३. ऊर्ध्वभूमिषु । १४. **शीलशालिनी** की० । १५. **०ल्लक्ष्मवती** खं० २ । १६. **प्रणयिनी** खं० २ । १७. **०णिमिव दध्रे** पु०आ० । १८. **पुष्पिताऽऽह्लादिभि०** ला० । १९. **०ऽऽवनौ** ला० । २०. **०गृहमाङ्गल्य०** मु० । **०दीपकेव** खं० २ । २१. स्वकान्त्या । २२. अकरोत् । २३. **०मोहतः** खं० २ । २४. आह्वानैः । २५. धात्र्यः । २६. **शनैः सा जल्पन्ती** ला० । २७. अस्फुटया । २८. सारिका 'मेना' इति भाषायाम् । २९. क्वणत्-शब्दं कुर्वत् नूपुरं यस्याः । ३०. **ववर्ध** खं० २, ला० सू० । ३१. बालताम् । ३२. ब्राह्मीव । ३३. **साधुवत्** खं० १ । ३४. व्याकरणम् । ३५. गुरोरपि वादायाह्वानदाने ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१]षड्भाषानुगया वाचा काव्यकौशलमाप च । अचित्रीयत [२]चित्रे च [३]पुस्तकर्मण्य[४]गल्भत ॥२७॥
क्रिया-कारक[५]गुप्तज्ञा वेदित्री च प्रहे[६]लिकाः । सकलद्यूतदक्षा च सारथ्यकुशलाऽप्यभूत् ॥२८॥
संवाह[७]कत्व-कल्पाऽभूज्जज्ञे रसवती[८]कलाम् । प्राप मायेन्द्रजालादिप्रादुर्भावननैपुणम् ॥२९॥
आचा[९]र्यकमिव प्राप [१०]तूर्यत्रितयदर्शने । सा काऽपि हि कला नास्ति सम्यग् यां न विवेद सा ॥३०॥ षड्भिः कुलकम् ॥
¶सा प्रपेदेऽनवद्याङ्गी लावण्यजलनि[११]म्नगा । कलाकलापसफलीकरणं मध्यमं वयः ॥३१॥
[१२]तद् दृष्ट्वा पितरौ तस्या वरान्वेषणतत्परौ । अपश्यन्तौ वरं योग्यमारेभाते स्वयंवरम् ॥३२॥
¶अपरेद्युः स्वसदने सुखासीना मृगेक्षणा । अकस्मादागतं राजहंसमेकं ददर्श सा ॥३३॥
अशोकपल्लवाताम्रचञ्चु-च्चरण-लोचनम् । [१३]पाण्डिम्ना [१४]नवडिण्डीरपिण्डैरिव विनिर्मितम् ॥३४॥
[१५]स्वर्णघर्घरिकामालभारिग्रीवं कलस्वनम् । नृत्यन्तमिव याने[१६]न तं दृष्ट्वा सेत्यचिन्तयत् ॥३५॥ युग्मम् ॥
कस्याऽप्यनल्पपुण्यस्य विनोदास्पदमेष हि । स्वामिस्वीकारबाह्यं हि पक्षिणां भूषणं कुतः ? ॥३६॥
स्वामिनो यस्य कस्याऽपि भवत्वेष सितच्छ[१७]दः । विनोदायाऽस्तु मे बाढं ममेहोत्कण्ठते मनः ॥३७॥
गवाक्षलीनमथ तं हंसं सा हंसगामिनी । म[१८]ङ्गल्यचामरमिव श्रियः स्वयमुपाददे ॥३८॥
प[१९]द्माक्षी पाणिपद्मेन सुखस्पर्शेन सा शनैः । मरालं लालयामास तं क्रीडापु[२०]ण्डरीकवत् ॥३९॥
शिरीषसुकुमारेण पाणिनाऽमार्जयच्च सा । तस्या[२१]ऽमलं पिच्छकोशं केशपाशं शिशोरिव ॥४०॥
सखीं **कनकवत्यू**चे दारुपञ्जरमानय । यथा तत्र क्षिपाम्येनं नैकत्र स्थायिनः खगाः ॥४१॥
दारुपञ्जरमानेतुं सा यावत् प्राचलत् सखी । स हंसो वक्तुमारेभे तावन्मानुषभाषया ॥४२॥
राजपुत्रि ! विवि[२२]क्ताऽसि मा मा मां पञ्जरे निधाः । तुभ्यं निवेदयिष्यामि प्रियं किञ्चिद् विमुञ्च माम् ॥४३॥
हंसं [२३]मानुषवाचा तं वदन्तं प्रेक्ष्य विस्मिता । सा गौरवाददोऽवादीत् प्रियातिथिमिवाऽऽगतम् ॥४४॥
[२४]प्रत्युताऽसि प्रसादार्हो हे हंस ! कथय प्रियम् । शर्करातोऽपि मधुरा वार्ताऽर्धकथिता सती ॥४५॥
¶हंसोऽप्याख्यत् **कोश[२५]लायां** नगर्यां खेचरेशितुः । **कोश[२६]लस्या**ऽमरीकल्पा दुहिताऽस्ति **सुको[२७]शला** ॥४६॥
[२८]**सुकोशला**पतिश्चास्ति युवा सौन्दर्य[२९]सारभूः । तं दृष्ट्वा भज्य[३०]ते रेखा सर्वेषां रूपशालिनाम् ॥४७॥
**सुको[३१]शला**पतिर्लोकोत्तररूपः स सुन्दरि ! । तद्रूपसदृशं रूपं ह्य[३२]दर्शि यदि नाऽन्यतः ॥४८॥
यथा हि स युवा रूपसम्पदा नृशिरोमणिः । नारीशिरोमणिस्तद्वत् त्वमप्यसि मनस्विनि ! ॥४९॥
युवयो रूप[३३]द्रष्टाऽहं युवयोः सङ्गमेच्छया । त्वां तस्य सम्यगाख्यायाऽऽख्यातवानस्मि तं तव ॥५०॥
स्वयंवरं च ते श्रुत्वा तथा तस्याऽसि वर्णिता । [३४]तव स्वयंवरे भद्रे ! स यथा स्वयमेष्यति ॥५१॥
स्वयंवरे बहूनां च मध्ये [३५]तमुपलक्षयेः । नक्ष[३६]त्रनाथं नक्षत्रेष्विवाऽनल्पेन तेजसा ॥५२॥
तन्मुञ्च मां स्वस्ति तुभ्यमपवादो धृते मयि । [३७]विधिर्भट्टारक इव पत्यर्थं प्रयते तव ॥५३॥
न सामान्यः पुमानेष क्रीडया हंसरूपभृत् । पतिः सम्पत्स्यते[३८]ऽनेन दध्यौ **कनकवत्यदः** ॥५४॥
तं मुमोच च सा हस्तात् स उत्पत्य विहायसा । तदुत्सङ्गे चित्रपटमपातयदुवाच च ॥५५॥

१. संस्कृतं, प्राकृतं, मागधी, पैशाची, शौरसेनी, अपभ्रंशः-इति षड् भाषाः । २. **चित्रेषु** मु० र० । ३. पुस्तं धातुकाष्ठादिभिर्वस्तुनिर्माणं तत्कर्मणि । "पुस्तं लेप्यादिकर्मणि" (अमर० २, शूद्र० २८); लेप्यं मृदा पुत्तलिकादिकरणं, आदिना काष्ठपुत्तलिकाकर्म गृह्यते (टीका) । ४. प्रावीण्यमलभत । ५. **०कारकगुम्फिका** ला०पु० आ० । ६. समस्याः । ७. अङ्गमर्दनकलायां दक्षा । ८. **०वर्ती कलाम्** । ९. आचार्यत्वम् । १०. गेयं नृत्यं वाद्यं च । ११. नदी । १२. **तां दृष्ट्वा** पा. पु० । १३. श्वैत्येन । १४. डिण्डीरः समुद्रफेनः । १५. स्वर्णस्य घर्घरिका-किङ्किणिकाः, तासां मालां बिभर्ति ग्रीवायां सः । १६. गमनेन । १७. हंसः । १८. **माङ्गल्यः** मु० । १९. **पद्माक्षा** मु० । २०. 'लीलाकमलवत्' लाटि० । २१. **०मलपिच्छ०** खं० २ । २२. **विदग्धाऽसि** खं० २। विवेकशीला । २३. **मानववाचा** छा० । २४. 'सन्मुखं' लाटि० । २५.२६.२७.२८. 'कोशल' मध्ये **श** स्थाने '**स०**' खं० १-२, सू० । २९. **०सारभृत्** खं० २ । ३०. **भग्नरेखाऽस्मि स०** खं० १ । **भग्नरेखोऽस्मि स०** सू० । ३१. **सुकोसला०** खं० १-२, सू० । ३२. दर्पणे । ३३. **रूपद्रष्टाऽहं** खं० १, ला०मु० । ३४. **ततः** खं० २ । ३५. **त्वमुप०** मु० । **तमपि ल०** ला० । ३६. चन्द्रम् । ३७. **विधिभट्टा०** मु० र० । भट्टारकः पूज्यः । ३८. **०ते तेन** खं० १-२, ला० ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

इहाऽस्ति लिखितो भद्रे ! स युवा यादृगीक्षितः । दृष्ट्वाऽऽले[1]ख्यगतममुं जानीथास्तमिहाऽऽगतम् ॥५६॥
प्रीता[2] **कनकवत्यू**चे कृताञ्जलिपुटा च तम् । कोऽसि त्वं ? कथ[3]यित्वा स्वं मनागनुगृहाण माम् ॥५७॥
स खेचरो हंस[4]चरश्चल[5]त्काञ्चनकुण्डलः । दिव्याङ्गरागनेपथ्यस्तथ्यवागिदमभ्यधात् ॥५८॥
¶अहं **चन्द्रातपो** नाम खेचरोऽस्मि वरानने ! । भाविनस्त्वत्पतेरस्य पादशुश्रूषणोद्यतः ॥५९॥
विद्याप्रभावादन्यच्च निरघे ! कथयामि ते । त्वामेष्यत्यन्य[6]दूत्येन स्वयंवरदिने च सः ॥६०॥
इत्युक्तवन्तं दत्ताशीः खेचरं विससर्ज सा । दध्यौ च संवदति मे दिष्ट्या यद्दैवतं वचः ॥६१॥
¶तयाऽ[7]थ चित्रस्थपतिदर्शनातृसया पटः । भूयो भूयोऽक्षिवच्चक्रे मीलनोन्मीलनास्पदम् ॥६२॥
क्षणं मूर्ध्नि क्षणं कण्ठे क्षणं हृदि च सा पटम् । दध्रे विरहतापार्ता बाला कदलिकाण्डवत् ॥६३॥
¶**चन्द्रातपो**ऽपि तत्कालं तयोः सङ्गमकौतुकी । ययौ **विद्याधरपुरे** विद्याधरविभूषिते ॥६४॥
विद्याशक्त्या महीयस्या स नभ[8]स्वानिवाऽस्खलन् । **वसुदेवा**श्रितं वासभवनं प्राविशन्निशि ॥६५॥
हंसरोमतूलिकाङ्के तल्पे धौतोत्तरच्छदे । सकलत्रं **वसुदेवं** शयानं च ददर्श सः ॥६६॥
विद्याधरीभुजलतो[9]च्छीर्षकं सुखशायिनम् । पाद[10]संवाहनेनोपाक्रंस्त **शौरिं** स सेवितुम् ॥६७॥
**शौरी** रतक्लमोत्पन्ननिद्रासुखभरोऽपि हि । क्षणादथ जजागार सूत्थाना हि नरोत्तमाः ॥६८॥
आकस्मिकं निशीथेऽपि तं तदोद्वीक्ष्य **यादवः** । न[11] बिभाय न चुकोप प्रत्युतैवं [12]परामृशत् ॥६९॥
पुमानेष विरुद्धो मे न हि तावदुपासनात् । शरणार्थी भवेद् यद्वा यद्वा मत्कार्यचिन्तकः ॥७०॥
यद्यालपाम्यमुं पादसेवकं मृदुवागपि । [13]सुषुप्ता सुरतक्लान्त्या तदा देव्यपि जागृयात् ॥७१॥
न चोपेक्षितुमर्हामि सेवापरममुं जनम् । उपेक्षकस्यापि हि[14] मे न निद्राऽस्मिन्निह स्थिते ॥७२॥
तदुत्थाय प्रयत्नेन देवीमप्रतिबोधयन् । पर्यङ्कात् परतो भूत्वा वार्तयाम्यमुमादृतम् ॥७३॥
[15]अनन्दोलितपर्यङ्कस्तनुलाघवनाटनात् । दशार्हस्तल्पमुज्झित्वा निषसाद ततो[16]ऽन्यतः ॥७४॥
¶**चन्द्रातपो**ऽपि सर्वाङ्गरत्नाभरणभूषितः । **दशार्हं** दशमं भक्त्या प्राणमत् पत्तिलेशवत् ॥७५॥
य आख्यत् **कनकवतीं** सोऽयं **चन्द्रातपा**भिधः । विद्याधर इति **शौरि**रुपलक्षयति स्म तम् ॥७६॥
**दशार्हः**[17] प्रतिपत्त्यर्हं तं परिष्वज्य खेचरम् । पृच्छति स्म [18]स्वागतिकः स्वयमागमकारणम् ॥७७॥
ततश्च**न्द्रातप**श्चन्द्रातपशीतलया गिरा । प्रौढ्या प्रज्ञावतां धुर्यो वक्तुमेवं प्रचक्रमे ॥७८॥
¶तादृशीं **कनकवतीं** तवाऽऽख्याय **यदूद्वह** ! । त्वामप्याख्यातवानस्मि तस्यै सद्भूतवर्णनात् ॥७९॥
विद्याबलाच्च त्वां नाथ ! पटे लिखितवानहम् । तं पटं चाऽर्पयं तस्यै तन्मुखाम्भोजभास्करम् ॥८०॥
दृष्ट्वा पटस्थं त्वां [19]राकामृगाङ्कमिव [20]सम्मदात् । [21]तस्या अमुञ्चताम् वारि लोचने चन्द्र[22]कान्तवत् ॥८१॥
साऽधात् तदैव त्वन्मूर्तिसनाथं तं पटं हृदि । दातुं विरहसन्तापसंविभागमि[23]व त्वयि ॥८२॥
सा यन्त्र[24]शालभञ्जीव वर्षन्नेत्रा कृताञ्जलिः । मामिति प्रार्थितवती गौरवोत्तारिताञ्चला ॥८३॥
मोपेक्षिष्ठा वराकीं मां नाऽऽप्तो[25] मे त्वदृतेऽपरः । उपानयेस्त्वं पुरुषं सर्वथा मत्स्वयंवरे ॥८४॥
नाथाऽद्य कृष्णदशमीदिवसस्तदनन्तरम् । भावी सितायां पञ्चम्यां पूर्वाह्ले तत्स्वयंवरः ॥८५॥
स्वयंवरोत्सवे तत्र प्रया[26]तुं यूयमर्हथ । [27]त्वत्सङ्गमाशाजीवातुरनुग्राह्यैव सा त्वया ॥८६॥

---

१. चित्रगतम् । २. **प्रीत्या** पु०आ० । ३. **कथयात्मानं** को० । ४. भूतपूर्वो हंसः **हंसचरः** । **हंसवर०** खं० १-२ । ५. **०श्चलकाञ्च०** - खं० १ । ६. **०रूपेण** ला० । अन्यस्य दूतो भूत्वा । ७. **तया च** खं० १ । ८. वायुरिव' लाटि० । ९. **०लतोत्कर्षकं** खं० १ । १०. पादसंवाहनेन शौरिं सेवितुमारेभे । ११. **विभावयन्न चु०** खं० १ । १२. **परामृशन्** खं० १-२ । १३. **सुखसुप्ता रत०** को०मु० । १४. **च** खं० १-२, ला० सू० । १५. **अनान्दोलित०** पु०आ०मु० । १६. **तदन्यतः** ला० । १७. **प्रतिपत्त्यर्थं** ता० सं० । १८. **स्वागतिकं** मु० र० । १९. पूर्णिमाचन्द्रम् । २०. हर्षात् । २१. **तस्या ववर्षतुर्वारि** मु० । २२. चन्द्रकान्तमणिवत् । २३. **०मिवोद्यता** सू० । २४. यान्त्रिकपुत्तली । २५. त्वया विनाऽपरो मे न हितः । २६. **स्वामिंस्त्वं गन्तुमर्हसि** खं० १, ला० को० छा० ला०२ । २७. 'भवत्सङ्गमस्याशैव जीवितं यस्याः सा' लाटि. ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶**वसुदेवो**ऽप्यथाऽवादी**च्चन्द्रातप** ! दिनोदये । आपृच्छ्य स्वजनानेवं करिष्ये [2]मुदंमुद्वह ॥८७॥
तिष्ठेस्त्वं **प्रमदवने** मया सह यियासया । स्वप्रयत्नफलं हन्त **पश्येस्तस्याः** [3]स्वयंवरम् ॥८८॥
एवमुक्ते तिरोऽधत्त स विद्याधरदारकः । **वसुदेवस्तु** सुष्वाप तल्पेऽनल्पप्रमोदभाक् ॥८९॥
¶स्वजनान् प्रातरापृच्छ्याऽनुज्ञाप्य प्रेयसीजनम् । **वसुदेवो** ययौ प्रातः **पेढालपुर**पत्तनम् ॥९०॥
तत्र राजा **हरिश्चन्द्रः** समागत्य **यदूद्वहम्** । अवासयदुपवने **लक्ष्मीरमण**नामनि ॥९१॥
अशोकपल्लवाताम्रे पाटलामोदशालिनि । केतकीकुसुमस्मेरे सप्तच्छदसुगन्धिनि ॥९२॥
कृष्णेक्षु-नागरङ्गाढ्ये कुन्दकुड्मलदन्तुरे । तत्रोद्याने विशश्राम **शौरिर्दृष्टिं** विनोदयन् ॥ ९३॥ युग्मम् ॥
ततश्च **कनकवती**पिता स्वविभवोचिताम् । [4]अर्हणामर्हणीयस्य **व्यधादानक**[5]**दुन्दुभेः** ॥९४॥
[6]पूर्वनिष्पादितेषूच्चैः-प्रासादेषु गृहेषु च । तत्रोद्याने स्थितः **शौरिरैति**[7]ह्यमशृणोदिदम् ॥९५॥
¶पुरा समवसरणं श्री**नमिस्वामिनो**ऽभवत् । इहोद्याने सेव्यमानं सुरा-ऽसुर-नरेश्वरैः ॥९६॥
इहाऽमरीभिः सहिता रासकेनाऽर्हतः पुरः । लक्ष्मी रेमे [8]तदाद्येत**ल्लक्ष्मीरमण**मित्यभूत् ॥९७॥
तत्र चाऽऽ[9]यतनेषूच्चैः प्रतिमाः श्रीमदर्हताम् । दिव्योपहारैरानर्च ववन्दे च **यदूद्वहः** ॥९८॥
¶तदा च विष्वग् रत्नाढ्यं **सुमेरु**मिव जङ्गमम् । उत्प[10]ल्लवं द्रुममिव पताकालक्षलक्षितम् ॥९९॥
अनेककरि-मकर-तुरगाकरमब्धिवत् । आदित्यमण्ड[11]लैरुचामाचामकमिवाऽर्चिषा ॥१००॥
समेघनादं व्योमेव बन्दिकोलाहलाकुलम् । [12]मङ्गल्यतूर्यनिर्घोषै[13]स्तर्जिताम्बुदगर्जितम् ॥१०१॥
उत्कन्धरीकृताशेषविद्याधरमवातरत् । विमानमेकमद्राक्षीत् तत्र **शौरिरनाकुलः** ॥१०२॥ चतुर्भिः कलापकम् ॥
पप्रच्छ चैकमग्रस्थं **वसुदेवो दिवौकसम्** । विमानं शक्र[14]सध्रीचः कस्येदं नाकिनो ? वद ॥१०३॥
**सोऽब्रवीद् धनदस्येदं**[15] तदारूढः स चाऽधुना । उत्तरत्यत्र भूलोके कारणेन गरीयसा ॥१०४॥
पूजयित्वाऽर्हत्प्रतिमाश्चैत्येऽस्मिन् प्रयतिष्यते । अचिरात् **कनकवती**स्वयंवरदिदृक्षया ॥१०५॥
तदा चाऽचिन्तयत् **शौरिर्धन्या कनकवत्य**हो ! । देवा अप्युपतिष्ठन्ते प्रारब्धे यत्स्वयंवरे ॥१०६॥
अथाऽवतीर्य **धनदः** प्रतिमाः श्रीमदर्हताम् । आनर्च च ववन्दे च सङ्गीतं चाऽप्यचीकरत् ॥१०७॥
अहो ! महात्मा देवोऽयं **पुण्य**भाक् परमार्हतः । अहो ! **प्रभावनापात्रं** शासनं श्रीमदर्हताम् ॥१०८॥
अहो ! धन्योऽस्मि यस्यैतदद्भुतं [16]दृष्टिगोचरम् । सुचिरं चिन्तयामास **शौरिरेवं** समाहितः ॥१०९॥
तत्र **वैश्रवणः** पूजां समाप्य श्रीमदर्हताम् । यथारुचि प्रचलितो ददर्शाऽऽ**नकदुन्दुभिम्** ॥११०॥
अचिन्तयच्च काऽप्यस्य पुंसो लोकोत्तराकृतिः । [17]अमराणामसुराणां खेचराणां च नास्ति या ॥१११॥
**धनदो**ऽनुपमश्रीकमाकृत्या प्रेक्ष्य **यादवम्** । अङ्गुलीसंज्ञयाऽऽह्वास्त विमानस्थः समम्भ्रमम् ॥११२॥
अहं मनुष्यो देवोऽयं महर्द्धिः परमार्हतः । [18]इत्यगाद् **वसुदेवस्तमभीरुः** कौतुकीति च ॥११३॥
**धनदो**[19]ऽपि ततः स्वार्थसतृष्णो **वृष्णि**नन्दनम् । प्रियालापादिसत्कारपात्रीचक्रे वयस्यवत् ॥११४॥
प्रकृत्याऽपि विनीतात्मा सत्कृतश्चेति **वृष्णि**[20]**सूः** । कृताञ्जलिस्तं प्रावोचदाज्ञापय करोमि किम् ? ॥११५॥
अथावदद् **वैश्रवणः** [21]श्रोत्रशर्मदया गिरा । साधयाऽनन्यसाध्यं मे [22]दूत्यमेकं महाशय ! ॥११६॥
¶अस्मिन् पुरे **हरिश्चन्द्र**नरेन्द्रस्य कुमारिका । सुता **कनकवत्य**स्ति तामिदं वद मद्गिरा ॥११७॥
शक्रस्य देवराजस्योत्तरदिक्पतिरिच्छति । त्वां वैश्रवण उद्वोढुं [23]मनुष्यप्यमरी भव ॥११८॥

---

१. **दिवात्यये** खं० १ । **दिनात्यये** ला०ता०पा०सं०की०ला० । **निशात्यये** पु० । २. **मुदमुद्वहेः** मु० । ३. **स्वयंवरे** मु० र० । ४. सत्कारम्। ५. वसुदेवस्य । ६. **पूर्व नि०** ला० । ७. इतिहासम् । ८. 'तत आरभ्य । ९. **चायतनेऽप्युच्चैः** खं० २, मु० । १०. **उत्पल्लवद्रुम०** खं० २ । ११. **०रुचमेकं गृहमिवार्चिषाम्** खं० १ । आचामकं-'व्यापकं' लाटि. । १२. **माङ्गल्य०** मु० । १३. **०षनिर्जिता०** ता० सं० । **०निर्घोषैस्तर्जिता०** ला० । १४. इन्द्रसमानस्य कस्य देवस्य । १५. **०दमिहारूढः** खं० १, ला० । १६. **दृष्टिगोचरः** त० सं० की० छा० । १७. **न सुराणां नासुराणां** ता.सं.पा.की.पु.खं०२ । **न सुराणां खेचराणां नासुराणां** सू० । १८. **अभ्यगाद्०** की० । **इत्यागाद्०** २ । १९. **ततोऽपि धनदः** ता०सं० । २०. **वृष्णिभूः** ता०सं० । २१. **श्रवणानन्दया** खं०१, सू० । २२. **दौत्य०** ला०ता०सं०, र० । २३. मानुष्य० मु० र० ।

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

मम चाऽमोघया वाचा समीरण [१]इवाऽस्खलन् । प्रदेशं [२]**कनकवती**भूषितं त्वमवाप्स्यसि ॥११९॥
ततश्च गत्वा स्वावासे दिव्यालङ्करणादिकम् । मुक्त्वा प्रेष्यौ[३]चितं **शौरि**र्मलिनं वेषमाददे ॥१२०॥
यान्तं मलिनवेषं तु[४] **यादवं धनदो**ऽवदत् । किमुदारं वेषमौज्झीः सर्वत्रा[५]ऽऽडम्बरोऽर्हति ॥१२१॥
**शौरिः** प्रोवाच वेषेण मलिनेनोज्ज्वलेन वा । किं नाम कार्यं ? दूत्ये[६] हि मण्डनं वाग् ममाऽस्ति सा ॥१२२॥
¶'स्वस्ति तुभ्यं' प्रयाहीति **धनदे**नोदितः पुनः । निःशङ्कं **वसुदेवो**ऽगाद् **हरिश्चन्द्र**गृहाङ्गणम् ॥१२३॥
हस्त्यश्व-रथ-योधादिनिरुद्धद्वारमप्यथ । **वसुदेवो**ऽविशद् वेश्म **हरिश्चन्द्र**महीपतेः ॥१२४॥
अदृश्यमानः केनाऽपि ततश्चाऽप्रस्खलद्गतिः । योगीवाऽञ्जनसिद्धोऽगादग्रतो **वृष्णि**नन्दनः ॥१२५॥
¶रुद्धं बद्धपरिकरैः सौ[७]विदैर्वेत्रपाणिभिः । प्राविशत् प्रथमं कक्षान्तरं **शौरि**र्नृपौक[८]सः ॥१२६॥
इन्द्रनीलमयोर्वीकं [९]चलत्कान्तितरङ्गितम् । साम्भोवापीभ्रमकरं **शौरि**स्तत्क्षणमैक्षत ॥१२७॥
दिव्याभरणधात्रीणां स्त्रीणामप्सरसामिव । सुरूपाणां सवयसां तत्र वृन्दं ददर्श सः ॥१२८॥
स्वर्णस्तम्भं मणिमयपाञ्चालीकं [१०]चलद्ध्वजम् । कक्षान्तरमथाऽविक्षद् [११]द्वैतीयीकं **यदूद्वहः** ॥१२९॥
ज्योत्स्नासहोदरक्षीरतरङ्गेऽथ तृतीयके । कक्षान्तरेऽविशत् क्षीरोदधाविव सुरद्विपः[१२] ॥१३०॥
स्त्रीजनं तत्र सोऽपश्यद् दिव्याभरणभूषितम् । असम्मान्तं सुरपुरेऽप्सरोजन[१३]मिवाऽऽगतम् ॥१३१॥
तुर्यं कक्षान्तरं प्राप्तोऽपश्यच्च [१४]जलकुट्टिमम् । तरङ्गतरलं हंस-कुर[१५]रादिसमाकुलम् ॥१३२॥
तत्राऽऽत्मानं प्रपश्यन्तीर्विनाऽप्यादर्शमङ्गनाः । शृङ्गारकर्म कुर्वाणाः प्रेक्षाञ्चक्रे **यदूद्वहः** ॥१३३॥
अश्रौषी[१६]च्छारिका-कीरोदीर्यमाणं च मङ्गलम् । चेटीजनं च प्रैक्षिष्ट गीत-नृत्य[१७]समाकुलम् ॥१३४॥
कक्षान्तरं पञ्चमं च ययौ **शौरि**र्ददर्श च । मनोरमं मौर[१८]कतं कुट्टिमं स्वर्गृहोपमम् ॥१३५॥
मुक्ता-विद्रुमदामौघांश्चामरांश्चाऽवलम्बितान् । सङ्क्रान्तांस्तत्र सोऽपश्यन् मायाकारकृतानिव ॥१३६॥
सुरू[१९]पवेषा रत्नालङ्कारभाण्डभृतोऽभितः । शालभञ्जीरिव स्तम्भ[२०]लग्नाश्चेटीर्ददर्श च ॥१३७॥
प्राप्तः कक्षान्तरं षष्ठं सोऽद्राक्षीत् पद्म[२१]कुट्टिमम् । दिव्यं सरोवरमिव सर्वतः पद्ममण्डितम् ॥१३८॥
दिव्याङ्गरागपूर्णानि मणि[२२]पात्राणि चाऽग्रतः । अपश्यत् तत्र **वार्ष्णेयो** दैवतान्यंशुकानि च ॥१३९॥
कृमिरागांशुकभृतां सुदृशां तत्र **वृष्णिभूः**[२३] । मूर्तानामिव सन्ध्यानां वृन्दं दृग्विषयं व्यधात् ॥१४०॥
कक्षान्तरे सप्तमे च **शौरिः** कुट्टिममैक्षत । लोहिताक्षमयस्तम्भं कर्केतनमणीमयम् ॥१४१॥
तत्राऽपश्यत् कल्पवृक्षान् कुसुमाभरणानि च । पानीयपूर्ण[२४]कलश-करका[२५]णां च धोर[२६]णीः ॥१४२॥
कलाविदः सर्वदेशभाषादक्षाः सुलोचनाः । कुण्डलालीढगण्डाश्च सोऽद्राक्षीद् वेत्रधारिणीः ॥१४३॥
¶सोऽचिन्तयच्च कस्याऽपि नाऽवकाशोऽत्र वेश्मनि । एताभिर्वेत्रधारीभिर्नीरन्ध्रं परिवारिते ॥१४४॥
एवं चिन्तयतः **शौरे**र्लीलाकनकपद्मभृत् । पक्ष[२७]द्वाराध्वना दिव्यवेषैका दास्युपाययौ ॥१४५॥
अपृच्छन् वेत्रधारिण्यस्तास्तामेवं ससम्भ्रमाः । स्वामिनी **कनकवती** क्व तिष्ठति ? करोति किम् ? ॥१४६॥
साऽप्याख्यत् **प्रमदवने** प्रासादे दिव्यवेषभृत् । देवताकृतसान्निध्या स्वामिन्येकैव तिष्ठति ॥१४७॥
**वसुदेवो**ऽपि तच्छ्रुत्वा तां ज्ञात्वा तत्र तस्थुषीम् । पक्षद्वाराध्वना दासी-कथितेन विनिर्ययौ ॥१४८॥
प्राप्तश्च **प्रमदवने** प्रासादं सप्तभूमिकम् । तुङ्ग[२८]प्राकारमद्राक्षीत् तं शनैरारुरोह च ॥१४९॥
दिव्यालङ्कार-नेपथ्यधरां कल्पलतामिव । सर्वर्तुपुष्पाभरणां साक्षादिव वनश्रियम् ॥१५०॥

---

१. **इवाचलन्** ता०सं० । २. **कनकवत्या** मु० । ३. दूतयोग्यम् । ४. **च** खं०२, सू० । ५. **०डम्बरोऽर्घति** खं० १-२, ला०ता०सं०पा० । ६. **दौत्ये** र० । ७. **सोविदै०** खं० २ । ८. **०कसि** ला० । ९. **चलकान्ति०** खं० १-२, सू० । १०. **चलध्वजम्** खं० १-२, सू० । ११. **द्वितीयीकं** खं० १ । १२. ऐरावणः । १३. **०जनसमागतम्** मु० । १४. जलात्मकं (स्फाटिकं) भूतलम् । १५. **०कुलीरादि०** खं० २। कुररः पक्षिविशेषः मत्स्यनाशनः, बकः । १६. **०त्सारिका०** खं० २, मु० । १७. **०नृत्त०** खं० १, ला० । १८. मरकतमणिमयम् । १९. **सुवेषरूपा** मु० । २०. **स्तम्भं** खं० २ । २१. पद्मरागमणिमयभूतलम् । २२. **मणिवस्त्राणि** खं० २ । २३. **वृष्णिसूः** मु० । २४. **०पूर्णाः** क० ला०सू० । २५. 'झारी' इति भाषायाम् । २६. श्रेणीः । २७. पार्श्वद्वारमार्गेण । २८. **तुङ्गं प्रा०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]आजन्मसृष्टिसर्वस्वमिव रूपश्रियो[2] विधेः । भद्रासनस्थितामेकामपि सानुचरामिव ॥१५१॥
पटालिखितपुंरूपं पश्यन्तीं तन्मयीमिव[3] । अद्राक्षीत् **कनकवती**मुपसर्पन् **यदूद्वहः** ॥१५२॥ त्रिभिर्विशेषकम् ॥
¶**दशार्हं कनकवती** पटरूपमिवाऽपरम् । दृष्ट्वेष्टागमनज्ञानाद् व्यकसत् प्रातरब्जवत् ॥१५३॥
सा दृष्ट्वा **यादवं** चित्रं चित्रं दृष्ट्वा च **यादवम्** । [4]ददर्श श्रान्तमश्रान्तनेत्रा हर्षोच्छ्वसत्तनुः ॥१५४॥
**दशार्ह**मर्चमाना सा नेत्रैरिन्दीवरैरिव । भद्रासनाद् द्रागुदस्थात् कृताञ्जलिरुवाच च ॥१५५॥
त्वमाकृष्टोऽसि मे पुण्यैस्तव दास्यस्मि सुन्दर ! । इत्युक्त्वा **वसुदेव**स्य सा नन्तुमुपचक्रमे ॥१५६॥
**दशार्हः** प्रणमन्तीं तां प्रतिषिध्यैवमभ्यधात्[5] । भृत्योऽस्मि मा प्रणंसीस्त्वं स्वामिन्यसि महाशये ! ॥१५७॥
यो हि स्यादनुरूपस्ते तं प्रणन्तुं त्वमर्हसि । अविज्ञातकुले भृत्ये मा[6] मय्यनुचितं कृथाः ॥१५८॥
सोवाच सर्वं ज्ञातं ते त्वमेवाऽसि पतिर्मम । यस्त्वं देवतयाऽऽख्यातो ध्यातश्चित्रगतश्च यः ॥१५९॥
¶**वसुदेवो**ऽवदद् भद्रे ! नाऽहमस्मि पतिस्तव । यस्ते देवतया ख्यातः पतिस्तस्याऽस्मि किङ्करः ॥१६०॥
श्रूयतां च स ते भर्ता शक्रस्योत्तरदिक्पतिः । स्वःस्त्रीमुखाब्जभसलो[7] **धनदो** विश्वविश्रुतः ॥१६१॥
तस्याऽस्मि किङ्करो दूतो याचेऽहं त्वां तदाज्ञया । भवाऽग्रमहिषी तस्य सेव्यमानाऽमरीजनैः ॥१६२॥
साऽब्रवीद् **धनदे**[8] नामग्राहं कृतनमस्कृतिः । शक्रसामानिकः क्वाऽयं क्वाऽहं मानुषकीटिका ॥१६३॥
दूत्यं[9] यन्मय्यनुचितं क्रीडामात्रं हि तस्य तत् । मानुषीणां सुरैर्जातु भूतपूर्वो न सङ्गमः ॥१६४॥
**वसुदेवो**ऽवदद् भद्रे ! देवतादेशमन्यथा । कुर्वाणा **दवदन्तीव** त्वमनर्थमवाप्स्यति(सि?) ॥१६५॥
¶ऊचे **कनकवत्येवं धनदे**त्यक्षरैः श्रुतैः । मम प्राग्जन्मसम्बन्धात् कुतोऽप्युत्कण्ठते मनः ॥१६६॥
दुर्गन्धिस्य शरीरस्यौदारिकस्य सुधादना[10]: । नेशते गन्धमपि हि सोढुमित्यर्हतं[11] वचः ॥१६७॥
तद्दूत्यच्छद्मना छन्नस्त्वमेव हि पतिर्मम । गत्वा चाऽऽख्याहि[12] मद्वाचं देवस्योत्तरदिक्पतेः ॥१६८॥
त्वद्दर्शनेऽपि नाऽर्हामि मानुषीमात्रमस्म्यहम् । पूज्योऽसि प्रतिमां कृत्वा सप्तधातुतनोर्मम ॥१६९॥
¶अदृश्यमानः केनाऽपि ततश्च **यदुपुङ्गवः** । पथा यथागतेनैव ययौ **धनद**सन्निधौ[13] ॥१७०॥
यावदाख्यातुमारेभे तं वृत्तान्तं[14] **यदूद्वहः** । तावत् प्रोवाच **धनदः** सर्वं विदितमेव मे ॥१७१॥
पुरः सामानिकानां च **धनदः** प्रशशंस तम् । महापुंसोऽस्य काऽप्येषा निर्विकारचरित्रता ? ॥१७२॥
इति प्रशंसन् **धनदो** नाम्ना **सुरपतिप्रियम्** । देवदूष्यांशुकयुगं दिव्यगन्धाधिवासितम् ॥१७३॥
**सूरप्रभं** शिरोरत्नं **दकगर्भे** च कुण्डले । हारं **शशिमयूखं** च केयूरे **ललितप्रभे** ॥१७४॥
नक्षत्रमालिकां **चार्धशारदाम**भिधानतः । **सुदर्शनौ** च कटकौ विचित्रमणिमण्डितौ ॥१७५॥
विचित्ररत्नं च कटिसूत्रकं **स्मरदारुणम्** । दैवतानि च माल्यानि दैवतं च विलेपनम् ॥१७६॥
तदैव **वसुदेवाय** प्रददौ[15] परितोषभाक् । तदङ्गलग्नं कृत्वा च सोऽप्यभूद् धनदोपमः ॥१७७॥ पञ्चभिः कुलकम् ॥
**वसुदेवं** तथा दृष्ट्वा **धनदे**नाऽपि सत्कृतम् । श्यालादयः[16] सहाऽऽयाताः सर्वे मुमुदिरेतराम् ॥१७८॥
¶**हरिश्चन्द्रो**ऽपि हि तदा तत्राऽऽगत्य सकौतुकः । प्रणम्य **धनदं** बद्धाञ्जलिरेवं व्यजिज्ञपत् ॥१७९॥
भवद्भि**र्भारतं** वर्षमद्य देवाऽन्वगृह्यत । स्वयंवरदिदृक्षूणां यद् युष्माकमिहाऽऽगमः ॥१८०॥
इत्युक्त्वा सज्जयामास स स्वयंवरमण्डपम् । मञ्चांश्च कारयामास विविधासनबन्धुरान् ॥१८१॥
विमानच्छायया पृथ्व्याः सन्तापम्[17]वसादयन् । उद्दण्ड[18]पुण्डरीकालिदर्शितेन्दुपरम्परः ॥१८२॥
वीज्यमानः सुरवधूपाणिपल्लवलालितैः । विद्युदुत्क्षिप्तकरणै[19]र्नर्तकैरिव चामरैः ॥१८३॥

---

१. जन्मपर्यन्तं विधिना या सृष्टिः सृष्टा, तस्याः सारसर्वस्वमिव । २. **०श्रियां** ला० । ३. **तन्मया०** ला० । ४. **ददर्शाऽश्रान्तनेत्राब्जा हर्षोत्कर्षोच्छ्वसत्तनुः** ला० । ५. **०वमब्रवीत्** मु० । ६. **मैवं मे सत्कृतिं कृथाः** खं० २ । ७. भ्रमरः । ८. **०धनदनाम०** मु० । ९. **दौत्यं** ला० । १०. अमृतभक्षिणः, देवाः । **सुधौदनाः** मु० खं० १, र० । ११. **०मित्यर्हतां** मु० । १२. **त्वाख्याहि** खं० १-२, सू० । १३. **०सन्निधिम्** खं० २, सू० । १४. **०भे वृत्तान्तं च** ला० । १५. **ददौ च** ला० । १६. **शाला०** खं० २, सू० । १७. **०मपसारयन्** मु० । १८. श्वेतच्छत्रश्रेण्या दर्शिता इन्दूनां पंक्तिर्येन सः । १९. **०नक्षत्रैरिव** ला० ।

Jain Education International　　　　For Private & Personal Use Only　　　　www.jainelibrary.org

¶[1]**वालिखिल्यै**रिव रविः स्तूयमानश्च बन्दिभिः । ततः स्वयंवरं द्रष्टुं प्रचचालो[2]त्तरापतिः ॥१८४॥ त्रिभिर्विशेषकम् ॥
श्वेतदिव्यांशुकोल्लोचं ज्योत्स्नालिप्तमिवाऽम्बरम् । स्मरसज्जीकृतधनुःसन्निभाबद्धतोरणम् ॥१८५॥
रत्नादर्शाङ्कितं विष्वगनेकार्कैरिवाऽऽश्रितम् । रत्नमय्याऽष्टमङ्गल्या शोभितद्वारभूमिकम् ॥१८६॥
खे बलाकाभ्रमकरैः शोभितं शुभ्रकेतुभिः । नानारत्नमयोर्वीकं **सुधर्माया** इवाऽनुजम् ॥१८७॥
वराणां दृग्विनोदाय प्रक्रान्तप्रेक्षणीयकम् । प्रविवेशोत्तराधीशस्तं स्वयंवरमण्डपम् ॥१८८॥ चतुर्भिः कलापकम् ॥
¶[3]तत्रैकस्मिन् भव्यमञ्चे **धनदो** हंसवाहनः । [4]खस्थे सिंहासने स्वःस्त्रीजनावृत उपाविशत् ॥१८९॥
अदूरे **धनदस्या**ऽथ तस्यैव युवराडिव । **वसुदेवो** निषसाद प्रसादसुभगाननः ॥१९०॥
क्रमेणाऽन्येऽपि मञ्चेषु राजानः परमर्द्धयः । विद्याधराश्च न्यषदन् स्पर्धमाना इव श्रिया ॥१९१॥
**धनदो** निजनामाङ्कामर्जुनस्वर्णनिर्मिताम् । ऊर्मिकामार्पयत् **शौरेः** स न्यधात् [5]कन्यकाङ्गुलौ ॥१९२॥
ऊर्मिकायाः प्रभावे[6]ण तदैव **यदुनन्दनम्** । **कुबेर**मूर्त्तिमद्राक्षीत् तत्रस्थः सकलो जनः ॥१९३॥
अहो ! **कुबेरो** भगवान् मूर्त्तिद्वयभृदागतः । प्रघोषाद्वैतमित्युच्चैः स्वयंवरसदामभूत् ॥१९४॥
¶सदशश्वेतवसना ज्यो[7]त्स्नाक्तेव विभावरी । मुक्ताताडङ्करुचिरा सा [8]द्वीन्दुरिव **मेरु**भूः ॥१९५॥
अलक्तरसरक्तोष्ठी पक्वबिम्बेव बिम्बिका । हारभूषितवक्षोजाऽद्रिभूरिव सनिर्झरा ॥१९६॥
बिभ्रती स्मरदोलाभं पाणिभ्यां पुष्पदाम च । तदा **कनकव**त्यागात् तत्र हंसीव म[9]न्थरम् ॥१९७॥ त्रिभिर्विशेषकम् ॥
¶तया च तत्राऽऽगतया स स्वयंवरमण्डपः । मङ्गल्यया दीपिकया **गृहगर्भ** इ[10]वाऽशुभत् ॥१९८॥
दृशा सम्भावयामास वुवूर्षूनखिलांश्च सा । कैरवाणीन्दुलेखेव भासा [11]शैशिर्यसारया ॥१९९॥
चित्रदृष्टं **वसुदेवं** दू[12]त्यंदृष्टं च तत्र तम् । अपश्यन्ती विषादात्मा मम्लौ सायमिवाऽब्जिनी ॥२००॥
[13]सपांशुक्रीडिकाहस्तन्यस्तभाराऽथ सा चिरम् । **निःस्प**[14]**न्दा** शालभञ्जीव तस्थावस्वास्थ्यमीयुषी ॥२०१॥
तस्यां कमप्य[15]वृण्वत्यां राजानः स्वं व्यलोकयन् । किं रूप-वेष-चेष्टादिदोषोऽस्मास्विति शङ्कया ॥२०२॥
¶सख्यूचे **कनकवतीं** किमद्याऽपि विलम्बसे ? । स्वयंवरस्रक् कस्याऽपि न्यस्यतां कण्ठकन्दले ॥२०३॥
**हरिश्चन्द्र**सुतोवाच [16]रुच्यो हि व्रियते वरः । यश्च मे रोचते मन्दभाग्या पश्यामि तं नहि ॥२०४॥
दध्यौ च क उपायो मे ? का गतिश्च भविष्यति ? । इष्टं वरं न पश्यामि भव रे हृदय ! द्विधा ॥२०५॥
इत्थं चिन्तातुरा प्रेक्ष्य **धनदं** प्रणिपत्य च । दीना रुदती सा बद्धाञ्जलिरेवं व्यजिज्ञपत् ॥२०६॥
देव ! प्राग्जन्मपत्नीति नर्मेत्थं मा कृथा मयि । मया वुवूर्षितो भर्त्ता त्वया चक्रे तिरोहितः ॥२०७॥
स्मित्वोचे **धनदः शौरिं** महाभाग ! मयाऽर्पिताम् । मुद्रां **कुबेरकान्ता**ख्यामिमां हस्तादपाकुरु ॥२०८॥
**शौरि**स्तामूर्मिकां हस्तादुत्तार्य **धनदा**ज्ञया । स्वमूर्त्तिभागभूद् भूयो नाट्याभिनयपात्रवत् ॥२०९॥
सा **दशार्हं** स्वमूर्तिस्थमुपलक्ष्य [17]वलक्षदृक् । बहिर्भूतप्रमोदेव बभूव पुलकाङ्किता ॥२१०॥
उपसृत्य च तत्कण्ठे र[18]णज्झणितनूपुरा । स्वयंवरस्त्रजं न्यास्थन्निजां भुजलतामिव ॥२११॥
दिवि दुन्दुभयो नेदुस्तदा च **धनदा**ज्ञया । म[19]ङ्गल्यकं चोन्मनसोऽप्सरसः सरसं जगुः ॥२१२॥
अहो ! धन्यो **हरिश्चन्द्रो** वव्रे यस्य सुता वरम् । जगत्प्रधानमित्यु[20]च्चैर्विष्वद्रीची च वागभूत् ॥२१३॥
देवता **धनदा**दिष्टा वसुधारां निर[21]न्तराम् । सद्यो ववृषुराचारलाजानिव कुलाङ्गनाः ॥२१४॥
**वसुदेवस्य कनकव**त्याश्चोपयमोत्सवः । तदा बभूव तन्वानो हर्षस्यैकातपत्रताम् ॥२१५॥
¶अथ वि[22]ज्ञापयामास श्रीदं नत्वा **यदूद्वहः** । किमायाता यूयमत्रेत्यस्मि ज्ञातुं कुतूहली ॥२१६॥

---

१. ऋषिभिः । २. धनदः । ३. **तत्रैकस्मिन्नुच्चमञ्चे** मु०, खं० १-२, ला०सू० । **तत्रैकस्मिन् रुच्यमञ्चे** सं०पु०ला० २ । ४. **स्वस्थे** मु० । ५. **कनिष्ठाङ्गुलौ** खं० २, ला०मु०र० । कनिष्ठाङ्गुलौ इत्यर्थः । ६. **प्रभावेन तमेव** ला० । ७. ज्योत्स्नासहिता । ८. **सद्वीन्दु०** की०छा०ला०२, मु०, खं० १-२, ला०सू० । ९. **मन्थरा** ला० । १०. **इवाबभौ** मु० । ११. **शौण्डीर्य०** मु० । १२. **दौत्य०** ला० । १३. सखीहस्तन्यस्तभारा । १४. **निःस्पन्दशाल०** ता०सं० । १५. **०वृण्वन्त्यां** ला० । १६. **भव्यो** की०ला० । १७. शुद्धदृष्टिः । १८. **रूणज्झ०** ता.सं.ला.पा.की. । १९. **मङ्गल्यकण्ठोन्मनसो०** र० । २०. **०र्विषूची वागभूत्तदा** मु०, र० खं० १-२ । विश्वव्यापिनी । २१. **निरन्तरम्** ता.सं.पा.की.ला. खं० २, सू० । २२. **विज्ञपया०** खं० १-२, सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**श्रीदः** प्रोचे सहर्षस्तं **शौरि**माबद्धकङ्कणम् । कुमार ! श्रूयतामत्र [1]ममाऽऽगमनकारणम् ॥२१७॥
अस्यैव **जम्बूद्वीप**स्य क्षेत्रे **भरत**नामनि । [2]**सङ्गरं** नाम नगरमस्त्य**ष्टापद**सन्निधौ ॥२१८॥
तत्राभू**न्मम्मणो** राजा तस्य **वीरमती** प्रिया । सभार्यः सोऽन्यदाऽचालीत् पाप[3]र्द्ध्यै नगराद् बहिः ॥२१९॥
सार्थेन सममायातमेकं मलमलीमसम् । क्षमाश्रमणमद्राक्षीद् रक्ष[4]ःक्षुद्राशयोऽथ सः ॥२२०॥
असावशकुनं मेऽभून्मृगयोत्सवविघ्नकृत् । इति सोऽधारयत् साधुं सार्थाद् यूथादिव द्विपम् ॥२२१॥
भूयो राजकुले गत्वा सकलत्रोऽपि भूपतिः । सोऽस्थाद् द्वादश घटिकास्तमृषिं विप्र[5]लापयन् ॥२२२॥
ताभ्यां जातानुकम्पाभ्यां दम्पतीभ्यां ततो मुनिः । अप्रच्छि कुत आयासीः ? क्व वा गच्छसि ? कथ्यताम् ॥२२३॥
मुनिर्बभाषे चलितो **रोहीतकपुरा**दहम् । **अष्टापदा**र्हद्बिम्बानि सार्थेन सह वन्दितुम् ॥२२४॥
भवद्भ्यां च मह[6]ात्मानौ ! सार्थादस्मि वियोजितः । **नाऽष्टापद**मगां धर्मकर्म बह्वन्तरायकम् ॥२२५॥
दम्पती लघुकर्मत्वाद् [7]वार्तयन्तौ तु तं मुनिम् । तौ विसस्मरतुः कोपं दुःस्वप्नमिवं [8]मङ्क्ष्वपि ॥२२६॥
तावार्द्रहृदयौ ज्ञात्वा परोपकृतिधीर्मुनिः । तयोराख्यज्जीवदयाप्रधानं धर्ममार्हतम् ॥२२७॥
[9]अविद्धकर्णौ तौ धर्माक्षरैराजन्म दम्पती । किञ्चिद्धर्माभिमुखतां ततः प्रभृति जग्मतुः ॥२२८॥
प्रत्यलाभयतां भक्त्या भक्त-पानादिना च तम् । प्रियातिथिमिवाऽभ्य[10]र्णमवाऽति[11]ष्ठिपतां च तौ ॥२२९॥
किं तु राज[12]सभावेन विनिवार्या[13]ऽपरं जनम् । चक्रतुस्तौ स्वयमेव तस्यर्षेः प्रतिलाभनम् ॥२३०॥
[14]धर्मज्ञानौषधं दत्वा कर्मरोगार्तयोस्तयोः । मुनिः **सोऽष्टापदं** प्राप ताभ्यामनुमतश्चिरात् ॥२३१॥
तौ चिरं व्रतिसंसर्गात् प्रपद्य श्रावकव्रतम् । पालयामासतुर्यत्नाद् द्रविणं कृपणाविव ॥२३२॥
**वीरमत्य**न्यदा धर्मस्थिरीकरणहेतवे । निन्ये शासनदेव्या**ऽष्टापदे** धर्मजुषां न किम् ? ॥२३३॥
आर्हतीः प्रतिमास्तत्र पूज्यमानाः सुरासुरैः । दृष्ट्वा सा प्रापदानन्दं मुक्तेवाऽत्राऽपि जन्मनि ॥२३४॥
चतुर्विंशतिमप्यर्हद्बिम्**बान्यष्टापदा**चले । वन्दित्वा पुनरप्यागात् स्वपुरं खेचरीव सा ॥२३५॥
जिनं जिनं प्रत्यकार्षीत् सा [15]चैऽऽचाम्लानि विंशतिम् । तीर्थावलोकनाद् धर्मे दधाना स्थैर्य[16]सीं धियम् ॥२३६॥
उपरिन्यस्तरत्नानि सुवर्णतिलकानि सा । चतुर्विंशतिमर्हद्भ्यः कारयामास भक्तिभाक् ॥२३७॥
अन्येद्युः सपरीवारा गत्वा**ऽष्टापद**मूर्धनि । सा स्नात्रपूर्वमानर्च चतुर्विंशतिमर्हताम् ॥२३८॥
तासामर्हत्प्रतिमानां ललाटेषु न्यधत्त च । श्रीवल्लेः कुसुमानीव हैमानि तिलकानि सा ॥२३९॥
चारणश्रमणादीनां तीर्थे तस्मिन्नुपेयुषाम् । दत्वा दानं यथार्हं सा तपस्त[17]दुदयापयत् ॥२४०॥
ततश्च कृतकृत्येव प्रनृत्यन्तीव चेतसा । सा धीमती **वीरमती** पुनरागात् स्वपत्तनम् ॥२४१॥
पृथक्शरीरौ तावेकमनसाविव दम्पती । धर्मकर्मोद्यतौ कालं कियन्तमपि[18] निन्यतुः ॥२४२॥
समाधिमरणं प्राप्य [19]पूर्णे काले विवेकिनौ । देवलोके तावभूतां देवौ[20] देवी च दम्पती ॥२४३॥
च्युत्वा **मम्मण**जीवोऽथ **जम्बूद्वीपे**ऽत्र **भारते** । **बहली**नाम्नि विषये नगरे **पोतना**ह्वये ॥२४४॥
**धम्मिलो**[21]ख्यस्याऽऽभीरस्य **रेणुको**दरसम्भवः । **धन्यो** नामाऽभवत् पुत्रः पात्रं पुण्यस्य भूयसः ॥२४५॥ युग्मम् ॥
स तु **वीरमती**जीवः प्रच्युत्य त्रिदशालयात् । **धूसरी**नामधेयेन **धन्य**स्यैव गृहिण्यभूत् ॥२४६॥

१. **समागमन०** ला० । २. **सगरं** खं० २ । **संगमं** सू० । ३. **पापर्द्धौ** ला.ता.सं.सू० । ४. राक्षस इव क्षुद्राशयः । ५. **विप्रलाभयन्** ला० । सन्तापयन् । ६. **महामानौ** मु० । ७. वार्तां कुर्वन्तौ । ८. 'शीघ्रं' खं० २ टि. । ९. 'धर्म' इत्यक्षरमश्रुतपूर्वौ । १०. **०मिवाभ्यर्णे** ला० । **०मिवाभ्यर्हे०** खं० १-२, सू० । ११. **०मवातिष्ठयतां** मु० । **०मवातिष्ठिपतां** र० । **०मवातिष्ठपतं** ला० । १२. **राजा स्वभा०** खं० २ । १३. **०वार्य परं** ला० । १४. **धर्मध्यानौ०** ता. । १५. **साऽऽचामाम्लानि** ता०सं०ला० पु० ला० २ । १६. स्थिरतराम् । १७. **०स्तदुदपादयत्** मु० । १८. **कियन्तमतिनि०** खं० २, ला० । १९. **पूर्णकाले** मु० । **पूर्वकाले** र० । २०. **देवदेव्यौ च** ला० । २१. **धम्मिलासस्या०** मु०, र०, खं० १ ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

¶महिषीश्चारयामास **धन्यो**ऽरण्येऽनुवासरम् । महिषीचारणं ह्येव[1]माभीराणां कुलव्रतम् ॥२४७॥
दुर्दर्शैर्दर्शयन् [2]दर्शयामिनीरिव दुर्दिनैः । यन्त्रधारागृहीभूत[3]व्योमा प्रोद्दामवृष्टिभिः ॥२४८॥
[4]निनदन् दर्दुरातोद्य इवोद्यद्दर्दुरारवैः । कुर्वन्नुर्वीं च हरितैः केशपाशवतीमिव ॥२४९॥
वृष्टिसृष्टोरु[5]सेवालपिच्छ[6]लीभूतभूतलः । सञ्चरत्पान्थचरणचीत्कार्याजानुकर्दमः ॥२५०॥
कुर्वन् द्यां विद्युदावर्तै रु[7]ल्मुकावर्तिनीमिव । वर्षारात्रः प्रववृतेऽन्यदा वैरी प्रवासिनाम् ॥२५१॥ चतुर्भिः कलापकम् ॥
महिषीः पङ्कसम्पर्कहर्षकेङ्कारकारिणीः । **धन्य**श्चारयितुमगात् प्रवर्षत्यपि वारिदे ॥२५२॥
बिभ्राणः छत्रकं मूर्ध्नि महद्वारिनिवारणम् । पर्याटीदटवीं **धन्यो**ऽनुव्रजन् महिषीव्रजम् ॥२५३॥
¶तस्थिवांसं प्रतिमया पादेनैकेन निश्चलम् । उपवासकृशं वृष्टिसहमा[8]रण्यकेऽभवत् ॥२५४॥
शीतार्त्या कम्पमानाङ्गं वातान्दोलितवृक्षवत् । क्षमाश्रमणमद्राक्षीदेकं **धन्यः** परिभ्रमन् ॥२५५॥ युग्मम् ॥
तथा परीषहसहं तं दृष्ट्वा मुनिपुङ्गवम् । जातानुकम्पः स्वं छत्रं स तन्मूर्धन्यधारयत् ॥२५६॥
धृतातपत्रो **धन्येना**ऽनन्यसामान्यभक्ति[9]तः । प्रभ्रष्टवृष्टिकष्टोऽभूदृषिः स वसताविव ॥२५७॥
मद्यपानाद् दुर्मदीव वृष्टेर्न व्यरमद् घनः । न तु निर्विविदे **धन्य**स्तथाऽपि छत्रधा[10]रणात् ॥२५८॥
क्रमयोगेन[11] वृष्टेश्च विरराम घनाघनः । यावद्वृष्टिकृतध्यानाभिग्रहाच्च महामुनिः ॥२५९॥
तत्कालं महिषीपालस्तं प्रणम्य मुनीश्वरम् । पादसंवाहनापूर्वमित्युवाच कृताञ्जलिः ॥२६०॥
महर्षे ! विषमः कालः पङ्केनाऽऽतङ्कदा मही । तदद्य कुत आयासीरायासमविदन्निव ॥२६१॥
¶महर्षिरपि तस्याऽऽख्यत् **पाण्डुदेशा**दिहाऽऽगमम् । यास्यामि **लङ्कां**[12]नगरीं गुरुपादपवित्रिताम् ॥२६२॥
गच्छतश्चाऽब्दकालोऽयमन्तरायोऽन्तराऽभवत् । धाराधरोऽखण्डधारं वर्षितुं च प्रचक्रमे ॥२६३॥
वर्षत्यब्दे च गमनं महर्षीणां न युज्यते । वृष्ट्यन्ताभिग्रहं कृत्वा ततोऽत्रैव स्थितोऽस्म्यहम् ॥२६४॥
विरतायामद्य वृष्टौ महात्मन् ! सप्तमेऽहनि । सम्पूर्णाभिग्रहो यामि वसतौ क्वाऽपि सम्प्रति ॥२६५॥
**धन्यो**ऽप्युवाच हर्षेण महर्षे ! महिषं मम । याप्य[13]यानमिवाऽऽरोह पङ्कदुःसञ्चरा हि भूः ॥२६६॥
स मुनिः स्माऽऽह जीवेषु नाऽऽरोहन्ति महर्षयः । परपीडाकरं कर्म ह्याचरन्ति न जातु ते ॥२६७॥
पादचङ्क्रमणा एव महर्षय ! इति ब्रुवन् । स मुनिस्तेन सहितः प्रययावुपपत्तनम् ॥२६८॥
महर्षिं स्माऽऽह महिषीपालो नत्वा कृताञ्जलिः । दोह्यहं महिषीर्यावत् तावदत्र प्रतीक्ष्यताम् ॥२६९॥
इत्युक्त्वा स[14] गृहं गत्वा दुग्ध्वा च महिषीर्द्रुतम् । आदायैकं दुग्धकुम्भमभ्यगात्[15] तं महामुनिम् ॥२७०॥
**धन्यो**ऽतिधन्यमात्मानं मन्यमानः प्रमोदभाक् । तं मुनिं कारयामास पारणं पुण्यकारणम् ॥२७१॥
वर्षारात्रमतिक्रम्य **पोतने** स तपोधनः । जगाम रुचितं स्थानमीर्याशुद्ध्युचिते[16]ऽध्वनि ॥२७२॥
¶**धन्यो**ऽपि सह **धूसर्या** सुचिरं श्रावकव्रतम् । अपालयद् दृषल्लेखा[17]स्थिरं सम्यक्त्वमुद्वहन् ॥२७३॥
तौ धन्यौ **धूसरी-धन्यौ** काले जगृहतुर्व्रतम् । पालयित्वा च सप्ताब्दीं विपेदाते समाहितौ ॥२७४॥
पात्रे पीयूष[18]दानेनाऽर्जितपुण्यावुभौ च तौ । जातौ **हैमवते**[19] युग्मधर्मौ[20] लेश्याविशेषतः ॥२७५॥
अनार्त्त-रौद्रध्यानौ तावपि मृत्वोदपद्यताम् । **क्षीर**[21]**डिण्डीर**नामानौ देवौ दाम्पत्यशालिनौ ॥२७६॥
¶देवश्च्युत्वेह **भरते** विषये कोशला[22]भिधे । नगर्यां **कोशला**[23]**ख्यायामिक्ष्वाकु**कुलजन्मनः ॥२७७॥
**निषध**स्याऽवनिपतेः **सुन्दरोदर**सम्भवः । **नलो** नामाऽभवत् पुत्रः **कूबर**स्तस्य चाऽनुजः ॥२७८॥ युग्मम् ॥

---

१. **चैवमा०** खं० २ । २. अमावस्यारात्रीः । ३. **०गृहीभूतं व्योम प्रो०** मु० । ४. **निनदद्दर्दु०** मु० । शब्दं कुर्वद् दर्दुरनामातोद्यं-वाद्यं यत्र सः । ५. **०शेवाल०** खं० १-२, सू० । ६. **०पिच्छिली०** ला० । पङ्किलीभूत । ७. **०रुलूका०** मु० । उल्कापातवर्तिनीमिव । ८. **वृष्टिं सहमानं वनेभवत्** ला० । ९. **०भक्तिकः** ला० । १०. **०कारणात्** खं० १ । ११. **०योगेण** खं० २ । १२. **लङ्कां** ला० । १३. शिबिकामिव । १४. **स्वगृहं** मु० र० । १५. **०मभ्यगा०** मु० र० । १६. **०मीर्याशुद्ध्यच्युते०** ज्ञा०सं० । १७. पाषाणरेखावत् स्थिरम् । १८. दुग्धदानेन । १९. **हैमवतौ** ला० । हैमवतक्षेत्रे । २०. युगलिकौ । २१. क्षीरडिण्डीर-क्षीरडिण्डीरानामानौ, एकशेषसमासः । २२,२३. **कोसला०** खं० १-२, सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्चाऽस्ति **विदर्भेषु** नगरं **कुण्डिना**ह्वयम् । तत्र चाऽभून्नृपो **भीमरथो** भीमपराक्रमः ॥२७९॥
तस्याऽभूत् **पुष्पदन्तीति** जाया मायाविवर्जिता । [1]तर्जितस्वर्वधूरूपा परया रूपसम्पदा ॥२८०॥
अर्थ-धर्माविरोधेन काममप्यनुपालयन् । निर्विघ्नं बुभुजे भोगांस्तया सह महीपतिः ॥२८१॥
¶एकदा **क्षीरडिण्डीरा** प्रच्युत्य त्रिदशालयात् । तस्याः कुक्षाववातारीत् सुतात्वेन शुभे क्षणे ॥२८२॥
तदा च सुखसुप्ता सा शयनीये मनोरमे । निशावसाने सुस्वप्नं दृष्ट्वा राज्ञे व्यजिज्ञपत् ॥२८३॥
स्वामिन् ! जानाम्यहं सुप्ता श्वेतहस्ती तवौकसि । [2]दवाग्निप्रेरितोऽविक्षत् साक्षादिव यशश्चयः ॥२८४॥
राजाऽपि व्याजहारैवं सर्वशास्त्राब्धिपारगः । कोऽपि पुण्याधिको गर्भः सम्भूतोऽद्य तवोदरे ॥२८५॥
यावदेवं वार्तयन्तौ राजा राज्ञी च तस्थतुः । तावदागात् स शुभ्रेभो[3]ऽभ्रमुप्रिय इव च्युतः ॥२८६॥
नृपं सकलत्रमपि निजस्कन्धे स [4]सिन्धुरः । क्षणादारोपयामास तत्पुण्यप्रेरितो हि सः ॥२८७॥
पुष्पदामक्षेपपूर्वं पूज्यमानः स नागरैः । भ्रान्त्वा पुरे पुनः सौधमेत्य तावुदतारयत् ॥२८८॥
स्वयं [5]चाऽऽलीयताऽऽलाने स सिन्धुरधुरन्धरः । ववृषुश्चाऽथ पुष्पाणि रत्नानि च दिवौकसः ॥२८९॥
सुगन्धिभि[6]र्यक्षपङ्कैः सर्वाङ्गमनुलिप्य तम् । अर्चित्वा चोत्तमैः पुष्पै राजा [7]नीराजनं [8]व्यधात् ॥२९०॥
¶[9]पूर्णकाले व्यतीपातादिदोषादूषितेऽह्न्यथ । [10]कादम्बिनीव तडितं राज्ञी कन्यामजीजनत् ॥२९१॥
सब्रह्मचारी तरणेस्तस्याश्च तिलकोऽलिके[11] । सहजोऽभून् महापुंसः श्रीवत्स इव वक्षसि ॥२९२॥
सा स्वयं भास्वती तेन तिलकेन विशेषतः । उपरिन्यस्तरत्नेनोर्मिका हैमीव दिद्युते ॥२९३॥
तज्जन्मनः प्रभावेण[12] **भीमो** निःसीमविक्रमः । बभूव भूभुजां मूर्ध्ना धार्यमाणोग्रशासनः ॥२९४॥
तस्यामुदरवर्तिन्यां राज्ञी स्वप्ने यदैक्षत । दवाग्निभीत[13]मायान्तं दन्तीन्द्रमिति निर्ममे ॥२९५॥
सम्पूर्णे मासि दुहितुस्तस्याः **कुण्डन**भूपतिः । **दवदन्ती**त्यभिधानं [14]निधानं हर्षसम्पदः ॥२९६॥ युग्मम् ॥
सुगन्धिमुखनिःश्वासभ्रमद्भ्रमरधोरणिः । दिने दिने वर्धमाना साऽभवद् [15]रिङ्खणक्षमा ॥२९७॥
अपि मातृसपत्नीनां सा सौम्यमुखपङ्कजा । करात् करं सञ्चचार पुष्पात् पुष्पमिवाऽलिनी ॥२९८॥
अङ्गुष्ठमध्य[16]मास्फोटधृततालाः पदे पदे । तां धात्र्योऽरमयन् [17]वक्त्रतिमिलावाद्यवादनैः ॥२९९॥
[18]रणज्झणिति कुर्वद्भ्यां नूपुराभ्यां [19]पुरस्कृता । क्रमेण कर्तुमारेभे पादचङ्क्रमणं च सा ॥३००॥
रेमे रमेव सा मूर्ता भूषयन्ती गृहाङ्गणम् । तत्प्रभावाद् हि निधयः प्रत्यक्षाः क्ष्माभुजोऽभवन् ॥३०१॥
¶सम्प्राप्ते [20]चाऽष्टमे वर्षे तां कन्यामार्पयन्नृपः । कलाचार्यस्य वर्यस्य कलाग्रहणहेतवे ॥३०२॥
साक्षिमात्रमुपाध्यायोऽभवत् तस्याः सुमेधसः । कलाः सञ्चक्रमुस्तस्यां ह्यादर्शे प्रतिबिम्बवत् ॥३०३॥
साऽभूद[21]धीतिनी **कर्मप्रकृत्या**दिषु धीमती । तस्याः पुरश्च स्याद्वादाक्षेपकः कोऽपि नाऽभवत् ॥३०४॥
कन्यां कलाकलापाम्बुराशेस्तां पारदृश्वरीम् । वागीश्वरीमिव पितुः[22] पार्श्वे गुरुरथाऽनयत् ॥३०५॥
सा गुरोराज्ञया सर्वं कलाकौशलमात्मनः । सम्यक् प्रदर्शयामास गुणारामैकसारणिः ॥३०६॥
तथा श्रुतार्थप्रावीण्यं प्रकट्यकृत सा पितुः । यथा सोऽप्यभवत् सम्यग्दर्शना[23]द्ध्यैनिदर्शनम् ॥३०७॥
सहस्राधिकलक्षेण दीनाराणां नरेश्वरः । कलाचार्यं स्वदुहितुः पूजयित्वा विसृष्टवान् ॥३०८॥
¶**दवदन्त्याश्च** पुण्यातिशयान् [24]**निर्वृति**देवता । साक्षाद्भूयाऽर्हत्प्रतिमामर्पयामास काञ्चनीम् ॥३०९॥

---

१. **निर्जित०** खं० २ । २. **वनाग्नि०** सं.ला०पा. ला० २, छा. । ३. ऐरावणः । ४. हस्ती । ५. **चालीयदालाने** ला० । ६. यक्षकर्दमैः । "कर्पूरा-गुरु-कक्कोलकस्तूरी-चन्दनद्रवैः स्याद् यक्षकर्दमः" (अभि० चिं. ३/६३८) । ७. **नीराजनं** ला० २, की०, आरात्रिकम् । ८. **न्यधात्** खं० २ । ९. **पूर्णे** खं० १, ला० सू० । १०. मेघमाला । ११. ललाटे । १२. **०वेन** खं० २ । १३. **०मायातं** खं० २ । १४. **स्वजनैः हर्ष०** खं० २ । १५. चलनक्षमा । १६. **०मास्फोट्य धृत्वा तालं पदे०** ला० । १७. मुखरूपडिण्डिमवाद्यस्य वादनैः । १८. **झणज्झ०** खं० २, सू०ता०सं०ला०पा० । **रुणज्झ०** ला० । १९. **परिष्कृता** खं० १-२, सू० । 'अलंकृता' लाटि. । २०. **०ऽथाष्टमे** खं० २, सू० । २१. अधीतमनयेति अधीतिनी । २२. **गता( तां )पितुः पार्श्वे मनोहराम्** खं० २ । २३. **०नाद्यनिद०** खं० १-२ । **०नादौ निद०** ला० । २४. 'निर्वृति' इत्यभिधाना देवता, शासनदेवता, 'निर्वाणी' इत्यभिधदेव्या नामान्तरं स्यादिति कल्प्यते ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

देव्युवाच च हे वत्से ! प्रतिमा भाविनोऽर्हतः । एषा **श्रीशान्तिनाथस्य** पूजनीया त्वयाऽनिशम् ॥३१०॥
इत्युक्त्वाऽन्तर्दधे देवी प्रतिमां **दवदन्त्यपि** । निनायोत्फुल्लनयना वन्दित्वा निजवेश्मनि ॥३११॥
¶रममाणा वयस्याभिः सुदती[१] **दवदन्त्यथ** । यौवनं [२]पावनं प्राप प्रपां लावण्यवारिणः ॥३१२॥
राजा राज्ञी च तां दृष्ट्वा कन्यामन्यूनयौवनाम् । तद्विवाहोत्सवं द्रष्टुमभूतामुत्कमानसौ ॥३१३॥
तस्यास्तत्तद्गुणगणानुरूपवरचिन्तया । पितरावत्यदूयेतामन्तःशल्यातुराविव ॥३१४॥
क्रमेण **दवदन्त्यष्टा**दशवर्षा बभूव च । न तूपलेभे भूपालस्तद्योग्यं प्रवरं वरम् ॥३१५॥
स्वयंवरोऽतिप्रौढानामनूढानां हि योषिताम् । युक्त इत्यादिशद् दूतान् राज्ञामाहूतये नृपः ॥३१६॥
राजानो राजपुत्राश्च युवानः परमर्द्धयः । आययुस्त्वरितं तत्र स्पर्धमाना मिथः श्रिया ॥३१७॥
दृश्यमानैः [३]करटिभिरसङ्ख्यैर्भूभुजां तदा । [४]उपत्यकेव **विन्ध्याद्रेः कुण्डिनो**पान्तभूरभूत् ॥३१८॥
¶**निषधो**ऽपि हि तत्राऽऽगान्नृपतिः **[५]कोशलेश्वरः** । **नलेन कूबरे**णाऽपि पुत्राभ्यां सहितस्तदा ॥३१९॥
सर्वेषां स्वागतं राज्ञामभियान[६]पुरःसरम् । चकार **कुण्डिना**धीशोऽतिथीनामुचितं ह्यदः ॥३२०॥
**भीमो**ऽथ कारयामास स्वयंवरणमण्डपम् । **पालकस्य** विमानस्याऽनुजन्मानमिवर्द्धिभिः ॥३२१॥
मञ्चांश्च मण्डपस्याऽन्तर्विमानाभानकारयत् । प्रत्येकं स्थापितस्वर्णसिंहासनमनोरमान् ॥३२२॥
¶राजानोऽथाऽऽययुस्तत्र स्पर्धमाना महर्द्धिभिः । दिव्यालङ्कारवसनाः शक्रसामानिका इव ॥३२३॥
सर्वे निषेदुर्मञ्चेषु [७]विपञ्चितवपुःश्रियः । नानाविधाभिश्चेष्टाभिः स्पष्टवैदग्ध्यबन्धुराः ॥३२४॥
कृतोत्तरीयपर्यङ्कश्चलद्दलमनोरमम् । करेण लीलाकमलं लालयामास कश्चन ॥३२५॥
सुगन्धिमल्लिकापुष्पाण्याजघ्रौ कोऽपि भृङ्गवत् । मन्मथस्य यशोराशिवर्णिकामिव निर्मलाम् ॥३२६॥
करेणोल्लालयामास कश्चित् कुसुमकन्दुकम् । मृगाङ्कमण्डलं व्योम्नि स्रष्टुकाम इवाऽपरम् ॥३२७॥
व्यलिखल्लीलया [८]पाणि-पाणिजाग्रैः क्षणे क्षणे । कोऽपि स्वां [९]भासुरीं सान्द्र[१०]सारङ्गमदपङ्किलाम् ॥३२८॥
दीप्ताङ्गुलीयमणिना पाणिना दृढमुष्टिना । [११]मुष्टिग्रस्तदन्तमुष्टिं[१२] छुरीं कश्चिदनीनृतत् ॥३२९॥
छेकः केतकपत्राणि दारं दारमुदारधीः । जग्रन्थ कोऽपि कमलं कमलाकमलोपमम् ॥३३०॥
कश्चिदामलकस्थूलमुक्ताफलविनिर्मितम् । कण्ठावलम्बि[१३]नं हारं मुहुः पस्पर्श पाणिना ॥३३१॥
देवता देवतागारमिव तं वरमण्डपम् । भूषयन्ती **दवदन्त्य[१४]प्या**ययौ पितुराज्ञया ॥३३२॥
अलङ्करणसन्दोहैर्मुक्तामणिविनिर्मितैः । अलङ्कृताङ्गवयवामुत्फुल्लामिव मल्लिकाम् ॥३३३॥
प्रसरत्सारणीवारितरङ्गकुटिलालकाम् । बिभ्राणां तिलकं भाले युवराजं रवेरिव ॥३३४॥
कज्जलश्यामलकचां नीरन्ध्रकुचमण्डलाम् । वस्त्राणि रम्भागर्भत्वक्सगर्भाणि च बिभ्रतीम् ॥३३५॥
स्वच्छश्रीचन्दनरसविलि[१५]प्तामायतेक्षणाम् । **दवदन्तीं** नृपाः प्रेक्ष्य चक्षुस्तत्रैव चिक्षिपुः ॥३३६॥ चतुर्भिः कलापकम् ॥
¶अन्तःपुरप्रतीहारी ततश्च नृपशासनात् । तस्याः शंसितुमारेभे नामग्राहं महीपतीन् ॥३३७॥
**[१६]शिशुमारपुरा**ऽऽयातो **जितशत्रु**नृपात्मजः । **ऋतुपर्ण**नरेन्द्रोऽयं देवि ! सम्भाव्यतां दृशा[१७] ॥३३८॥
**इक्ष्वाकु**वंशतिलको गुणरत्ननिधानभूः[१८] । **चन्द्रभूश्चन्द्रराजो**ऽयम[१९]मुंकं किं वुवूर्षसि ? ॥३३९॥
**चम्पेशो भोगवंश्यो**[२०]ऽयं **सुबाहुर्धरणेन्द्र**भूः । अमुं वृणीष्व **जाह्नव्या** सेव्यसे शी[२१]करानिलैः ॥३४०॥
राजा **रोहीत[२२]केशो**ऽयं **[२३]पावनिश्चन्द्रशेखरः** । द्वात्रिंशद्ग्रामलक्षाधिपतिस्ते किमु रोचते ? ॥३४१॥

१. **सुदन्ती** मु० । २. **प्राप सौभाग्य प्रपां०** खं० २ । ३. गजैः । ४. तलहट्टी । ५. **कोसले०** खं० १-२ सू० । ६. अभिगमनपूर्वकम् । ७. विस्तारित । ८. **पाणी पाणि०** मु० २. । पाणि-पाणिजाग्रैः हस्त-नखग्रैः । ९. **स्वामासुरीं** मु०, खं० १-२, ला०सू० । श्मश्रूम् । १०. मृगमदलिप्ताम् । ११. मुष्टौ ग्रस्तो धृतो दन्तनिर्मितो मुष्टिः (दन्तमुष्टिः) यस्याः छुर्याः । १२. **०मुष्टि-छुरीं** खं० १-२, ला० सू० । १३. **०वलम्बितं** मु० । १४. **०दन्त्यथा०** मु० । १५. **०विलिप्ती०** खं० १, सू० । १६. **शिंशु०** खं० २ । **सुंसुमार०** पु. । १७. **दृशि** सू० । १८. **०निधानसूः** खं० १-२, सू० । १९. **०ममुं किं न वु०** खं० १ । **किं न हर्षसि** पु० । २०. **०वंशोऽयं** मु० । २१. **सीकरा०** ला०पा०आ०मु० । २२. रोहीतक-ईशः । २३. **पावनश्चन्द्र०** ला० पवनपुत्रः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षमापतिः **शशलक्ष्मा**ऽयं **जय[1]केशरि**नन्दनः । श्रीन[2]न्दनसमो मूर्त्या किमाकर्षति ते मनः ? ॥३४२॥
**जह्नु[3]सूर्यज्ञदेवो**ऽयमादित्यकुलमण्डनः । नृपति**र्भृगु[4]कच्छे**शो महेच्छेऽमुं किमिच्छसि ? ॥३४३॥
**भरते**शकुलोत्तंसो नृपोऽयं **मानवर्धनः** । विश्वप्रतीतं तदमुं पतिं वृणु पतिंवरे ! ॥३४४॥
**कुसुमायुध**पुत्रोऽयं नृपति**र्मुकुटेश्वरः** । किमस्य रोहिणीवेन्दोः पत्नी भवितुमर्हसि ॥३४५॥
**कोशलाना**मधीशोऽयं **निषधो**ऽरिनिषेधकृत् । **ऋषभस्वामि**कुलजो राजा संविदितोऽस्तु ते ॥३४६॥
अस्यैव तनयः सोऽयं **नलो** नाम महाबलः । तवाऽस्त्वभिमतो यद्वा **कूबरो**ऽयं **नलानुजः** ॥३४७॥
**दवदन्त्य**पि तत्कालं **नलस्य** गलकन्दले । स्वयंवरस्रजं न्यास्थल्लक्ष्मीरिव[5] मुरद्विषः ॥३४८॥
अहो ! सुष्ठु वृतं सुष्ठु वृतमित्यम्बरे गिरः । खेचराणां प्रादुरासन् वृते सति तया **नले** ॥३४९॥
¶अथैकं[6]खड्गमाकृष्य धूमकेतुमिवाऽपरम् । **कृष्णराज**कुमारो द्रागुत्थाय **नल**माक्षिपत् ॥३५०॥
स्वयंवरस्रक् क्षिप्तेयं **दवदन्त्या** वृथैव ते । नह्येतां मयि सत्यन्यः कश्चिदुद्वोढुमीश्वरः ॥३५१॥
तन्मुञ्च **भीम**तनयां नो वा भव धृतायुधः । **कृष्णराज**मनिर्जित्य भविष्यसि कृती कथम् ? ॥३५२॥
स्मयमानो **नलो**ऽवादीदरे [7]क्षत्रियपांसन ! । **दवदन्त्या** वृतो न त्वमिति किं दूयसे मुधा ? ॥३५३॥
वृतोऽस्मि **दवदन्त्या**ऽहं तदिमां परयोषितम् । इच्छस्यघमनादृत्य तथाऽपि न भवस्यरे ! ॥३५४॥
इति निस्त्रिंशमाकृष्य नर्तयामास पाणिना । **नलो**ऽनल इवाऽसह्यतेजाः क्रोधधुताधरः ॥३५५॥
**नलस्य** **कृष्णराजस्य** चाऽनीकमुभयोरपि । सद्यः संवर्मयामास धृत[8]मर्माविदायुधम् ॥३५६॥
¶दध्यौ च **दवदन्त्ये**वं धिगहो ! मत्रिबन्धनः । उपस्थितोऽयं प्रलयः क्षीणपुण्या किमस्म्यहम् ? ॥३५७॥
[9]आर्हती यद्यहं तर्हि मातः ! शासनदेवते ! । **नलो**ऽस्तु विजयी क्षेममस्तु चाऽनीकयोर्द्वयोः ॥३५८॥
इत्युक्त्वा वारिभृङ्गारमुपादाय तदम्भसा । चिक्षेपाऽनर्थशान्त्यर्थं **दवदन्ती** छटात्रयम् ॥३५९॥
**कृष्णराजो**ऽथ तद्वारिच्छटाच्छोटितमस्तकः । अङ्गार इव निर्वाणो निस्तेजास्तत्क्षणादभूत् ॥३६०॥
तदा शासनदेव्याश्च प्रभावात् **कृष्ण**भूपतेः । करात् पपात निस्त्रिंशः पक्वपत्रमिव द्रुमात् ॥३६१॥
हतप्रभावो दध्यौ च **कृष्णो**ऽहिरिव निर्[10]गरः । न सामान्यो **नलो**ऽमुष्मिन्न विमृश्य व्य[11]भाषिषि ॥३६२॥
तदयं प्रणिपातार्ह इति **कृष्णो** विचिन्तयन् । प्राणम**न्नल**पादानां प्रेषणायातदूतवत् ॥३६३॥
उवाच च विनीतः सन् ल[12]लाटघटिताञ्जलिः । अविमृश्य कृतं स्वामिन् ! मूर्खस्याऽऽगः सहस्व मे ॥३६४॥
**नलो**ऽपि **कृष्णं** [13]सम्भाष्य व्यसृजत् प्रणिपाति[14]नम् । **भीमो**ऽपि जामातृगुणैर्मेने पुण्यवतीं सुताम् ॥३६५॥
¶**भीमः** सत्कृत्य सत्कृत्य नृपानन्यान् विसृज्य च । **नलस्य** **दवदन्त्याश्च** [15]व्यधादुपयमोत्सवम् ॥३६६॥
**नलस्य** वी[16]वाहमहे वृत्ते स्वविभवोचितम् । हस्त्यश्वादि ददौ हस्तमोचने **भीम**भूपतिः ॥३६७॥
आबद्धकङ्कणौ गोत्रजरतीगीतमङ्गलौ । गृह[17]चैत्यमवन्देतां तौ[18] नवोढौ वधू-वरौ ॥३६८॥
महेन महता **भीम-निषधौ** वसुधाधवौ । कारयामासतुरथ तयोः कङ्कणमोचनम् ॥३६९॥
ततश्च **भीमो** **निषधं** सपुत्रमपि भक्तिभाक् । सत्कृत्य व्यसृजत् किञ्चिदन्वगाच्च स्थितिर्ह्यसौ ॥३७०॥
**दवदन्ती**मनु[19]पतिं [20]यान्तीमम्बाऽन्वशादिति । देहच्छायेव मा त्याक्षीर्व्यसनेऽपि पतिं सुते ! ॥३७१॥
अनुज्ञाप्य स्वपितरौ **दवदन्ती**मुपेयुषीम् । रथमारोपयामास [21]**नलो**ऽङ्के च न्यवीविशत् ॥३७२॥
¶ततश्च **कोशला**धीशे **कोशला**मभिगच्छति । सिषिचे भूर्गजमदैः सान्द्रैर्मृगमदैरिव ॥३७३॥

१. ०**केसरि**० खं० १-२, सू० । २. कामदेवसमः । ३. जह्नुपुत्रः । ४. ०**र्भरुकच्छेशो**० खं० १-२, ला०सू० । ५. ०**रिवाऽसुर**० खं० २ । विष्णोः । ६. **अथैकं** खं० १-२, ला०सू० विना; र० । ७. क्षत्रियाधम ! । ८. **धृतमर्माविधा**० र. । मर्मभेदकायुधधरम् । ९. अर्हद्धर्मोपासिका । १०. निर्विषः । **निर्भरः** ला० । ११. **व्यभाषिषम्** ला० । १२. **ललाटे** खं० २ । १३. **सम्भाव्य** मु० । १४. ०**पातितम्** खं० २ । १५. **चक्रे उपयमो**० खं० २ । १६. **विवाह**० मु० र० । १७. **गृहे चैत्य**० मु० र० खं० १ । १८. **नवोढौ च वधू**० ला० । १९. ०**मनुपति** खं० १-२ सू० । २०. **प्रयान्त्यम्बान्व**० सू०, ला० । **प्रयात्यम्बान्व**० खं० १ । **यान्तीं मातान्व**० पा० ला० र० आ० । २१. **नलोऽङ्कं च** ला० ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

ररासाऽश्वखु[1]रक्षुण्णा कांस्यतालमिवाऽवनिः । अचित्र्यन्त च पन्था[2]नो रेखाभिरभितोऽनसाम्[3] ॥३७४॥
मिथो नीरन्ध्रगमनैः [4]पादातैर्भूरदर्शि[5] न । क्रमेलकैश्च निष्पत्राः क्रियन्ते स्माऽध्वपादपाः ॥३७५॥
सैन्यैः पीताम्भसोऽभूवन् पङ्कशेषा जलाशयाः । सैन्यरेणुभिरुद्धूतैर्भूर्द्वितीयेव खेऽप्यभूत् ॥३७६॥ चतुर्भिः कलापकम् ॥
गच्छतो **निषध**स्याऽस्तं[6]मन्तरालेऽप्यगाद् रविः । ब्रह्माण्डं तमसाऽपूरि [7]वामलूर इवाऽम्भसा ॥३७७॥
न व्यरंसी[8]त्तु **निषधः** स्वपुरीदर्शनोत्सुकः । स्वस्थानगमनोत्कण्ठा कस्य न स्याद् बलीयसी ? ॥३७८॥
न स्थलं न जलं नाऽपि [9]गर्तावृक्षादिकं न च । अलक्ष्यत तमस्येकातपत्रत्वमुपेयुषि ॥३७९॥
तमसा रुद्धदृक्कर्म चतुरिन्द्रियतां गतम् । सैन्यं दृष्ट्वाऽङ्कशयितां **दवदन्तीं नलो**ऽवदत् ॥३८०॥
देवि ! क्षणं प्रबुध्य[10]स्व [11]तमसोपद्रुतं बलम् । स्वकीयतिलकादित्यं प्रकाशय यशस्विनि ! ॥३८१॥
उत्थाय **दवदन्ती** स्वं ललाटं पर्यमार्जयत् । स चाऽदीपिष्ट तिलकस्तमो[12]ऽहिगरुडो भृशम् ॥३८२॥
ततश्च गन्तुमारेभे निर्विघ्नमखिलं बलम् । विनाऽऽलोकेन लोको हि जीवन्नपि परा[13]सुवत् ॥३८३॥
लेलिह्यमानं भ्रमरैः पद्मखण्डमिवाऽग्रतः । तस्थिवांसं प्रतिमया ददर्शैकं मुनिं **नलः** ॥३८४॥
ऊचे च पितरं स्वामिन् ! महर्षिर्दृश्यतामसौ । वन्द्यतां च गृह्यतां च पथः प्रासङ्गिकं फलम् ॥३८५॥
कायोत्सर्गे स्थितोऽयं हि केनचिन्मत्तदन्तिना । [14]गण्डकण्डूयियि[15]षया द्रुमवत् पर्यघृष्यत ॥३८६॥
भृशं तद्गण्डकण्डूतिसङ्क्रान्तमदसौरभात् । दश्यमानो मधुकरैः सहतेऽसौ परीषहम् ॥३८७॥
ध्यानान्न चालितश्चैष मत्तेनाऽपि हि दन्तिना । स्थिरपादो गिरिरिव पुण्यैर्दृष्टोऽय[16]मन्तरे ॥३८८॥
जातश्रद्धोऽथ **निषधः** सपुत्रः सपरिच्छदः । क्षणं सिषेवे तमृषिं प्राप्तं तीर्थमिवोत्तमम् ॥३८९॥
**नलः** सदारो **निषध-कूबरौ** चाऽपरेऽपि हि । नत्वोप[17]श्लोक्य निरुपद्रवं कृत्वा च तं ययुः ॥३९०॥
**कोश[18]लायाः** परिसरमासाद्य च **नलो**ऽवदत् । इयं हि नः पुरी देवि ! जिनायतनमण्डिता ॥३९१॥
**दवदन्त्य**पि तत्काल[19]मुत्कण्ठोत्कण्ठितां ययौ । तच्चैत्यदर्शनादुच्चैः केकिनीवाऽब्ददर्शनात् ॥३९२॥
अभ्यधत्त च धन्याऽस्मि यया लब्धो **नलः** पतिः । वन्दिष्यन्ते मयाऽमूनि चैत्यानि प्रतिवासरम् ॥३९३॥
प्रारब्धमङ्गला[20]चारां सर्वतस्तोरणादिभिः । प्रविवेश विशांना[21]थः शुभेऽह्नि नगरीं निजाम् ॥३९४॥
**नलश्च दवदन्ती** च तत्र स्वैरविहारिणौ । जलक्रीडां विदधतुर्हंसाविव कदाचन ॥३९५॥
मिथः [22]संवलितैकैकदोःसनाथीकृतोरसौ । अन्वभूतां कदाचिच्च दोलान्दोलनजं सुखम् ॥३१६॥
स्वयं कदाचिद् ग्रथितैः पुष्पैरतिसुगन्धिभिः । विचित्रबन्धं धम्मिल्लं पूरयामासतुर्मिथः ॥३९७॥
बन्ध-मोक्ष-गम-चरचतुरौ दुस्तराशयौ । कदाचिदक्षद्यूतेन चिक्रीडतुरनाकुलौ ॥३९८॥
आतोद्यानि ततादीनि क्रमशः परिवादयन् । **नलः** कदाचिद् रहसि **दवदन्तीमनर्तयत्** ॥३९९॥
एवं **नल-दवदन्त्याववियुक्तौ** दिवानिशम् । लीलायितैर्नवनवैः कियत्कालमतीयतुः[23] ॥४००॥
अन्येद्यु**र्निषधो** राजा स्वे राज्ये[24]ऽस्थापय**न्नलम्** । **कूबरं** यौवराज्ये तु स्वयं च व्रतमाददे ॥४०१॥
**नलो**ऽपि [25]पालयामास प्रजा[26]मिव निजां प्रजाम् । तत्सुखेन सुखी दुःखी तद्दुःखेन च सर्वदा ॥४०२॥
बुद्धि-विक्रमसम्पन्नं [27]निःसपत्नं भुजौजसा । अलं **नलं** जेतुमभूद् भूपतिः कोऽपि नाऽपरः ॥४०३॥
**नलः** पप्रच्छ चाऽन्येद्युः सामन्तादीन् क्रमागतान् । किं पित्रोपार्जितामेव शास्मि भूमिमुताऽधिकाम् ? ॥४०४॥

१. **०खर०** मु० । २. **वर्त्मानो** ला० सू० । ३. रथानाम् । ४. **पदाते०** सू० विना । ५. **०र्भूरदर्शना** मु० । ६. **०स्याध्वन्यन्त०** ला० । ७. **वामलूरमिवा०** खं० २, ला० विना । वामलूरो वल्मीकः । ८. **व्यरंसीच्च** मु० र० । ९. **गर्तो वृक्षा०** र० । १०. **विबुध्यस्व** की० ला० २ । ११. **तमसोपहतं** ता०सं० । १२. तमांसि एव सर्पास्तेषु गरुडः । १३. मृत इव । १४. **गण्डू०** ला० । १५. **०कण्डूजिघृषया** खं० २ । १६. **०यमन्तरा** मु०, खं० २, ला० । १७. स्तुत्वा । १८. **कोसला०** खं० १-२, सू० । १९. **तत्कालमकुण्ठोत्कण्ठिता** खं० १, सू० । **०तत्कालं शीघ्रमुत्कण्ठिता** खं० २ । **०मुत्कण्ठिता** ला० । २०. **०चारः** ला० । २१. पृथ्वीपतिः । २२. **संचलितै०** मु० र० । २३. **०मतीययुः** खं० १ । २४. **०राज्ये च सुतं निजम् । निवेशयामास नलं स्वयं०** खं० २ । २५. **लालया०** खं० २ । २६. **लीलया नीतिवित् प्रजाम्** खं० २ । २७. **गुणज्येष्ठं** खं० २ ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

तेऽवोच**न्निषधो**[1]ऽभुक्त त्र्यंशोनं **भरता**र्धकम् । त्वया तु सकलं भुक्तं युक्तं[2] पुत्रोऽधिकः पितुः ॥४०५॥
किन्त्वितो योजनशतद्वयं **तक्षशिला** पुरी । **कदम्बो** नृपतिस्तत्र त्वदाज्ञां न प्रतीच्छति ॥४०६॥
**भरतार्ध**जयोद्भूतयशःशशिनि तावके । दुर्विनीतः स एवैकः कलङ्कश्रियमश्नुते ॥४०७॥
उपेक्षितः प्रमा[3]देन व्याधिलेश इव त्वया । प्रकाममाप्तोपच[4]यः कृ[5]च्छ्रसाध्यत्व[6]मागतः ॥४०८॥
कृतं च रोषपरुषं महाबाहो ! मनस्त्वया । सोऽद्रिभ्रष्टो घट इव विशीर्णश्च न संशयः ॥४०९॥
तददौ दूतमादिश्य स दुर्मत्तः प्रबोध्यताम् । प्रणिपाते च दण्डे च स्वेच्छा तस्य ततः परम् ॥४१०॥
इत्युक्ते **नैषधि**र्दूतमवष्ट[7]म्भमहागिरिम् । अनुशिष्याऽऽदिशत् सैन्य[8]परिस्पन्देन भूयसा ॥४११॥
¶दूतोऽपि गत्वा त्वरितं गरुत्मानिव दुर्द्धरः । **कदम्बराजं** व्याजह्रे स्वस्वामिनमह्रे[9]पयन् ॥४१२॥
मत्स्वामिनमहो ! वैरिवनदावानलं **नलम्** । सेवस्व भृशमेधस्व माऽऽत्मतेजोवधं कृथाः ॥४१३॥
अहं त्वत्कुलदेवीभिरधिष्ठित इवोच्चकैः । हितं ते वच्मि सेवस्व **नलं** विमृश मा मुहः ॥४१४॥
दशनाग्रैर्दशन्नोष्ठं राहुरिन्दुकलामिव । **कदम्बो**ऽम्बा[10]मुख इव स्वमजानन्नदोऽवदत् ॥४१५॥
बालिशः किं किमुन्मत्तो [11]वातसुप्तोऽथ किं **नलः** ? । वैरिमु[12]स्तावराहं मामपि जानाति यो न हि ॥४१६॥
कुलामात्या अपि न किं सन्ति राजकुले तव ? । न्यषेधि **नैषधि**र्यैर्न मुग्धधीर्मामधिक्षिपन् ॥४१७॥
तद्गच्छ दूत ! राज्यस्य निर्विण्णो यदि ते प्रभुः । तदस्तु सज्जोऽहमपि तस्यैषोऽस्मि रणातिथिः ॥४१८॥
दूतोऽपि हि **कदम्बो**क्तं तदहङ्कारदा[13]रुणम् । आगत्य कथयामास **नलस्य** बलशालिनः ॥४१९॥
ततस्**तक्षशिला**धीशं महाहङ्कारपर्वतम् । सर्वसं[14]न्नहनेनाऽभिषेणयामास **नैषधिः** ॥४२०॥
**नलस्तक्षशिलां** सर्वां वेष्टयामास सेनया । कुर्वन् द्वितीयप्राकारामिवाऽऽस्फा[15]लितदन्तिभिः ॥४२१॥
**कदम्बो**ऽपि हि[16] सन्नह्य ससैन्यो निर्ययौ बहिः । न सिंहः सहतेऽन्यं हि गुहाद्वारोपसर्पिणम् ॥४२२॥
मिथो युयुधिरे योधाः क्रोधारुणविलोचनाः । शराशरिकृतव्योममण्डपाश्चण्डतेजसः ॥४२३॥
**नलः कदम्ब**मूचे च मारितैः किमिभादिभिः ? । आवां युध्यावहे हन्त द्वन्द्वयुद्धेन वैरिणौ ॥४२४॥
ततो **नलः कदम्ब**श्च जङ्गमाविव पर्वतौ । युयुधाते द्वन्द्वयुद्धैर्दोर्युद्धादिभिरुत्तमैः ॥४२५॥
**नलात् कदम्बो** दर्पान्धो यद्यद्युद्धमयाचत । परा[17]बभूवे जयिना तत्र तत्र **नलेन** सः ॥४२६॥
[18]क्षत्रव्रतं मयाऽतोलि **नलेन** तु महौजसा । मृत्युको[19]टिं प्रापितोऽस्मि तन्मा मृषे[20] पतङ्गवत् ॥४२७॥
तस्मात् पलायनं कृत्वा व्रतमासादयाम्यहम् । पलायनमपि श्रेयो यस्योदर्को[21]ऽतिनिर्मलः ॥४२८॥
इति चेतसि सञ्चिन्त्य **कदम्बः** प्रपलाय्य च । विरक्तो व्रतमादत्त तस्थौ प्रतिमया च सः ॥४२९॥
**नलः कदम्बं** दृष्ट्वाऽऽत्तव्रतमूचे जितोऽस्म्यहम् । क्षमां [22]क्षमान्तरासक्तो मा त्याक्षीर्जित[23]कास्यसि ॥४३०॥
महाव्रतधरो धीरः स **कदम्ब**महामुनिः । **नलस्य** नोत्तरमदान्निरीहस्य हि किं नृपः[24] ? ॥४३१॥
**नलः कदम्बं** व्यावर्ण्य तत्सत्त्वेन शिरो धुनन् । तत्सूनुमेव तद्राज्ये **जयशक्तिं** न्यवीविशत् ॥४३२॥
¶ततश्च **नलराज**स्य जिष्णोर्विष्णोरिवाऽखिलैः । **भरतार्ध**पतित्वाभिषेकोऽकारि नरेश्वरैः ॥४३३॥
अथ **कोशलनाथ**स्य **कोशला**मधिजग्मुषः । राजानो भक्तिकुशलाः सर्वे कौशै[25]लिकान्यदुः ॥४३४॥
अपि खेचरनारीभिर्गीयमानबलो **नलः** । रममाणः समं **भैम्या** भूमिमन्वशिषच्चिरम् ॥४३५॥
¶**कूबरः** स्वकुलाङ्गारो राज्यलुब्धो **नलस्य** तु । [26]छलं गवेषयामास सत्पात्रस्येव शाकिनी ॥४३६॥

---

१. ०धोऽभुङ्क्त र० मु० । २. ०पुत्रोऽधिकः पितुः परः खं० २ । ३. **प्रसादेन** खं० २ । ४. **०पचयात्** ला० । ५. **कष्टसाध्य०** खं० २ । ६. **०त्वमाप सः** ता. सं. । ७. दृढतायां गिरिसमम् । **०महागिरम्** ला० । ८. सैन्यपरिवारेण । ९. 'लज्जामकुर्वन्' लाटि. । १०. मूर्खो बालो वा । ११. **वाऽथ सुप्तो०** ता० । वाते, वातेन वा सुप्तः । १२. मुस्ता **'मोथ'** नामा वनस्पतिविशेषः, तत्र वराहः । १३. **०दारणम्** खं० १, ला० । १४. **०सन्नाहने०** र० मु० । १५. **०स्फलित०** ला० । १६. **च** खं० १-२, ला० । १७. **पराभूतो विजयिना** मु० । १८. **क्षत्रवृत्तं** मु० । १९. **०कोटीं** मु० र० । २०. **मृषं** ला० । २१. **०दर्को हि नि०** ला० । उदर्कः आगामिकालः परिणामः । २२. क्षमान्तरे-परलोके आसक्तः । २३. **०काश्यसि** खं० २ । **०कास्यपि** ला० । विजेताऽसि । २४. **नलः** सू० । २५. उपहारान् । २६. **छलमन्वेषया०** खं० १, सू०ला० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्यूतासक्तिर्नलस्याऽभूत् सदा न्यायवतोऽपि हि । चन्द्रस्याऽपि कलङ्कोऽस्ति क्व रत्नमनुपद्रवम् ? ॥४३७॥
जयामि मेदिनीमे[1]नामिति क्रूराशयो हृदि । **कूबरो** रमयामास सर्वदा देव[2]नैर्**नलम्** ॥४३८॥
रेमाते तौ [3]बहुं कालं देवनद्यूतलीलया । सञ्चचार डमरुकग्रन्थिवच्च जयो[4] द्वयोः ॥४३९॥
अन्यदाऽनुगम-चर-बन्ध-मोक्षक्षमोऽपि हि । **नलो** नाऽलमभूज्जेतुं **कूबरं** दैवदोषे[5]तः ॥४४०॥
अनुकूलो **नलस्या**ऽक्षः कां[6]ङ्क्ष्यमाणोऽपि नाऽपतत् । तच्छारा[7]न् **कूबरः** क्रूरो मुहुर्मुहुरमारयत् ॥४४१॥
ग्राम-कर्बट-खेटादि शनकैर्हारयन्**नलः** । हीयमानोऽभवल्लक्ष्म्या ग्रीष्मे सर इवाऽम्भसा ॥४४२॥
विषसादाऽखिलो लोको **नले** द्यूतममुञ्चति । **कूबरस्तु** जहर्षोच्चैः पूर्यमाणसमीहितः ॥४४३॥
**नलानुरक्तो** लोकश्च हा हा ! कर्तुं प्रचक्रमे । हाहाकारं तमाकर्ण्य तत्राऽऽगाद् **दवदन्त्यपि** ॥४४४॥
उवाच च नलं नाथ ! [8]नाथामि त्वां प्रसीद मे । मुञ्च द्यूतं द्रोहकौ ते वैरिणाविव देवनौ ॥४४५॥
वेश्यागमनवद् द्यूतं क्रीडामात्रं मनीषिणः । सेवन्ते नाथ ! न त्वेवमन्धङ्करणमात्मनः ॥४४६॥
वरं राज्यं स्वयं देहि **कूबराया**ऽनुजन्मने । श्रीरा[9]त्ताऽस्मात् प्रसह्येति प्रवादं माऽऽत्मनः कृथाः ॥४४७॥
उपार्जिता युद्धशतैर्द्यूते[10]स्तीर्णा मही तव । दुनोति देवाऽत्यन्तं मा[11]मेश्रोतोगतसि[12]क्थवत् ॥४४८॥
तद्वाचं न हि शुश्राव ददर्शाऽपि[13] न तां **नलः** । अध्यारूढो मदावस्थां दर्श[14]मीमिव वारणः ॥४४९॥
पत्या भृशमवज्ञाता रु[15]दती **दवदन्त्यथ** । कुलामात्यादिकानूचे **नलं** द्यूतान्निषेधत ॥४५०॥
तेषामपि वचो नैव [16]प्रबभूव मनागपि । **नैषधेरौ**षधमिव सन्निपा[17]तवतो भृशम् ॥४५१॥
**नलो**ऽनलस एवाऽभूद् द्यूते हारितभूरपि । ततः सार्धं, **दवदन्त्या**ऽप्यन्तःपुरमहारयत् ॥४५२॥
**नलो** हारितसर्वस्वस्ततश्चाऽमु[18]ञ्चदङ्गतः । परिविव्रजिषुरिव सर्वमाभरणादिकम् ॥४५३॥
**कूबरो**ऽथ **नलं** प्रोचे मेह स्थास्त्यज मद्भुवम् । पित्रा राज्यं तवाऽदायि ममाऽदायि तु देवनैः ॥४५४॥
न लक्ष्मीर्दोष्मतां दूरे मा [19]द्रांप्सीरिति तं ब्रुवन् । सं[20]व्यानमात्रोपात्तस्वः प्रचचाल **नलस्ततः** ॥४५५॥
**नलानुलग्नां भैमीं** तु भीमवाक् **कूबरो**ऽवदत् । द्यूते जिताऽसि मा गास्त्वं मच्छुद्धान्तमलङ्कुरु ॥४५६॥
¶अथाऽमात्यादयः प्रोचुः **कूबरं** तु [21]दुराशयम् । न स्पृशत्यन्यपुंश्छायामपि **भैमी** महासती ॥४५७॥
[22]अवरोधे निधा मेमां[23] ज्येष्ठपत्नी हि मातृवत् । शिशवोऽपि पठन्त्येवं ज्येष्ठो भ्राता पिता यथा ॥४५८॥
कुरुषे चेत् प्रसह्यैवं तदा **भीम**सुता सती । करिष्यते भस्मसात् त्वां सतीनां नाऽस्ति दुष्करम् ॥४५९॥
अनर्थं मा प्रपद्येथाः कोपयित्वा सतीमिमाम् । भर्तारमनुगच्छन्ती प्रत्युतोत्साह्यतामियम् ॥४६०॥
ग्राम-खेटादिदानेन [24]पर्याप्तं ते **नलं** प्रति । तदर्पय सपाथेयं रथमेकं ससारथिम् ॥४६१॥
इत्युक्तो व्यसृजद् **भैमीं नलेन** सह **कूबरः** । अर्पयामास च रथं सपाथेयं ससारथिम् ॥४६२॥
**नलो**ऽवदन् मया लक्ष्मी**र्भरतार्ध**जयार्जिता । क्रीडया त्यज्यते येन तस्य मे का रथस्पृहा ? ॥४६३॥
¶**नलं** प्रधानपुरुषाः प्रोचिरे चिरसेवकाः । वयमप्यनुयामस्त्वां **कूबरस्तु** निषेधति ॥४६४॥
तवाऽनुजस्त्वया [25]दत्तराज्यस्त्याज्यश्च **नैष नः** । अस्मिन् वंशे हि यो राजा स सेव्यो नः क्रमो ह्यसौ ॥४६५॥
ततो नाऽऽगन्तुमर्हामस्त्वया सह **महाभुज** ! । भार्या मन्त्री सखा पति**र्दवदन्त्ये**व तेऽधुना ॥४६६॥
शिरीषसुकुमाराङ्गीमङ्गीकृतसतीक्रमाम् । **भीमजां** पादचारेण कथं नेष्यसि वर्त्मनि ? ॥४६७॥
मार्गं तपनसन्तापस्फुलिङ्गद्वालुकाकणम् । चुम्बेदेषा कथं पादैः कमलोदरसोदरैः ? ॥४६८॥

---

१. ०मेतामिति खं० २ । २. पाशैः । ३. **बहुकालं** मु० र० । ४. **द्वयोर्जयः** मु० । ५. **दैवमोहितः** मु० । ६. **कांक्षमाणो०** खं० २, ला० । ७. **तच्छारीन्** पा०आ०ला० । **तच्छारीः** । शारिः-शारः 'सोगठी' । ८. प्रार्थयामि । ९. **श्रीर्गता०** ला० । १०. द्यूतेन गता । ११. नासिकारन्ध्रगतान्नकणवत् । १२. **०सिक्थुवत्** मु० । १३. **ददर्श च न** खं० २ । १४. गजस्य मदावस्थाप्रकारः । १५. **रुदन्ती** मु० । १६. **प्रावर्तत** ला० । १७. **०पातभृतो०** खं० २ । १८, **०श्चामुच०** खं० १-२, ला० सू० । १९. दर्पं मा कार्षीः । २०. उत्तरीयवस्त्रमात्रधनः । २१. **कूबरं तुबराशयम्** खं० १-२, ला० सू० । २२. अन्तःपुरे । २३. **मैनाम्,** ता०ला० । २४. अलम् । २५. **दत्तराज्यश्चैषोऽपि नैषधिः** पु० ला० २ । **दत्तराज्यस्त्याज्य श्च नैषधिः** खं० १, सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद् गृहाण रथं नाथ ! प्रसीदाऽनुगृहाण नः । देव्या सममिहाऽऽरोह क्षेमोऽध्वा स्वस्ति चाऽस्तु वः ॥४६९॥
प्रधानपुरुषैरेवं प्रार्थ्यमानो मुहुर्मुहुः । **दवदन्त्या** सह **नलो** रथमारुह्य निर्ययौ ॥४७०॥
एकवस्त्रां **दवदन्ती** दृष्ट्वा स्नानोद्यतामिव । नागर्यो रुरुदुर्बाष्पजलक्लेदितकञ्चुकाः ॥४७१॥
¶गच्छंश्च पुरमध्येन हस्तपञ्चशतोन्नतम् । ददर्शैकं **नलः** स्तम्भं दिग्गजालानसन्निभम् ॥४७२॥
राज्यभ्रंशोद्भवं दुःखमविदन्निव कौतुकात् । तं **नलो** लीलयोद्दध्रे[1] कदलीमिव वारणः ॥४७३॥
पुनरारोपयमास स्तम्भं तत्रैव तं **नलः** । उत्खात-प्रतिरोपाख्यं शंसन्निव नृपव्रतम् ॥४७४॥
दृष्ट्वा च नागराः प्रोचुर्**नलस्**याहो ! महद्बलम् । व्यसनं बलिनोऽप्यस्य प्रमाणं नियतिः खलु ॥४७५॥
क्रीडतोऽस्य **नगोद्याने कूबरेण समं** पुरा । महर्षिराजगामैको ज्ञानरत्नमहानिधिः ॥४७६॥
स आख्यद् भाव्यसौ याम्य[2]**भरतार्धपतिर्नलः** । पूर्वस्मिन् जन्मनि मुनेः क्षीरदानप्रभावतः ॥४७७॥
पुरीमध्ये महास्तम्भं हस्तपञ्चशतोन्नतम् । चौलयिष्यति[3] योऽवश्यं **भरतार्ध**पतिः स हि ॥४७८॥
द्वयं संवाद्यभूदेतद्[4] **भरतार्धपतिर्नलः** । स्तम्भश्च [5]चालितोऽनेन दृष्टः स्वैरेव लोचनैः ॥४७९॥
**नले** जीवति न ह्यन्यः **कोशलायां**[6] महीपतिः । भावीति यत् त्ववादीत् स विसंवादि बभूव तत् ॥४८०॥
वाग् दृष्टप्रत्यया तस्य भवित्री नाऽन्यथाऽथवा । किं ज्ञायते यदि पुनर्न नन्दिष्यति **कूबरः** ? ॥४८१॥
कदाचित् स्याद्[7] यदि पुनर्**नल** एवात्र भूपतिः । **नलस्य** पुण्यश्लोकस्य सर्वथा पुण्यमेधताम् ॥४८२॥
एवं लोकवचः शृण्वन् पुरीं तत्याज **कोशलाम्** । रुदत्यां[8] **दवदन्त्याऽ**स्रैः स्नाप्यमानरथो **नलः** ॥४८३॥
¶अभ्यधान्**नैषधिः** पत्नीं क्व यामो देवि ! सम्प्रति ? । न हि स्थानमनुद्दिश्य प्रवृत्तिश्चेतनावताम् ॥४८४॥
**वैदर्भ्युवाच** दर्भाग्रतीक्ष्णधीर्देव ! गम्यताम् । **कुण्डिने** तत्र मे तातोऽतिथीभूयाऽनुगृह्यताम्[9] ॥४८५॥
तथैवाऽथ **नलादिष्टः**[10] सव्येष्ठा प्रेरयन् हयान् । आशिश्रायाऽऽश्रयो भक्तेर्दिशं **कुण्डिन**मण्डिताम् ॥४८६॥
व्याघ्र[11]घूत्कारघोराद्रिगुहामुरगदारुणाम् । दुःश्वापदशताकीर्णां सङ्कीर्णां भिल्ल-लुब्धकैः ॥४८७॥
सिंहमारितवन्येभदन्तदन्तुरभूतलाम् । क्रीडास्थानं यमस्येव **नलः** प्रापदथाऽटवीम् ॥४८८॥ युग्मम् ॥
आकर्णाकृष्टकोदण्डान् प्रचण्डानभिसर्पतः । यमदूतोपमान् भिल्लान् गच्छन्नग्रे ददर्श सः ॥४८९॥
भिल्लास्ते ननृतुः केऽपि पानगोष्ठीपरा इव । केऽपि चाऽवादयन् शृङ्गमेकदन्तद्विपोपमाः ॥४९०॥
केचित् कलकलं चक्रू रङ्गादाविव नर्तकाः । केचिच्च ववृषुर्बाणान् धारासारानिवाऽम्बुदाः ॥४९१॥
करास्फोटं व्यधुः केऽपि मल्ला इव [12]नियोधिनः । सर्वे सम्भूय रुरुधुर्**नलं** श्वान इव द्विपम् ॥४९२॥ त्रिभिर्विशेषकम् ॥
द्रुतं रथादथोत्तीर्य कोशादाकृष्य **नैषधिः** । अनर्तयन्मुष्टि[13]रङ्गेऽसियष्टिं नर्तकीमिव ॥४९३॥
**भीमजाऽपि** रथं मुक्त्वा बाहौ धृत्वाऽवदन्**नलम्** । क एतेषु तवाऽऽक्षेपः सिंहस्य शशकेष्विव ॥४९४॥
व्यापार्यमाणश्चैतेषु पशुमात्रेषु **नैषधे**[14] । ह्रेष्यत्यसौ **भरतार्ध**जयश्रीवासभूरसिः ॥४९५॥
इत्युक्त्वा **भीम**तनया हुङ्कारानमुचन् मुहुः । मान्त्रिकी मण्डलस्येव स्वसमीहितसिद्धये ॥४९६॥
मुच्यमानास्तु ते **भैम्या** हुङ्कारास्तत्प्रभावतः । विशन्तो भिल्लकर्णेषु तीक्ष्णायःसूचितां ययुः ॥४९७॥
भिल्लास्तु ते ययुः सर्वे कान्दिशीका दिशो दिशम् । तौ तु तानभिधावन्तौ रथाद् दूरे बभूवतुः ॥४९८॥
¶इतश्च भिल्लैरपरैरपजह्रे तयो रथः । कुर्यात् पुरुषकारः किं दैवे[15] वक्रत्वमीयुषि ? ॥४९९॥
तस्यामटव्यां भीमायां **भैमी**मादाय पाणिना । पाणिग्रहोत्सवं तस्याः स्मारयन्[16]भ्रमन्**नलः** ॥५००॥
**वैदर्भी** दर्भविद्धांह्रिक्षरद्रुधिरबिन्दुभिः । चकाराऽरण्यवसुधामिन्द्रगोपाङ्कितामिव ॥५०१॥
पट्टबन्धः पुरा मूर्धन्यभूद् **भैम्यास्**तदा पुनः । **नलेन** पादयोश्चक्रे दारं दारं स्वमंशुकम् ॥५०२॥

---

१. **उत्पाट्य प्रति०** खं० २ । २. 'दक्षिण' लाटि० । ३. **चलयि०** खं० १, सू० । ४. **०द्यभूदेतै०** खं० २ । ५. **चलितो येन** ता०सं० । ६. **कोशलाया०** पा० मु० । ७. **स्यादिदं पुन०** खं० १ । ८. रुदन्त्या मु० । ९. **०नुगृह्यत** खं० २ । १०. **०दिष्टसव्येष्ठा** मु० । सव्येष्ठा सारथिः । ११. **व्याघ्रपूत्कार०** ला० २ । **व्याघ्रबूत्कार०** ता०सं०मु० । १२. **नियोगिनः** खं० १ । **च योधिनः** खं० २ । द्वन्द्वयुद्धं कुर्वाणाः । १३. मुष्टिरेव रङ्गं-नाट्यशाला तत्र । १४. **नैषधिः** खं० १ । **नैषधे** ! ला० । १५. **देववक्रत्व०** खं० १-२ । १६. **स्मर०** खं० १, सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भीमजां** वीजयामास श्रान्तासीनां तरोस्तले । तालवृन्तीकृतनिजपरिधानाञ्चलो **नलः** ॥५०३॥
**नलः** पलाशैः[1] पालाशैः पुटं कृत्वा[2]ऽऽहृतं पयः । तामपीप्यत् पञ्जरस्थां शारिकामिव तर्षिताम् ॥५०४॥
पप्रच्छ **भीमजा**ऽप्येवं किय[3]त्यद्याऽप्यटव्यसौ । इह द्विधैव भवितुं कम्पते हृदयं मम ॥५०५॥
**नलो**ऽप्याख्यदटव्येषा योजनानां शतं प्रिये ! । पञ्चैव योजनान्यस्या गतान्या[4]श्रय धीरताम् ॥५०६॥
एवं वार्तयतोस्तस्मिन्नरण्ये गच्छतोस्तयोः । सूर्योऽस्तमाप, कथयन्निव सम्पदनित्यताम् ॥५०७॥
¶[5]अथाऽवचित्य निर्वृन्तीकृत्य चाऽशोकपल्लवान् । **दवदन्त्याः** कृते चक्रे नलस्तल्पमनल्पधीः ॥५०८॥
उवाच च प्रियां तल्पं शयित्वा त्वमलङ्कुरु । निद्रायाः समयं देहि दुःखविस्मृतिसख्यसौ ॥५०९॥
**भैम्य**भ्यधादितो देव ! पश्चिमायामदूरतः । अस्ति संवसथो मन्ये गवां हम्भारवं शृणु ॥५१०॥
किञ्चिदग्रे परिक्रम्य तदिहाऽऽवसथे वयम् । यामो याम[6]वती[7] तत्र सुखसुप्तैर्निगम्यताम् ॥५११॥
**नलः** प्रोवाच हे भीरु ! तापसानामिहाऽऽश्र[8]मः । अशुभोदर्कसम्पर्कास्ते च मिथ्यादृशः सदा ॥५१२॥
[9]अपि तापससङ्गत्या सम्यक्त्वं हि विना[10]श्यते । मनोरमं क्षीरमिवाऽऽरनालेन कृशोदरि ! ॥५१३॥
तदत्रैव सुखं शेष्व मा कृथास्तन्मुखं मनः । भवामि यामिकोऽहं ते सौविदल्ल इव स्वयम् ॥५१४॥
तत्र पल्लवतल्पे स्वं संव्यानार्धमथाऽक्षिपत् । तूलिकां प्रच्छदवर्ती प्रेयस्याः स्म[11]रयन्नलः ॥५१५॥
वन्दित्वा देवमर्हन्तं स्मृत्वा पञ्चनमस्कृतिम् । **वैदर्भी** तत्र चाऽशेत गाङ्गे हंसीव रोधसि ॥५१६॥
¶निद्रामुद्रितनेत्रायां **वैदर्भ्यां कोशलेश्वरः** । चिन्तां चक्रे महावर्तमिव व्यसनवारिधेः ॥५१७॥
श्वशुरः शरणं येषां नराणां ते नराधमाः । **दवदन्त्याः** पितुर्गेहं तत्[12]कथं यात्वसौ **नलः** ? ॥५१८[13]॥
हृदयं व[14]ज्रसात्कृत्वा तत् त्यक्त्वा प्रेयसीमपि । गच्छामि स्वेच्छयाऽन्यत्राऽऽत्मानमादाय रङ्कवत् ॥५१९॥
शीलप्रभावाद् **भैम्याश्च** न स्यात् कश्चिदुपद्रवः । शीलं सतीनां सर्वाङ्गरक्षामन्त्रो हि शाश्वतः ॥५२०॥
इत्याकृष्य छुरीं राजा स्वसंव्यानार्धमच्छिदत् । **भैम्या** वस्त्रे स्वरुधिरेणाऽक्षराणि लिलेख च ॥५२१॥
'**वि[15]दर्भे**ष्वेष यात्यध्वा वटालङ्कृतया दिशा । **कोशले**षु च तद्वामस्तयोरेकेन केनचित् ॥५२२॥
गच्छेः स्वच्छाशये ! वेश्म पितुर्वा श्वशुरस्य वा । अहं तु क्वाऽपि न स्थातुमुत्सहे [16]हे विवेकिनि !' ॥५२३॥ युग्मम् ॥
अक्षराणि लिखित्वैवमशब्दं **प्ररुदन्नलः** । अग्रतो गन्तुमारेभे चौरवन्नि[17]भृतक्रमः ॥५२४॥
प्रसुप्तां प्रेयसीं पश्य**न्नलो** वलितकन्धरः । तावदग्रे ययौ यावददृश्यत्व**मि**याय सा ॥५२५॥
अचिन्तयच्च तां बालामनाथां शयितां वने । [18]क्षुत्क्षामो भक्षयेद् व्याघ्रः सिंहो वा यदि का गतिः ॥५२६॥
तद्दृष्टिविषयीकृत्य तां रक्षामि निशामहम् । प्रातः स्वरुचि यात्वेषा मया [19]कथितयोः पथोः ॥५२७॥ युग्मम् ॥
तैरेव पादैर्वलितः पति[20]तार्थः पुमानिव । दृष्ट्वा भूलुठितां जायां **नलः** पुनरचिन्तयत् ॥५२८॥
**दवदन्त्ये**कवस्त्रेयमेका स्वपिति वर्त्मनि । अहो ! **नलस्य** शुद्धान्तमसूर्यपश्यमीदृशम् ॥५२९॥
अहो ! मत्कर्मदोषेण कुलीनेयं सुलोचना । प्रविवेश[21] दशामेव हताशः किं करोम्यहम् ? ॥५३०॥
मयि सत्यपि पार्श्वस्थेऽप्युन्मत्तवदनाथवत् । भूमौ शेते व[22]रारोहा जीवत्यद्याऽपि ही **नलः** ॥५३१॥

---

१. **पलासपालाशैः** खं० २। पलाशवृक्षस्य पत्रैः । २. **कृत्वा द्रुतं** मु० र० । ३. **कियत्पन्थाऽप्य०** पा० । ४. ०न्याधेहि खं० २, ला० । ५. **अवचित्याथ** खं० १-२, ला० सू० मु० । ६. ग्रामः । ७. रात्रिः । ८. ०**श्रयः** खं० २ । ९. **अति** ला० । १०. **विनश्यति** मु० र० । ११. **स्मारयन्नतः** खं० २ । १२. **कथं यातु त्वसौ** ला० ।
१३. ५१८ पद्यानन्तरं पु. प्रतावधिकोऽयं श्लोको दृश्यते-
"यतः- उत्तमाः स्वगुणैः ख्याता मध्यमास्तु पितुर्गुणैः । अधमा मातुलैः ख्याताः श्वसुरैश्चाधमाधमाः ॥"
१४. 'वज्रसदृशं' लाटि. ।
१५. "वडरुक्खि दाहिणि दिसिं जाइ विदब्भि मग्ग । वामदिसिं पुण कोसलहिं जहिं भावइ तिहां लग्ग" ॥ इति की० प्रतौ टि० ।
१६. **हि** खं० २ । १७. मन्दपदः । १८. **क्षुत्क्षामां** ला० । १९. **कल्पितयोः** खं० १ । २०. पतितधनः । २१. ०**वेशाटवीमेव** ला० । २२. श्रेष्ठ **स्त्री** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मयैकाकिन्यसौ मुक्ता प्रबुद्धा मुग्धलोचना । मोक्ष्यते जीवितेनाऽपि स्पर्द्धयेव मया सह ॥५३२॥
भक्तां तदेनां वञ्चित्वा नाऽन्यतो गन्तुमुत्सहे । जीवितं मरणं वाऽपि मम स्तादनया सह ॥५३३॥
अथवाऽनेकदुःखानामरण्ये नरकोपमे । पात्रं नारकिक इव भवाम्येकोऽहमस्त्वसौ ॥५३४॥
मया तु वस्त्रे लिखितामाज्ञां ज्ञात्वा[1] मृगाक्ष्यसौ । स्वयं गत्वा कुशलिनी वत्स्यति स्वजनौकसि ॥५३५॥
इति निश्चित्य तां रात्रिमतिक्रम्य च **नैषधिः** । प्रबोधसमये पत्यास्तिरोऽधात्त्वरितक्रमम् ॥५३६॥
¶उन्निद्रपङ्कजामोदिमृदुप्रत्यूषमारुते । निशाशेषे **दवदन्ती** स्वप्नमेवमुदैक्षत ॥५३७॥
यदहं फलिते फुल्ले पत्रले चूतपादपे । आरुह्य तत्फलान्यादं शृण्वन्ती भृङ्गनिःस्वनान् ॥५३८॥
अकस्माद् वनकरिणोदमूलि च स पादपः । पतिताऽहं च मेदिन्यां ततोऽण्डमिव[2] पक्षिणः ॥५३९॥ युग्मम् ॥
**भैमी** प्रबुद्धा तत्कालमपश्यन्ती **नलं** पुरः । दिशोऽवलोकयामास मृगी यूथादिव च्युता ॥५४०॥
अचिन्तयच्चाऽऽपतितमत्याहित[3]मनाहतम् । अशरण्यामरण्ये मां प्रेयानपि मुमोच यत् ॥५४१॥
यद्वा मुखक्षालनाय प्राणेशो मे निशात्यये । गतो भविष्यति[4] क्वाऽपि वार्यानेतुं जलाशये ॥५४२॥
नीतो रमयितुं यद्वोपरुध्य नियतं **नलः** । कयाचिदपि खेचर्या तद्रूपालोकलुब्धया ॥५४३॥
क्रीडन् कलायां कस्याञ्चिज्जितो मन्ये तया च सः । कृतावस्थानपणि[5]तस्तस्थौ चाऽद्यापि नैति यत् ॥५४४॥
ते द्रुमाः पर्वतास्तेऽपि तदरण्यं च सा च भूः । एकमेव न पश्यामि **नलं** कमललोचनम् ॥५४५॥[6]
एवं चिन्ताप्रपन्ना[7] सा दर्शं दर्शं दिशोऽखिलाः । प्राणनाथमपश्यन्ती निजं[8] स्वप्नं व्यचारयत् ॥५४६॥
सहकारो **नलो** राजा राज्यं पुष्प[9]-फलादिकम् । फलास्वादो राज्यसुखं मृगाः परिजनो मम ॥५४७॥
सहकार[10]तरुर्यश्चोन्मूलितो वनदन्तिना । राज्यादुत्थाप्य दैवेन[11] प्रावास्यत स मे पतिः ॥५४८॥
यच्चाऽस्मि पतिता वृक्षात् तद् भ्रष्टाऽस्मि **नलादहम्** । स्वप्नेनाऽनेन नूनं मे **नलो** दुर्लभदर्शनः ॥५४९॥ त्रिभिर्विशेषकम् ॥
स्वप्नार्थमिति निर्णीय सा दध्याविति धीमती । न राज्यं न पतिश्चेति द्वयमापतितं मम ॥५५०॥
व्यलपन् मुक्तकण्ठं च सा तारं तारलोचना । दुर्दशापतितानां हि स्त्रीणां धैर्यगुणः कुतः ? ॥५५१॥
हा नाथः मां किमत्याक्षीः? किं भाराय तवाऽभवम् ?। न ह्यात्मीया कञ्चुलिका जातु भाराय भोगिनः[12] ॥५५२॥
मर्मणाऽन्तरितोऽभूस्त्वं यद्वा वल्लीवने क्वचित् । तत्प्रकाशो भव चिरं न हि नर्माऽपि शर्मदम् ॥५५३॥
प्रार्थये वः प्रसीदन्तु मह्यं हे वनदेवताः ! । प्राणेशं दर्शयत मे मार्गं वा तत्पवित्रितम् ॥५५४॥
द्विधा भव धरित्रि ! त्वं वालुङ्कमिव[13] पाकिमम्[14] । त्वद्दत्तविवरेणाऽहं प्रविश्याऽऽप्नोमि निर्वृतिम् ॥५५५॥
¶एवं **भैमी** विलपन्ती रुदती[15] नयनोदकैः । सारणीवारिभिरिव सिषेचाऽरण्यपादपान् ॥५५६॥
जले स्थले वा छायायामातपे वा **नलं** विना । ज्वरार्त्तायां इव तस्या न निर्वृतिलवोऽप्यभूत् ॥५५७॥
भ्रमन्त्यटव्यां संव्यानाञ्चले दृष्ट्वाऽक्षराणि सा । वाचयामास हर्षेण विकसन्नयनाम्बुजा ॥५५८॥
दध्यौ च तन्मनःपूर्णसरोहंस्यस्मि खल्वहम् । कुतोऽन्यथैवमादेशप्रसादास्पदता मम ॥५५९॥
तदद्य[16] पत्युरादेशं मन्ये गुरुवचोऽधिकम् । कुर्वन्त्या[17] मे तदादेशमिहलोकोऽतिनिर्मलः ॥५६०॥
तद् व्रजामि पितुर्वेश्म सुखवासनिबन्धनम् । पतिं विना हि[18] तद्वेश्मा[19]ऽभिभवायैव योषिताम् ॥५६१॥
पत्या सहाऽपि हि मया पितृवेश्म यियासितम् । विशेषतोऽद्य तद्यामि पत्यादेशवशंवदा ॥५६२॥

१. **कृत्वा** मु० । २. **ततोऽण्ड इव** मु० र० । ३. अत्याहितं-महाभयम् । ४. **भविष्यत्यथवा** ला० । ५. **०पणत०** मु० । ६. ५४५ श्लोकादनन्तरं पु. प्रतावेवं पाठो दृश्यते - "रणे वास पिएण सिउं विहि एतलउं करिज्ज । धण कण कंचण आभरण जइ लावउ तउ दिज्ज ॥" ७. चिंतासमुद्दपडियं(या) दहदिसि चाहंति भुंभला नयणी । अच्छइ को इणिं अवसरि जो हत्थालंबणं देइ ॥ इति टि. की० प्रतौ । ८. **निजस्वप्नं** खं० १-२, सू० । ९. **पुष्पलता** ता० । १०. **तरुर्यस्योन्मू०** ला० । ११. **देवेन** ला० । १२. सर्पस्य । १३. चिर्भटकम् - चीभडुं । १४. पक्वम् । १५. **रुदन्ती** मु० । १६. **एतच्च पत्यु०** मु० । १७. **कुर्वत्या** ला० । १८. **विनापि** मु० र० । **विना तु** खं० १-२, सू० । १९. पतिगृहं पराभवायैव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶इति न्यग्रोधमार्गेण **भैमी गन्तुं** प्रचक्रमे । **नलाक्षराणि** पश्यन्ती पार्श्वे **नलम**िव स्थितम् ॥५६३॥
व्याघ्रा व्यात्ताननास्तस्या खादनायोत्थिता अपि । समीपमागन्तुमलमनलस्येव नाऽभवन् ॥५६४॥
गच्छन्त्यास्त्वरितं तस्या वल्मीकमथनोत्थिताः । जाङ्गुल्या इव मूर्ताया नाभ्यसर्पन् महोरगाः ॥५६५॥
स्वच्छायामपि भिन्दन्तौ दन्तैरन्येभशंकया । मत्ता अपि ययुर्दूरं[1] तस्याः सिंह्या इव द्विपाः ॥५६६॥
प्राभूवन् पथि गच्छन्त्यास्तस्या नान्येऽप्युपद्रवाः । सर्वत्र कुशलं तासां स्त्रीणां याः स्युः पतिव्रताः । ॥५६७॥
सा पुलिन्दपुरन्ध्रीवाऽतिविसंस्थुलकुन्तला । सद्यःस्नातेव सर्वाङ्गमपि स्वेदजलाविला ॥५६८॥
करीर-बदरीप्रायकण्टकिद्रुमघर्षणैः । प्रक्षरद्रुधिरा निर्य[2]न्निर्यासार्द्रेव सल्लकी ॥५६९॥
बिभ्रती मार्गसङ्क्रान्तं रजस्त्वचमिवाऽपराम्[3] । त्वरितं त्वरितं यान्ती दवत्रस्तेव हस्तिनी ॥५७०॥
आवासितमुदैक्षिष्ट सङ्कटं शाकटादिभिः । मार्गे महर्द्धिकं सार्थं शिबिरं नृपतेरिव ॥५७१॥ चतुर्भिः कलापकम् ॥
अचिन्तयच्च सार्थश्चेत् कश्चिदप्यधिगम्यते । सोऽरण्याब्धितरण्डः स्यात् तदा मे पुण्यसम्पदा ॥५७२॥
स्वस्थीभूय च सा तस्थौ यावत् तावच्च दस्यवः । परितो रुरुधुः सार्थं देवसेनामिवाऽसुराः ॥५७३॥
तां चौरसेनामायान्तीमीर्ति[4] चौरमयीमिव । दृष्ट्वा बिभ्युः[5] सार्थलोकाः सुलभा धनिनां हि भीः ॥५७४॥
हंहो मा भैष्ट मा भैष्ट लोकाः सार्थनिवासिनः । इति तत्कुलदेवीवोवाच वाचं **नल**प्रिया ॥५७५॥
व्याजहार च सा चौरान्[6] रे रे यात दुराशयाः । रक्ष्यमाणे मयाऽमुष्मिन् सार्थेऽनर्थमवाप्स्यथ ॥५७६॥
एवं वदन्तीमपि हि **दवदन्तीं** मलिम्लुचाः । वातूलामिव भूतात्तामिव चाऽजीगणन्न हि ॥५७७॥
ततो मुमोच हुंकारांश्चौ[7]राहंकारदारणान्[8] । **कुण्डिना**धीशदुहिता हितार्थं सार्थवासिनाम् ॥५७८॥
श्रुतैश्च तस्या हुङ्कारैर्बधिरीकृतकाननैः । दस्यवस्ते पलायन्त धनुर्नादैरिव द्विकाः[9] ॥५७९॥
अस्मत्पुण्यैः समाकृष्टा काऽप्येषा देवता खलु । अस्मानरक्षच्चौरेभ्य[10] इति सार्थजनोऽवदत् ॥५८०॥
सार्थनाथोऽपि तां भक्त्या प्रणम्य जननीमिव । पप्रच्छ किमिहाऽरण्ये परिभ्रमसि काऽसि वा ? ॥५८१॥
[11]सास्रदृग् बान्धवायेव सार्थवाहाय **भैम्य**पि । अशंसदा**नल**द्यूतात् सर्वं वृत्तान्तमात्मनः ॥५८२॥
उवाच सार्थवाहोऽपि महाबाहोर्महीपतेः । **नल**स्य पत्नीत्यपि मे पूज्याऽस्यद्याऽस्मि पुण्यभाक् ॥५८३॥
त्वयोपकारक्रीताः[12] स्मस्तस्करेभ्यश्च रक्षणात् । तत्पुनीहि ममाऽऽवासं स्तोकं यत् क्रियते त्वयि ॥५८४॥
एवमुक्त्वा सार्थवाहो नीत्वा पटगृहे निजे । **भैमीं** विश्रामयामासा[13]ऽऽराधयन् देवतामिव ॥५८५॥
¶वर्षानाटकनान्द्याभां गर्जामुच्चैर्विपञ्चयन् । अखण्डधारां[14] विदधे वृष्टिं धाराधरस्तदा ॥५८६॥
स्थाने स्थाने परीवाहैः[15] प्रवहद्भिर्निरन्तरैः। ससारणीक[16]मुद्यानमिवाऽभूदभितोऽपि भूः ॥ ५८७॥
अखातसरसां वारिपूर्णानां दर्दुरारवैः । नद्यद्दर्दुरकातोद्यमयीवोपान्तभूरभूत् ॥५८८॥
बभूव सर्वतोऽरण्ये [17]वाराहीदोहदप्रदः । पङ्कः पादेषु पान्थानां मोचक[18]प्रक्रियाकरः ॥५८९॥
त्रिरात्रमनवच्छिन्ना वृष्टिरासीत् तदोत्कटा । **भैमी** त्वस्थात् सुखं तत्र प्राक्षेव पितृवेश्मनि ॥५९०॥
वर्षं वर्षं स्थिते मेघे **दवदन्ती** महासती । सार्थं हित्वा पुनरपि प्राग्वदेकाकिनी ययौ ॥५९१॥
¶**नल**प्रवासदिवसादपि **भीम**सुता सती । चतुर्थादितपोलीनाऽत्यगा[19]न्मार्गं शनैः शनैः ॥५९२॥
उत्पिङ्गलकचं शैलमिव दीप्तदवानलम् । जिह्वाज्वालाकरालास्यं द्विजिह्वमिव दारुणम् ॥५९३॥
कर्तिकादारुणकरं [20]तालदघ्नं कृशकमम् । अमावास्यातमःश्यामं घटितं कज्जलैरिव ॥५९४॥

---

१. दूरे ला० २. निर्यन्-निर्गच्छन् यो निर्यासः रसः 'गुंद', तेनाऽऽर्द्रा सल्लकी (वृक्ष) इव सा । ३. **मिवापरम्** मु०र० । ४. उपद्रवम् । ५. **ऽबिभ्यन्** खं० २, ला० । ६. **चौराः अरे !** ला० । ७. **०रान् स्फाराहंकार०** खं.२ । ८. **०दारुणान्** मु० र० विना । ९. काकाः । १०. **अस्मान् रक्षति चौरेभ्यः इति** ला० ला० २ । ११. **साश्रु** मु० र० । १२. **त्वया चाद्योपकृताः स्म०** खं० १ । **०क्रीतोऽस्मि** ला० । १३. **मास राध०** मु० । १४. **०धारं** खं० १, ला० सू० । १५. जलोच्छ्वासैः, 'अधिकजलनिर्गमनमार्गैः । १६. **ससारणिक०** मु० र० । १७. **वराही०** मु० विना । १८. पादत्राणपरिधायकः । १९. **०त्यागा०** ला० । **०भ्यगा०** ता०सं०पु० खं० २ । २०. तालवृक्षप्रमाणम्। **तालदघ्नकृश०** खं० १-२, मु० र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शार्दूलचर्मसंव्यानं भीषणेभ्योऽपि भीषणम् । रक्षोऽद्राक्षीदथैकं सा पुत्रं पितृपतेरिव ॥५९५॥ त्रिभिर्विशेषकम् ॥
बुभुक्षाक्षामकुक्षेर्मे चिराद् भक्ष्यमुपस्थितम् । मङ्क्षु त्वां भक्षयिष्यामीत्युवाच च स राक्षसः ॥५९६॥
भीताऽप्यथोऽवदद् धैर्यमालम्ब्य **नल**गेहिनी । श्रुत्वा मदी[2]यं वचनं यथारुचि त्वमा[3]चरेः ॥५९७॥
जातस्य हि ध्रुवं मृत्युरकृतार्थस्य मृत्युभीः । आजन्म परमार्हत्याः कृतार्थायास्तु सा न मे ॥५९८॥
परस्त्रियं मा स्पृश मां स्पृशन्नपि न नन्दसि । ममाऽऽक्रोशेन मूढात्मन्नेषाऽस्मि विमृश क्षणम् ॥५९९॥
इति धैर्येण **वैदर्भ्या** हृष्टः स रजनीचरः । उवाच भद्रे ! तुष्टोऽस्मि किं तवोपकरोम्यहम् ? ॥६००॥
साऽप्यूचे यदि तुष्टोऽसि देवयोने ! निशाचर ! । तर्हि पृच्छामि कथय कदा मे पतिसङ्गमः ? ॥६०१॥
विज्ञायाऽवधिना तस्यै कथयामास राक्षसः । सम्पूर्णे द्वादशे वर्षे प्रवा[4]साहाद्यशस्विनि ! ॥६०२॥
पितृवेश्मस्थितायास्ते स्वयमेव समागतः । मिलिष्यति **नलो** राजा समाश्वसिहि सम्प्रति ॥६०३॥ युग्मम् ।
कल्याणि ! भणसि त्वं चेत् तदा त्वां तातवेश्मनि । नयाम्यर्धनिमेषेण यासीर्माऽऽयासमध्वनि ॥६०४॥
सा प्रोचे कृतकृत्याऽस्मि **नलागमनशंसनात्** । परपुंसा सह ना[5]ऽहं प्रयामि स्वस्ति ते व्रज ॥६०५॥
दर्शयित्वा निजं रूपं स ज्योतिर्मयमात्मनः । उत्पपाताऽम्बरतले तडित्पुञ्ज इव क्षणात् ॥६०६॥
पत्युः प्रवासं विज्ञाय साऽपि द्वादशहायनीम् । चकाराऽभिग्रहानेवं सतीत्वं[6]द्रुमपल्लवान् ॥६०७॥
रक्तवस्त्राणि ताम्बूलं भूषणानि विलेपनम् । विकृतीरपि नाऽऽदास्ये न यावन्मिलितो **नलः** ॥६०८॥
गिरेरेकस्य च प्राप्य कन्दरां दर[7]वर्जिता । **भैमी** प्रावृषमत्येतुं तत्रैवाऽवस्थितिं व्यधात् ॥६०९॥
सा बिम्बं **शान्तिनाथस्य** स्वयं निर्माय मृन्मयम् । न्यवीविशद् गुहाकोणे मनसीवाऽमले निजे ॥६१०॥
स्वयंगलितपुष्पाणि स्वयमानीय **भीमजा** । त्रिसन्ध्यं पूजयामास तद्बिम्बं षोडशार्हतः ॥६११॥
चतुर्थादितपःप्रान्ते पारणं परमार्हती । [8]प्रासुकैर्बीजरहितैः [9]कृतिन्यकृत सा फलैः ॥६१२॥
सोऽपश्यन् सार्थवाहोऽपि सार्थमध्ये **नल**प्रियाम् । [10]आगादनुपदं तस्याः क्षेममस्त्विति चिन्तयन् ॥६१३॥
गुहायामागतस्तस्यां सार्थवाहो ददर्श च । **दवदन्ती**मर्चयन्तीमर्हद्बिम्बं समाधिना ॥६१४॥
दृष्ट्वा क्षेमवतीं **भैमीं** सार्थवाहः प्रमोदभाक् । नत्वा चोपाविशद् भूमौ विस्मयस्मेरलोचनः ॥६१५॥
**भैमी** समाप्याऽर्हत्पूजां स्वागतप्रश्नपूर्वकम् । सार्थेशं वार्त्तयामास सुधामधुरया गिरा ॥६१६॥
अदूरवासिनः केऽपि तापसास्तत्र सत्वरम् । [11]आगुस्तच्छब्दमाकर्ण्योत्कर्णाश्चाऽस्थुर्मृगा इव ॥६१७॥
धाराधरोऽम्बुधाराभिर्दुर्धराभिर्धराधरम् । ताडयन्नभितष्टङ्कैरिवाऽऽरेभे च[12] वर्षितुम् ॥६१८॥
आहन्यमाना भल्लीभिरिव धाराभिरम्भसाम् । ते प्रोचिरे क्व गच्छामः ? क्व पयो वञ्च्यतामिदम् ? ॥६१९॥
दृष्ट्वा च तान् कान्दिशीकान् श्वापदानिव तापसान् । उवाच **भैमी** मा भैष्ट मा भैष्टेति प्रकृ[13]ष्टवाक् ॥६२०॥
कृत्वा च परिधौ तेषां कुण्डं **कुण्डिनराट्**सुता । सतीधुरन्धरा धीरं व्याजहाराऽतिहारिवाक् ॥६२१॥
सत्यस्मि यद्यहं यद्यार्हती ऋजुमना यदि । कुण्डात्[14] तदस्मादन्यत्र वर्षन्तु स्तनयि[15]त्नवः ॥६२२॥
तदैव **भीम**तनयासतीत्वस्य प्रभावतः । कुण्डे धृतच्छत्र इव पयस्तत्राऽपतन्नहि ॥६२३॥
पर्वतः सर्वतोऽपि द्राग् धौतो नीरैरराजत । निर्मल[16]श्यामलवपुर्नदीस्नात इव द्विपः ॥६२४॥
गह्वराणि गिरेस्तस्याऽभूवन् वर्षति वारिदे । [17]परितो वारिपूर्णानि पू[18]र्त्तानीवाऽम्बुदश्रियः[19] ॥६२५॥
तद्दृष्ट्वाऽचिन्तयन् सर्वे काऽप्येषा खलु देवता । मानव्या नेदृशं रूपं न च शक्तिरपीदृशी ॥६२६॥
सार्थवाहो **वसन्तस्तां** पप्रच्छ स्वच्छधीरथ । भद्रे ! कथय को नाम देवोऽयं पूज्यते त्वया ? ॥६२७॥

---

१. यमराजस्य । २. **मदीयवचनं** खं० २ । ३. **तमाचरेः** र०स्वीकृतप्रतिषु सर्वत्र । ४. प्रवासदिनात् । ५. **साहं** सू० । ६. **सतीव्रतद्रुपल्लवान्** ला० । ७. **०वर्जिताम्** खं० २, ला०सू० । भयरहिता । ८. निर्दोषैः । ९. पण्डिता । **कृतज्ञाऽकृत** ता०सं०पु० । १०. **अगा०** ला० । ११. **आयु०** ता०सं० । १२. **०भेऽथ** खं० २, सू०ला० । **०भे प्रव०** खं० १ । १३. **प्रगल्भवाक्** ता०सं० । १४. **कुण्डात् तस्मात्तदन्यत्र** ला० । १५. मेघाः । १६. **निर्मलः** मु०र० । १७. **वारिपूर्णानि मूर्त्तानि पू०** ला० सू० । १८. पूर्त्तानि-जलाशयाः, 'इष्टापूर्त्त'कर्मसु 'पूर्त्त' कर्म । १९. **०श्रिया** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भैम्यी**[1]ख्यात् सार्थवाहाय, देवोऽर्हन् परमेश्वरः । त्रैलोक्यनाथो भविनां प्रार्थनाकल्पपादपः ॥६२८॥
आराधयन्त्यहममुमिह तिष्ठामि निर्भया । एतत्प्रभावात् प्रभवन्त्यत्र व्याघ्रादयो न मे ॥६२९॥
अर्हत्स्वरूपमाख्याय **वैदर्भी** धर्ममार्हतम् । **वसन्त**सार्थवाहायाऽहिंसादिकमचीकथत् ।६३०॥
तं च धर्मं तयाऽऽख्यातं **वसन्तः** प्रत्यपद्यत । धर्मकामगवी दिष्ट्या दृष्टाऽसीति मुदाऽवदत् ॥६३१॥
हेयोपादेयविद्धू[2]य तापसा अपि तद्गिरा । तद्धर्मं प्रत्यपद्यन्ताऽनुस्यूतमिव चेतसि ॥६३२॥
नि[3]जं तापसधर्मं तेऽनिन्दंस्तद्धर्मवासिताः । अवाप्तक्षीरपौ[4]णाय कस्मै रोचेत काञ्जिकम्[5] ? ॥६३३॥
**वसन्त**सार्थवाहोऽपि तत्रैवाऽकारयत्[6] पुरम् । पुरं[7]न्दरपुराकारं महेभ्यैर्यत्र मुच्यते ॥६३४॥
तापसानां पञ्चशती प्रबुद्धाऽत्रेति कारणात् । तत्पुरं **तापसपुर**मिति सर्वत्र पप्रथे ॥६३५॥
स्वार्थज्ञः सार्थवाहो[8] हि स स्वमर्थं कृतार्थयन् । चैत्यं **श्रीशान्तिनाथ**स्य पुरे तस्मिन्नकारयत् ॥६३६॥
स सार्थवाहस्ते सर्वे तापसाः स जनोऽखिलः । समयं गमयामासुरर्हद्धर्मपरायणाः ॥६३७॥
¶अन्यदा तु[9] निशीथेऽद्रिशिखरे **नल**वल्लभा । ददर्शोद्योतमादित्यः स्फुलि[10]ङ्ग इव यत्पुरः ॥६३८॥
उत्पततो निपततस्ततश्च पतगानि[11]व । **भैमी** व्यलोकयद् देवाऽसुरान् विद्याधरानपि ॥६३९॥
तेषां जयजयारावतुमुलेन प्रबोधिताः । अपश्यन् विस्मे[12]योत्पश्या वणिजस्तापसाश्च ते ॥६४०॥
रोदस्योरन्तरां[13] मानदण्डरूपं महागिरिम् । तमारुरोह **वैदर्भी** सवणिग्जन-तापसा ॥६४१॥
तत्रोत्पन्नकेवलस्य **सिंहकेसरिणो** मुनेः । केवल[14]महिमानं ते प्रारब्धं ददृशुः सुरैः ॥६४२॥
द्वादशावर्तपूर्वं ते वन्दित्वा तं महामुनिम् । तत्पादमूले न्यषदन् द्रुममूल इवाऽध्वगाः ॥६४३॥
आगाद् **यशोभद्रसूरि**स्तदा तस्य मुनेर्गुरुः । तं च केवलिनं ज्ञात्वा वन्दित्वा न्यषदत् पुरः ॥६४४॥
¶**सिंहकेसर्य**पि स्वामी करुणारससागरः । मर्माविधमधर्मस्य विदधे धर्मदेशनाम् ॥६४५॥
मानुष्यं दुर्लभं हन्त प्राणिनां भ्रमतां भवे । तल्लब्ध्वा सफलं कार्यं स्वयमुप्त इव द्रुमः ॥६४६॥
मानुष्यकस्य च फलमाददीध्वं सुमेधसः । मुक्तिप्रदं जीवदयाप्रधानं धर्ममार्हतम् ॥६४७॥
श्रोतृश्रोत्रसुधासारं धर्ममाख्याय पावनम् । स महर्षिः कुलपतिं प्रोचे तत्संशयच्छिदे ॥६४८॥
**दवदन्त्या** तवाऽऽख्यातो धर्मो यः स तथैव हि । अर्हद्धर्माध्वपथिकी भाषते नेयमन्यथा ॥६४९॥
महासतीयमाजन्माऽऽर्हती वो दृष्टप्रत्यया । तदा[15] हि वर्षन् जीमूतो रेखाकुण्डे धृतोऽनया ॥६५०॥
सतीत्वेनाऽऽर्हतीत्वेन चाऽमुष्या देवता अपि । सदा सान्निध्यकारिण्योऽरण्येऽप्यस्यास्ततः शिवम् ॥६५१॥
[16]सार्थोऽस्य सार्थवाहस्य चौरेभ्यो रक्षितः पुरा । अस्या हुङ्कारमात्रेण प्रभावोऽतः परं हि कः ? ॥६५२॥
¶तदा च कश्चिदप्यागात् तत्र देवो महर्द्धिकः । स वन्दित्वा केवलिनमूचे **भैमी**मभीमवाक् ॥६५३॥
भद्रे ! तपोवनेऽमुष्मिन् शिष्यः कुलपतेरहम् । अभूवं **कर्परो** नाम तपस्तेजोदुरासदः ॥६५४॥
पञ्चाग्निसाधकमपि ते तपोवनतापसाः । न मामपूजयन्नाऽपि वचसाऽप्यभ्यनन्दयन् ॥६५५॥
[17]ततोऽहमभिमानेन तद्विहाय तपोवनम् । द्रुतमन्यत्र गतवानाविष्टः क्रोधरक्षसा ॥६५६॥
नीरन्ध्रतिमिरायां च यामिन्यां त्वरितं व्रजन् । पतितोऽद्रिकन्दरायामहं वा[18]र्यामिव द्विपः ॥६५७॥
सर्वे दन्ता गिरिदन्तास्फ[19]लितास्यस्य मे तदा । जीर्णशुक्तिपुटानीव व्यशीर्यन्त सहस्रधा ॥६५८॥
सप्तरात्रं तथैवाऽस्थां दन्तपातव्यथातुरः । दुःस्वप्नस्येव मे वार्तामपि चक्रुर्न तापसाः ॥६५९॥
ततः स्थानान्मयि गते गृहादिव महोरगे । प्रत्युताऽभूत् सुखं तेषां तापसानां महत्तरम् ॥६६०॥

१.**भैम्यप्याख्यत् सार्थवाह** ! मु०र० । २. **हेयोपादेयविद्रूप०** मु० । **हेयोपादेयविद्धूता** खं० २ । ३. **निजतापस०** खं० २ । ४. **०पानाय** ला० । ५. **काञ्जिका** खं० २, मु० । **काञ्जिकम्** खं० १ । ६. **तत्रैवाऽवासयत्** मु० । ७. **पुरं तत्र स्वयमपि** खं० १-२, सू० 'र'स्वीकृतपाठश्च । **पुरं तच्च स्वयमपि** ला० । ८. **०वाहोऽपि** र० । ९. **च** ला० । १०. अग्निकणः । ११. पक्षिणः । १२. विस्मयेनोर्ध्वं पश्यन्तः । १३. **०रन्तरात्मानं** खं० १-२, ला०सू० विना; र० । १४. **केवलि०** मु० । **केवलिबहुमानं** ला० । १५. **तथा** ला० । १६. **सार्थस्य** खं० १-२ । १७. **ततोऽहमति०** ता०सं० । १८. वारी-गजबन्धनी । १९. **०दन्तास्फालि०** खं० १-२, ला० विना च; र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तापसानां ततस्तेषामुपर्याविरभून्मम । प्रदीपनकवह्न्याभः क्रोधो दुःखानुबन्धकः ॥६६१॥
जाज्वल्यमानः क्रोधेन दुर्मनाः प्राप्य पञ्चताम् । इहैव तापसारण्ये महाविषधरोऽभवम् ॥६६२॥
दशनायाऽन्यदाऽहं तेऽधाविषं स्फारयन् फणान् । नमस्कारश्च पठितस्त्वया मद्गतिरोधकः ॥६६३॥
नमस्काराक्षरैः सद्यः पतितैः कर्णगोचरम् । धृतः सन्दंशकेनेव नाऽभिगन्तुमशक्नुवम् ॥६६४॥
पुनश्च द[1]र्यामेकस्यां प्राविशं हतशक्तिकः । भेकादीनाहरन् जीवानजीवं तत्र च स्थितः ॥६६५॥
अन्यदा वर्षति घने तापसानां पुरस्त्वया । कथ्यमानमिमं धर्ममश्रौषं परमो[2]र्हति ! ॥६६६॥
यो जीवहिंसां कुरुते स संसारे निरन्तरम् । भ्रमन् दुःखान्यवाप्नोति मरुभूमाविवाऽध्वै[3]गः ॥६६७॥
तच्छ्रुत्वाऽचिन्तयं चाऽहं जीवहिंसापरः सदा । पापात्मा पन्नगोऽस्म्येष का गतिर्मे भविष्यति ? ॥६६८॥
मयैवमूहापोहाभ्यां ज्ञातं यत् तापसा इमे । क्व नामैते मया दृष्टा इति भूयोऽप्यचिन्तयम् ॥६६९॥
तदा च जातिस्मरणमुत्पेदे मम निर्मलम् । अस्मार्षं ह्यः कृतं कार्यमिव पूर्वभवं ततः ॥६७०॥
उत्क[4]ल्लोलशिरानीरमिव वैराग्यमक्षयम् । ममोदपद्यताऽकार्षमथाऽनशनमात्मना ॥६७१॥
ततो विपद्य **सौधर्मे** कल्पेऽभूवमहं सुरः । तपःक्लेशसहानां हि न मोक्षोऽपि दवीयसि ॥६७२॥
सोऽहं विमाने **कुसुमसमृद्धे कुसुमप्रभः** । नाम्ना देवोऽस्मि भुञ्जानः स्वःसुखं त्वत्प्रसादतः ॥६७३॥
यदि ते धर्मवचनं न स्यान्मे कर्णगोचरम् । तदा क्वैषा गतिर्मे स्यात् पापपङ्कमहाकिरेः[5] ? ॥६७४॥
विज्ञाय चाऽवधिज्ञानाद् भद्रे ! त्वामुपकारिणीम् । द्रष्टुमत्राऽऽगमं धर्मपुत्रस्तेऽहमतः परम् ॥६७५॥
**वैदर्भ्यां** ज्ञापयित्वा स्वं स[6] गीर्वाणोऽथ तापसान् । उवाच श्लक्ष्ण[7]या वाचा बन्धून् ग्रामागतानिव ॥६७६॥
भोस्तापसाः ! पूर्वभवे तत्कोपाचरणं मम । क्षमध्वं पालयत च प्रपन्नं[8] श्रावकव्रतम् ॥६७७॥
इत्युक्त्वा तमहेः कायमाकृष्य गिरिकन्दरात् । उल्लम्ब्य **नन्दिवृक्षे** च प्रोवाच **कुसुमप्रभः** ॥६७८॥
यः कोऽपि कोपं कुरुते लोकाः! कोपफलेन हि । स ईदृशो भवेत् सर्पः **कर्परो**[9]ऽहं यथा पुरा ॥६७९॥
अग्रेऽपि सम्यक्त्वधरस्तदा कुलपतिः स तु । भाग्योदयेन वैराग्यं परमं प्रत्यपद्यत ॥६८०॥[10]
अथ केवलिनं [11]नत्वा तापसानामधीश्वरः । व्रतं ययाचे वैराग्यशाखिनः फलमुत्तमम् ॥६८१॥
केवल्यूचे **यशोभद्रसूरि**रेष तव व्रतम् । दास्यत्यसावेव गुरुर्ममाऽप्यममताधनः ॥६८२॥
पुनर्विस्मयमापन्नोऽपृच्छत् कुलपतिर्मुनिम् । गृहीतवानसि कथं प्रव्रज्यां ? भगवन् ! वद ॥६८३॥
केवल्याख्यत् **कोशलायां** नगर्यां **नल**भूपतेः । अनुजः कुरुते राज्यं **कूबरो** वरवैभवः ॥६८४॥
सूनुस्तस्याऽस्म्यहं **सङ्गनगरीशो** ममाऽऽदि[12]ते । नृपतिः **के[13]शरी बन्धुमती** नाम निजात्मजाम् ॥६८५॥
पित्राऽऽदिष्टस्तत्र गत्वा पर्यणैषं च तामहम् । नवोढां च समादायाऽचालिषं स्वपुरं प्रति ॥६८६॥
मार्गे चाऽऽगच्छताऽनेकशिष्यो गुरुरयं मया । अदर्शि समवसृतः कल्याणमिव मूर्तिमत् ॥६८७॥
तत्र भक्त्या परमया वन्दितोऽयं मुनिर्मया । कर्णामृतप्रपाधर्मदेशना चाऽस्य शु[14]श्रुवे ॥६८८॥
देशनान्ते मया पृष्टः कियदायुर्ममेत्यसौ । दत्तोपयोगश्चाऽवोचत् पञ्चैव दिवसा इति ॥६८९॥
आसन्नं मरणं ज्ञात्वा ततोऽभैषमकम्पिषि । महाभयं प्राणभयं सर्वेषामपि देहिनाम् ॥६९०॥
सूरि[15]र्मां स्माऽऽह मा भैषीर्वत्साऽऽदत्स्वाऽनगारताम् । अप्येकाहपरिव्रज्याऽवश्यं स्वर्गापवर्गदा ॥६९१॥
ततः प्रव्रजितोऽमुष्मादस्याऽऽदेशादिहाऽऽगमम् । शुक्लध्याने स्थितो घातिक्षयात् केवलमासदम् ॥६९२॥
इत्युक्त्वा रचयन् योगनिरोधं **सिंहकेसरी** । भवोपग्राहिकर्माणि हत्वाऽगात् परमं पदम् ॥६९३॥
पुण्यक्षेत्रे सुरैर्नीत्वा तस्य केवलिनो वपुः । तत्कालमग्निसंस्कारपात्रीचक्रे शुभाशयैः ॥६९४॥

१. दरे । २. **परमार्हतः** ता०सं० । ३. **०वाध्वगाः** खं० २, सू० विना । ४. **उत्कल्लोलम्मिरा०** मु० । ५. 'सूकरस्य' खं० २, ला०टि० । ६. **गीर्वाणः सर्वतापसान्** ला० । ७. कोमलया । ८. **प्रपन्नश्रावक०** खं० २ । ९. **कर्परोऽयं** ‐प० । १०. ला०प्रतौ ६८० श्लोकस्य स्थानेऽयं श्लोकोऽस्ति- "**महासत्याः प्रसादेनाऽस्माभिर्धर्मो जिनोदितः । अग्रेऽपि सम्यक्त्वयुतः पर.:: प्रत्यपद्यत** ॥" ११. **ज्ञात्वा** ला०पु० । १२. दत्तवान् । १३. **केसरी** खं० १, ला०सू० । १४. **विश्रुता** खं० २, ला० ता०सं०की०छा० ला०२ । १५. **सूरिर्मा** खं० २, सू० ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

¶यथार्थनामा **विमलमतिः** कुलपति[1]स्तु सः । प्रव्रज्यां श्री**यशोभद्रसूरि**पादान्तिकेऽग्रहीत् ॥६९५॥
**दवदन्त्य**पि दा[2]न्तात्मा तं महर्षिमभाषत । ममाऽपि भगवन् ! देहि प्रव्रज्यां मुक्तिमातरम् ॥६९६॥
**यशोभद्रो**ऽवदत् सूरिरद्यापि **दवदन्ति** ! ते । **नलेन** सह भोक्तव्या भोगा नाऽर्हसि तद् व्रतम् ॥६९७॥
¶विभातायां विभावर्यां मुनिरुत्तीर्य **पर्वतात्** । पादैः पवित्रयामास तत् **तापसपुरं** पुरम् ॥६९८॥
तत्र चैत्यं **प्रतिष्ठा**[3]**य** सोऽर्हद्धर्मोपदेशकः । सम्यक्त्वारोपणं चक्रे पौराणां करुणानिधि ॥६९९॥
¶मलीमसाङ्गवसना धर्मध्यानपरायणा । सप्ताब्दीं तत्र **भैम्यस्थाद्** भिक्षुणीव गुहागृहे ॥७००॥
पान्थ एकोऽन्यदा तस्याः कथयामास यन्मया । दृष्टोऽमुकप्रदेशेऽद्य **दवदन्ति** ! पतिस्तव ॥७०१॥
**दवदन्त्य**पि तत्कालं पीततद्वचनामृता । रोमाञ्चोच्छ्वसदङ्गाऽभूदिदं प्रेम्णो हि लक्षणम् ॥७०२॥
कोऽयमा[4]प्याययति मामिति **भीमसुता** सती । अधावताऽनु तच्छब्दं शब्दवेधीव मार्ग[5]णैः ॥७०३॥
**भीमजाया** गुहामध्याकर्षणप्रतिभूरिव । तां गुहाया स आकृष्य क्वचनाऽपि तिरोदधे ॥७०४॥
सा ददर्श न तं पान्थमत्यजत् तां गुहामपि । इत्यभूदुभयभ्रष्टा दैवं दुर्बलघाति हि ॥७०५॥
पतिता सा महारण्ये ययौ तस्थावुपाविशत् । [6]व्यलुठद् व्यलपद् भूयो भूयो[7]ऽश्रान्तं रुरोद च ॥७०६॥
किं करोमि ? क्व यामीति विमृशन्ती विमर्शवित् । तामेव गन्तुमारेभे कन्दरामादरेण सा ॥७०७॥
सा राक्षस्यैकया दृष्टा छागी वृक्येव वर्त्मनि । प्रसारितास्यगुहया खादिष्यामीति[9] चोच्यत ॥७०८॥
**भैम्यूचे** यदि मे भर्ता **नलो** मनसि नाऽपरः । तत्सतीत्वप्रभावेण हताशा भव राक्षसि ! ॥७०९॥
सर्वज्ञो भगवानष्टादशदोषविवर्जितः । यद्यर्हन्नेव देवो मे हताशा भव राक्षसि ! ॥७१०॥
अष्टादशब्रह्मरता विरताः करुणापराः । साधवो गुरवश्चेन्मे हताशा भव राक्षसि ! ॥७११॥
आजन्माऽपि मम स्वान्ते विलग्नो वज्रलेपवत् । अस्ति यद्यार्हतो धर्मो हताशा भव राक्षसि ! ॥७१२॥★
तच्छ्रुत्वा राक्ष[8]सवधूरमुचत् तच्चिखादिषाम् । [10]महर्षय इवाऽमोघवचना हि पतिव्रताः ॥७१३॥
न सामान्येयमन्यूनप्रभावेति प्रणम्य ताम् । क्षणादपि तिरोधत्त स्वप्नायातेव राक्षसी ॥७१४॥
¶यान्ती चाऽग्रे जलाकारतरङ्गीभूतवालुकाम् । ददर्शाऽद्रिनदीमेकां निर्जलां **नल**वल्लभा ॥७१५॥
शून्योपवनकुल्यायामिव तस्यामनम्भसि । [11]उदन्यन्ती **दवदन्ती** शुष्यत्तालु-रदोऽवदत् ॥७१६॥
यदि मे मानसं सम्यग्दर्शनेनाऽधिवासितम् । तदत्रोद्वीचि [12]वार्यस्तु **गङ्गाया**मिव निर्मलम् ॥७१७॥
इत्युक्त्वा [13]पार्ष्णिघातेन भूतलं प्रजहार सा । सद्यो नद्यम्बुयुक्ताऽभूदिन्द्रजालनदीव सा ॥७१८॥
क्षीरोदधि[14]शिरोद्धूतमिव स्वादु यथारुचि । करेणुकेव तद् **भैमी** पपौ क्षीरोज्ज्वलं जलम् ॥७१९॥
ततोऽपि यान्ती **वैदर्भी** परिश्रममुपेयुषी । उपाविशद् वटस्याऽधो [15]वटवासिवधूरिव ॥७२०॥
तां तथास्थामथाऽद्राक्षुः पान्थाः सार्थादुपागताः । ऊचुश्च काऽसि **भद्रे** ! त्वं देवीव प्रतिभासि नः ॥७२१॥
सोचे मर्त्याऽस्म्यहं सार्थभ्रष्टाऽरण्ये वसामि च । यियासु**स्तापसपुरं** नियुङ्ग्ध्वं मां तदध्वनि ॥७२२॥
तेऽवोचन् याति यत्राऽस्तं रविस्तां दिशमाश्रयेः । तवाऽध्वानं दर्शयितुं नेश्महे वयमुत्सुकाः ॥७२३॥
वारि[16] चाऽऽदाय यास्यामः सार्थे स्वस्मिन्नितोऽस्ति सः । तत्रैषि चेन्नयामस्त्वां वसति क्वाऽपि पत्तने ॥७२४॥
[17]तं सार्थं तैः सहाऽऽगाच्च तत्र तां करुणापरः । **धनदेवः** सार्थवाहोऽपृच्छत् का त्वं ? किमत्र च ? ॥७२५॥
**[18]भैम्यूचे**ऽहं वणिक्पुत्री समं भर्त्रा पितुर्गृहे । चलिता निशि सुप्ताऽपि तेन त्यक्ताऽस्मि वर्त्मनि ॥७२६॥
त्वदीयैः पुरुषैरत्राऽऽनीताऽहं सोदरैरिव । तन्मां नय महाभाग ! स्थाने वसति कुत्रचित् ॥७२७॥

---

१. **०पतिः स तु** खं० २ । २. **दन्तात्मानं म०** खं० १-२, ला०सू० । ३. **नमस्कृत्य** मु० । ४. वर्धापयति । ५. बाणः । ६. **अलुटद्** ला० । ७. **भूयः श्रान्तं** मु० र० । ८. **०वधूरमुञ्चत्** खं० १-२, ला० सू० विना । ९. खादितुमिच्छाम् । १०. **महर्द्धय०** मु० । ११. उदकमिच्छन्ती । १२. **नद्यां मे स्तात् कान्तिनिर्मलं जलम्** खं० १ । १३. **पार्ष्णिभागेन** ता.सं. । १४. **०सिरोद्धूत०** खं० १, मु० र० । १५. यक्षवधूरिव । १६. **नीरमादाय** पा० । १७. **तत्** खं० १, सू० । १८. **भैम्यूचेऽस्मि** मु० ।
★ ७१२ इत्ययं श्लोकः खं० २ प्रतौ न ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

¶सार्थेशोऽवददचलपुरे यास्याम्यहं पुरे । त्वमप्यागच्छ हे वत्से ! त्वां हि नेष्यामि पुष्पवत् ॥७२८॥
इत्युक्त्वा सार्थवाहस्तां स्नेहलः स्वां सुतामिव । अधिरोप्योत्तमे याने गन्तुं प्रास्थित सत्वरः ॥७२९॥
अथैकस्मिन्नद्रिकुञ्जे वारिझात्कारनिर्झरे । सार्थमावासयामास सार्थनाथशिरोमणिः ॥७३०॥
**वैदर्भी** सुस्थिता तत्र सुखसुप्ताऽशृणोन्निशि । नमस्कारं पठ्यमानं केनचित् सार्थवर्तिना ॥७३१॥
उवाच सार्थवाहं सा नमस्कारं पठन्नसौ । साधर्मिको मे तदमुं दिदृक्षेऽहं त्वदाज्ञया ॥७३२॥
तस्याः पूरयितुं वाञ्छां सार्थवाहः पितेव सः । तामादाय नमस्कारश्रावकस्याऽऽश्रयं ययौ ॥७३३॥
तं श्रावकं बन्धुमिव कुर्वाणं चैत्य[1]वन्दनाम् । ददर्शाऽथ पटौकःस्थं **भैमी** [2]शममिवाऽङ्गिनम् ॥७३४॥
आचैत्यवन्दनं **भैमी** तत्राऽस्थाच्च निषेदुषी । तं महाश्रावकमनुमोदमानाऽश्रुपूर्णदृक् ॥७३५॥
ददर्श वन्द्यमानं च पटालिखितमार्हतम् । जीमूतश्यामलं बिम्बं ववन्दे च **नल**प्रिया ॥७३६॥
चैत्यवन्दनपर्यन्ते कृतस्वागतमङ्गलम् । **भैमी** पप्रच्छ तं भ्रातः ! कस्येदं बिम्बमर्हतः ? ॥७३७॥
¶श्रावकः कथयामास धर्मशीले ! स्वसः ! शृणु । **मल्लेरेकोनविंशस्याऽर्हतो बिम्बं** भविष्यतः ॥७३८॥
भविष्यतोऽर्हतो बिम्बं कारणात् पूजयाम्यहम् । तच्चाऽद्य शृणु कल्याणि ! मम कल्याणकारणम् ॥७३९॥
[3]अब्धिकाञ्चीशिरोरत्ने **काञ्चीपुर्या**महं वणिक् । तत्राऽन्यदा **धर्मगुप्तो** ज्ञानवान् मुनिराययौ ॥७४०॥
स मुनिः समवासार्षीदुद्याने **रतिवल्लभे** । तं वन्दित्वा पर्यपृच्छं क्व तीर्थे [4]निर्वृतिर्मम ? ॥७४१॥
स आख्यन् **मल्लिनाथ**स्याऽर्हतस्तीर्थे दिवश्च्युतः । **प्रसन्नचन्द्रो** राजा त्वं **मिथिलायां** भविष्य[5]सि ॥७४२॥
**मल्ले**रेकोनविंशस्याऽर्हतः सम्प्राप्य दर्शनम् । उत्पन्नकेवलज्ञानो निर्वाणं त्वमवाप्स्यसि ॥७४३॥
तदादि **मल्लिनाथे**ऽहमुत्पन्नात्यन्तभक्तिकः । पटे तद्बिम्बमालेख्य धर्मज्ञे ! पूजयाम्य[6]दः ॥७४४॥
आख्यायेति स्ववृत्तान्तं पप्रच्छ श्रावकोऽप्यदः । धर्मबन्धोर्ममाऽऽख्याहि काऽसि त्वं पुण्यदर्शने !? ॥७४५॥
तस्मै श्रावकवर्याय **धनदे**[7]**वाय** तादृशम् । सर्वं पतिवियोगादि वृत्तमाख्यदुदस्र[8]दृक् ॥७४६॥
श्रावकोऽपि करन्यस्तहनुर्बाष्पायितेक्षणः । [9]असंमात्रेव **वैदर्भ्यां** दुःखेनाऽधिष्ठितोऽवदत् ॥७४७॥
मा शोचीरीदृशं कर्मोदितं ते दुःखकारणम् । पिता ते सार्थवाहोऽयं भ्राताऽहं सुखमास्स्व तत् ॥७४८॥
¶प्रभाते सार्थवाहोऽपि प्राप्याऽ**चलपुरं** पुरम् । मुमोच तत्र **वैदर्भी**मन्यतोऽगात् स्वयं पुनः ॥७४९॥
तृषिता नगरद्वारवाप्यामाशु विवेश सा । लक्षिता जलहर्त्रीभिर्मूर्त्तेव जलदेवता ॥७५०॥
वामोंऽह्रिर्गोधया तस्या जग्रसे जलसीमनि । आयाति दुःखिनां दुःखे दुःखं तत्सौहृदादिव ॥७५१॥
साऽपाठीत्त्रिर्नमस्कारं तत्प्रभावेण गोधया । मुक्तोंऽह्रिरि[10]न्द्रजालिक्या गलान्तर्धृतवस्त्विव ॥७५२॥
मुखां-ऽह्रि-हस्तं प्रक्षाल्य पीत्वा तद्वारि हारि च । मन्दं मन्दं मरालीव सा वाप्या निर्ययौ बहिः ॥७५३॥
सा विषण्णा निषण्णा च शीलरत्नकरण्डिका । [11]वरण्डिका तटे वाप्याः पावयन्ती दृशा पुरम् ॥७५४॥
¶**ऋतुपर्ण**नृपस्तत्राऽभूत् सुप[12]र्ण इवौजसा । चन्द्रोज्ज्वलयशा**श्चन्द्रयशा**स्तस्य च गेहिनी ॥७५५॥
तत्र **चन्द्रयशो**दास्यो वार्यानेतुं समाययुः । मस्तकन्यस्तकलशा मिथो नर्मपरायणाः ॥७५६॥
दास्यस्ता दुर्दशां प्राप्तामपि साममरीमिव । ददृशुः पङ्कमग्नाऽपि पद्मिन्येव हि पद्मिनी ॥७५७॥
**भैम्या** रूपं प्रपश्यन्त्यस्ताश्च वाप्यां सविस्मयाः । मन्दं मन्दं प्रविविशुर्मन्दं मन्दं च निर्ययुः ॥७५८॥
गत्वा च कथयामासुस्तां तथारूपशालिनीम् । स्वामिन्यै **चन्द्रयशसे** सम्प्राप्तमिव शेवधि[13]म् ॥७५९॥
ताश्च **चन्द्रयशाः** प्रोचे समानयत तामिह । मत्पुत्र्या**श्चन्द्रवत्याः** सा भगिनीव भविष्यति ॥७६०॥
वापीपरिसरे तस्मिन्नेव ता द्रुतमाययुः । नगराभिमुखां लक्ष्मीमिवाऽथ ददृशुश्च ताम् ॥७६१॥

---

१. **०वन्दनम्** ता०सं०ला० । २. **धर्ममिवा०** ला० । ३. **अस्ति का०** खं० २ । ४. निर्वाणम् । ५. **भविष्यति** खं० २ विना, र० । ६. **०याम्यहम्** मु० र० । ७. **धनदेवस्तयोदितम्** ला० विना । ८. **०दुदश्रुदक्** खं० २, ता०सं०ला० आ०ला०२, छा० विना । ९. **असंमातेव** खं० १, ला०सू० । **असंमात्रेण** र० । १०. **०रैन्द्रजालिक्या** खं० १-२ । ११. **तटे वाप्याः पावयन्ती दृशाऽचलपुरं पुरम्** खं० २ । वरण्डिका-भीता-इति मु० प्रतौ टि. । १२. गरुडः । १३. **सेवधिम्** खं० २ । निधिः ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

ऊचुश्च नगरेऽमुष्मिन्नृतुपर्णस्य भूपतेः । राज्ञी **चन्द्रयशो**नाम्नी त्वामाह्वयति गौरवात् ॥७६२॥
आज्ञापयति च त्वं हि पुत्री **चन्द्रवतीव** मे । तदेहि भद्रे ! दुःखेभ्यः प्रकल्पय जलाञ्जलिम् ॥७६३॥
तिष्ठन्ती शून्यचित्तेह छलमाप्य दुरात्मभिः । व्यन्तरादिभिराविष्टा त्वमनर्थमवाप्स्यसि ॥७६४॥
एवं च **चन्द्रयशस**सो वचनेनाऽर्द्रमानसा । **दवदन्त्य**पि पुत्रीत्वस्ने[1]हक्रीती ततोऽचलत् ॥७६५॥
स्वामिन्या धर्मपुत्री त्वमपि स्वामिन्यसीति सा । ताभिर्विनयवक्त्रीभिरनीयत नृपौकसि ॥७६६॥
**चन्द्रयशाः पुष्पदन्त्या भैमी**मातुः सहोदरा । मम मातृष्वसैवेति विवेद न तु **भीमजा** ॥७६७॥
जामेयी **दवदन्ती** मेऽस्तीति **चन्द्रयशाः** पुनः । विवेद बाल्यदृष्टां तु तामुपालक्षयन्न हि ॥७६८॥
पुत्रीप्रेम्णा तु तां दूरादपि राज्ञी ददर्श सा । प्रमाणमन्तःकरणं खल्विष्टाऽनिष्टनिर्णये ॥७६९॥
सस्वजे **चन्द्रयशसा**ऽतिगाढं च **नल**प्रिया । [3]तदङ्गसादं श्रमजमपनेतुमिवाऽऽदरात् ॥७७०॥
वर्षन्त्यश्रूणि **वैदर्भी** राज्ञ्याः पादाववन्दत । तत्प्रीत्यै[4]वक्रयं पादक्षालनेनेव तन्वती ॥७७१॥
पृष्टा च **चन्द्रयशसा** काऽसि त्वमिति **भीमजा** । कथयामास तत्सर्वं सार्थवाहाय यत्पुरा ॥७७२॥
**वैदर्भी**मभ्यधा**च्चन्द्रयशाः** कल्याणि ! मद्गृहे । यद्व**च्चन्द्रवती** तद्वत् त्वमप्येधस्व शर्मभिः ॥७७३॥
¶देव्यन्यदा **चन्द्रयशाः** प्रोचे **चन्द्रवतीं** सुताम् । मज्जामेय्या **दवदन्त्या** सदृशीयं तव स्वसा ॥७७४॥
तस्याः सम्भाव्यते नैवंविधमागमनं क्वचित् । अस्माकमपि यः स्वामी **नलः** पत्नी हि तस्य सा ॥७७५॥
सचतुश्चत्वारिंशति योजनानां शते च सा । कथमागमनं तस्या दुर्दशा चेदृशी कुतः ? ॥७७६॥
सा च **चन्द्रयशा** देवी प्रत्यहं नगराद् बहिः । दीनाऽनाथादिपात्रेभ्यो ददौ दानं यथारुचि ॥७७७॥
¶तामन्यदौ[5]चे **वैदर्भी** दानमत्र ददाम्यहम् । आगच्छेन्मे यदि पुनः पतिर्याचकवेषभाक् ॥७७८॥
[6]आयुक्ता **चन्द्रयशसा दवदन्ती** तदाद्यपि । पत्याशया क्लेशसहा ददौ दानं यथास्थिति ॥७७९॥
दानार्थिनश्च प्रत्येकं **भैम्य**पृच्छद् दिने दिने । ईदृग्रूपः पुमान् कोऽपि किं युष्माभिरदृश्यत ? ॥७८०॥
दानशालास्थिताऽन्येद्युश्चौरमेकं ददर्श सा । बद्ध्वाऽऽरक्षैर्नीयमानं वाद्यमानो[7]ग्रडिण्डिमम् ॥७८१॥
अपृच्छद् **भीम**तनयाऽप्यारक्षानमुना हि किम् । अपराद्धं वधप्राप्तिप्रक्रियाऽस्य यदीदृशी ॥७८२॥
एष **चन्द्रवती**देव्या जह्रे रत्नकरण्डिकाम् । वध्योऽसौ कर्मणाऽनेनेत्याख्यन्नारक्षपूरुषाः ॥७८३॥
चौरोऽपि नत्वा **वैदर्भी**मूचे दृष्टोऽस्मि ते दृशा । कथं प्राप्स्यामि मरणं ? शरणं भव देवि ! मे ॥७८४॥
आरक्षानागमय्योचे तं चौरं **दवदन्त्य**पि । मा भैषीर्जीवितव्येन कुशलं ते न संशयः ॥७८५॥
इत्युक्त्वा **भीम**तनया सतीत्वश्रा[8]र्वणां व्यधात् । सत्यस्मि चेद् विशीर्यन्तां बन्धनान्यभितोऽस्य तु ॥७८६॥
सतीत्वश्रावणामेवं कृत्वा भृङ्गारवारिणा । त्रिस्तमाच्छोटयच्चौरं द्राक् तद्बन्धाश्च तुत्रुटुः ॥७८७॥
¶अथोत्थिते कलकले किमेतदिति चिन्तयन् । **ऋतुपर्ण**नृपस्तत्राऽऽजगाम सपरिच्छदः ॥७८८॥
स विस्म[9]यस्मेरनेत्रो नेत्रकैरवकौमुदीम् । **दवदन्तीं** दन्तकान्तिधौताधरदलोऽवदत् ॥७८९॥
सर्वत्र राजधर्मोऽयं [10]मात्स्यन्यायनिषेधकः । यद् दुष्टनिग्रहः शिष्टपालनं च यशस्विनि ! ॥७९०॥
राजा गृह्णन् करं पृथ्व्या रक्षेच्चौराद्युपद्रवम् । चौरादीनां हि पापेन लिप्येत स्वयमन्यथा ॥७९१॥
तत् पुत्रि ! न निगृह्णामि यद्यमुं रत्नतस्करम् । तत्परस्वापहाराय प्रयतेताऽभयो जनः ॥७९२॥
**भैम्यू**चे मयि पश्यन्त्यां यदि मार्येत देहभृत् । श्राविकायाः कृपालुत्वं तदा मे तात ! कीदृशम् ॥७९३॥
क्षम्यतामपराधोऽस्य शरणाश्रित एष मे । दुष्टरोग इवास्याऽऽर्त्तिः सङ्क्रान्ता तात ! मय्यपि ॥७९४॥
**ऋतुपर्ण**नरेन्द्रोऽथ तं मुमोच मलिम्लुचम् । महासत्या धर्मपुत्र्या[11]स्तस्या अत्युपरोधतः ॥७९५॥
मुक्तमात्रः स चौरोऽपि त्वं मे मातेति **भीमजाम्** । प्रतिपेदे तिलकयन् भालं भूतलरेणुना ॥७९६॥

---

१. **स्नेहक्रीता** मु० र० । २. **०निष्टदर्शने** सू० । ३. तस्या अङ्गखेदम् । ४. तत्प्रीतिमूल्यम् । ५. **तामन्यदा च** मु० र० । ६. **प्रयुक्ता** लां० । ७. **०मानाग्र०** मु० र० । ८. **०श्रावणं** खं० २, लां० । ९. **सविस्मयो स्मेरनेत्रो** मु० र० । १०. मत्स्यगलागलन्यायः । ११. **एतस्या उप०** मु० । **०स्तस्या अप्युप०** र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्राणदानो[1]पकारं तं दिवानिशमविस्मरन् । मुक्तः स तस्करो **भैमीं** नमश्चक्रे दिने दिने ॥७९७॥
¶तमन्यदा चौरवरं पप्रच्छ **नलवल्लभा** । कोऽसि त्वं ? कुत आयासीरपशङ्कं निवेदय ॥७९८॥
स आख्यत् **तापसपुरे** पुरे परमसम्पदः । **वसन्त**सार्थवाहस्य दासोऽहं **पिङ्गला**ह्वयः ॥७९९॥
व्यसनैरभिभूतेन **वसन्त**स्यैव वेश्मनि । खनित्वा खात्रमग्राहि कोशसारं मया निशि ॥८००॥
नष्टोऽहं लोप्त्रपाणिश्च प्राणत्राणपरायणः । लुण्टाकैर्लुण्टितो मार्गे कियत् क्षेमं दुरात्मनाम् ? ॥८०१॥
अत्राऽऽगत्याथ राजान**मृतुपर्ण**मसेविषि । [2]सेवां मनस्वी कः कुर्यात् कुर्याद् वा तर्हि भूपतेः ? ॥८०२॥
ततः सञ्चरता राजहर्म्ये [3]चाऽधर्म्मबुद्धिना । मया **चन्द्रवती**देव्या दृष्टा रत्नकरण्डिका ॥८०३॥
तद्दर्शनान्मनोऽचालीन्मम तद्धरणेच्छया । परस्त्रीदर्शनात् पारदारिकस्येव दुर्धियः ॥८०४॥
[4]चिल्ली हारमिवाऽहार्षमथ रत्नकरण्डिकाम् । विधायाऽप्र[5]पदीनं चोत्तरीयं निरगां ततः ॥८०५॥
**ऋतुपर्ण**नरेन्द्रेण कैश्चिच्चौरेङ्गितैरहम् । लक्षितोऽस्म्यतिदक्षेण नाऽलक्ष्यं दक्षताजुषाम् ॥८०६॥
आरक्षैः पार्थिवादिष्टैर्बद्धोऽहं तत्क्षणादपि । वधार्थं नीयमानश्च त्वामद्राक्षं महासति ! ॥८०७॥
दूरादपि त्वां शरणं प्रपन्नस्तारमारटन् । मोचितोऽस्मि त्वया छाग इव वध्यत्वमागतः ॥८०८॥
¶अन्यच्च **तापसपुराद्** गतायां स्वामिनि ! त्वयि । **विन्ध्या**कृष्टो द्विप इव **वसन्तो** भोजनं जहौ ॥८०९॥
बोधितश्च **यशोभद्र**सूरिणाऽन्यजनेन च । उपोषितः सप्तरात्रं बुभुजे [6]सोऽष्टमेऽहनि ॥८१०॥
स **वसन्तो**ऽन्यदाऽऽदाय महामूल्यमुपायनम् । जगाम **कूबर**नृपं द्रष्टुं [7]श्रीदसमं श्रिया ॥८११॥
उपायनेन तुष्टश्च तस्मै **कूबर**पार्थिवः । प्रददौ **तापसपुर**राज्यं छत्रादिलाञ्छितम् ॥८१२॥
तं सामन्तपदे कृत्वा तस्याऽदादभिधान्तरम् । **वसन्तश्रीशेखर** इत्यवनीशो **नलानुजः** ॥८१३॥
**कूबरेण** विसृष्टश्च भम्भया वाद्यमानया । आगतस्**तापसपुरे वसन्तो** राज्यमन्वशात् ॥८१४॥
¶**भैम्यूचे** वत्स ! दुष्कर्म कृतं प्रव्रज्य निस्तर । प्रमाणं मातुरादेश इति चोवाच **पिङ्गलः** ॥८१५॥
तत्र चाऽऽगादनगारद्वितयं पर्यटत् तदा । प्रत्यलाभि च **वैदर्भ्या** दोषवर्जितभिक्षया ॥८१६॥
बभाषे तावृषी **भैमी** भगवन्तावयं पुमान् । यदि योग्यस्तदेतस्य व्रतदानात् [8]प्रसीदतम् ॥८१७॥
ताभ्यां योग्योऽयमित्युक्ते **पिङ्गलो**ऽयाचत व्रतम् । ततो देवगृहे नीत्वा सद्यः [9]प्रव्राजितश्च सः ॥८१८॥
¶[10]**विदर्भेशो**ऽन्यदाऽश्रौषीन्**नलो** यदनुजन्मना । द्यूते हारितराज्यश्रीः **कूबरेण** प्रवासितः ॥८१९॥
**दवदन्तीं** गृहीत्वा च स विवेश महाटवीम् । न ज्ञायते गतः क्वाऽपि किं जीवति मृतोऽथवा ? ॥८२०॥
**पुष्पदन्त्य**पि तद्राज्ञो मुखाच्छ्रुत्वाऽरुदद्भृशम् । नारीणामातुरत्वे हि न दूरे नयनोदकम् ॥८२१॥
ततश्च **हरिमित्रा**ख्यस्तदन्वेषणहेतवे । स्वाम्यादेशपटू राजबटू राज्ञा न्ययोज्यत ॥८२२॥
**नलं** च **दवदन्तीं** च बटुः सर्वत्र शोधयन् । स यया**वचलपुरे**ऽविक्षच्च नृपपर्षदि ॥८२३॥
पप्रच्छ तं **चन्द्रयशा** निषण्णं नृपतेः पुरः । कच्चित् क्षेमं **पुष्पदन्त्या**स्तदीयस्य जनस्य च ॥८२४॥
स आख्यत् कुशलं देव्याः पुष्पदन्त्याः सदोदितम् । **नलस्य दवदन्त्या**श्च कुशलं चिन्त्यमीश्वरि ! ॥८२५॥
उक्तश्च किं ब्रवीषीति देव्याः सोऽकथयद् बटुः । **नल-भैम्योः** कथां द्यूतादारभ्याऽत्यन्तदुःश्रवाम् ॥८२६॥
ततश्च **चन्द्रयश**सि रुदन्त्यां प्ररुरोद च । हर्षवार्तास्वनध्यायी राजलोकस्तदाऽखिलः ॥८२७॥
सर्वं दुःखातुरं प्रेक्ष्य क्षामकुक्षिर्बुभुक्षया । बटुर्ययौ दानशालां भोज्यचिन्तामणिर्हि सा ॥८२८॥
तत्राऽऽसीनो भोजनार्थं दानशालाधिकारिणीम् । **दवदन्तीं** स्वामिपुत्रीमुपलक्षयति स्म सः ॥८२९॥
स ववन्दे **दवदन्त्याः** पादौ रोमाञ्चमुद्वहन् । विस्मृतक्षुद्व्यथो हर्षादुत्फुल्लाक्षो जगाद च ॥८३०॥
देवि ! केयमवस्था ते निदाघ इव वीरुधः ? । दिष्ट्या दृष्टाऽसि जीवन्ती सर्वेभ्यः स्वस्ति सम्प्रति ॥८३१॥
इत्युत्थाय द्रुतं **चन्द्रयशो**देवीमवर्धयत् । तवाऽस्ति दानशालायां **दवदन्ती**ति स [11]ब्रुवन् ॥८३२॥

१. ०पकारां मु० । २. **सेवामतिश्वी** खं० १-२ । ३. **चाधर्म०** मु० र० । ४. शकुनिः-'चील' । ५. पादाग्रपर्यन्तम् । ६. **सोऽष्टमे दिने** मु०र० । ७. **श्रीदसमः** ता०सं०को०ला०छा० । ८. **प्रसीदताम्** र० । ९. **प्राव्राजित०** मु० र० । १०. **वैदर्भे०** खं० १, सू० । ११. **संलपन्** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तच्छ्रुत्वा दानशालायां गत्वा **चन्द्रयशा** द्रुतम् । **दवदन्ती**मालिलिङ्ग मरालीव मृणालिनीम् ॥८३३॥
ऊचे च वत्से ! धिग् धिग् मां यया नाऽस्युपलक्षिता । सामुद्रिकैरद्वितीयैर्लक्षणैर्व्यञ्जिताऽपि हि ॥८३४॥
किमात्मगोपनं कृत्वा वञ्चिताऽस्मि त्वयाऽनघे !? । [1]यद्येति दुर्दशा दैवात् का ह्रीर्मातृकुले निजे ? ॥८३५॥
हा वत्से ! किं त्वया मुक्तो **नलो** ? मुक्ताऽसि तेन वा ? । नूनं मुक्ताऽसि तेन त्वं त्वं सती तं न मुञ्चसि ॥८३६॥
त्वयाऽपि यदि हीयेत दुर्दशापतितः पतिः । उदयेत तदा नूनं पश्चिमायां दिवाकरः ॥८३७॥
**नलो**ऽत्याक्षीः कथमिमां ? मत्पार्श्वे नाऽमुचः कथम् ? । किं ते कुलोचितमिदं दयितां त्यजतः सतीम् ? ॥८३८॥
दुःखं गृह्णामि ते वत्से ! क्रि[2]यासमवतारणम् । आगः सहस्व मे यत् त्वं न मयाऽस्युपलक्षिता ॥८३९॥
तमोऽहिगरुडः कृष्णनिशायामपि [3]भाँसुरः । क्व वा स तिलको बाले ! तवाऽलिकसहोद्भवः ? ॥८४०॥
इति स्ववदनाम्भोजनिष्ठीवनरसेन सा । **भैम्या** अमार्जयद् भालं जिघ्रन्ती मूर्ध्नि तां मुहुः ॥८४१॥
रैपि[4]ँण्डोऽग्न्युत्तीर्ण इव मेघमुक्त इवाऽर्यमा । तत्कालं भालतिलको **वैदर्भ्या** दिद्युतेतराम् ॥८४२॥
ततश्चाऽस्नपयच्**चन्द्रयशा** देवी **नल**प्रियाम् । गन्धोदकैः स्वपाणिभ्यां देवताप्रतिमामिव ॥८४३॥
वाससी धवले सूक्ष्मे ज्योत्स्नारसमये इव । **भैमी चन्द्रयशो**देव्याऽर्पिते परिदधे ततः ॥८४४॥
देवी **चन्द्रयशाः** प्रीता पाणिनाऽऽदाय **भीमजाम्** । प्रमोदवारिसरसी निषसाद नृपान्तिके ॥८४५॥
¶तदा चाऽस्तं ययौ सूर्योऽपूर्यताऽशेषमम्बरम् । [5]सूचिभेद्येन तमसा कज्जलेनेव भाजनम् ॥८४६॥
विवेश नाऽन्धतमसं तदा सदसि भूपतेः । **भैमी**तिलकतेजोभिः स्खलितं काष्ठि[6]कैरिव ॥८४७॥
उवाच देवीं नृपतिर्नन्वियायाऽस्तमर्यमा । नेह दीपो न वा वह्निरह्नीवोद्योत एष किम् ? ॥८४८॥
जन्मतः सहसंसिद्धं **वैदर्भ्या**स्तिलकं च तम् । राज्ञी प्रादर्शयद् [7]राज्ञे ज्योतिर्जलमहाह्रदम् ॥८४९॥
[8]प्यधात्तत् तिलकं राजा कौतुकेन स्वपाणिना । अभूद् गिरिगुहाप्रायं तमसा मङ्क्षु [9]तत्सदः ॥८५०॥
अपसार्य पुनः पाणिं पप्रच्छाऽतुच्छसम्मदः । राजा पि[10]त्रीयितो **भैमीं** राज्यभ्रंशादिकां कथाम् ॥८५१॥
न्यग्मुखी कथयामास रुदती **दवदन्त्य**पि । **नल-कूबर**योर्द्यूतादारभ्य सकलां कथाम् ॥८५२॥
राजाऽपि स्वोत्तरीयेण **भैम्याः** सम्मार्ज्य चक्षुषी । उवाच पुत्रि ! मा रोदीर्न कश्चिद् बलवान् विधेः ॥८५३॥
¶अत्रान्तरे दिवो देवः कश्चिदुत्तीर्य पर्षदि । तत्राऽऽगाद् **भीम**तनयामूचे च रचिताञ्जलिः ॥८५४॥
**दवदन्ति** ! तवाऽऽदेशाच्चौरः **पिङ्गलको** ह्यहम् । [11]प्रव्रज्य **तापसपुरे** [12]कदाचिद् विहरन्नगाम् ॥८५५॥
तत्र स्मशानमध्येऽस्थामहं प्रतिमया स्थिरः । चितानलोत्थितो दूरं प्रासरच्च दवानलः ॥८५६॥
तेनाऽहं दह्यमानोऽपि धर्मध्यानादविच्युतः । स्वयमाराधनां कृत्वा नमस्कारपरायणः ॥८५७॥
[13]भूपृष्ठे पतितस्तत्र [14]समिधीभूतविग्रहः । विपद्य त्रिदशोऽभूवं नामधेयेन **पिङ्गलः** ॥८५८॥ युग्मम् ॥
ततोऽज्ञासिषमवधे रक्षितोऽस्मि त्वया वधात् । प्रव्रज्यां ग्राहितश्चाऽस्मि तत्प्रभावात् सुरोऽभवम् ॥८५९॥
मां महापापिनं भद्रे ! यद्युपैक्षिष्यथास्तदा । अप्राप्तधर्मो मृत्वाऽहमयास्यं नरके ततः ॥८६०॥
**वैदर्भि** ! त्वत्प्रसादेनाऽऽसदं द्युसदनश्रियम् । इति त्वां द्रष्टुमागच्छं विजयस्व महासति ! ॥८६१॥
इत्युक्त्वा च हिरण्यस्य सप्तकोटीः प्रवृष्य सः । सुरस्तिरोऽधादुत्पत्य विद्युत्पुञ्ज इवाऽम्बरे ॥८६२॥
इति साक्षात्कृ[15]तफलं द्युसदा धर्ममार्हतम् । **ऋतुपर्ण**नरेन्द्रोऽपि प्रपेदे विदुषां वरः ॥८६३॥
सम्प्राप्तावसरश्चोचे **हरिमित्र**स्तदा नृपम् । देवाऽऽदिश चिराद्यातु **दवदन्ती** पितुर्गृहे ॥८६४॥
¶ततश्च **चन्द्रयशसा**ऽप्युक्तो राजैवमस्त्विति । **विदर्भान्** प्रति **वैदर्भी**मादिशत् सेनया सह ॥८६५॥
आगच्छन्तीं **दवदन्तीं** श्रुत्वा **भीम**नृपोऽभ्यगात् । कृष्टो बलीयसा प्रेम्णा दुर्धरेणेव वाजिना ॥८६६॥

१. **यद्येवं** मु०र० । २. **क्रियाः सम०** मु० र० । **क्रियां सम०** ला० । 'क्रियासम्' कृधातोराशीःप्रथमपुरुषैकवचनप्रयोगः । ३. **भास्करः** ता०सं०मु० । ४. स्वर्णपिण्डः । ५. **सूच्यभेदेन** मु० । ६. **काष्ठकै०** मु० । वेत्रधारिभिः । ७. **राज्ञो** ता०सं० । ८. **प्यधात्तं** मु० र० । **पिधात्तत्** खं० २ । ९. राजसभा । १०. **पित्रीयते** खं० २ । **पित्रीयन्ति** खं० १ । **पित्रीयतो** सू० । पितेवाऽऽचरन् । ११. **तदा च** ला० । १२. **तदा हि वि०** मु०र० । १३. **भूमध्ये** ला० । १४. दग्धकाष्ठतुल्यदेहः । १५. **०फलः** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टमात्रेऽपि पितरि **वैदर्भी** पादचारिणी । स्मेरास्यपद्मा धावित्वाऽपतत् तत्पादपद्मयोः ॥८६७॥
पि[1]तुः पुत्र्याश्च सोत्कण्ठं चिरान्मिलितयोस्तयोः । पतद्भिर्नेत्रसलिलैर्भूरभूद् भूरिकर्दमा ॥८६८॥
ज्ञात्वा सह समायातां **पुष्पदन्ती** तदात्मजा । आलिङ्गति स्म सुदृढं **यमुना जाह्नवी**मिव ॥८६९॥
लगित्वा तद्गलेऽरोदीन्मुक्तकण्ठं **नल**प्रिया । इष्टे दृष्टे नवमिव दुःखं भवति देहिनाम् ॥८७०॥
प्रक्षाल्य च क्षणादूर्ध्वं मुखाम्भोजानि वारिणा । ते मिथो वार्तयामासुर्दुःखोद्गिरणपूर्वकम् ॥८७१॥
अङ्कमारोप्य **वैदर्भी पुष्पदन्ती** जगाद च । दृष्टाऽस्यायुष्मती दिष्ट्या भाग्यं जागर्ति नः खलु ॥८७२॥
सुखेनाऽस्मद्गृहे कालं गमयन्ती चिरादपि । पतिं द्रक्ष्यसि जीवन् हि प्राणी भद्राणि पश्यति ॥८७३॥
**हरिमित्राय** तुष्टोऽदाद् ग्रामपञ्चशतीं नृपः । ऊचे च दास्ये राज्यार्धमपि तुभ्यं **नलागमे** ॥८७४॥
पुरे गत्वा नृपश्चक्रे **दवदन्त्यागमोत्सवम्** । दिनानि सप्त देवार्चां गुर्वर्चां च विशेषतः ॥८७५॥
अष्टमेऽह्नि च **वैदर्भी विदर्भपति**[2]रब्रवीत् । तथा करिष्यते शीघ्रं **नलः** सङ्गंस्यते यथा ॥८७६॥
¶तदा च[3] हित्वा **वैदर्भी नलो**ऽरण्ये परिभ्रमन् । अपश्यदेकतो धूमं वनक[4]क्षात् समुत्थितम् ॥८७७॥
धूमस्तोमोऽञ्जनश्यामो व्यानशे स नभस्तलम् । अच्छिन्नपक्षः कोऽप्यद्रिः खे यातीति भ्रमप्रदः ॥८७८॥
धूमो निमेषमात्रेण ज्वालामालाकरालितः । भुवः प्रादुर्भवन् विद्युद्युतमेघविडम्ब्यभूत् ॥८७९॥
वंशानां दह्यमानानां त्रटत्त्रटिति निःस्वनम् । आक्रन्दं श्वापदानां च ततः शुश्राव **नैषधिः** ॥८८०॥
ततो [5]दवानले दीप्ते शब्दं शुश्राव मानुषम् । ऐक्ष्वा[6]क ! **नल** ! भूपाल ! रक्ष मां क्षत्रियोत्तम ! ॥८८१॥
निष्कारणोपकारी त्वं पुंव्रतेनाऽसि यद्यपि । तथाऽपि तुभ्यमुर्वीशोपकरिष्यामि रक्ष माम् ॥८८२॥
तं शब्दमभिगच्छंश्च लतागहनमध्यगम् । महोरगं **नलो**ऽद्राक्षीद् रक्ष रक्षेति भाषिणम् ॥८८३॥
पप्रच्छ च कथं वेत्सि मां मन्नाम मदन्वयम् ? । कथं वा मानुषी वाक् ते? ममाऽऽख्याहि महोरग ! ॥८८४॥
आख्यत् सर्पोऽहमभवं मनुष्यः पूर्वजन्मनि । तज्जन्माभ्यासतो भाषा मानुषी मे प्रवर्तते ॥८८५॥
ममाऽस्ति चावधिज्ञानमुज्ज्वलं तेन वेद्म्यहम् । त्वां च त्वन्नामधेयं च त्वद्वंशं च यशोनिधे ! ॥८८६॥
¶**नलो** जातानुकम्पोऽथ कम्पमानस्य भोगिनः । कर्षणायाऽक्षिपद् वल्लीवनोपरि निजां पटीम् ॥८८७॥
उत्तरीयाञ्चलं राज्ञो भूलग्नं प्राप्य पन्नगः । अवेष्टयत् [7]स्वभोगेन बालकेनोर्मिकामिव ॥८८८॥
पन्नगेन तदाक्रान्तमुत्तरीयं निजं **नलः** । उदपा[8]नाद् रज्जुमिव चकर्षोत्कर्षभा[9]क्नृपः ॥८८९॥
गत्वोखरप्रदेशे च वनवह्नेरगोचरे । मुमुक्षु मङ्क्षु भूपालं दन्दशूकोऽदशत् करे ॥८९०॥
स्वेदबिन्दुमिवाऽऽच्छोट्य तं नागमवनीतले । **नलः** प्रोवाच भोः ! साधु कृतज्ञेन कृतं त्वया ॥८९१॥
ममोपकारिणः साधूपकृतं पन्नग ! त्वया । यो हि पाययति क्षीरं त्वज्जात्या सोऽपि दश्यते ॥८९२॥
**नल**स्यैवं विवदतो विषेणाऽङ्गे प्रसर्पता । कुब्जतां वपुरापेदे धन्वेवाऽधिज्यतां गतम् ॥८९३॥
सोऽणुपिङ्गकचः प्रेत इव लम्बौष्ठ उष्ट्रवत् । सूक्ष्मपाद-करः स्थूलोदरो रङ्क इवाऽभवत् ॥८९४॥
सर्वाङ्गमपि बीभत्सविकृताकारधार्यभूत् । आशीविषविषग्रस्तो **नलो** नट इव क्षणात् ॥८९५॥
अचिन्तयच्च रूपेणाऽमुना मे जीवितं मुधा । गृह्णामि तत् परिव्रज्यां परलोकोपकारिणीम् ॥८९६॥
¶**नल**स्यैवं चिन्तयतः सोऽहिस्त्यक्त्वाऽहिरूपताम् । दिव्यालङ्कारवसनस्तेजोरूपः[10] सुरोऽभवत् ॥८९७॥
ऊचे च मा विषीदः स्म तवाऽहं **निषधः** पिता । तुभ्यं दत्त्वा तदा राज्यं परिव्रज्यामुपात्तवान् ॥८९८॥
परिव्रज्याफलेनाऽहं **ब्रह्मलोके** सुरोऽभवम् । अद्राक्षं चाऽवधिना त्वां प्रपेदानमिमां दशाम् ॥८९९॥
[11]मया मायोरगीभूय दुर्दशापतितस्य ते । गण्डोपरि पिटकवत् कृताऽङ्गेषु विरूपता ॥९००॥
अङ्गेषु वैरूप्यमपि मयोत्पादितमीदृशम् । उपकाराय मन्यस्व कटुभेषजपानवत् ॥९०१॥

---

१. **पितृपुत्र्योश्च** ता०सं० । २. **विदर्भापति०** खं० १-२, सू० । ३. **तदा हित्वा च** खं० २ । ४. वनविभागात् । ५. **दावा०** मु० र० । ६. **इक्ष्वाकुनल** मु० । ७. स्वशरीरेण । ८ कूपात् । ९. **०त्कर्षभाग् नृपः** मु० र० । उत्कर्षभाक् कृपा यस्य सः । १०. **०रूपधरो०** खं० १ । ११. **मायामहोरगीभूय** ता०सं० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वया दासीकृताः सर्वे राजानस्ते तव द्विषः । वैरूप्याऽनुपलक्ष्यं त्वां नोपद्रोष्यन्ति सम्प्रति ॥९०२॥
इदानीमपि मा कार्षीः परिव्रज्यामनोरथम् । भोक्तव्या भूस्तवाऽद्याऽपि तावत्येव चिरं **नल** ! ॥९०३॥
कथयिष्यामि समयं परिव्रज्योचितं च ते । स्वा[1]हा मौहूर्तिक इव सुस्थितोऽतः परं भव ॥९०४॥
पुत्रेदं श्रीफलफलमिमं रत्नकरण्डकम् । गृहाण यत्नाद् रक्षेश्च क्षत्रव्रतमिवाऽऽत्मनः ॥९०५॥
स्वरूपार्थी यदा त्वं स्याः श्रीफलं स्फोटयेस्तदा । देवदूष्याण्यदूष्याणि द्रक्ष्यसि त्वं तदन्तरे ॥९०६॥
तदैवोद्घाटये रत्नकरण्डमपि तत्र तु । हारादीन्यतिहारीणि द्रक्ष्यस्याभरणानि च ॥९०७॥
सद्यः परिहितैर्देवदूष्यैराभरणैश्च तैः । तदैव देवताकारं निजं रूपमवाप्स्यति(सि) ॥९०८॥
¶**नलः** पप्रच्छ तं तात ! **दवदन्ती** स्नुषा तव । किं यत्र मुक्ता तत्राऽस्ति गता वा क्वचिदन्यतः ? ॥९०९॥
देवोऽप्याख्यत् ततः स्थानाद् **विदर्भा**गमनावधि । **भैम्या** वृत्तान्तमखिलं तत्सतीत्वं प्ररूपयन् ॥९१०॥
जगाद च **नलं** वत्सः किमरण्ये भ्रमन्नसि । नयामि तत्र स्थाने त्वां यस्मिन् जिगमिषा तव ॥९११॥
**नलः** प्रोवाच मां देव ! **सुसुमार[2]पुरे** नय । देवोऽपि हि तथा कृत्वा जगाम निजधामनि ॥९१२॥
**नलो**ऽपि **नन्दनवने** तत्पुरोपान्तवर्त्मनि । स्थितो ददर्शाऽऽयतनं सिद्धायतनसन्निभम् ॥९१३॥
तत्र चैत्ये विशन् कुब्जो ददर्श च तदन्तरे । प्रतिमां **नमिनाथ**स्योत्पुलकस्तामवन्दत ॥९१४॥
ततो **नलः सुसुमार**नगरद्वारमभ्यगात् । तत्र चाऽऽलानमुन्मूल्य भ्रमन्मत्तगजोऽभवत् ॥९१५॥
स्पृष्टासनोऽनिलेनापि स व्यधूनयदो[3]सनम् । उपरि स्फुरतो ह[4]स्तेनाऽऽचकर्ष खगानपि ॥९१६॥
दृष्टिं दृष्टिविषस्येव जहु[5]स्तस्येभजी[6]विकाः । महावात इवोद्यानतरूनपि बभञ्ज सः ॥९१७॥
**दधिपर्ण**नृपस्तत्र वप्रमारुह्य सत्वरम् । उच्चैरुवाच तं नागं वशं नेतुमनीश्वरः ॥९१८॥
कुर्याद् गजं मे यो वश्यमवश्यं तस्य वाञ्छितम् । ददामि किं भोः ! कोऽप्यस्ति गजारोहणधूर्वहः ? ॥९१९॥
कुब्जोऽवादीत् तदाकर्ण्य क्व स क्व स मतङ्गजः ? । तमहं गमयिष्यामि वश्यतां पश्यतां हि वः ॥९२०॥
आगात् कुब्जे वदत्येवं स गर्जन्नूर्जितं गजः । तमभ्यधावत् कुब्जोऽपि क्ष्मां पद्भ्यामस्पृशन्निव ॥९२१॥
मा मृथा मा मृथाः कुब्जाऽपसराऽपसरेत्यलम् । लोको जगाद निःशङ्कं केसरीव ययौ तु सः ॥९२२॥
प्रससाराऽपससार पपात च लुलोठ च । स कन्दुक इव कुब्जः कुञ्जरं विप्रतारयन् ॥९२३॥
भूयो भूयश्च लाङ्गूलमाक्रमन् विक्रमी **नलः** । [7]वार्तिकः पन्नगमिव खेदयामास तं गजम् ॥९२४॥
जितश्रमो **नलो** जातश्रमं विज्ञाय तं गजम् । द्राग् गरुत्मानिवोत्पत्याऽऽरुरोहाऽऽ[8]रोहकाग्रणीः ॥९२५॥
पूर्वासनमधिष्ठाय पादौ न्यस्य क[9]लापके । दृढयामास तद्ग्रन्थिमाघ्नन् कुम्भौ चपेटया ॥९२६॥
कला[10]पताडनाव्यात्त[11]वक्त्रं चीत्कारकारिणम् । करिणं वाहयामास तं कुब्जो नर्तयन् सृ[12]णिम् ॥९२७॥
तस्याऽथो घोषयामास जनो जयजयारवम् । तद्गले चाऽक्षिपद् राजा स्वयं कनकशृङ्खलाम् ॥९२८॥
मदनं[13]मयमिव तं कृत्वा व्यालं **नलो** बली । आलानलीनतां निन्ये [14]कक्षानाड्योत्ततार च ॥९२९॥
ततो **नलो**ऽमलयशाः प्रणिपात[15]मसंस्पृशन् । अभ्यर्णे **दधिपर्ण**स्योपाविशत् सवया[16] इव ॥९३०॥
**दधिपर्णो**ऽथ तं प्रोचे गजशिक्षाविचक्षण !। किमन्यदपि भोः कुब्ज ! वेत्सि ? सम्भावनाऽस्ति ते ॥९३१॥
कुब्जोऽप्युवाच हे राजन् ! किमन्यत् कथयामि ते । **सूर्यपाकां** रसवतीं वेद्मि किं तां दिदृक्षसे ? ॥९३२॥
स राजा सदनं गत्वा **सूर्यपाक**कुतूहली । कुब्जाय तण्डुलान् शाकान् वेषवारादि चाऽऽर्पयत् ॥९३३॥
चरून् सूर्यातपे मुक्त्वा [17]**सौरीं** विद्यामनुस्मरन् । मङ्क्षु निष्पादयामास दिव्यां रसवतीं **नलः** ॥९३४॥
कल्पवृक्ष[18]विशेषेण दत्तयेव मनोज्ञया । रसवत्या तया राजा बुभुजे सपरिच्छदः ॥९३५॥

---

१. **सोऽहंमौ०** मु०र० । **महामौहू०** ला० । **अहो मौ०**सू० । 'स्वाहा' उच्चारणक्षणं कथयन् ज्योतिर्विद् इव । २. **०पुरं** मु०र० । ३. स्कन्धप्रदेशम् । ४. शुण्डया । ५. **जहु०** खं० १-२ । ६. **०जीवकाः** खं० २, ला०सू० । हस्तिपकाः । ७. गारुडिकः । ८. श्रेष्ठारोहक इव । ९. कण्ठरज्ज्वाम् । १०. **कलापताडनव्यात्त०** खं० २ । ११. **०व्यात्तवक्त्रचीवर०** मु० । १२. **शृणिम्** खं० १-२ । अङ्कुशम् । १३. मदनं 'मीण' इति । १४. पार्श्वस्थरज्जुबलेन । १५. **०पातमसंस्पृशन्** मु० र० । १६. सुहृदिव । १७. **शौरीं** खं० २ । १८. **कल्पवृक्षावि०** खं० १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रमापनोदजननीं परमानन्ददायिनीम् । आस्वाद्य तां रसवतीं **दधिपर्ण**नृपोऽवदत् ॥९३६॥
एवंविधां रसवतीं **नलो** जानाति नाऽपरः । चिरं परिचिता ह्येषा सेवमानस्य मे **नलम्** ॥९३७॥
तत् किं **नलो**ऽसि विकृताकारो ? नैतादृशो **नलः** । योजनद्विशत्या तस्याऽन्तरितस्याऽऽगमः कुतः ? ॥९३८॥
एकाकित्वं कुतस्तस्य **भरतार्ध**महीपतेः । तद्रूपं च मया दृष्टं जितगीर्वाण-खेचरम् ॥९३९॥
ततः कुब्जाय तुष्टोऽदाद् वस्त्रालङ्करणादिकम् । टङ्कलक्षं च नृपतिर्ग्रामपञ्चशतीमपि ॥९४०॥
सर्वं जग्राह तत्कुब्जो ग्रामपञ्चशतीं विना । राजाऽप्युवाच किं कुब्ज ! तवाऽन्यदपि दीयताम् ? ॥९४१॥
कुब्जो बभाषे तर्ह्येतन्मम पूरय वाञ्छितम् । मृगयां मद्यपानं च [1]स्वाज्ञावधि निवारय ॥९४२॥
राजाऽपि वचनं तस्य मानयन्निजशासने । वार्तामपि निराकार्षीन्मृगया-मद्यपानयोः ॥९४३॥
¶**दधिपर्ण**नृपोऽन्येद्युः कुब्जमूचे रहःस्थितः । कोऽसि त्वं ? कुत आयासीः ? क्व वास्तव्योऽसि वा? वद ॥९४४॥
कुब्जः प्रोचे **कोशलायां नलराज**स्य सूपकृत् । **हुण्डिका**ख्योऽस्मि तत्पार्श्वे शिक्षिताश्च कला मया ॥९४५॥
**नलो** भ्रात्रा **कूबरेण** जितो द्यूतेऽखिलां महीम् । **दवदन्ती**मुपादाय प्रपेदेऽरण्यवासिताम् ॥९४६॥
**नलो** विपेदे तत्रैव ततोऽहं त्वामुपागमम् । मायाविनमपात्रज्ञं श्रितोऽस्मि न तु **कूबरम्** ॥९४७॥
**दधिपर्णो**ऽपि हि तया **नल**पञ्चत्ववार्तया । हृदि वज्राहत इव चक्रन्द सपरिच्छदः ॥९४८॥
**दधिपर्णनृपः** प्रेतकार्यं बाष्पाम्बुवारिदः । चक्रे **नलस्य** कुब्जेन वीक्ष्यमाणो धृतस्मितम् ॥९४९॥
¶**दवदन्ती**पितुः पार्श्वे **दधि[2]पर्ण**नृपोऽन्यदा । केनाऽपि हेतुना दूतं प्रैषीत् सौहार्दवर्त्मना ॥९५०॥
**भीमेन** सत्कृतो दूतः स तत्पार्श्वे सुखं वसन् । उवाच वार्तां प्रस्तावेऽन्यदैवं वदतां वरः ॥९५१॥
**नलस्य** सूपकारोऽस्ति मत्स्वामिनमुपागतः । **सूर्यपाकां** रसवतीं स वेत्ति **न**[3]**ल**शासनात् ॥९५२॥
**दवदन्ती** तदाकर्ण्योत्कर्णा पितरमब्रवीत् । प्रणिधिं प्रेष्य जानीहि कीदृगस्ति स सूपकृत् ? ॥९५३॥
**सूर्यपाकां** रसवतीं वेत्ति नाऽन्यो **नलं** विना । गोपितात्मा यदि पुनर्भविता **नल** एव सः ॥९५४॥
ततः स्वाम्यर्थकुशलं **कुशलाख्यं** द्विजोत्तमम् । आहूय सत्क्रियापूर्वमादिदेश विशां पतिः ॥९५५॥
**सुं[4]सुमारपुरे** गत्वा पश्य [5]तं राजवल्लभम् । कां कां कलां[6] स जानाति किंरूपश्चेति निश्चिनु ॥९५६॥
प्रभोः प्रमाणमादेश इत्युक्त्वा चलितो द्विजः । प्रेर्यमाणः सुशकुनैः [7]**सुंसुमारपुरं** ययौ ॥९५७॥
¶पृच्छन् पृच्छन् ययौ कुब्जसमीपे निषसाद च । सर्वाङ्ग[8]विकृताकारं तं दृष्ट्वा विषसाद च ॥९५८॥
दध्यौ च क्व **नलः** क्वाऽयं ? क्व मेरुः क्व च सर्षपः ? । उत्पन्नाऽस्ति[9] **नलभ्रान्तिर्दवदन्त्या** वृथैव हि ॥९५९॥
निश्चेष्ये सम्यगिति च मनसा सम्प्रधार्य सः । जगौ श्लोकयुगलकं [10]**नलाप**श्लोकगर्भितम् ॥९६०॥
"निर्घृणानां निस्त्रपाणां निःसत्त्वानां दुरात्मनाम् । धूर्वहो **नल** एवैकः पत्नीं तत्याज यः सतीम् ॥९६१॥
सुप्तामेकाकिनीं मुग्धां विश्वस्तां त्यजतः प्रिया[11]म् । उत्सेहाते कथं पादौ **नैषधेरल्पमेधसः** ?" ॥९६२॥
मुहुर्मुहुः पठ्यमानं तच्छ्रुत्वा दयितां स्मरन् । रुरोदाऽनर्गलगलन्नयनाब्जजलो **नलः** ॥९६३॥
किं रोदिषीति विप्रेण पृष्टः प्रोवाच **हुण्डिकः** । गीतं ते [12]मञ्जु करुणरसमाकर्ण्य रोदिमि ॥९६४॥
कुब्जेन पृष्टः श्लोकार्थं स विप्रोऽकथयत् कथाम् । आद्यूतात् **कुण्डिनपुरे वैदर्भी**गमनावधि ॥९६५॥
पुनराख्यदहो ! कुब्ज ! **सूर्यपाकेन** सूपकृत् । **सुंसुमारे**शदूतेनाऽऽख्यातस्त्वं **भीम**भूपतेः ॥९६६॥
एवंविधचरित्रेण **नलो** भवति नाऽपरः । **भैम्येति भीम**मभ्यर्थ्य त्वां द्रष्टुं प्रेषितोऽस्म्यहम् ॥९६७॥
अचिन्तयं च त्वां दृष्ट्वा क्व कुब्जस्त्वं दुराकृतिः ? । क्व **नलो** देवतारूपः ? क्व खद्योतः क्व भास्करः ? ॥९६८॥
मम चाऽऽगच्छतोऽभूवञ्छकुनानि शुभानि तु । तानि सर्वाण्यन्यथात्वं[13] ययुर्नाऽसि **नलो** यतः ॥९६९॥
**दवदन्तीं** हृदि ध्यायन् रुदन् कुब्जोऽधिकाधिकम् । उपरुध्य गृहेऽनैषीत् तं विप्रमिति चाऽवदत् ॥९७०॥

१. **यावदाज्ञम्** मु० । २. **०पर्णो** मु० र० । ३. नलशिक्षणात् । ४. **सुसु०** मु० र० । ५. **तद्राज०** मु० र० । ६. **कलामसौ वेत्ति** पु० मु० । ७. **सुसु०** मु० र० । ८. **सर्वाङ्गे** खं० २ । ९. **उत्पन्नाऽस्मिन्नल०** खं० १ विना । १०. नलापकीर्तिगर्भम् । ११. **सतीम्** मु० । १२. **मंक्षु** खं० २ । १३. **०त्वमयु०** ता०सं० ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

महासत्या **दवदन्त्या** महापुंसो **नलस्य** च । कथां तवाऽऽख्यातवतः स्वागतं किं विधी[1]यताम् ? ॥९७१॥
इत्युक्त्वा विदधे स्नान-भोजनादिभिरौचितीम् । तस्याऽदाच्च **दधिपर्ण**दत्तमाभरणादि[2] सः ॥९७२॥
**कुशलः** कुशलेनाऽथ **कुण्डिनं** नगरं ययौ । यथा[3]दृष्टं च तं कुब्जं **भैमी**पित्रे शशंस च ॥९७३॥
कुब्जो यथा खेदयति स्माऽऽरुरोह च तं गजम् । [4]तथाऽऽख्यत् **सूर्यपाकां** च दृष्टां रसवतीं द्विजः ॥९७४॥
हेममालां टङ्कलक्षं वस्त्रालङ्कारणानि च । आख्यत् कुब्जेन दत्तानि श्लोकगानं च तन्निजम् ॥९७५॥
¶**भैम्यू**चे स **नल**स्तात ! प्राप्तो वैरूप्यमीदृशम् । केनाऽप्याहारदोषेण कर्मदोषेण वा खलु ॥९७६॥
कौशलं गजशिक्षायां दानमद्भुतमीदृशम् । **सूर्यपाका**[5] रसवती नाऽन्यस्याऽस्ति **नलं** विना ॥९७७॥
तात ! केनाऽप्युपायेन तं कुब्जकमिहाऽऽनय । यथा स्वयं परीक्षेऽहं तं निरीक्ष्येङ्गितादिभिः ॥९७८॥
**भीमराजो**ऽवदत् पुत्रि ! तवाऽलीकस्वयंवरम् । प्रारभ्य **दधिपर्ण**स्याऽऽह्वानाय प्रेष्यतां नरः ॥९७९॥
[6]तव स्वयंवरं श्रुत्वा **दधिपर्णः** समेष्यति । सोऽग्रेऽपि त्वयि लुब्धोऽभूद् वृतः किंतु **नलस्त्वया** ॥९८०॥
**दधिपर्णे**न च सह स कुब्जोऽप्यागमिष्यति । त्वामन्यस्मै दीयमानां न सोढा स हि **चेन्नलः** ॥९८१॥
**नलो**ऽश्वहृदयज्ञोऽस्ति **स** कुब्जो **नल** एव चेत् । रथाश्वैरेव विज्ञेयः स[7] स्वयं प्रेरयन् रथम् ॥९८२॥
तस्य च प्रा[8]जतो वाहाः स्युः समीरण[9]रंहसः । वाहरूपेण सम्प्राप्ता मूर्ता इव समीरणाः ॥९८३॥
आसन्नं दिनमाख्येयं यस्तत्रैतैं[10] **नलो** हि सः । न स्त्रीपरिभवं कोऽपि सहते किं **पुनर्नलः** ? ॥९८४॥
¶दूतेन **सुंसुमारे**शं **भीमरा**ट् पञ्चमीदिने । आह्लादागर्म[11]नप्रह्वश्चिन्तयामास [12]चेति सः ॥९८५॥
**भैमी** प्रेप्स्यौ[13]ऽतिदूरे सा तत्र श्वो गम्यते कथम् ? । किं करोम्यरतिं प्राप्तो मीनः स्तोक इवाऽम्भसि ॥९८६॥
कुब्जो दध्यौ सती **भैमी** नाऽन्यं पुरुषमिच्छति । इच्छेद् वा तर्हि तां को हि गृह्णीयान्मयि सत्यपि ॥९८७॥
**दधिपर्णं विदर्भा**यां षड्भिर्यामैर्नयाम्यहम् । अनेन सह मेऽपि स्याद् यानं प्रासङ्गिकं यथा ॥९८८॥
ऊचे च **दधिपर्णं** स मा ताम्य ब्रूहि कारणम् । न ह्यनाख्यातरोगस्य रोगिणोऽपि चि[14]कित्सितम् ॥९८९॥
**दधिपर्णो**ऽवदत् कुब्ज ! कथाशेषो **नलो**ऽभवत् । स्वयंवरं पुनरपि **वैदर्भी श्वः** करिष्यति ॥९९०॥
चैत्रस्य शुद्धपञ्चम्यां भावी तस्याः स्वयंवरः । षड्[15]याम्येवाऽन्तरे तस्यै[16] गतिः का मे भविष्यति ? ॥९९१॥
बहुभिर्दिवसैर्दूतोऽप्यागात् तेनैव वर्त्मना । सार्धेनाऽह्ना कथं यामि ? **भैमी**लुब्धो मुधाऽस्म्यहम् ॥९९२॥
कुब्जो जगाद हे राजन् ! मा विषीदाऽचिरादपि । नेष्यामि त्वां **विदर्भायां** रथं साश्वं ममाऽर्पय ॥९९३॥
गृहाण स्वैरमित्युक्तो **राज्ञा** कुब्जो वरं रथम् । जग्राह जात्यावश्वौ च सर्वलक्षणलक्षितौ ॥९९४॥
दध्यौ च **दधिपर्ण**स्तं कुशलं वीक्ष्य सर्वतः । न सामान्यः पुमानेष देवो वा खेचरोऽथवा ॥९९५॥
रथं कृत्वा च युक्ताश्वं कुब्जः प्रोवाच तं नृपम् । रथमारोह नेष्यामि **विदर्भां** त्वां निशात्यये ॥९९६॥
राजा स्थगीधरश्छत्रधरश्चामरधारिणौ । कुब्जश्च षडमी सज्जीकृतमारुरुहू रथम् ॥९९७॥
तद्बिल्वं तं करण्डं च कट्यामाबध्य वाससा । स्मृत्वा पञ्चनमस्कारं कुब्जो [17]रथ्यानखेटयत् ॥९९८॥
रथः प्रवी[18]र्यमानाश्वो **नैषधिना**ऽश्वहृद्विदा । जगाम स्वामिचित्तेन विमानमिव नाकिनः ॥९९९॥
प्रच्छ[19]दो **दधिपर्ण**स्य रथवेगानिलो[20]द्धुतः । अथाऽपतत् कृतस्तेन **नलस्ये**वाऽवतारणे ॥१०००॥
**दधिपर्णो**ऽवदत् कुब्जं मुहूर्तं धार्यतां रथः । वातेनोड्डीय खगवद् गतां गृह्णाम्यहं पटीम् ॥१००१॥
**दधिपर्ण**नृपो यावदवादीदिति कुब्जकम् । तावद् रथो व्यतीयाय पञ्चविंशतियोजनीम् ॥१००२॥
स्मयमानोऽवदत् कुब्जः क्वा[21]ऽस्ति ते नृपते ! पटी ? । पटीपाताद् योजनानां पञ्चविंशतिरुज्झिता ॥१००३॥

१. **विधीयते** ला० । २. **०दिकम्** सू० । ३. **तथा दृष्टं** ला० । ४. **तथाऽऽख्यात्** मु० र० । ५. **०पाकरसवती** मु० र० । ६. ततः खं० २ । ७. **तत् स्वयं** मु० र० । ८. प्रेरयतः अश्वाः । ९. वायुवेगाः । १०. **यस्तत्रैति** मु० । ११. आगमने आतुरः । १२. **चेतसि** मु० र० । १३. **भैमीप्रेप्सा** मु० र० । १४. **चिकित्सनम्** खं० २ । १५. षडेव प्रहरा अन्तरे सन्ति । १६. **तस्याः** खं० २, सू० । १७. अश्वान् अनोदयत् । १८. **प्रचीय०** मु० । १९. उत्तरीयवस्त्रम् । २०. **०निलोद्धतः** खं० १-२, ला० सू० । २१. **क्वाऽस्ति धात्रीश ! ते पटी** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते हि मध्यमा वाहा भवेयुर्यदि [1]तूत्तमाः । एतावता तद् व्रजेयुः पञ्चाशद्योजनीमपि ॥१००४॥
**दधिपर्ण**नृपो दूरादनेकफलसङ्कुलम् । [2]अक्षाख्यं वृक्षमद्राक्षीदिति चोवाच सारथिम् ॥१००५॥
अस्मिन् फलानि यावन्ति तावन्त्यगणयन्नपि । वेद्म्यहं दर्शयिष्यामि व्यावृत्तः कौतुकं तव ॥१००६॥
कुब्जो जगाद हे राजन् ! कालक्षेपाद् बिभेषि किम् ? । मा भैषीरश्वहृदयविदुरे मयि सारथौ ॥१००७॥
एकमुष्टिप्रहारेण सर्वाणि पुरतस्तव । फलानि पातयिष्यामि मेघोऽम्भःपृषता[3]निव ॥१००८॥
राजा प्रोवाच तर्हि त्वं फलानि कुब्ज ! पातय । अष्टादश सहस्राणि तेषां स्युः पश्य कौतुकम् ॥१००९॥
कुब्जोऽप्यपातयत् तानि सङ्ख्याति स्म च भूपतिः । यथाख्यातानि चाऽभूवन्नैकं हीनं न चाधिकम् ॥१०१०॥
कुब्जोऽ**श्वहृदयविद्यां दधिपर्णा**य याचिताम् । ददौ तस्मादाददे च **सङ्ख्याविद्यां** यथाविधि ॥१०११॥
प्रात**र्विदर्भा**भ्यर्णेऽगात् सरथः कुब्जसारथिः । **दधिपर्ण**नृपश्चाऽभूत् पद्मवद् विकसन्मुखः ॥१०१२॥
॥तदैव च निशाशेषे **वैदर्भी** स्वप्नमैक्षत । यथावत् कथयामास पितुरग्रे च हर्ष[4]भाक् ॥१०१३॥
मया **निर्वृति**देव्यद्य निशान्ते सुखसुप्तया । अदर्शि **कोशलो**द्यानं तयेहाऽऽनीतमम्बरे ॥१०१४॥
पुष्पितं फलितं चूतं चाऽऽरूढाऽस्मि तदाज्ञया । विकस्वरं सरोजं च मम हस्ते तयाऽर्पितम् ॥१०१५॥
मयि तत्राऽधिरूढायां कश्चिदेको विहङ्गमः । पुराधिरूढो [5]धसिति पपात धरणीतले ॥१०१६॥
**भीमो**ऽप्युवाच हे पुत्रि ! स्वप्नोऽयमतिशोभनः । तथाऽऽह **निर्वृतिर्देवी** पुण्यराशिस्तवोद्यतः ॥१०१७॥
खे दृष्टं **कोशलो**द्यानं **कोशलै**श्वर्यदं तव । माकन्दारोहणात् पत्या सह सङ्गंस्यसे द्रुतम् ॥१०१८॥
अग्रे तत्राऽधिरूढश्च यः पपात विहङ्गमः । स **कूबर**नृपो राज्यात् पतिष्यति न संशयः ॥१०१९॥
प्रभातसमये स्वप्नदर्शनादद्य ते **नलः** । मिलिष्यत्यत्र काले हि स्वप्नः शीघ्रं[6] फलप्रदः ॥१०२०॥
॥तदानीमेव पूर्द्वारं सम्प्राप्तो **दधिपर्ण**राट् । पुमांश्च **मङ्गलो** नाम **भीमा**याऽऽख्यात् [7]तमागतम् ॥१०२१॥
**भीमो**ऽभ्यगाद् **दधिपर्णं** परिरेभे च मित्रवत् । गृहार्पणादिनाऽऽतिथ्यं कृत्वा चैवमवोचत ॥१०२२॥
**सूर्यपाकां** रसवतीं कुब्जस्ते वेत्ति सूपकृत् । तां दर्शय दिदृक्षोर्मे वार्तया कृतमन्यया ॥१०२३॥
आदिक्षद् **दधिपर्णो**ऽपि कुब्जं रसवतीकृते । सोऽपि तां दर्शयामास कल्पवृक्ष इव क्षणात् ॥१०२४॥
**भीम**स्तया रसवत्या बुभुजे सपरिच्छदः । **दधिपर्णो**परोधेन तत्स्वादं च परीक्षितुम् ॥१०२५॥
स्थालं तदोदनभृतमानाय्य **दवदन्त्य**पि । बुभुजे तद्रसास्वादादज्ञासीत् कुब्जकं **नलम्** ॥१०२६॥
**भैम्यू**चे च ममाऽऽख्यातं ज्ञानिना सूरिणा पुरा । **सूर्यपाका** रसवती **नल**स्यैवेह **भारते** ॥१०२७॥
अयं कुब्जोऽस्तु [8]कुण्टोऽस्तु यादृशस्तादृशोऽस्तु वा । कारणं तत्र किमपि **नल** एव न संशयः ॥१०२८॥
**नल**स्यैका रसवती परीक्षाऽन्याऽपि विद्यते । **नला**ङ्गुल्याऽप्यहं स्पृष्टा भवाम्युत्पु[9]लका खलु ॥१०२९॥
कुब्जोऽङ्गुल्या स्पृशतु मां तिलकं रचयन्निव । अभिज्ञानान्तरेणै[10]ष भवेद् यदि पुन**र्नलः** ॥१०३०॥
कुब्जो **नलो**ऽसीति पृष्टः प्रोचे भ्रान्ताः स्थ सर्वथा । क्व **नलो** देवतारूपः ? क्वाऽनर्हो द्रष्टुमप्यहम् ? ॥१०३१॥
तद्वक्षोऽस्पृक्षदङ्गुल्या कुब्जोऽथाऽत्युपरोधतः । अतिलाघवतः पत्रमिवाऽऽर्द्राक्षरमार्जकः ॥१०३२॥
तावताऽप्यङ्गुलिस्पर्शेनाऽऽनन्दाद्वैतदायिना । **भैम्याः** [11]कर्कोटकमिवाऽजनिष्टोत्कण्टकं वपुः ॥१०३३॥
सुप्तां तदा मामत्याक्षीरिदानीं क्व नु यास्यसि । चिरात् प्राणेश ! दृष्टोऽसीत्यवोचद् **भीमजा** मुहुः ॥१०३४॥
नीतो गृहान्तरेऽभ्यर्थ्य कुब्जो बिल्वात् करण्डकात् । आकृष्य **वस्त्रा**–ऽलङ्कारानामु[12]च्याऽभूत् स्वरूपभाक् ॥१०३५॥
॥ततश्च **भीम**तनया यथारूपं निजं पतिम् । तमालिलिङ्ग सर्वाङ्गमपि वल्लीव पादपम् ॥१०३६॥
समागतं पुनर्द्वारे **नलं** कमललोचनम् । आलिङ्ग्याऽध्यासयामास **भीमः** सिंहासने निजे ॥१०३७॥
त्वं स्वामी सर्वमेतत् ते समादिश करोमि किम् ?। एवं वदन् **भीमरथो** वेत्रीवाऽस्थात् कृताञ्जलिः ॥१०३८॥

---

१. **सत्तमाः** पा० । **नूत्तमाः** मु० । २. बिभीतकवृक्षम् । ३. बिन्दून् । ४. **हर्षवाक्** खं० २ । ५. **झटिति** खं० १, ला० सू० विना । ६. **शीघ्रफलप्रदः** खं० १–२ । ७. **तदागमम्** ता०सं० । ८. **कुण्ठो०** ता० सं० पु० । ९. रोमाञ्चिता । १०. **०न्तरेणैव** मु० र० । ११. बिल्ववृक्ष इव । १२. परिधाय ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दधिपर्णो** [1]**नलं** नत्वाऽवदन्नाथोऽसि नः सदा । तत् क्षमस्व यदज्ञानात् त्वय्यकार्यमनुष्ठितम् ॥१०३९॥
¶अत्रान्तरे **धनदेवः** सार्थवाहो महर्द्धिकः । स आगादुपदापाणिर्द्रष्टुं **भीमरथं** नृपम् ॥१०४०॥
**वैदर्भी** सार्थवाहस्य तस्य पूर्वोपकारिणः । अकारयद् **भीमं**[3]नृपात् स्वबन्धोरिव गौरवम् ॥१०४१॥
**ऋतुपर्णश्चन्द्रयशास्**तत्सुता **चन्द्रवत्य**पि । **वसन्तश्रीशेखरश्च स तापसपुरेश्वरः** ॥१०४२॥
तत्राऽऽययुर्**दवदन्त्या**ऽऽह्वायिताः पितृवाचिकैः[4] । नितान्तमुत्कण्ठितया पूर्वोपकृतिलिप्सया ॥१०४३॥ युग्मम् ॥
अतिसत्क्रियमाणास्ते नित्यं **भीमेन** भूभुजा । तस्थुर्मासं नवनवैरातिथ्यैः प्रीतचेतसः ॥१०४४॥
¶अन्यदा तस्थुषां तेषां सर्वेषां **भीम**पर्षदि । प्रातर्देवो दिवः कश्चिदायासीद् भाःप्लुताम्बरः[5] ॥१०४५॥
प्रोचे च प्राञ्जलि**र्भैमीं** स तापसपतिः पुरा । त्वया **विमलमत्याख्यः** प्रबोधित इति स्मर ॥१०४६॥
स तापसपतिर्मृत्वा सौधर्मेऽहं सुरोऽभवम् । श्री**केसरो**ऽभिधानेन विमाने **केसरा**भिधे ॥१०४७॥
अर्हद्धर्मे स्थापितो[6]ऽहं मिथ्यादृष्टिरपि त्वया । तेन धर्मेण देवोऽहमभूवं त्वत्प्रसादतः ॥१०४८॥
इत्युक्त्वा च हिरण्यस्य कोटीः सप्त प्रवृष्य सः । क्वचिदन्तर्दधे देवः स्वां प्रकाश्य कृतज्ञताम् ॥१०४९॥
¶**वसन्त-दधिपर्णर्तुपर्णा भीमो**ऽपरेऽपि हि । महाबला महीपाला राज्येऽभिषिषिचुर्**नलम्** ॥१०५०॥
ते राजानो **नला**दिष्टाः स्वानि स्वानि बलान्यथ । सङ्कीर्णत्वं ददानानि पृथ्व्यां प्राज्यान्यमेलयन् ॥१०५१॥
शुभेऽह्नि तैर्नृपैः सार्धं **नलो**ऽतुलपराक्रमः । राज्यलक्ष्मीं जिघृक्षुः स्वाम**योध्या**मभ्यषेणयत् ॥१०५२॥
कैरप्यहोभिस्तरणिं तिरयन्[7] रतिवल्लभम् । **अयोध्योप**वनं गत्वाऽध्युवास **रतिवल्लभम्** ॥१०५३॥
समागतं **नलं** ज्ञात्वा **कूबरो** वरवैभवम् । भिया कण्ठगतप्राण इवाऽभूद् भृशमाकुलः ॥१०५४॥
¶**नल**स्तं स्माऽऽह दूतेन देवनैर्दीव्यतां पुनः । ममैवाऽस्तु त्वदीया श्रीर्मदीयाऽपि तवाऽस्तु वा ॥१०५५॥
**कूबरो**ऽपि रणशङ्कामपाकृत्य प्रमोदभाक् । पुनर्द्यूतं समारेभे जितकाशी[8] हि तत्र सः ॥१०५६॥
सर्वामुर्वी जिगायाऽथ भाग्यवा**न्नैषधो**ऽनुजात् । भाग्ये हि विजयो नृणां पाणिपद्मे मरालति[9] ॥१०५७॥
**नलेन** जितराज्योऽपि सोऽतिक्रूरोऽपि **कूबरः** । ममाऽनुजन्मायमिति नाऽप्रसादास्पदं कृतः ॥१०५८॥
**वैदर्भी**[10]जानिना राज्यमलङ्कृत्य निजं तदा । अरुषा **कूबर**श्चक्रे पूर्ववद्यौवराज्यभाक् ॥१०५९॥
**नलः** स्वं राज्यमासाद्य **दवदन्ती**युतस्तदा । **कोशला**नगरीचैत्यान्युत्कण्ठावानवन्दत ॥१०६०॥
राज्याभिषेकमाङ्गल्योपायनानि महीभुजः । सर्वेऽप्यानिन्यिरे भक्त्या **भरतार्ध**निवासिनः ॥१०६१॥
सकलैरवनीपालैः पालिताखण्डशासनः । बहून्यब्दसहस्राणि **भरतार्धं नलो**ऽशिषत् ॥१०६२॥
स्वर्गादन्येद्युरागत्य **निषधो** देवभूयभाक् । विषयार्णवे[11]पाठीनमिति प्राबोधयन्**नलम्** ॥१०६३॥
भवारण्ये लुण्ट्यमानं[12] सदा विषयतस्करैः । आत्मनोऽपि विवेकस्वमरक्षन्[13] पुरुषोऽसि[14] किम् ? ॥१०६४॥
प्रव्रज्यासमयाख्यानं प्रतिपन्नं पुरा मया । तदिदानीं परिव्रज्यां गृहाणाऽऽयुस्तरोः फलम् ॥१०६५॥
इत्युक्त्वाऽन्तर्दधे देवस्तत्र चाऽभ्याययौ तदा । **जिनसेना**भिधः सूरिरवधिज्ञानशेवधिः[15] ॥१०६६॥
**दवदन्ती-नलौ** गत्वा ववन्दाते तमादरात् । पृष्टश्च प्राग्भवं ताभ्यामाख्यायैवमुवाच सः ॥१०६७॥
प्राप्तं राज्यं त्वया साधोः क्षीरदानात् तथा मुनौ । क्रोधाद् द्वादशघटिकाद् विरहो द्वादशाब्दिकः ॥१०६८॥
इति श्रुत्वा **पुष्कलाख्ये** सुते राज्यं निधाय तौ । गृहीत्वा च व्रतं तस्मात् पालयामासतुश्चिरम् ॥१०६९॥
**नलो**ऽन्यदा तु भोगार्थी[16] **दवदन्त्यां** मनोऽकरोत् । अथाऽऽचार्यैः परित्यक्तः पित्राऽऽगत्य प्रबोधितः ॥१०७०॥
अशक्नुवन् व्रतं कर्तुं प्रपेदेऽनशनं **नलः** । **नले** जातानुरागाऽथ दवदन्त्यपि तद् व्यधात् ॥१०७१॥
**नलो** मृत्वा **कुबेरो**ऽहमभूवं सा तु **भीमजा** । मत्प्रियाऽजनि सा च्युत्वा **शौरेः कनकवत्य**भूत् ॥१०७२॥

---

१. **नृपं ज्ञात्वा०** खं० २ । २. **त्वय्यन्ना( न्या )य्यमनु०** खं० १-२, ला० । ३. भीमनृपं ता०सं० विना । ४. **०पितृवाचकैः** मु० र० । पितुः भीमनृपस्य वाचिकैः-सन्देशकैः । ५. कान्त्या दीपितं अम्बरं येन सः ॥ ६. **०तोऽस्मि** खं० १-२, ला० । ७. आच्छादयन् । ८. **०काशी** मु० र० । ९. मराल इव आचरति । १०. वैदर्भी जाया यस्य सः नलः तेन । ११. विषयसुखसमुद्रे मकरतुल्यम् । १२. **लुट्यमानं** खं०र० । १३. **विवेकं** ला०सू० । विवेक एव धनम् । १४. **पुरुषो असि** खं० २ । १५. **०सेवधिः** खं० २, ला० । १६. **भोगार्थि** आ० **भोगार्थम्** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्यां प्राग्भवपत्नीत्वस्नेहातिशयमोहितः । इहाऽऽगतोऽस्मि स्नेहो हि याति जन्मशतान्यपि ॥१०७३॥
अस्मिन्नेव भवे तावदियं **कनकवत्य**हो ! । **दशार्ह** ! कर्माण्युन्मूल्य निर्वाणं च [1]गमिष्यति ॥१०७४॥
सहेन्द्रेण वन्दनाय गतस्यैतत् पुरा मम । महाविदेहे कथितं **विमलस्वामि**नाऽर्हता ॥१०७५॥
इत्थं **कनकवत्या**स्तु कथां प्राग्भवसङ्गताम् । **कुबेरो वसुदेवाय** समाख्याय तिरोदधे ॥१०७६॥

अतिशयितचिरानुरागयोगात्,
**कनकवती**मुपयम्य **वृष्णिसूनुः** ।
अरमत पुनरेव खेचरीभिः,
सुभगशिरोमणिरद्वितीयरूपः ॥१०७७॥

॥ इत्याचार्यश्री**हेमचन्द्र**[2]विरचिते **त्रिषष्टिशलाकापुरुषच**रिते महाकाव्ये
अ[3]ष्टमे पर्वणि **कनकवती**परिणयन-तत्पूर्वभववर्णनो नाम
तृतीयः **सर्गः** ॥

१. **भविष्यति** ला० । २. **हेमचन्द्रसूरि वि०** ला० । ३. **अष्टमपर्वणि** खं० २, ला० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ चतुर्थः सर्गः ॥

**सूर्पके**णाऽन्यदा सुप्तः [1]स जह्रेऽथ [2]प्रबोधभाक् । जघान **सूर्पकं** मुष्ट्या **सूर्पक**स्तं मुमोच च ॥१॥
**गोदा**[3]**यां** पतितः **शौरि**स्तीर्त्वा **कोल्लापुरे** ययौ । **पद्मश्रियं पद्मरथ**राजपुत्रीं व्युवाह च ॥२॥
तत्रापि **नीलकण्ठेन** हृतो मुक्तश्च सोऽपतत् । **चम्पा**सरसि तत् तीर्त्वा मन्त्रिपुत्रीमुपायत ॥३॥
ततो हृतः **सूर्पकेण** मुक्तो गङ्गाजलेऽपतत् । ततोऽप्युत्तीर्य विचरन् ययौ पल्लीं सहाऽध्वगैः ॥४॥
पल्लीपते**र्जरा**नामकन्यां परिणिनाय च । अजीजनत् तत्र **ज**[4]**रत्कुमारं** नाम नन्दनम् ॥५॥
सो**ऽवन्तिसुन्दरीं सूरसेना**मथ नरद्विषम् । **जीवयशस**मपराश्चोपयेमे नृपात्मजाः ॥६॥
गच्छन्तम[5]न्यदा मार्गे तमूचे देवता मया । दत्ता **रुधिर**राट्कन्या **रोहिणी** ते स्वयंवरे ॥७॥
त्वया तु पटहस्तत्र वाद्य इत्युदितस्तया । स जगामा**ऽरिष्टपुरे** स्वयंवरणमण्डपम् ॥८॥
**जरासन्ध**प्रभृतिषु तत्राऽऽसीनेषु राजसु । आययौ **रोहिणी** साक्षाद् भुवं प्राप्तेव रोहिणी ॥९॥
ते स्वं [6]रुरोचयिषवस्तस्यै तत् तच्चिचेष्टिरे । स्वानुरूपम[7]पश्यन्त्यै नैकोऽपि रुरुचे परम् ॥१०॥
कृतवेषान्तरः **शौरि**र्मध्यस्थस्तूर्यवादिनाम् । वादयामास पटहमेवं पाठस्फुटाक्षरम् ॥११॥
एह्येहि मां कुरङ्गाक्षि ! कुरङ्गीव किमी[8]क्षसे ? । तवाऽनुरूपो भर्ताऽस्मि त्वत्सङ्गमसमुत्सुकः ॥१२॥
तच्छ्रुत्वा **रोहिणी** रो[9]मोत्पुलका तन्निरीक्षणात् । स्वयंवरस्रजं कण्ठे **वसुदेव**स्य विन्यधात् ॥१३॥
जज्ञे राज्ञां कलकलो हतैनमिति भाषिणाम् । अनया तौ[10]र्यिको वव्रे प्रहासश्चेत्यभूद्दृशम् ॥१४॥
**रुधिरं कोशलाधीशो दन्तवक्रो**ऽतिवक्रवाक् । सोपहासमुवाचैवं वै[11]हासिक इवोच्चकैः ॥१५॥
यदि [12]पाणविकायेयं कन्यका दि[13]त्सिता त्वया । तत्कुलीनाः कुलीनेन किमाहूता अमी नृपाः ? ॥१६॥
गुणानभिज्ञा चेदेषा वृणुते तौर्यिकं नरम् । नोपेक्षणीयं तत्पित्रा पिता बाल्ये हि शासिता ॥१७॥
ऊचे च **रुधिर**स्तेऽलं विचारेणाऽमुना नृप ! । स्वयंवरे कन्यकानां प्रमाणं हि वृतो नरः ॥१८॥
अथोचे [14]न्यायविदुरो **विदुरः** साध्विदं नृपः । तथाऽपि युज्यते प्रष्टुं वर एष कुलादिकम् ॥१९॥
**वसुदेवो**ऽवदत् कोऽयं प्रस्तावः कुलकीर्तने ? । वृतोऽहमनया यस्माद् यादृशस्तादृशोऽपि सन् ॥२०॥
असहिष्णुर्ममेमां योऽपहरिष्यति तस्य तु । कथयिष्यामि दोर्वीर्यदर्शनेनाऽऽत्मनः कुलम् ॥२१॥
**जरासन्धो** निशम्याऽथ वचस्तस्येदमुद्धतम् । इत्यादिक्षन्नृपान् क्रुद्धः **समुद्रविजया**दिकान् ॥२२॥
राजविप्लवकृत्ताव**द्रुधिरो**ऽयं नृपाधमः । द्वितीयोऽयं पाणविको मत्तः पणववा[15]दनात् ॥२३॥
राजकन्या मयाऽप्याप्तेतीयताऽपि न तृप्यति । वी[16]तास्तोच्चद्रुफलाप्त्या ख[17]र्वाङ्ग इव दृप्यति ॥२४॥
ततो हतेमौ **रुधिर**-तौर्यिकौ तूर्णमेव भोः! । इत्युक्तास्ते युधेऽसज्जन् **समुद्रविज**यादयः ॥२५॥
खेचरेन्द्रो **दधिमुखः** सारथीभूय स स्वयम् । रथेऽधिरोहयामास **वसुदेवं** रणोद्यतम् ॥२६॥
तदा **वेगवती**मात्रा**ऽङ्गारवत्या**ऽर्पिताऽन्यथ । आददे चाप-तूणानि **शौरिः** समरदुर्धरः ॥२७॥
**भग्नं** च **रुधिर**बलं **जरासन्ध**स्य पार्थिवैः । वसुदेवो **दधिमुखे**नेरयामास वाजिनः ॥२८॥
आदावप्युत्थितं **शत्रुञ्जयं यदुवरो**ऽजयत् । **दन्तवक्र**मभाङ्क्षीच्च **शल्यराजं** बभञ्ज च ॥२९॥
**जरासन्धो**ऽथ साशङ्कं **समुद्रनृप**मब्रवीत् । न पाणविकमात्रोऽयमसाध्योऽन्यमहीभुजाम् ॥३०॥

---

१. वसुदेवः । २. **प्रमोदभाक्** सं०ला० । ३. **गोलायां** खं० २, ला० । ४. **जराकुमारं** पु० ला०२, पा० । ५. **०मन्यदा तत्र** ता०सं०आ० । **०मन्यदाऽन्यत्र** र० । ६. 'स्वस्मै सा रोचयेत' इत्येवमिच्छाभाजः । ७. **०मपश्यन्ती नैको०** पु०पा०ला० । **०मपश्यन्त्यै न को०** मु० । ८. **०मीक्ष्यसे** खं० २ । ९. रोमाञ्चिता । १०. तूर्यवादयिता-पटहवादकः । ११. विदूषकः । १२. वाद्यवादकाय । १३. दातुमिष्टा । १४. न्यायचतुरः । १५. ०वादनः खं० २ । १६. वातेन अस्तं क्षिप्तं यदुन्नतवृक्षफलं तस्य प्राप्त्या । १७. कुब्जः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जह्येनं स्वयमुत्थाय हतेऽस्मिन् **रोहिणी** तव । सर्वेषां भङ्गवैलक्ष्यमपाकुरु महीभुजाम् ॥३१॥
**समुद्रविजयो**ऽप्यूचे परदारैः [1]कृतं मम । त्वदाज्ञया तु योत्स्येऽहमनेन सह दोष्मता ॥३२॥
इत्युक्त्वा युयुधे भ्रात्रा **समुद्रविजयो**ऽपि हि । विश्वाश्चर्यकरं जज्ञे शस्त्राशस्त्रि चिरं तयोः ॥३३॥
को न्वसौ मेऽप्यलमिति दध्यौ यावद् **यदूत्तमः** । **वसुदेवः** पुरस्तावत् साक्षरं बाणमक्षिपत् ॥३४॥
**समुद्रस्तं** गृहीत्वेषुं तद्वर्णानित्यवाचयत् । **वसुदेवो** नमति त्वां निर्गतश्छद्मना तदा ॥३५॥
अथ हृष्टो **दशार्हेशो** वत्स ! वत्सेत्युदीरयन् । सायं गौरिव वत्सोत्का दधावे रथमुत्सृजन् ॥३६॥
उत्तीर्य **वसुदेवो**ऽपि न्यपतत् तस्य पादयोः । उद्धृत्य च **समुद्रस्तं** दोर्भ्यां सपदि सस्वजे ॥३७॥
वत्स ! वर्षशतं क्वाऽऽस्था इति पृष्टोऽग्रजन्मना । आचख्यौ **वसुदेवः**[2] स्वं वृत्तान्तं सर्वमादितः ॥३८॥
**समुद्रविजयो** भ्रात्रा तादृग्विक्रमशालिना । यथाऽहृष्यत् तथा तेन जामात्रा **रुधिरो**ऽपि हि ॥३९॥
**जरासन्धः** स्वसामन्तबन्धुं ज्ञात्वा च तं तथा । सम्प्राप कोपोपशमं मुदे हि स्वो गुणाधिकः ॥४०॥
प्रसङ्गमिलितै राजस्वजनैर्जनितोत्सवः । जज्ञे विवाहः पुण्येऽह्नि **रोहिणी-वसुदेवयोः** ॥४१॥
**रुधिरे**णाऽर्चिता जग्मुर्**जरासन्धा**दयो नृपाः । **यादवैस्**[3]तत्र तस्थुस्तु वत्सरं **कंससंयुताः** ॥४२॥
तत्राऽन्येद्युर्**वसुदेवो**ऽपृच्छद् रहसि **रोहिणीम्** । कथं त्वया नृपान् मुक्त्वा वृतः पाटहिकोऽप्यहम् ? ॥४३॥
साऽप्याचख्यौ सदा विद्यां **प्रज्ञप्ति**महमार्चयम् । तयाऽऽख्यातं भविता ते **दशार्हो** दशमो वरः ॥४४॥
ज्ञेयः पटहवाद्येन स त्वया तु स्वयंवरे । ज्ञेयः तत्प्रत्ययादेव त्वं वृतोऽसि मया तदा ॥४५॥
सभास्थितेषु चाऽन्येद्युः **समुद्रविजया**दिषु । काऽप्यर्धजरती यच्छन्त्याशिषं खादवातरत् ॥४६॥
उवाच **वसुदेवं** सा **बालचन्द्रा**जनन्यहम् । नाम्ना **धनवती**पुत्र्याः कृते त्वां नेतुमागता ॥४७॥
सा पुत्री **बालचन्द्रा** मे पुत्रिका **वेगवत्य**पि । त्वद्वि[4]प्रलम्भविधुरे तिष्ठतस्ते दिवानिशम् ॥४८॥
ऐक्षिष्ट **वसुदेवो**ऽपि **समुद्रविजया**ननम् । राजाऽप्यूचे याहि परं मा स्म स्थाः पूर्ववच्चिरम् ॥४९॥
राजानं क्षमयित्वाऽथ **वसुदेव**स्तया सह । ययौ गगनयानेन पुरे **गगनवल्लभे** ॥५०॥
**समुद्रविजयो**ऽप्यागात् स्वं पुरं **कंससंयुतः** । तस्थौ च **वसुदेव**स्याऽऽगमने नित्यमुन्मुखः ॥५१॥
पित्रा **काञ्चनदंष्ट्रेण** खेचरेन्द्रेण कल्पिताम् । चन्द्रास्यां **बालचन्द्रां** तु **वसुदेव** उपायत ॥५२॥
पूर्वोढा वरयोषितो निजनिजस्थानादथाऽऽदाय सोऽन्वीतो व्योमचरैः[5] पदातिभिरिवाऽत्युच्चैर्विमानस्थितः ।
आगा[6]च्छौर्यपुरं **समुद्रविजये**[7]नोत्कण्ठितेनाऽऽदरादाश्लिष्टः प्रसरद्भुजोर्मिपयसांपत्येव शीर्त[8]द्युतिः ॥५३॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुषे**(षचरिते?) महाकाव्ये
अष्टमे पर्वणि **वसुदेव**हिण्डिवर्णनो नाम
चतुर्थः सर्गः ॥

१. **अलम्** । २. ०**देवस्तं** मु० र० । ३. **यादवा०** मु० । ४. त्वद्वियोगपीडिते । ५. विद्याधरैः । ६. **आगात् सूर्यपुरम्** ता०सं० ॥ ७. समुद्रेन । ८. चन्द्रः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ पञ्चमः सर्गः ॥

इतश्च **हास्तिनपुरे** श्रेष्ठ्यभूत् कोऽपि तस्य च । **ललिताख्यो**ऽभवत् पुत्रो मातुरत्यन्तवल्लभः ॥१॥
श्रेष्ठि[1]न्याश्चाऽन्यदा जज्ञे गर्भः सन्तापदो भृशम् । तया च विविधद्रव्यैः पात्यमानोऽपि नाऽपतत् ॥२॥
जातश्च पुत्रः श्रेष्ठिन्या दास्यै त्यक्तुं च सोऽर्पितः । दृष्टश्च श्रेष्ठिना पृष्टा किमेतदिति दास्यथ ॥३॥
असावनिष्टः श्रेष्ठिन्याऽत्याज्यतेति तयोदिते । श्रेष्ठी गृहीत्वा तं छन्नमन्यत्र [2]समवर्धयत् ॥४॥
**गङ्गदत्त** इति नामाऽदत्त तस्य शिशोः पिता । मातुश्छन्नं **ललितो**ऽपि लालयामास तं सदा ॥५॥
¶पितरं **ललितो**ऽन्येद्युरभ्यधत्त [3]मधूत्सवे । भोज्यते **गङ्गदत्तो**ऽद्य सह चेच्छोभनं तदा ॥६॥
श्रेष्ठ्यूचे यदि ते माता तं पश्येत् तन्न शोभनम् । **ललितो**ऽप्यब्रवीत् तात ! यतिष्ये तददर्शने ॥७॥
श्रेष्ठिनाऽपि तथा[4]ऽऽदिष्टो **ललितो गङ्गदत्तकम्** । तिर[5]स्करिण्याऽन्तरितं भोजनार्थं न्यै[6]षादयत् ॥८॥
पुरस्तात् स्वयमासीनौ तौ श्रेष्ठि-**ललितौ** तदा । भुञ्जानौ **गङ्गदत्ताय** भोज्यं छन्नं [7]स्म यच्छतः ॥९॥
वातोद्धूते[8] काण्डपटे श्रेष्ठिनी तं ददर्श च । [9]केशैः कृष्ट्वा कुट्टयित्वा गृहस्रोतसि चाऽक्षिपत् ॥१०॥
उद्विग्नौ श्रेष्ठि-**ललितौ** श्रेष्ठिन्याश्छन्नमेव तम् । स्नपयित्वाऽबोधयतां **गङ्गदत्तं** महामती ॥११॥
¶तदा च साधवस्तत्र भिक्षार्थं समुपागताः । पृष्टाश्च ताभ्यां श्रेष्ठिन्यास्तत्पुत्रद्वेषकारणम् ॥१२॥
अथैकः साधुरित्याख्यदेकस्मिन् सन्निवेशने । अभूतां भ्रातरौ तौ तु बहिः काष्ठार्थमीयतुः ॥१३॥
काष्ठैर्भृत्वा तत्र[10] [11]गन्त्रीमग्रस्थो ज्येष्ठ आपतन् । ददर्श पथि वे[12]ल्लन्तीं **चक्रे[13]लुण्डां** महोरगीम् ॥१४॥
सोऽप्यवोचत् कनीयांसं गन्त्र्याः सारथि[14]मैत्र रे ! । गन्त्रीतो रक्षणीयेयं **चक्रै[15]लुण्डा** वराकिका ॥१५॥
तच्छ्रुत्वा सर्पिणी साऽपि हृष्टा[16] विश्वासभागभूत् । तत्राऽऽयातः कनिष्ठस्तां दृष्ट्वा चैवमवोचत ॥१६॥
ज्येष्ठेन रक्षिताऽस्तीयं तथाऽप्यस्या उपर्यहम् । नेष्ये गन्त्रीं श्रोतुमेतदस्थिभङ्गस्वरं मुदा ॥१७॥
तथा चक्रे स च क्रूरस्तच्छ्रुत्वा साऽपि पन्नगी । कोऽप्येष मम वैरीति चिन्तयन्ती व्या(व्य?)पद्यत ॥१८॥
सा जज्ञे तव भार्येयं ज्येष्ठो भ्राता विपद्य सः । अस्याः सूनु**र्ललितो**ऽभूत् प्रियः प्राग्जन्मै[17]ककर्मणा ॥१९॥
सोऽयं मृत्वा कनिष्ठोऽस्या अनिष्टः पूर्वकर्मणा । **गङ्गदत्तः** समुत्पेदे प्राक्तनं कर्म नाऽन्यथा ॥२०॥
ततो विरक्ता जगृहुः पिता पुत्रौ च ते व्रतम् । जग्मतुः श्रेष्ठि-**ललितौ महाशुक्र**मुभौ दिवम् ॥२१॥
तत्तु मातुरनिष्टत्वं **गङ्गदत्तः** पुनः स्मरन् । वि[18]श्ववाल्लभ्यनिदानी **महाशुक्रं** [19]दिवं ययौ ॥२२॥
¶ततश्च **ललित**जीवो **महाशुक्रात्** परिच्युतः । **वसुदेवस्य** भार्याया **रोहिण्या** उदरेऽभवत् ॥२३॥
गजा-ऽब्धि[2]-सिंह[3]-शशि[4]नो विशतो **रोहिणी**मुखे । स्वप्नेऽपश्यन्निशाशेषे हलभृज्जन्मसूचकान् ॥२४॥
**रोहिणी** रोहिणीशाभं समये सुषुवे सुतम् । तस्य जन्मोत्सवं चक्रू राजानो **मागधादयः** ॥२५॥
**राम** इत्यभिरामं च तस्य नामाऽकरोत् पिता । क्रमाच्च ववृधे **रामः** सर्वेषां रमयन् मनः ॥२६॥
जग्राह च कलाः सर्वा **रामो** गुरुजनान्तिके । अम्लानप्रतिभादर्शसङ्क्रान्तसकलागमः ॥२७॥
¶अथाऽन्यदा **वसुदेव-कंसा**दिपरिवारितम् । आगात् **समुद्रविजयं** स्वच्छन्दो **नारदो** मुनिः ॥२८॥
**समुद्रविजयः कंसो वसुदेवो**ऽपरेऽपि च । अभ्युत्थाय तमानर्चुरुद्यन्तमिव भास्करम् ॥२९॥
तेषां च पूजया प्रीतः क्षणं स्थित्वा च **नारदः** । उत्पपाताऽन्यतो गन्तुं स्वैरचारी सदा हि सः ॥३०॥

---

१. **कालक्रमेण द्वितीयो** ता० । २. **तमवर्ध०** खं० २ । ३. बसन्तोत्सवे । ४. **तदा०** ला० । ५. जवनिकया । ६. **न्यषेद०** मु० । ७. **च** मु० । ८. **०द्धूतेऽकाण्ड०** मु० । ९. **केशे** खं० २ । १०. **तथा** मु० । ११. शकटम् । १२. लुठन्तीम् । १३. **चक्र०** मु० र० । १४. **सारथिमग्रतः** मु० । १५. **चक्र०** मु० र० । १६. **हृष्ट्वा** खं० २ । १७. **०कर्मणः** ता०सं०ला० । १८. 'विश्ववल्लभो भविष्यामी'ति निदानकारी । १९. **०शुक्रदिवं** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶कोऽसाविति च **कंसेन** पृष्टोऽवादीदिदं नृपः । पुरादस्माद् बहिर्**यज्ञयशाः** प्राक् तापसोऽभवत् ॥३१॥
**यज्ञदत्ता** तस्य भार्या **सुमित्रो** नाम नन्दनः । अभूत् पत्नी **सुमित्रस्य** नाम्ना **सोमयशा** इति ॥३२॥
मध्याज्**जृम्भक**देवानां देवश्च्युत्वाऽऽयुषः क्षये । आगात् **सोमयशः**[1]कुक्षौ सञ्जज्ञे **चैष नारदः** ॥३३॥
एकाहं[2] तापसास्ते चोपोष्याऽहन्यपरे पुनः । उपेत्य वनमुञ्छेन[3] पारयन्ति सदाऽपि हि ॥३४॥
तेऽन्यदा ययुरुञ्छायाऽशोकद्रौ[4] न्यस्य **नारदम्** । ददृशुर्**जृम्भका**स्ते च तं बालमसमद्युतिम् ॥३५॥
प्राग्जन्ममित्रमवधेर्ज्ञात्वा ते **नारदं** तदा । अस्तम्भयन्नशोकस्य छायां तदुपरिस्थिताम् ॥३६॥
ततो ययुः स्वकार्याय सिद्धार्था वलितास्तु ते । तं दृष्ट्वा जगृहुः स्नेहाद् **वैताढ्याद्रौ** च निन्यिरे ॥३७॥
तैर्देवैः स्तम्भितच्छायः सोऽशोकस्तत्प्रभृत्यपि । छायावृक्ष इति ख्यातो बभूव पृथिवीतले ॥३८॥
**जृम्भकैः** पालितो बालः स **वैताढ्याद्रि**कन्दरे । शिक्षितश्चाऽष्टवर्षः सन् विद्याः **प्रज्ञप्तिका**दिकाः ॥३९॥
ताभिश्च व्योमगमनो नवमो **नारदो** मुनिः । एतस्यामवसर्पिण्यामयं चरम[5]विग्रहः ॥४०॥
मुनिना **सुप्रतिष्ठेन** त्रिकालज्ञानशालिना । उत्पत्तिर्**नारद**मुनेरियं हि कथिता मम ॥४१॥
कलिप्रियः प्रकृत्याऽयमवज्ञातश्च कुप्यति । एकत्र चाऽनवस्थायी सर्वत्राऽपि हि पूज्यते ॥४२॥
¶**कंसेना**ऽन्येद्युराहूतः स्नेहादा**नकदुन्दुभिः** । **दशार्हेश**मनुज्ञाप्य **मथुरायां** ययौ पुरि ॥४३॥
**कंस**स्तत्राऽन्यदा **शौरि**मूचे **जीवयशो**ऽन्वितः । गरीयस्यस्ति नगरी नामतो **मृत्तिकावती** ॥४४॥
तस्यां मम पितृव्योऽस्ति **देवको** नाम भूपतिः । **देवकी** नाम तस्याऽस्ति देवकन्योपमा सुता ॥४५॥
गत्वा परिणय त्वं तामेषोऽस्म्यनुचरस्तव । मा मे प्रणययाच्ञाया अमुष्याः खण्डनं कृथाः ॥४६॥
दाक्षिण्यनिधिरित्युक्तो **दशार्हो** दशमः स तु । चचाल सह **कंसेन** मार्गे चैक्षिष्ट **नारदम्** ॥४७॥
विधिना **शौरिकंसाभ्या**मर्चितो **नारदो** मुनिः । प्रीतोऽपृच्छन् कुतो हेतोः कुत्र वा चलितौ युवाम् ? ॥४८॥
उवाच **शौरिः कंसेन** सुहृदा चालितोऽस्म्यहम् । परिणाययितुं कन्यां **देवकीं देवकात्म**जाम् ॥४९॥
जगाद **नारदः** साधु **कंसेना**ऽऽरब्धमीदृशम् । निर्मायाऽप्यनुरूपाणां योगे धाताऽप्यपण्डितः ॥५०॥
रूपेणाऽप्रतिरूपस्त्वं **वसुदेव** ! यथा नृषु । नारीषु **देवक**सुता तथा सा खलु **देवकी** ॥५१॥
परिणीतास्त्वया बह्व्यः खेचर्योऽपि हि कन्यकाः । असारा मंस्यसे[7] तास्तु नूनं [8]सम्प्रेक्ष्य **देवकीम्** ॥५२॥
अस्मिन्नुचितसंयोगे मा भूद् विघ्नः कुतोऽप्यतः । गत्वाऽऽख्यास्यामि **देवक्यै वसुदेव**[6] ! भवद्गुणान् ॥५३॥
¶इत्युक्त्वोत्पत्य स मुनिर्**देवकी**सदनं ययौ । तयाऽर्चितश्चाऽऽशीं[9]स्तेति **वसुदेवो** वरोऽस्तु ते ॥५४॥
**वसुदेवः** क इत्युक्तस्तया स मुनिरब्रवीत् । युवा **दशार्हो** दशमो विद्याधरवधूप्रियः ॥५५॥
किमन्यद् यस्य रूपेण तुल्या देवादयोऽपि न । **वसुदेवः** स इत्युक्त्वा **नारदर्षि**स्तिरोदधे ॥५६॥ युग्मम् ॥
¶तद्दि[11]रौ हृदि **देवक्या** विवेशाऽऽ**नकदुन्दुभिः** । [12]आदितो **मृत्तिकावत्यां पुर्यां** तु क्रमयोगतः ॥५७॥
**देवकेना**ऽर्चितौ तौ तु **शौरि-कंसौ** विवेकिनौ[13] । आसयित्वाऽऽसनेऽनर्घे[14] पृष्टावागमकारणम् ॥५८॥
**कंसो**ऽप्यवोचदुचितां **वसुदेवा**[15]य **देवकीम्** । प्रदापयितुमत्राऽऽगामिदमागमकारणम् ॥५९॥
अवदद् **देवको** नैष विधिः कन्यार्थमागमः । स्वयमेव वरस्येति दास्याम्यस्मै न **देवकीम्** ॥६०॥
एवं विलक्षौ तौ द्वाव[16]प्येयतुः शिबिरं निजम् । अन्तःपुरं प्राविशत् तु **देवकः** पृथिवीपतिः ॥६१॥
¶नमस्कृतोऽथ **देवक्या देवकः** परया मुदा । अनुरूपं वरं पुत्रि ! लभस्वेत्याशिषं[10] ददौ ॥६२॥
आख्यच्च **देवको देव्यै वसुदेवाय देवकीम्** । अद्य दापयितुं **कंस** उद्युक्तो मामयाचत ॥६३॥
**देवकीं वसुदेवाय** नाऽदां तद्विरहासहः । तच्छ्रुत्वा व्यषदद् **देवी** रुरोदोच्चैश्च **देवकी** ॥६४॥

---

१. **सोमयशाः०** खं० २ । २. एकदिनम् । ३. धान्यकणादानेन । ४. **०याऽशोकाधो** ता० सं० । **०याऽशोकांह्रौ** की० ला० । ५. चरमशरीरः । ६. वसुदेवः । ७. **मंस्यते** ता०सं०ला० । **मन्यसे** मु० । ८. **नूनं तां प्रेक्ष्य** खं० २ । ९. **रम्यानिव भ०** खं० २ । १०. आशिषं ददौ । ११. **तद्दिनाद् हृदि** खं० २ । १२. **आयातौ** र० **आगतो** खं० २, ला० । **आयातो** खं० १, सू० । १३. **विवेकिनौ** खं० २ । १४. **०नर्घ्ये** खं० १, ला० सू० । १५. **वसुदेवस्य** खं० २ । १६. **द्वावपीयतुः** खं० १-२, सू० विना ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**देवको**ऽपि तयोर्भावं सम्यक्ज्ञात्वैवमब्रवीत् । अलं विषादेन युवां प्रष्टुं ह्यहमिहाऽऽगमम् ॥६५॥
**देव्यप्यूचे वसुदेवो देवक्या** उचितो वर: । पुण्यैरस्या: स्वयमसावागाद् वरणहेतवे ॥६६॥
इत्युक्तो **देवक: कंस-वसुदेवौ** स्वमन्त्रिणा । सद्य: [1]सम्मानयामास स्वयं पूर्वापमानितौ ॥६७॥
जज्ञे विवाह: पुण्येऽह्नि **देवकी-वसुदेवयो:** । तारं[2]तारं गीयमानै[3]र्नैर्वैर्धवलमङ्गलै: ॥६८॥
**देवको वसुदेवाय** ददौ स्वर्णादि भूरिश: । दशगोकुलनाथं च **नन्दं** गोकोटिसंयुतम् ॥६९॥
¶**दशार्ह-कंसौ मथुरा**मीयतुर्नन्दसंयुतौ । सुहृद्विवाहोपज्ञं चाऽऽरेभे **कंसो** महोत्सवम् ॥७०॥
पूर्वोपात्तव्रतश्चा**ऽतिमुक्त: कंसा**नुजो मुनि: । तप:कृशाङ्ग: **कंसौ**कस्यागात् पारणहेतवे ॥७१॥
तदा **जीवयशा: कंस**पत्नी मद्यवशंवदा । साधूत्सवदिनेऽमुष्मिन् देवराऽसि समागत: ॥७२॥
नृत्य गार्य[4]न्मया सार्धमित्यादि बहुधा तया । कण्ठे लगित्वा स मुनिरकदर्थि गृहस्थवत् ॥७३॥
**सो**ऽपि ज्ञानी शशंसैवं यन्निमित्तोऽयमुत्सव: । तद्गर्भ: सप्तमो हन्ता पति-पित्रोस्त्वदीययो: ॥७४॥
¶तां वाचं स्फूर्[5]र्जथुनिभां श्रुत्वा **जीवयशा** द्रुतम् । भयाद् गतमदावस्था तं मुमोच महामुनिम् ॥७५॥
गत्वा **कंसा**य साऽऽचख्यौ **कंसो**ऽप्येवमचिन्तयत् । मोघीभवेद् वज्रमपि न पुनर्मुनिभाषितम् ॥७६॥
न यावत् कोऽपि जानाति तावदा**नकदुन्दुभिम्** । सप्ताऽपि **देवकी**गर्भान् याचे स्वयम[6]नागतम् ॥७७॥
याचितो **देवकी**गर्भान् न चेद् दास्यति मे सुहृद् । तदाऽन्यथा यतिष्येऽहं यथा स्यात् क्षेममात्मन: ॥७८॥
विचिन्त्यैवं **मदावस्थां** नाटयन्नमदोऽपि स: । जगामोप**वसुदेवं** दूराद् विरचिताञ्जलि: ॥७९॥
अभ्युत्थाय **दशार्ह**स्तमर्हति स्म यथोचितम् । स्वपाणिना परामृश्य ससंभ्रममुवाच च ॥८०॥
सुहृत् ! प्राणप्रियो मेऽसि किञ्चिद् वक्तुमना इव ! प्रेक्ष्यसे च तदाऽऽचक्ष्व यद् ब्रवीषि करोमि तत् ॥८१॥
जगाद प्राञ्जलि: **कंस:** कृतार्थोऽग्रेऽप्यहं सखे ! । **जरासन्धाज्जीवयशो**दापनेन कृतस्त्वया ॥८२॥
[7]सप्तैतो **देवकी**गर्भान् जातमात्रान् मर्मा[8]ऽर्पये: । **वसुदेवो**ऽप्यृजुमनास्तत् तथा प्रत्यपद्यत ॥८३॥ युग्मम् ॥
वृत्तानभिज्ञा **देवक्य**प्यभ्यधादेवमस्त्विदम् । **वसुदेवसुता**नां च त्वत्सुतानां च नाऽन्तरम् ॥८४॥
त्वयैव ह्यावयोर्योगो व्यधायि विधिनेव भो: ! । किमद्याऽनधिकारीव हे **कंस** ! व्याकरोष्यद: ? ॥८५॥
**दशार्हो**ऽप्यवदत् सुभ्रु ! पर्याप्तं बहुभाषितै: । जातमात्रा: सप्त गर्भा: **कंसा**यत्ता भवन्तु ते ॥८६॥
प्रसादोऽयं **ममे**त्यूचे **कंस:** क्षीबोपदेशत: । समं **दशार्हेण** सुरां पीत्वा च स्वगृहं ययौ ॥८७॥
अश्रौषीन् मुनिवृत्तान्तं पश्चा**दानकदुन्दुभि:** । **कंसेन** छलितोऽस्मीति सत्यवागन्वतप्यत ॥८८॥
¶इतश्च भद्रि[10]लपुरे श्रेष्ठीभ्यो **नाग** इत्यभूत् । श्रेष्ठिनी **सुलसा** नाम परमश्रावकौ च तौ ॥८९॥
**अतिमुक्त**श्चारणर्षि: **सुलसा**यास्तु शैशवे । आचख्यौ यदसौ बाला नि[11]न्दुरेव भविष्यति ॥९०॥
तया च तपसाऽऽराधि **नैगमेषी** हरे: सुर: । तुष्टश्च याचित: पुत्रानूचे ज्ञात्वा तु सोऽवधे: ॥९१॥
अहं हि **देवकी**गर्भान् हन्तुं **कंसेन** याचितान् । निन्दोस्ते गर्भसञ्चारादर्पयिष्यामि धार्मिके[12]! ॥९२॥
इत्युक्त्वा निजशक्त्या स **देवकी-सुलसे** समम् । रजस्वले व्यधात् ते च समं गुर्व्यौ बभूवतु: ॥९३॥
समं च सुषुवाते ते मृतं गर्भं च **सौलसम्** । सञ्चार्य **देवकी**गर्भं **सुलसाया:** सुरो ददौ ॥९४॥
एवं तयोस्तु षड्गर्भान् स सुर: पर्यवर्तयत् । **कंसो**ऽपि निन्दुगर्भांस्तान् दृषद्यास्फालयद् दृढम् ॥९५॥
षट् च ते **देवकी**गर्भा: **सुलसाया:** स्वपुत्रवत् । गृहे सुखमवर्धन्त तस्या एव स्तनन्धया: ॥९६॥
नाम्ना**ऽनीकयशोऽनन्तसेनावजितसेनक: । निहतारिर्देवयशा: शत्रुसेनश्च** ते [13]त्वमी ॥९७॥
¶अथ **देवक्यृ**तुस्नाता सिंहा-ऽर्का-ऽग्नि-गज-ध्वजान् । विमान-पद्मसरसी निशान्ते स्वप्न[14] ऐक्षत ॥९८॥
च्युत्वा **शुक्राद् गङ्गदत्त**स्तस्या: कुक्षाववातरत् । गर्भं च धारयामास रत्नमाकरभूरिव ॥९९॥

---

१. **समानयामास** मु० । २. **तारतारं** मु० । ३. **मानैर्गीतै०** खं० २ । ४. **गाय मया** मु० र० । ५.वज्रनिर्घोषतुल्याम् । ६. **०मनागतान्** मु० । ७. **सप्तैतान्** ला०, **सप्तैतो** र० । ८. **ममार्पय** ता०सं०ला० पु० । ९. मत्तत्वमिषत: । १०. **भद्दिल०** मु० र० । ११. मृतवत्सा । १२. **धार्मिकि**! खं० १, ला० सू० । १३. **न्वमी** खं० २ । १४. **स्वप्नमै०** मु० र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुत्रं नभः[1]सिताष्टम्यां निशीथेऽसूत **देवकी** । **कृष्णं** सदेवसान्निध्यं शत्रुदृक्पातघातिनम् ॥१००॥
तद्गृह्यां देवताः **कंसा**युक्तान् यामिकपूरुषान् । स्वशक्त्या [3]स्वापयामासुरुपभुक्तविषानिव ॥१०१॥
**देवक्य**वोचदाहूय पतिं **कंसेन** पाप्मना । अमित्रेण मित्ररूपेणाऽसि वाचा नियन्त्रितः ॥१०२॥
जातं जातं सुतं मेऽसौ हन्ति तन्माययाऽप्यमुम् । रक्ष पुत्रं न मायाऽपि पाप्मने भ्रूणरक्षिणाम्[4] ॥१०३॥
**नन्द**स्य गोकुले नीत्वा मुञ्चेमं मम बालकम् । गृहे मातामहस्येव तत्र वर्धिष्यते ह्यसौ ॥१०४॥
साधु साध्विति तां जल्पन् स्नेहार्द्रो **यदुपुङ्गवः** । बालमादाय निरगात् तद्गृहात् सुप्तयामिकात् ॥१०५॥
दधुस्तस्योपरि च्छत्रं पुष्पवृष्टिं च चक्रिरे । उद्दण्डैरष्टभिर्दीपैर्मार्गोद्योतं च देवताः ॥१०६॥
धवलर्षभरूपेण भूत्वाऽग्रे तस्य देवताः । द्वाराण्युद्घाटयामासुः[5] पुर्या अन्यैरलक्षितम् ॥१०७॥
प्राप्तश्च गोपुरे[6] **शौरिरुग्रसेनेन** भूभुजा । पृष्टश्च पञ्जरस्थेन किमेतदिति विस्मयात् ॥१०८॥
**कंसस्य** प्रत्यनीकोऽयमिति **शौरि**स्तमर्भकम् । दर्शयन्**नुग्रसेना**य सहर्षमिदमभ्यधात् ॥१०९॥
त्वद्द्विषो निग्रहोऽमुष्मादमुष्माच्च तवोदयः । भविष्यति परं राजन्नाऽऽख्येयं कस्यचित् त्वया ॥११०॥
एवमस्त्विति तेनोक्ते **शौरिर्नन्द**गृहे ययौ । **नन्द**भार्या **यशोदा**ऽपि तदैव सुषुवे सुताम् ॥१११॥
सुतं दत्त्वा **यशोदायै शौरि**रादाय तत्सुताम् । आनीय **देवकी**पार्श्वे सुतस्थानेऽमुचत् क्षणात् ॥११२॥
**शौरि**श्च निर्ययौ ते च प्रबुद्धाः **कंस**पूरुषाः । किं जातमिति जल्पन्तो ददृशुस्तत्र तां सुताम् ॥११३॥
तां **कंस**स्याऽऽर्पयंस्तेऽथ दध्यौ **कंसो**ऽपि यो मम । मृत्यवे सप्तमो गर्भः स स्त्रीमात्रमभूदसौ ॥११४॥
मन्ये मुनिवचो मिथ्याऽनया किं हतयेति सः । छिन्ननाशापुटां कृत्वा **देवक्या**स्तां समार्पयत् ॥११५॥
¶कृष्णाङ्गत्वात् **कृष्ण** इति नाम्नाऽऽहूतः स बालकः । रक्ष्यमाणो देवताभिर्ववृधे **नन्द**वेश्मनि ॥११६॥
**देवकी** तु गते मासे **वसुदेव**मभाषत । द्रष्टुमुत्कण्ठिता पुत्रं तत्र यास्यामि गोकुले ॥११७॥
ऊचे **शौरि**रकस्मात् त्वं यान्ती **कंसेन** लक्ष्यसे । उत्पाद्य कारणं तस्माद् गन्तुं **देवकि** ! युज्यते ॥११८॥
ततोऽन्विता बहुस्त्रीभिः सर्वतो गोपथेन गाः । अर्चन्ती गोकुलं गच्छे**र्देवक्य**पि तथाऽकरोत् ॥११९॥
श्रीवत्सलाञ्छितोरस्कं नीलोत्पलदलद्युतिम् । उत्फुल्लपुण्डरीकाक्षं चक्राद्यङ्ककर-क्रमम् ॥१२०॥
नीलरत्नमिवोन्मृष्टं **यशोदो**त्सङ्गवर्तिनम् । ददर्श हृदयानन्दं नन्दनं तत्र **देवकी** ॥१२१॥ युग्मम् ॥
गोपूजाव्याजतो नित्यं ययौ तत्र च **देवकी** । ततः प्रभृति गोपूजाव्रतं प्रववृते जने ॥१२२॥
तदा च पितृवैरेण [7]**सूर्पक**स्याऽऽत्मजे उभे । **वसुदेवा**पकारायाऽक्षमे **शकुनि-पूतने** ॥१२३॥
शाकिन्याविव पापिष्ठे **यशोदा-नन्द**वर्जितम् । **कृष्ण**मेकाकिनं हन्तुमीयतुस्तत्र गोकुले ॥१२४॥ युग्मम् ॥
**शकुनिः** [8]शकटं चक्रे **कृष्णो**परि कटुस्वरा । विषलिप्तं **पूतना** तु स्तनं **कृष्णा**ननेऽक्षिपत् ॥१२५॥
**कृष्ण**सान्निध्यकारिण्यो देवतास्तत्क्षणादपि । तेनैव शकटेनोभे ते प्रहृत्य व्यपादयत् ॥१२६॥
**नन्द**स्तत्राऽऽगतोऽपश्यत् **कृष्ण**मेकाकिनं स्थितम् । पर्यस्तं शकटं तच्च खेचर्यौ ते च मारिते ॥१२७॥
मुषितोऽस्मीति जल्पंश्च **कृष्ण**मङ्के निधाय सः । साक्षेपमूचे गोपालान् [9]पर्यस्तः शकटः कथम् ? ॥१२८॥
राक्षस्याविव रक्षांस्ये[10] के चैते गतजीविते ? । वत्सो ममाऽयमेकाकी स्वभाग्येनैव जीवितः ॥१२९॥
गोपा अप्यूचिरे स्वामिन् ! बालेन बलिना तव । पर्यस्तं शकटमिदमेते [11]चैकेन मारिते ॥१३०॥
तच्छ्रुत्वा [12]**नन्द** ऐक्षिष्ट सर्वेष्वङ्गेषु **केशवम्** । अक्षताङ्गं च तं [13]प्रेक्ष्य **यशोदा**मित्यभाषत ॥१३१॥
कथमेकाकिनं पुत्रं मुक्त्वा यास्यन्यकर्मसु ? । स्तोकान्मुक्तोऽयमद्यैवाऽपायेषु निपतन्निह ॥१३२॥
सर्पिर्घटेष्वपि[14] लुठत्सूज्झित्वा **कृष्णमे**ककम् । न त्वया क्वाऽपि गन्तव्यं पर्याप्तं तेऽन्यकर्मभिः ॥१३३॥
इति श्रुत्वा **यशोदा**ऽपि हा ! हताऽस्मीति भाषिणी । आघ्नाना पाणिना वक्षोऽभ्येत्य **कृष्ण**मुपाददे ॥१३४॥

१. श्रावण वदि ८ । २. तत्पक्षपातिनः । ३. **स्थापया०** खं० २ । ४. **भ्रूणरक्षणात्** मु० र० । ५. **द्वारमुद्घा०** खं० २ । ६. दुर्गद्वारे । ७. **सूर्पनख्या०** मु० विना सर्वप्रतिषु । ८. **०शकटारूढाधःस्थे कृष्णे कटु व्यरौत्** खं० १, सू० विना । ९. **पर्यस्तं शकटं** ता०सं० । १०. **रक्ताक्षे** र० । ११. **चैतेन** खं० २ । १२. **नन्दः प्रैक्षिष्ट** मु० र० । १३. **संप्रेक्ष्य** ता०सं०की० । १४. घृतघटेषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न क्षतोऽसीति पृच्छन्ती सर्वाङ्गेक्षणपूर्वकम् । **कृष्णं** चुचुम्ब शिरसि **यशोदा** सस्वजे च तम् ॥१३५॥
आदरेण **यशोदा** तं नित्यं स्वयमधारयत् । उत्साहशील: **कृष्णस्तु** छलेनेतस्ततो ययौ ॥१३६॥
¶दाम्नोदरेऽन्यदा कृष्णं तद्दामान्तमुदूखले[1] । बद्ध्वा तद्यानभीता सा [2]प्रतिवेश्मगृहं ययौ ॥१३७॥
तदा च **सूर्पक**सुतो वैरं पैतामहं स्मरन् । तत्रैत्याऽन्योऽन्यमासन्नयमलार्जुनतां[3] ययौ ॥१३८॥
**कृष्णं** सोलूखलं[4] पेष्टुं स तयोश्चाऽन्तरेऽनयत् । भङ्क्त्वाऽर्जुनतरू[5] जघ्ने **कृष्ण**देवतयाऽथ स: ॥१३९॥
कलभेनेव **कृष्णे**नोन्मूलितौ यमलार्जुनौ । इति गोपमुखात् श्रुत्वा **नन्दो**ऽभ्यागाद् **यशोद**या ॥१४०॥
तौ धूलिधूसरं **कृष्णं** स्नेहान्मूर्ध्नि[6] चुचुम्बतु: । **दामोदरे**त्यूचिरे [7]च तं गोपा दामबन्धनात् ॥१४१॥
वल्लवैर्वल्लवीभिश्च सोऽत्यन्तं प्राणवल्लभ: । उरस्यङ्के शिरसि चाऽऽरोप्यते स्म दिवानिशम् ॥१४२॥
जग्राह दधिसाराणि मन्थनीभ्य: स चापलात् । अवार्यमाण: स्नेहार्द्रैर्गोपैस्तत्कौतुकेक्षिभि:[8] ॥१४३॥
व्याहरन् विहरन् वाऽपि प्रहरन्नाहरन्नपि । **यशोदा-नन्द**-गोपानामानन्दाय बभूव स: ॥१४४॥
अपायभीतास्ते धर्तुं तं यान्तं जातु नाऽशकन् । अन्वयु: केवलं स्नेहगुणपाशनियन्त्रिता: ॥१४५॥
¶**दशार्हो**ऽप्यशृणोत् तेन हते **शकुनि-पूतने** । पर्यस्तं शकटं भग्नौ तौ चाऽपि यमलार्जुनौ ॥१४६॥
चिन्तयामास चैवं स गोपितोऽपि मया सुत: । स्वौजसा प्रथमानोऽस्ति मा ज्ञासीत् **कंस** एष तम् ॥१४७॥
ज्ञात्वाऽपि किञ्च माऽलं[10] भूत् कर्तुं सोऽस्मिन्नमङ्गलम् । तत: **कृष्ण**स्य साहाय्ये सुतेभ्य: प्रेषयामि [11]कम् ? ॥१४८॥
**अक्रूराद्या:** क्रूरबुद्धे: **कंस**स्य विदितौ[12] हि ते । आदेष्टुं साधु **राम**स्तदद्याऽप्यविदितोऽस्य[13] स: ॥१४९॥
निश्चित्यैवं **कोशलाया रोहिणीं राम**संयुताम् । **शौरि**रानाय्य [14]सम्भाष्य प्रैषी[15]च्छौर्यपुरे पुरे ॥१५०॥
**राम**माहूय सोऽन्येद्यु: कथयित्वा यथातथम् । शिक्षां दत्त्वा सुतत्वेनाऽर्पय**न्नन्द-यशोद**यो: ॥१५१॥
¶तौ द्वौ दशधनुस्तुङ्गौ रेमाते सुन्दराकृती । निर्निमेषं वीक्ष्यमाणौ गोपीभिर्मुक्तकर्मभि: ॥१५२॥
**कृष्णो**ऽध्यैष्ट धनुर्वेदमन्या अप्यखिला: कला: । **राम**स्य पार्श्वे गोपोपनीतोपकरण: सदा ॥१५३॥
कदाचित् सुहृदौ भूत्वा शिष्याचार्यौ कदापि तौ । विविधं विचिचेष्टाते क्षणमप्यवियोगिनौ ॥१५४॥
गच्छतो मत्तवृषभान् पुच्छे जग्राह **केशव:** । **रामो** भ्रातृबलं जानन्नुदासीन इवैक्षत ॥१५५॥
यथा यथा हि ववृधे **कृष्ण**स्तत्र तथा तथा । गोपीनां [16]मान्मथो जज्ञे विकारस्तन्निरीक्षणात् ॥१५६॥
तं मध्येकृत्य [17]हल्लीसं चक्रुर्गोपालयोषित: । भ्रमन्त्य: परितोऽम्भोजं भ्रमर्य इव निर्भरम् ॥१५७॥
तं पश्यन्त्यो यथा गोप्यो नयने न ह्यमीलयन् । **कृष्ण** ! **कृष्णे**ति जल्पन्त्यस्तथैवोष्ठपुटे अपि ॥१५८॥
**कृष्णे** गतमनस्कत्वात् पतिता अपि दोहनी:[18] । अजानन्त्यो गवां दोहं भुवि चक्रु: कदाऽपि ता: ॥१५९॥
**कृष्णं** पराङ्मुखं यान्तं सम्मुखीकर्तुमाशु ता: । अस्थानेऽनाटयंस्त्रासं त्रस्तत्राणपरो हि स: ॥१६०॥
सिन्दुवारादिदामानि ग्रथित्वा गोपिका: स्वयम् । स्वयंवरस्रज इव निदधु: **कृष्ण**वक्षसि ॥१६१॥
स्खलितं गीत-नृत्तादौ[19] चक्रुस्ता बुद्धिपूर्वकम् । **कृष्णा**च्छिक्षापदेशेन [20]प्रसादालापलिप्सव: ॥१६२॥
येन तेन प्रकारेण जजल्पु: पस्पृशुश्च तम् । अगोपितविकारास्ता गोपेन्द्रं गोपयोषित: ॥१६३॥
मयूरपिच्छाभरण: **कृष्णो** गोपालगूर्जरी:[21] । गोपालीभि[22]रविच्छिन्नं पूर्यमाणश्रुतिर्जगौ[23] ॥१६४॥
**कृष्णो**ऽत्यगाधवारिस्थान्यपि पद्मानि लीलया । तरन् हंस इवोद्धृत्य गोपीभ्योऽदत्त याचित: ॥१६५॥
दृष्टो हरति नश्चित्तमदृष्टो जीवितं पुन: । भवद्भ्रातेत्युपालम्भं ददू **रामाय** गोपिका: ॥१६६॥
गिरिशृङ्गस्थितो वेणुं वादयन् मधुरस्वरम् । नृत्यंश्च हासयामास **रामं रामा**नुजो मुहु: ॥१६७॥

---

१. **०मुलूखले** ला०ता०सं० । २. **प्रातिवेश्मगृहे** मु० र० । **प्रतिवेशि०** खं० १, ला०सू० । **प्रतिवेश०** खं० २ । ३. समीपस्थ-अर्जुनवृक्षद्वयताम् । ४. **सोदूखलं** मु० र० । ५. **०र्जुनतरून्** खं० १, ला० । ६. **मोहान्मूर्ध्नि** मु० । ७. **०रेऽतस्तं गोपा०** खं० २ । ८. **०केक्षुभि:** मु० । ९. **कंसो मा०** खं० १ । १०. **नाऽलं** ला०पु०पा०की० । ११. **किम्** खं० २ । १२. **विदिताश्च ते** मु० । १३. **०विदितोऽस्ति स:** ता०सं० । १४. **संलाप्य** ता०सं० । १५. **प्रैषीत् सूर्यपुरे** ता०सं० । १६. कामस्य । १७. **स्त्रीणां** रासक: । १८. 'दोणी' इति भाषायां, दुग्धभाण्डम् । १९. **०नृत्यादौ** मु० । २०. **प्रासादा०** खं० २ । २१. गोपालगीतिका: । **गुर्जरीम्** खं० २ । २२. **गोपिकाभि०** ला० । २३. **०श्रुतिं जगौ** खं० १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गायन्तीषु च गोपीषु **कृष्णगोपे** च नृत्यति । हस्ततालं [1]ददौ **रामो** रङ्गाचार्य इवोद्भटः ॥१६८॥
एवं च क्रीडतोस्तत्र गोपयो **राम-कृष्णयोः** । एकादश स[2]मा जग्मुः सुषमाकालवत् सुखम् ॥१६९॥
¶इतश्च श्री[3]**शौर्यपुरे समुद्रविजय**प्रिया । **शिवा**ऽपश्यन्निशाशेषे महास्वप्नांश्चतुर्दश ॥१७०॥
गजो-क्ष-सिंह-श्री-दाम-चन्द्रा-र्क-ध्वज-वार्घटौ[4] । पद्मसरो-ब्धि-विमान-रत्नपुञ्जा-ऽग्नयस्तु ते ॥१७१॥
तदा च कार्तिके कृष्णद्वादश्यां त्वा[5]ष्ट्रगे विधौ । च्युत्वाऽ**पराजितात् शङ्खः शिवा**कुक्षाववातरत् ॥१७२॥
नारकाणामपि सुखमुद्योतश्च जगत्त्रये । तदाऽभूदावश्यकं हि कल्याणेष्वर्हतां[6]मदः ॥१७३॥
प्रबुद्धा च **शिवादेवी** पत्युः स्वप्नान् शशंस तान् । स्वप्नार्थं प्रष्टुमाहूतः **क्रोष्टुकि**स्तत्र चाऽऽययौ ॥१७४॥
चारणश्रमणश्चैकस्तत्र स्वयमुपाययौ । नृपेणोत्थाय सोऽवन्दि न्यषादि च महासने ॥१७५॥
स**क्रोष्टुकि**र्मुनिः पृष्टो राज्ञा स्वप्नफलं तदा । [7]आख्याद् यत् ते सुतो भावी तीर्थकृत्त्रिजगत्पतिः ॥१७६॥
इत्याख्याय जगामर्षी राजा राज्ञी च तौ मुदम् । बिभराञ्चक्रतुर्भूरि स्नाताविव सुधारसैः ॥१७७॥
देवी च धारयामास गर्भं गूढं सुखावहम् । प्रत्यङ्गमपि लावण्य-सौभाग्योत्कर्षदायिनम् ॥१७८॥
श्रावणश्वेतपञ्चम्यां निशीथे त्वाष्ट्रगे विधौ । सा देवी सुषुवे सूनुं कृष्णाभं शङ्खलाञ्छनम् ॥१७९॥
¶षट्पञ्चाशद्दिक्कुमार्यः स्वस्वस्थानेभ्य एत्य ताः । चक्रिरे सूतिकर्माणि **शिवादेवी**-जिनेन्द्रयोः ॥१८०॥
एत्य शक्रः पञ्चरूपो रूपेणैकेन च प्रभुम् । आददे चामरे द्वाभ्यामेकेन च्छत्रमुज्ज्वलम् ॥१८१॥
एकेनोल्लालयन् वज्रं वल्गन्नर्त्तकवत्[8] पुरः । जगाम **मेरु**शिखरेऽ**तिपाण्डुकम्बलां** शिलाम् ॥१८२॥ युग्मम् ॥
स्वाङ्के स्वामिनमारोप्य सिंहासन इवोच्चकैः । अधिसिंहासनं तत्र निषसाद पुरन्दरः ॥१८३॥
अथाऽ**च्युत**प्रभृतयः सुरेन्द्रास्तत्र च क्षणात् । जिनेन्द्रं स्नपयामासुस्त्रिषष्टिरपि भक्तितः ॥१८४॥
**ईशानाङ्के** स्थापयित्वा **शक्रो**ऽपि **स्वामिनं** ततः । विधिनाऽस्नपयद् दिव्यैश्चाऽऽनर्च कुसुमादिभिः ॥१८५॥
विधायाऽऽरात्रिकं भर्तुः प्रणम्य च कृताञ्जलिः । इति स्तोतुं समारेभे भक्तिनिर्भरवाग् **हरिः**[9] ॥१८६॥
¶"शिवगामिन् ! **शिवा**कुक्षिशुक्तिमुक्तामणे ! प्रभो ! । शिवा[10]नामेकनिलय ! भगवंस्त्वं शिवङ्करः ॥१८७॥
तुभ्यमभ्यर्णमोक्षाय [11]समक्षाशेषवस्तवे । विविधर्द्धिनिधानाय द्वाविंशायाऽर्हते नमः ॥१८८॥
**हरिवंशः** पवित्रोऽयं पवित्रा **भारती** च भूः । यस्मिंश्चरमदेहस्त्वमवातारीर्जगद्गुरो ! ॥१८९॥
कृपा[12]या एक आधारो ब्रह्म[13]णश्चैकमास्पदम् । ऐश्वर्यस्याऽऽश्रयश्चैकस्त्वमेव त्रिजगद्गुरो ! ॥१९०॥
भवतो दर्शनेनैवाऽतिमहिम्ना जगत्पते ! । देहिनां मोहविध्वंसाद् देशनाकर्म सिध्यति ॥१९१॥
विनैव[14] कारणं त्राता विना हेतुं च वत्सलः । विना निमित्तं भर्ता त्वं **हरिवंशै**कमौक्तिक ! ॥१९२॥
अद्याऽ**पराजिता**देतद् **भरत**क्षेत्रमुत्तमम् । शर्मणे यत्र लोकस्य बोधिदस्त्वमवातरः ॥१९३॥
नित्यं भजन्तु त्वत्पादा मानसे मम हंसताम् । चरितार्था भवतु च त्वद्गुणस्तवनेन गीः" ॥१९४॥
इति स्तुत्वा जगन्नाथमादाय च पुरन्दरः । मुमोच श्री**शिवादेवी**पार्श्वे नीत्वा यथास्थिति ॥१९५॥
स्वा[15]मिनेऽप्सरसो धात्री पञ्चाऽऽदिश्याथ वासवः । कृत्वा **नन्दीश्वरे** यात्रां निजं स्थानमुपाययौ ॥१९६॥
¶प्रातरर्कमिवोद्यन्तं प्रेक्ष्य सूनुं महाद्युतिम् । जन्मोत्सवं प्रमुदितः **समुद्रविजयो**ऽकरोत् ॥१९७॥
स्वप्ने रिष्टमयी दृष्टा चक्रधाराऽत्र गर्भगे । मात्रा तस्याऽ**रिष्टनेमि**रित्याख्यां तत्पिता व्यधात् ॥१९८॥
**अरिष्टनेमि**नो जन्म श्रुत्वा हर्षप्रकर्षतः । **मथुरायां वसुदेवा**दयश्चक्रुर्महोत्सवम् ॥१९९॥
¶**वसुदेव**गृहेऽन्येद्युर्**देवकीं** [16]द्रष्टुमापतन् । तां छिन्नैकघ्राणपुटां **कंसः** कन्यामुदैक्षत ॥२००॥
भीतोऽथ **कंसो** वेश्मैत्याऽपृच्छन्नैमित्तिकोत्तमम् । सप्तमाद् **देवकी**गर्भान्मुनिनोक्तं वृथाऽर्थो[17] न ? ॥२०१॥

१. **दधौ** ता०सं०पु०ला०छा०आ० । २. वर्षाणि । ३. **श्रीसूर्यपुरे** पु० ता० सं० मु० । ४. पूर्णकुम्भः । ५. चित्रानक्षत्रस्थिते । ६. **०र्हतां यतः** खं० २ । ७. **आख्यद् य०** खं० २ । **आख्यच्च** ते ला० । ८. **बलान्नर्त्त०** मु० । नृत्यम् । ९. इन्द्रः । १०. कल्याणानाम् । ११. प्रत्यक्षाणि समग्रवस्तूनि यस्य तस्मै । १२. कृपानामेक ता०सं० । १३. ब्रह्मचर्यस्य । **१४. विनैककारणं** खं० १ । १५. **स्वामिनो०** खं.१-२, ला० विना । १६. **द्रष्टुमागतः** ला०मु० । १७. **वृथाथ तत्** खं० १, सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैमित्तिकोऽप्यभाषिष्ट न मृषा ऋषिभाषितम् । सप्तमो **देवकी**गर्भः क्वचिदस्ति तवाऽन्तकृत् ॥२०२॥
**अरिष्टो** यस्तवोक्षोऽस्ति **केशी** नाम महाहयः । खरमेषौ च दुर्दान्तौ मुञ्च **वृन्दावने**ऽथ तान् ॥२०३॥
[२]गिरिसारानप्यमून् यस्तत्र क्रीडन् यदृच्छया । हनिष्यति स हन्ता ते **देवक्याः** सप्तमः सुतः ॥२०४॥
अन्यच्च यत् क्रमायातं **शार्ङ्गं** धन्व त्वदोकसि । पूज्यमानं त्वज्जनन्या स एवाऽऽरोपयिष्यति ॥२०५॥
आख्यातं ज्ञानिना यत् तद् भविष्यति भविष्यतः । दोष्मतो **वासुदेवस्य** दुःस्पर्शमितरैर्जनैः ॥२०६॥
**कालियाहेः** स दमक**श्चाणूर**स्य च घातकः । **पद्मोत्तरं चम्पकं** च हनिष्यति तव द्विपौ ॥२०७॥
[३]स्वारिं ज्ञातुमथो **कंसो**ऽ**रिष्टादी**नमुचद् वने । **चाणूर-मुष्टिकौ** मल्लावादिदेश श्रमाय च ॥२०८॥
तदा शरद्य**रिष्टोक्षा** स रिष्टिमिव मूर्त्तिमत् । **अन्तर्वृन्दावनं** गर्जन् गोपलोकमुपाद्रवत् ॥२०९॥
शृङ्गाग्रेणोद्दध्रे गाः स तटीपङ्क्तिमिवोच्चकैः । [६]तुण्डाग्रेणाऽलोठयच्च सर्पिर्भाण्डान्यनेकशः ॥२१०॥
त्रायस्व **कृष्ण** ! **कृष्णे**ति **राम** ! **रामे**ति चोच्चकैः । अतिदीनो वल्लवानां तदा कलकलोऽभवत् ॥२११॥
**रामे**ण सह **गोविन्दः** किमेतदिति सम्भ्रमात् । धावितः पुरतोऽद्राक्षीत् तमुक्षाणं महौजसम् ॥२१२॥
कश्चिदर्थो न नो गोभिर्न चाऽऽज्यैरपि तिष्ठ तत् । इति वृद्धैर्निषिद्धोऽपि **कृष्ण** आह्वास्त तं वृषम् ॥२१३॥
विषाणे उन्नमय्योच्चैराकुञ्चितमुखो रुषा । उत्पुच्छयमानोऽ**रिष्टो गोविन्दा**याऽभ्यधावत ॥२१४॥
तं शृङ्गयोर्गृहीत्वाऽऽशु वालयित्वा च तद्गलम् । विधाय च निरुच्छ्वासम**रिष्ट**मवधी**द्धरिः** ॥२१५॥
मृत्याविव मृतिं नीतेऽ**रिष्टे** हृष्टाः समन्ततः । आनर्चुर्वल्लवाः **कृष्णं** सतृष्णास्तन्निरीक्षणे ॥२१६॥
¶**कृष्ण**स्य क्रीडतोऽन्येद्युः **केशी कंस**किशोरकः । कीनाश इव दुष्टाशो विवृतास्यः समाययौ ॥२१७॥
दन्तैर्वत्सतरान् गृह्णन्निघ्नन् गोर्गर्भिणीः खुरैः । भीषणं हेषमाणश्च स **कृष्णे**नाऽत्यतर्ज्यत ॥२१८॥
जिघत्सोः प्रसृते तस्य दन्तक्रकचदारुणे । मुखे वज्रोपमं बाहुं [१०]वलयित्वा **हरि**र्न्यधात् ॥२१९॥
आग्रीवं बाहुना तेन तथाऽदार्यत तन्मुखम् । परासुः स यथा जज्ञेऽ**रिष्ट**सार्थ इवोत्सुकः ॥२२०॥
**कंसस्य** [११]खर-मेषौ तु तत्राऽटन्तौ [१२]खरौजसौ । अन्येद्युर्लीलया **कृष्णो** निजघान महाभुजः ॥२२१॥
तानाकर्ण्य हतान् **कंसः** सम्यक् स्वारिं परीक्षितुम् । **शार्ङ्गं** पूजोत्सवव्याजात् स्थापयामास पर्षदि ॥२२२॥
तस्य चोपासिकां **सत्यभामां** [१३]जामिं कुमारिकाम् । चक्रे सदा सन्निहितामुत्सवं च प्रचक्रमे ॥२२३॥
एवं चाऽघोषयत् **कंसो** यः **शार्ङ्ग**मधिरोपयेत् । **सत्यभामा**महं तस्मै दास्ये सुरवधूपमाम् ॥२२४॥
श्रुत्वेदं तत्र सम्प्रापुर्दूरादपि महीभुजः । न चाऽऽरोपयितुं धन्वाऽलम्भूष्णुः कश्चिदप्यभूत् ॥२२५॥
¶तच्छ्रुत्वा **मदनवेगानन्दनो वसुदेवजः** । **अनाधृष्टि**र्वीरमानी वेगिनं रथमास्थितः ॥२२६॥
आगच्छन् गोकुले तत्र **राम-कृष्णौ** युतावुभौ । प्रेक्ष्योवास निशामेकामालपन् लालयंश्च तौ ॥२२७॥
प्रातश्च रथमारुह्या[१४]ऽनुजं **रामं** विसृज्य च । सोऽचलत् **कृष्ण**मादाय **मथुरा**मार्गदर्शकम् ॥२२८॥
मार्गे महाद्रुसङ्कीर्णे विलग्नस्तद्रथो वटे । तं च मोचयितुं नाऽल**मनाधृष्टि**र्बभूव सः ॥२२९॥
[१५]पत्तिस्तत्र व्रजन् **कृष्णो** लीलयोन्मूल्य तं वटम् । चिक्षेपाऽन्यत्र तदनु रथाध्वानमृजुं व्यधात् ॥२३०॥
**अनाधृष्टि**स्ततो हृष्टः प्रेक्ष्य तं तस्य विक्रमम् । उत्तीर्य परिरेभे तं रथे चाऽऽरोपयत् स्वयम् ॥२३१॥
क्रमादुत्तीर्य **कालिन्दीं** प्रविश्य **मथुरां** च तौ । तामनेकागतनृपां धनुष्पर्षदमीयतुः ॥२३२॥
¶अभ्यर्णे धनुषस्तस्याऽधिष्ठात्रीमिव देवताम् । तौ तां ददृशतुः **सत्यभामा**मम्भोजलोचनाम् ॥२३३॥
**कृष्णं** सतृष्णं पश्यन्ती **सत्यभामा**ऽपि तत्क्षणम् । तं वरं मनसा [१६]वव्रे मनोभ[१७]वशरातुरा ॥२३४॥

---

१. वृषभः । २. पर्वतान् इव बलवन्तः । ३. स्वकीयशत्रुम् । ४. अमङ्गलम् । ५. ०ग्रेणोत्क्षिपन् खं० १ । ६. मुखाग्रेण । ७. ०किसोरकः खं० २, ला० । अल्पवया हयः । ८. गावश्च ताः गर्भिण्यश्च गोगर्भिण्यः ताः । ९. दन्ता एव क्रकचः तेन दारुणे ॥ १०. **बालयित्वा** ता०सं०छा०की० ला०र०, खं० १-२, ला०सू०विना । ११. गर्दभ-मेण्ढकौ । १२. तीक्ष्णमोजो ययोस्तौ । १३. भगिनीम् । १४. कृष्णम् । १५. **पथि तत्र** खं० २ । कृष्णो मार्गदर्शकत्वेन पद्भ्यां चलन्नासीदिति गम्यते । १६. **दध्रे** पु० । १७. कामबाणेन पीडिता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनाधृष्टि**रथोपेत्योद्धरन्नपि हि तद्धनुः । पपात पिच्छि[1]लभ्रश्यत्पाद उष्ट्र इवाऽवनौ ॥२३५॥
तं शीर्णहारं निष्पिष्टमुकुटं भ्रष्टकुण्डलम् । **सत्यभामा** तदा[2]ल्यश्चाऽन्ये च स्मेरदृशोऽहसन् ॥२३६॥
तत्प्रहासासहः सद्यस्तद्धनुः पुष्पदामवत् । **दामोदर** उपादत्ताऽधिज्यीचक्रे च हेलया ॥२३७॥
तेन कुण्डलितेनाऽभाद् धनुषोद्दामतेजसा । [3]आखण्डलधनुर्दण्डेनेव [4]वार्षुकवारिदः ॥२३८॥
**अनाधृष्टिः** पितुर्वेश्म गत्वा तद् द्वारि **केशवम्** । मुक्त्वा रथस्थं मध्येऽगादिति पित्रे शशंस च ॥२३९॥
¶**शार्[5]ङ्गं** धन्व मया तातैकाकिनाऽप्यधिरोपितम् । यदन्यैः पार्थिवैः स्प्र[6]ष्टुमप्यशक्यत न क्वचित् ॥२४०॥
साक्षेपो **वसुदेव**स्तमूचे याह्यविलम्बितम् । त्वां धन्वारोपिणं ज्ञात्वा **कंसो** व्यापादयिष्यति ॥२४१॥
आकर्ण्य तद**नाधृष्टि**र्भीतो निर्गत्य वेश्मतः । जगाम सह **कृष्णेन** त्वरितं **नन्दगोकुले** ॥२४२॥
आपृच्छ्य **राम-गोविन्दौ** सोऽथ **शौ[7]र्यपुरे** ययौ । प्रवादश्चेत्यभून्न**न्दपुत्रे**णाऽऽरोपितं धनुः ॥२४३॥
चापाधिरोपणाद् दूनः **कंस**श्चापमहोत्सवम् । [8]अपदिश्य [9]नियुद्धाय मल्लान् सर्वान् समादिशत् ॥२४४॥
**वसुदेवेन** चाऽऽहूताः **कंस**दुर्भावेवेदिना । सर्वेऽपि स्वाग्रजाः सर्वेऽप्य**क्रूरा**द्याश्च सूनवः ॥२४६॥
**कंसे**नाऽपि हि सत्कृत्य मञ्चेषूच्चतरेषु ते[10] । उपावेश्यन्त भास्वन्त इव तेजोभिरुद्भटाः ॥२४७॥
मल्लयुद्धोत्सवं श्रुत्वा **रामं कृष्णो**ऽब्रवीदिति । तत्राऽऽवामार्य ! गच्छावः पश्यावो मल्लकौतुकम् ॥२४८॥
¶प्रतिपद्य च तद् **रामो यशोदा**मित्यभाषत । प्रगुणीकुरु नौ स्नानं यियास्वो**र्मथुरां** पुरीम् ॥२४९॥
तां किञ्चिदलसां प्रेक्ष्य साक्षेपमवदद् **बलः** । **गोविन्द**स्य भ्रातृवधाख्यानप्रस्तावनाकृते ॥२५०॥
अयि ! किं विस्मृतः प्राच्यो दासीभावस्तवाऽधुना ? । अस्मदीयं यदादेशं नाऽनुतिष्ठसि सत्वरम् ॥२५१॥
वि[11]च्छायं वचसा तेन **कृष्ण**मादाय **सा[12]त्वतः** । नद्यां निनाय स्नानाय **यमुना**यां वशंव[13]दम् ॥२५२॥
तमुवाच च किं वत्स ! विच्छाय इव दृश्यसे ? । प्रावृषेण्याम्बुदमरुत्संस्पृष्ट इव दर्पणः ॥२५३॥
**बलदेवं** जगादैवं **गोविन्दो** गद्गदाक्षरम् । किं मे माता त्वया भ्रातर्दासीत्याक्षिप्य जल्पिता ? ॥२५४॥
[14]रामाभिरामं **रामो**ऽपि निजगाद **जनार्दनम्** । न ते **यशोदा** जननी **नन्द**श्च जनको न वा[15] ॥२५५॥
किन्तु ते **देवकी** माता सा **देवक**नृपात्मजा । विश्वैकवीर ! सुभगो **वसुदेव**श्च ते पिता ॥२५६॥
मासे मासे दिदृक्षुस्त्वां स्तन्यसिक्तमहीतला । गोपूजाव्याजतोऽत्रैति **देवकी** साश्रुलोचना ॥२५७॥
उपरोधेन **कंसस्य मथुरा**यामवस्थितः । **वसुदेवो**ऽस्ति नौ तातो दाक्षिण्यैकमहोदधिः ॥२५८॥
वै[16]मात्रेयोऽग्र[17]जस्तेऽहं त्वदपायाभिशङ्किभिः । तातपादैः समादिष्टस्त्वां रक्षितुमिहाऽऽगमम् ॥२५९॥
किं पित्राऽहमिह क्षिप्त इति पृष्टोऽनुजन्मना । **कंसो**पज्ञं स आचख्यौ सर्वं भ्रातृवधादिकम् ॥२६०॥
तच्छ्रुत्वा कुपितः **कृष्णः** कृष्ण[18]वर्त्मेव दारुणः । प्रत्यज्ञासीत् **कंस**वधं नद्यां स्नातुं विवेश च ॥२६१॥
¶**कंस**स्येव प्रियसुहृद् दष्टुकामो **जनार्दनम्** । **कालिन्दी**जलमग्नाङ्गः **कालियो**ऽहिरधावत ॥२६२॥
तत्फणामणिविद्योतात् किमेतदिति वादिनि । **रामे कृष्णः** समुत्थाय तमुत्पलमिवाऽऽददे ॥२६३॥
घ्राणे नलि[19]ननालेन सोऽहिर्गौरिव नस्ति[20]तः । उपर्यारुह्य **कृष्णे**न वाहितश्च चिरं जले ॥२६४॥
निर्जीवमिव तं खिन्नं मुक्त्वा **कृष्णो**ऽथ निर्ययौ । एत्य सौ[21]स्नातिकैर्विप्रैः परिवव्रे च कौतुकात् ॥२६५॥
¶ततः परिवृतौ गोपै **राम-कृष्णौ** महौजसौ । चेलतुः प्रति **मथुरां** प्रपेदाते च गोपुरम् ॥२६६॥
**कंसा**दिष्टमहामात्रप्रेरितौ तत्र च द्विपौ । **पद्मोत्तरश्चम्पक**श्चाऽधावतां सन्मुखं तयोः ॥२६७॥
दन्तोत्खननमुष्ट्यादिघातैः **पद्मोत्तरं** गजम् । **कृष्णो**ऽवधीत् सिंह इव **बलभद्र**स्तु **चम्पकम्** ॥२६८॥

---

१. पिच्छिल आर्द्रपङ्के भ्रश्यन्तौ पादौ यस्य सः । २. तत्सख्यः, **च दास्यश्चान्ये** ला० । ३. इन्द्रधनुर्दण्डेन । ४. **वर्षुक०** खं० १, ला० । **वर्षक०** सू० । ५. **शाङ्र्गधन्व** मु० र० । ६. **स्पर्ष्टुमप्य०** पु०ला०छा०आ०की० । ७. **सूर्यपुरे** ता०सं० । ८. व्याजात् । ९. बाहुयुद्धाय । १०. **च०** मु० । ११. उद्विग्नम् । १२. बलदेवः । १३. **वशंवदः** मु० । १४. वनिताभिरामम्, **सामाभिरामम** ता०सं०की०पा०ला० । १५. **च** मु० र० । १६. अपरमातुः पुत्रः । १७. ज्येष्ठभ्राता । १८. अग्निः । १९. **नलिनीनालेन** मु० र० । २०. **नस्थितः** मु० । नाथितः । २१. सुस्नातं पृच्छन्तीति सौस्नातिकाः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ **नन्द**नन्दनावेता**वरिष्टा**दिनिघातिनौ । इत्यन्योऽन्यं दर्श्यमानौ नागरैर्गुरुविस्मयैः ॥२६९॥
नील-पीताम्बरधरौ वनमालाधरावुभौ । गोपावृतौ **राम-कृष्णा**वक्षवाटमुपेयतुः ॥२७०॥ युग्मम् ॥
तत्रैकस्मिन् महामञ्चे जनमुत्सार्य तत्स्थितम् । निःशङ्कौ सपरीवारौ भ्रातरौ तौ निषेदतुः ॥२७१॥
तं शत्रुं दर्शयामास **कंसं कृष्णाय सात्वतः** । अनुज्येष्ठं पितृंस्तांश्च **समुद्रविजया**दिकान् ॥२७२॥
कौ नु[2] देवोपमावेतावित्यन्योऽन्यविमर्शिनः । तौ प्रेक्षाञ्चक्रिरे भूपा मञ्चस्था नागराश्च ते ॥२७३॥
¶**कंसा**ज्ञया युयुधिरे तत्र मल्ला अनेकशः । तत्प्रेरितश्च **चाणूर** उदस्थात् पर्वताकृतिः ॥२७४॥
सो[3]ऽर्जं पर्जन्यवद् गर्जन् करास्फोटं विधाय च । आक्षिपन् क्ष्माभुजः सर्वां**श्चाणूरो**ऽवोचदुच्चकैः ॥२७५॥
यः कोऽपि जातो वीरेण वीरमानी च कोऽपि यः । नियुद्धयुद्धश्रद्धां मे स पूरयतु दुर्धरः ॥२७६॥
**कृष्णो**ऽसहिष्णुस्तं दर्पं **चाणूर**स्याऽतिगर्जतः । मञ्चादुत्तीर्य विदधे भुजास्फोटं महाभुजः ॥२७७॥
**गोविन्द**स्य करास्फोटः पुच्छाच्छोटो [4]हरेरिव । [5]आस्फोटयदिव द्यावा-**पृथिव्या**वुद्भटध्वनिः ॥२७८॥
वयसा वपुषा चैष[6] गरिष्ठः श्रमकर्कशः । नियुद्धजीवी **चाणूरः** सदा क्रूरश्चमूरु[7]वत् ॥२७९॥
अयं दुग्धमुखो मुग्धो मृदुः पद्मोदरादपि । वनवासादनभ्यासो न युद्धं युज्यतेऽनयोः ॥२८०॥
असमञ्जसमेतद्धि[8] धिगहो ! विश्वगर्हितम् । इत्युच्चैर्भाषमाणानां लोकानां तुमुलोऽभवत् ॥२८१॥ त्रिभिर्विशेषकम् ॥
¶अथ क्रुद्धोऽवदत् **कंसः** केनेहाऽऽकारिताविमौ । गोपालौ गोपयःपानमत्तौ ? किन्त्वागतौ स्वयम् ॥२८२॥
युध्यमानौ स्वयं चैतौ को नामेह निषेधति ? । यस्य पीडाऽनयोश्चाऽस्ति पृथग्भूत्वा स जल्पतु ॥२८३॥ युग्मम् ॥
इति **कंस**वचः श्रुत्वा तूष्णीकोऽभूज्जनोऽखिलः । स्मेरनेत्रारविन्दश्च **गोविन्द** इदमभ्यधात् ॥२८४॥
राजपिण्डेन पुष्टोऽयं कृताभ्यासश्च सर्वदा । समर्थश्च शरीरेण **चाणूरो** मल्लकुञ्जरः ॥२८५॥
मया गोपालबालेन गोपयःपानजीविना । हरिपोतेन हस्तीव हन्यमानोऽद्य दृश्यताम् ॥२८६॥ युग्मम् ॥
**कंस**स्तत्सौष्ठवाद् भीतो युगपद्युद्धहेतवे । द्वितीयं **मुष्टिकं** नाम महामल्लं समादिशत् ॥२८७॥
उत्थितं **मुष्टिकं** दृष्ट्वा मञ्चादुत्तीर्य **सात्वतः** । नियुद्धाय तमाह्वास्ता[9]ऽविहस्तो रणकर्मणि ॥२८८॥
¶ततश्च **कृष्ण-चाणूरौ** तौ चोभौ **राम-मुष्टिकौ** । नियोद्धुं[10] प्रववृताते नागपाशोपमैर्भुजैः ॥२८९॥
तेषां दृढपदन्यासैरङ्कम्पिष्टेव मेदिनी । पुस्फोटेव करास्फोटै[11]रवैर्ब्रह्माण्डमण्डपः ॥२९०॥
तौ च **मुष्टिक-चाणूरा**वुत्क्षिप्य तृणपूलवत् । क्षिप्तौ खे **राम-कृष्णा**भ्यां पश्यन्तो जहृषुर्जनाः ॥२९१॥
**चाणूर-मुष्टिका**भ्यां च मनागपि हि तौ भटौ । उत्क्षिप्यमाणौ सम्प्रेक्ष्य लोको म्लाय[12]न्मुखोऽभवत् ॥२९२॥
दृढमुष्ट्या च **चाणूरं** ताडयामास **केशवः** । दन्तीव तरसा[13] दन्तमुशले[14]न शिलोच्चयम् ॥२९३॥
मानदो जयमा[15]नोऽथ **चाणूरो**ऽ**रिष्टसूदनम्** । जघानोरःस्थले मुष्ट्या वज्रगोलसमौजसा ॥२९४॥
मदेनेव लुलद्दृष्टिस्तेन घातेन पीडितः । **अधो[16]क्षजो** मीलिताक्षः पपात पृथ्वी[17]तले ॥२९५॥
**कंसेन** प्रेरितो दृष्ट्या **चाणूर**श्छलवेदिना । हन्तुं विसंज्ञं **गोविन्दं** पापः पुनरधावत ॥२९६॥
जिघांसुं[18] तं **बलो** ज्ञात्वा सद्योऽभ्यु[19]त्सृष्ट**मुष्टिकः** । अताडयत् प्रकोष्ठेन[20] पतद्वज्रानुहारिणा ॥२९७॥
**चाणूर**स्तेन घातेन सप्त चापानपासरत् । **कृष्णो**ऽपि हि समाश्वस्य पुनराह्वत[21] तं युधे[22] ॥२९८॥
मध्य[23]माक्रम्य जानुभ्यां शीर्षं दोष्णाऽऽनमय्य च । जघान मुष्ट्या **गोविन्दश्चाणूरं** गुरुविक्रमः ॥२९९॥
**चाणूरो** वान्तरुधिरधारो विधुरलोचनः । **कृष्णेन** मुमुचे भीतैरिव प्राणैरपि क्षणात् ॥३००॥

१. मल्लयुद्धस्थानं 'अखाडो' इति भाषायाम् । २. **कौ तु** खं० १, ला०मु० र. । ३. **सोग्रं** मु० । ४. सिंहस्येव । ५. **अस्फोट०** मु० र० । ६. **चैव** खं० २ । ७. मृगविशेषः । ८. **०मेतद् धिग्** मु० र० । ९. **०माह्वास्त वि०** मु० र० । अविहस्तः-अव्याकुलः, सज्जः । १०. **नियुद्धं** ला०पु०आ० । ११. **०स्फोटरावै०** खं० २ । १२. **म्लानमुखो०** मु० र० । १३. वेगेन । १४. **०मुसलेन** खं० २, सू० । १५. **०मानी च** मु० र० । **जायमानोऽथ** 'र०' स्वीकृतप्रतिषु । १६. कृष्णः । १७. **च महीतले** पु० । १८. **जिघांसन्तं** खं० १-२, ला०सू० । १९. मुष्टिकमल्लं त्यक्त्वा । २०. 'पहोंचो' इति भाषायाम् । २१. **पुनराह्वात** मु० र० । २२. **युधि** मु० र० । २३. मध्यं कटिप्रदेशं जानुभ्यामाक्रम्य, बाहुना शीर्षमानमय्य ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कंसो**ऽथ भय-कोपाभ्यां वेपमानोऽब्रवीदिति । अरे ! [1]गोपौब्रुवावेतौ मार्यतामविलम्बितम् ॥३०१॥
येनैतौ पोषितौ सर्पौ तं **नन्द**मपि रे ! हत । आदाय तस्य सर्वस्वमिहाऽऽनयत दुर्मतेः ॥३०२॥
[2]तद्गृह्योऽन्योऽपि यः कश्चित् तस्य त्राताऽन्तरे भवेत् । समानदोषः सोऽप्याशु निहन्तव्यो मदाज्ञया ॥३०३॥
अथोचे **[3]पुण्डरीकाक्षो**ऽरुणाक्षः कोपसम्भ्रमात् । मृतंमन्योऽसि [4]नाऽद्यापि त्वं **चाणूरे** हतेऽपि हि ? ॥३०४॥
तावद् रक्ष त्वमात्मानं हन्यमानं मयाऽद्य रे ! । पश्चात् [5]स्वामर्षसदृशं **नन्दा**दिषु समादिशेः ॥३०५॥
इत्युक्त्वोत्पत्य **गोविन्दो** मञ्चमारुह्य तत्क्षणात् । संगृह्य **कंसं** केशेषु पृथिव्यां पर्यपातयत् ॥३०६॥
विशीर्णमुकुटं [6]स्रस्तान्तरीयं तरलेक्षणम् । सूनाबद्धं पशुमिव तमुवाच **जनार्दनः** ॥३०७॥
त्वया कृता [7]भ्रूणहत्या स्वरक्षार्थं वृथैव रे ? । इदानीं न भवस्येष स्वकर्मफलभाग्भव ॥३०८॥
*आत्तरूप इव [8]व्याले [9]धृत**कंसे हरौ** तदा । विसिष्मिये च बिभयाञ्चकार च जनोऽखिलः ॥३०९॥
अथ [10]यौक्त्रिकबन्धेनाऽनुच्छ्वासीकृत्य **मुष्टिकम्** । यज्ञोपनीताजमिव वीरो **[11]नीलाम्बरो**ऽवधीत् ॥३१०॥
इतश्च **कंस**रक्षार्थं **कंस**गृह्या महाभटाः । **कृष्णं** हन्तुमधावन्त विविधायुधपाणयः ॥३११॥
मञ्चस्तम्भमथोद्धृत्य **राम**स्तान् परिताडयन् । द्रुतं विद्रावयामास मधुस्था मक्षिका इव ॥३१२॥
**कृष्णो**ऽपि पादं शिरसि न्यस्य **कंसं** व्यपादयत् । कैशैः कृष्ट्वाऽक्षिपद् रङ्गाद् बहिस्तं [12]दार्विवाऽर्णवः ॥३१३॥
¶**कंसेन** पूर्वमानीता **जरासन्ध**स्य सैनिकाः । तदा संवर्मयामासू **राम-कृष्ण**जिघांसया ॥३१४॥
तांश्च सन्नह्यतः प्रेक्ष्य **समुद्रविजयो** नृपः । सन्नह्याऽढौकयद् [13]युद्धे तदर्थं हि तदागमः ॥३१५॥
द्राक् समुद्र इवोद्वेले **समुद्रविजये** नृपे । दिशोदिशं ययुर्नष्ट्वा[14] **जरासन्ध**स्य सैनिकाः ॥३१६॥
**राम-कृष्णावनाधृष्टि**रारोप्य स्यन्दने निजे । **समुद्रविजया**देशाद् **वसुदेव**गृहेऽनयत् ॥३१७॥
सर्वेऽपि **[15]यदव**स्तत्र **समुद्रविजया**दयः । **वसुदेव**गृहे गत्वा [16]दत्त्वाऽऽस्थानीमुपाविशन् ॥३१८॥
अर्धासनासित**बलः** स्वाङ्कमारोप्य **केशवम्** । मुहुश्चुचुम्ब शिरसि **वसुदेवो**ऽश्रुलोचनः ॥३१९॥
किमेतदिति सोदर्यैः पृष्ट **आनकदुन्दुभिः** । **कृष्ण**वृत्तान्तमाचख्याव**ति[17]मुक्ते**तिवृत्ततः ॥३२०॥
ततः **समुद्रविजयः** स्वोत्सङ्गे **कृष्ण**मादधे । **रामं** तत्पालनप्रीतः प्राशंसच्च मुहुर्मुहुः ॥३२१॥
तयैकनासया पुत्र्या सहाऽऽगत्य च **देवकी** । अङ्कादङ्कं सञ्चरन्तं **कृष्ण**मादाय सस्वजे ॥३२२॥
ऊचुश्च [18]यादवो वीरा **वसुदेव**मुदश्रवः । [19]एकाक्यपि जगज्जेतुं त्वं क्षमोऽसि महाभुज ! ॥३२३॥
**कंसे**नाऽतिनृशंसेन [20]जातजातांस्त्वमात्मनः । हन्यमानान् सुतान् वीर ! कथं नामाऽसि सोढवान् ? ॥३२४॥
**वसुदेवो**ऽप्युवाचैवमाजन्म परिपालितम् । सत्यव्रतं त्रातुमहं दुष्कर्मेदं विसोढवान् ॥३२५॥
**देवक्या**श्चाऽऽग्रहेणाऽयं **कृष्णः** प्रक्षिप्य गोकुले । [21]मर्याऽरक्षि **नन्द**सुतां सञ्चार्येमां वराकिकाम् ॥३२६॥
स्त्रीमात्रं सप्तमो गर्भो **देवक्या** इत्यवज्ञया । एकं नासापुटं छित्त्वा मुमोचेमां स पापधीः ॥३२७॥
¶भ्रातृ-भ्रातृव्यसम्मत्या **समुद्रविजय**स्ततः । कारागारा**दुग्रसेनं** कर्षयामास पार्थिवम् ॥३२८॥
राज्ञा सहो**ग्रसेने**न **समुद्रविजया**दयः । **कंस**स्य प्रेतकार्याणि **कालिन्दी**पुलिने व्यधुः ॥३२९॥
**कंस**स्य माता पत्न्यश्च [22]ददुर्नद्यां जलाञ्जलीन् । मानात्तु न ददौ **जीवयशाः** कोपादुवाच च ॥३३०॥
गोपावेतौ **राम-कृष्णौ दशार्हां**श्च ससन्ततीन् । घातयित्वा प्रेतकार्यं करिष्ये स्वपतेरहम् ॥३३१॥
अन्यथाऽग्नौ प्रवेक्ष्यामि प्रतिश्रुत्येति सोच्चकैः । निर्गत्याऽगाज्**जरा[23]सन्धा**श्रिते **राजगृहे** पुरे ॥३३२॥
**राम-कृष्णा**नुज्ञयाऽथ **समुद्रविजयो** नृपः । चकार **मथुरापुर्यामुग्रसेनं** नरेश्वरम् ॥३३३॥

१. **गोपसुता०** मु० । गोपाधमौ । २. तत्पक्षपाती । ३. कृष्णः । ४. **नोऽद्यापि** मु० । ५. स्वकीयक्रोधसदृशं कार्यम् । ६. **स्रस्तोत्तरीयम्** की०छा०ला०लार० आ० । ७. गर्भहत्या । ८. गजे । ९. **धूतकंसे** खं० १-२ । १०. **यौत्रिक०** मु० र० । ११. बलदेवः । १२. काष्ठमिव । १३. **युधे** मु० विना । १४. **०र्नष्ट्वा** खं० २ । १५. **यादवा०** खं० १-२, ला० । १६. **स्वस्थानीयमुपाविशत्** की० । १७. **०मुक्तकवृत्ततः** मु० । १८. **यादवाः** आ० मु० । १९. **एककोऽपि ता०**सं० । २०. **जाताज्जातांस्त्व०** ता०सं०आ० । २१. **अरक्षि नन्दतनयाम्** पु० । २२. कंसस्य उत्तरक्रियां चक्रुरित्यर्थः । २३. **०सन्धश्रिते** मु० । *'रूप'पदं पशुवाचकं, आत्तरूपे-आत्तपशौ इत्यर्थः सम्भवति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदत्तामुग्रसेनेन **सत्यभामां जनार्दनः** । दिने **क्रोष्टुकिना**ऽऽख्याते पर्यणैषीद् यथाविधि ॥३३४॥
॥इतश्च सा **जीवयशा** रुदती[1] मुक्तकुन्तला । प्रविवेश **जरासन्धा**स्थान्यामश्रीरिवाऽङ्गिनी ॥३३५॥
**जरासन्धेन** पृष्टाऽथ कथञ्चिदपि साऽवदत् । **अतिमुक्तक**वृत्तान्तं **कंस**घातकथां च ताम् ॥३३६॥
प्रत्युवाच **जरासन्धः** साधु **कंसे**न नो कृतम् । यन्नाऽहन् **देवकी**मेव क्षेत्राभावे कुतः कृषिः ? ॥३३७॥
मा रोदीरधुना वत्से ! रोदयिष्यामि [2]तत्स्त्रियः । समूलघातं तान् हत्वा परितः **कंस**घातकान् ॥३३८॥
॥तामित्युक्त्वा **जरासन्धः सोमकं** नाम पार्थिवम् । अनुशिष्य प्रजिघाय **समुद्रविजया**न्तिके ॥३३९॥
स एत्य **मथुरापुर्यां समुद्रविजयं** नृपम् । इत्युवाच **जरासन्धः** समादिशति वः प्रभुः ॥३४०॥
पुत्र्यस्माकं **जीवयशा** जीवितादपि वल्लभा । तत्स्नेहात् तत्पतिः **कंसः** कस्यैतत् विदितं न हि ? ॥३४१॥
भवन्तोऽपि हि भृत्या नः सुखं तिष्ठन्तु किं पुनः । अर्पणीयौ **राम-कृष्णौ** क्षुद्रौ **कंस**द्रुहाविमौ ॥३४२॥
किं चाऽयं सप्तमो गर्भः पुराऽप्यर्पित एव हि । सोऽद्याऽर्प्यतामसौ **रामः** पुनस्तद्रोपनीगसि[3] ॥३४३॥
ऊचे **समुद्रविजयो** मत्परोक्षेऽर्पिता यदि । ऋजुना **वसुदेवेन** षड् गर्भास्तद्धि नोचितम् ॥३४४॥
वत्साभ्यां **राम-कृष्णाभ्यां** स्वभ्रातृवधवैरतः । **कंसो** हतश्चेत् तदिह किमेतावपराध्यतः ? ॥३४५॥
एको दोषोऽयमस्माकं यत् स्वैरी[4] बाल्यतोऽपि हि । **वसुदेव**स्तस्य बुद्ध्या हताः षट् सूनवो मम ॥३४६॥
प्राणभूतौ मम सुतौ **राम-कृष्णौ** वधेच्छया । त्वद्भर्तुर्याचमानस्य नविमृश्यविधायिता ॥३४७॥
सकोपं **सोमको**ऽप्यूचे न खलु स्वामिशासने । युक्तायुक्तविचारोऽर्हः सेवकानां कदाचन ॥३४८॥
षड् गर्भा यत्र ते राजंस्तत्रैतावपि दुर्मती । गच्छतां मा स्म कण्डूयस्तुण्डं तक्षकभोगिनः ॥३४९॥
विरोधो बलिना सार्धं न हि क्षेमाय जायते । कस्त्वं मेष इवेभस्य पुरतो **मगधेशितुः** ?॥३५०॥
क्रुद्धोऽभ्यधाच्च **गोविन्द**स्तातेन चिरमार्जवात् । पालिते स्नेहसम्बन्धे त्वत्स्वामी किं [5]प्रभूयते ? ॥३५१॥
न नः प्रभुर्**जरासन्धः** प्रत्युतैवं स विब्रुवन् । **कंसो** द्वितीयस्तद्गच्छ यथेच्छं शंस तस्य भोः ! ॥३५२॥
इत्युक्तः **सोमको**ऽवोचत् **समुद्रविजयं** प्रति । कुलाङ्गारः सुतस्तेऽसौ **दशार्ह** ! किमुपेक्षसे ? ॥३५३॥
तद्गिरा प्रज्वलन् कोपाद**नाधृष्टि**रदोऽवदत् । भूयो भूयो याचमानः पुत्रौ तातान्न लज्जसे ? ॥३५४॥
स जामातृवधेनाऽपि दूनो **राजगृहेश्वरः** । षड्भ्रातृनिधनेनाऽपि न दूनाः किं वयं [6]ननु ? ॥३५५॥
दोष्मान् **रामश्च कृष्ण**श्चाऽन्येऽप्य**क्रूरा**दयो वयम् । न सहिष्यामहे हन्त त्वामेवमभिभाषिणम् ॥३५६॥
इत्य**नाधृष्टिना** रोषाद्धर्षितो रोषविह्वलः । उपेक्षितः **समुद्रेण** स्वस्थानं **सोमको** ययौ ॥३५७॥
॥द्वितीयेऽह्नि **दशार्हेशो**[7] मेलयित्वा स्वबान्धवान् । पप्रच्छ **क्रोष्टुकिं** नाम हितं नैमित्तिकोत्तमम् ॥३५८॥
त्रिखण्ड**भरतेशेन जरासन्धेन** विग्रहः । उपस्थितोऽयमस्माकं ब्रूहि यद्भाव्यतः परम् ॥३५९॥
सोऽप्युवाचाऽचिरादेतौ **राम-कृष्णौ** महाभुजौ । त्रिखण्ड**भरता**धीशौ तं निहत्य भविष्यतः ॥३६०॥
यात प्रतीच्याम[8]धुना समुद्दिश्याऽम्बुधेस्तटम् । भावी शत्रुक्षयारम्भो गच्छतामपि तत्र वः ॥३६१॥
**सत्यभामा** च यत्रैषा प्रसूते दारकद्वयम् । पुरीनिवेशं तत्रैव कृत्वा स्थेयमशङ्कितैः ॥३६२॥
ततो घोषणया राजा स्वां यात्रां [9]स्वानजिज्ञपत् । एकादशकुलकोटीसंयुतो **मथुरां** जहौ ॥३६३॥
गत्वा **शौर्यपुरे** सप्तकुलकोटीस्ततोऽपि हि । आदाय ज्ञातिसहितः **समुद्रविजयो**ऽचलत् ॥३६४॥
**उग्रसेन**नरेन्द्रोऽपि **समुद्र**नृपमन्वगात् । मध्ये**विन्ध्यं** च सर्वेऽपि जग्मुः सुखसुखं पथि ॥३६५॥
॥तदा च **सोमको** राजा **जरासन्धार्धचक्रिणे** । गत्वा शशंस तत्सर्वं क्रोधवह्नीन्धनायितम् ॥३६६॥
**जरासन्ध**मथ क्रुद्धं **कालः** सम्प्रेक्ष्य तत्सुतः । उवाच भवतां के हि यदवोऽमी तपस्विनः ? ॥३६७॥
तदादिश दिशा[10]मन्ताद् वह्नेरब्धेश्च मध्यतः । कृष्ट्वा यदून् हनिष्यामि निवर्तिष्येऽन्यथा न हि ॥३६८॥

१. **रुदन्ती** मु० । २. कंसघातक-स्त्रियः । ३. ०**गोपनादपि** मु० । रक्षणापराधे । ४. **स्वैरम्** पु० । ५. प्रभुवदाचरति । ६. **पुनः** मु० । ७. **दशार्हेण** मु० । ८. पश्चिमदिशि । ९. स्वकीयान् । १०. **मां समन्ताद्** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततः कालं जरासन्धो राजपञ्चशतीयुतम् । महासेनापरिवृतं यदून् प्रति समादिशत् ॥३६९॥
कालो भ्रात्रा यवनेन सहदेवेन चान्वितः । वार्यमाणोऽ[1]प्यंशकुनैर्दुर्निमित्तैर्नि[2]र्ययिवान् ॥३७०॥
स यदूनामनुपदं गच्छन् प्रापाऽचिरादपि । विन्ध्याचलोपत्यकोर्वीमदूरोषितयादवाम् ॥३७१॥
दृष्ट्वा कालमथाऽऽसन्नं राम-कृष्णाभिर[3]क्षिकाः । विचक्रुर्देवताः शैलमेकद्वारं पृथून्नतम् ॥३७२॥
उषितं च यदुसैन्यं भस्मीभूतं कृशानुना । [4]उपचित्यं स्त्रियमेकां [5]रुदतीं च विचक्रिरे ॥३७३॥
तां प्रेक्ष्य कालः पप्रच्छ भद्रे ! किमिति रोदिषि ? । साऽऽख्यद् भीता जरासन्धाद् दुद्रुवुर्यदवोऽखिलाः ॥३७४॥
तेषां च पृष्ठतो वीरः कालः काल इवाऽचलत् । तत्राऽऽसन्ने च चकिताः प्राविशन् यदवोऽनले ॥३७५॥
दशार्हा राम-कृष्णौ च चितायामविशन्निह । तेषां वियोगे बन्धूनां वेक्ष्याम्यग्नावसावहम् ॥३७६॥
इत्युक्त्वा साऽविशद् वह्नौ देवतामोहितश्च सः । कालोऽवोचत् सहदेवं यवनं भूभुजोऽपि च ॥३७७॥
मया तातस्य जामेश्च पुरतोऽदः [6]प्रतिश्रुतम् । वह्न्यादिभ्योऽपि कृष्ट्वाऽहं हनिष्यामि यदून् खलु ॥३७८॥
प्रविष्टान् मद्भयादग्नौ तान् हन्तुमहमप्यहो ! । सत्यसन्धः प्रवेक्ष्यामि ज्वलितेऽस्मिन् हुताशने ॥३७९॥
इत्युक्त्वा सोऽसिफलकी विवेशाऽग्नौ पतङ्गवत् । मृतश्च स्वेषु पश्यत्सु देवतामोहितात्मसु ॥३८०॥
¶अत्राऽन्तरे चाऽस्तगिरिं जगाम भगवान् रविः । ऊषुस्तत्रैव यवन-सहदेवादयश्च ते ॥३८१॥
जाते प्रभाते तेऽपश्यंस्तं नाद्रिं न चितां च ताम् । दूरं गता यदवश्चेत्याख्यंस्तेभ्यश्च [7]हेरिकाः ॥३८२॥
[8]वृद्धालोचनतो ज्ञात्वा सम्मोहं देवताकृतम् । यवनाद्या निवृत्याऽऽख्युस्तत्सर्वं मगधेशितुः ॥३८३॥
अतुच्छया मूर्च्छयाऽथ जरासन्धोऽपतद् भुवि । ससंज्ञः काल ! कालेति कंस ! कंसेति चाऽरुदत् ॥३८४॥
¶विज्ञाय कालमरणं गच्छन्तो यदवोऽपि ते । आनर्चुः क्रोष्टुकिं जातप्रत्ययं [9]भूरिसम्मदाः ॥३८५॥
पथ्येकस्मिन् वने तेषां तस्थुषां सोऽतिमुक्तकः । समाययौ चारणर्षिर्दशार्हेशेन [10]चाऽऽर्च्यत ॥३८६॥
समुद्रविजयोऽपृच्छत् तं प्रणम्य महामुनिम् । अमुष्मिन् व्यसनेऽस्माकं भगवन् ! किं भविष्यति ? ॥३८७॥
ऋषिर्बभाषे मा भैषीर्द्वाविंशो ह्येष तीर्थकृत् । कुमारोऽरिष्टनेमिस्ते त्रैलोक्याद्वैतपौरुषः ॥३८८॥
राम-कृष्णौ बल-विष्णू द्वारकास्थाविमौ पुनः । जरासन्धवधादर्धभरतेशौ भविष्यतः ॥३८९॥
ततो हृष्टस्तमर्चित्वा समुद्रो व्यसृजत् मुनिम् । सुखाकरैः प्रयाणैश्च [11]सुराष्ट्रीमण्डलं ययौ ॥३९०॥
¶तत्र रैवतकस्याद्रेः [12]प्रत्यगुत्तरतोऽथ ते । अष्टादशकुलकोटीसंयुताः शिबिरं [13]न्यधुः ॥३९१॥
कृष्णपत्नी सत्यभामा तत्राऽसूत सुतावुभौ । भानु-भामरनामानौ [14]जात्यजाम्बूनदद्युती ॥३९२॥
दिने क्रोष्टुकिनाऽऽख्याते स्नातः कृतबलिर्हरिः । अम्भोधिं पूजयामास विदधे चाऽष्टमं तपः ॥३९३॥
ततस्तृतीययामिन्यां नभस्थः सुस्थितोऽमरः । लवणाब्धेरधिष्ठाता तत्राऽऽगच्छन् कृताञ्जलिः ॥३९४॥
[15]कंसारये पाञ्चजन्यं सुघोषं [16]मुष्टिकारये । ददौ स देवो दिव्यानि रत्नमाल्यांशुकानि च ॥३९५॥
स देवः कृष्णमूचे च कुतो हेतोस्त्वया स्मृतः ? । सुस्थितो नाम देवोऽहं ब्रूहि किं करवाणि ते ? ॥३९६॥
उवाच कृष्णस्तं देवं या पूर्वं [17]पूर्वशार्ङ्गिणाम् । पुर्यत्र द्वारकेत्यासीत् पिहिता सा त्वयाऽम्भसा ॥३९७॥
ममाऽपि हि निवासाय तस्याः स्थानं प्रकाशय । 'तथा' कृत्वा सोऽपि देवो गत्वेन्द्राय व्यजिज्ञपत् ॥३९८॥
शक्राज्ञया वैश्रवणश्चक्रे रत्नमयीं पुरीम् । द्वादशयोजनायामां नवयोजनविस्तृताम् ॥३९९॥
तुङ्गमष्टादशहस्तान्[18]नवहस्तान् स भूगतम् । विस्तीर्णं द्वादशहस्तांश्चक्रे वप्रं [19]सखातिकम् ॥४००॥
वृत्ताश्च चतुरस्राश्च व्यायता गिरिकूटकाः । स्वस्तिकाः सर्वतोभद्रा [20]मन्दरा अवतंसकाः ॥४०१॥
वर्धमानाश्चेतिसंज्ञाः प्रासादास्तत्र लक्षशः । एकभूमा द्विभूमाश्च त्रिभूमाद्याश्च निर्मिताः ॥४०२॥ युग्मम् ॥

१. प्यशकुनदुर्निमित्तैर्नि० छा० मु० विना । २. निर्जगाम । ३. ०रक्षकाः मु० र० । ४. चितासमीपे । ५. रुदन्तीं मु० । ६. प्रतिश्रवम पा० । ७. चरपुरुषाः । ८. वृद्धालोकनतो पा० पु० । ९. जातसंमदाः ला०सू० । १०. चार्चितः ला०ता०सं०पु० । ११. सौराष्ट्रदेशम् । १२. वायव्यदिशि । १३. व्यधुः ला०ला०र० । १४. जात्यसुवर्णवत् कान्तिः ययो तौ । १५. कृष्णाय । १६. बलदेवाय । १७. पूर्ववासुदेवानाम् । १८. नवहस्तान् महीगतम् पु० । ०हस्तांश्च भू० मु० । १९. सुखा० मु० । २०. मन्दारा खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विचित्ररत्न-माणिक्यैश्चत्वरेषु त्रिकेष्वपि । जिनचैत्यानि दिव्यानि निर्मितानि सहस्रशः ॥४०३॥
आग्नेय्यां[1] दिशि तत्राऽऽदौ सौवर्णो वप्रसंयुतः । **समुद्रविजय**स्याऽभूत् प्रासादः **स्वस्तिका**भिधः ॥४०४॥
प्रासादौ च तदभ्यर्णेऽ**क्षोभ्य-स्तिमित**योः क्रमात् । **नन्द्यावर्त-गिरिकूटौ** सप्राकारौ बभूवतुः ॥४०५॥
नैर्ऋत्यां **सागर**स्याऽभूत् प्रासादोऽष्टांश उच्चकैः । प्रासादौ **वर्धमाना**ख्यौ ततः पञ्चम-षष्ठयोः ॥४०६॥
नाम्ना **पुष्करपत्रो**[2]ऽभून्मारुत्यां **धरण**स्य तु । **आलोकदर्शनो** नाम **पूरणस्य** ततोऽपि हि ॥४०७॥
तदभ्यर्णेऽ**भिचन्द्र**स्य **विमुक्तो** नामतोऽभवत् । ऐशान्यां **वसुदेव**स्य **कुबेरच्छन्द**संज्ञितः ॥४०८॥
**स्त्रीविहारक्षमो** नाम राजमार्गसमीपतः । **उग्रसेन**नरेन्द्रस्य जज्ञे प्रासाद उन्नतः ॥४०९॥
कल्पद्रुमैर्वृताः सर्वे सेभ[3]शालाः समन्दुराः । सप्राकारा बृहद्द्वाराः पताका[4]मालभारिणः ॥४१०॥
तेषां च मध्ये प्रासादो नामतः **पृथिवीजयः** । चतुरस्रो बृहद्द्वारो **बलदेव**स्य निर्ममे ॥४११॥
प्रासादोऽष्टादशभूमः **सर्वतोभद्र**[5]संज्ञितः । नानागृहपरिवारो **वासुदेव**स्य चाऽभवत् ॥४१२॥
**सुधर्मा**सदृशी **राम-कृष्ण**प्रासादयोः पुरः । सभा [6]**सर्वप्रभासा**ख्या नानामाणिक्यमय्यभूत् ॥४१३॥
अष्टोत्तरशतेनोच्चैर्जिनबिम्बैर्विभूषितम् । **मेरु**शृङ्गमिवोत्तुङ्गं मणि-रत्न-हिरण्मयम् ॥४१४॥
नानाभूमिगवाक्षाढ्यं विचित्रस्वर्णवेदिकम् । अर्हदायतनं रम्यं निर्ममे विश्वकर्मणा ॥४१५॥ युग्मम् ॥
सरांसि दीर्घिका वाप्यश्चैत्यान्युद्यानवीथिकाः । अन्यच्च सर्वं तत्राऽहोरात्रेण **धनदो**ऽकरोत् ॥४१६॥
एवं च रम्या नगरी [7]**द्वारकेन्द्र**पुरीसमा । बभूव **वासुदेव**स्य देवताभिर्विनिर्मिता ॥४१७॥
तस्याः पुरो[8] **रैवतको**ऽपाच्यामासीत्[9] तु **माल्यवान्** । **सोमनसो**ऽद्रिः प्रतीच्यामुदीच्यां[10] **गन्धमादनः** ॥४१८॥
ततः प्रातः **कुबेरो**ऽदाद् **विष्णवे** पीतवाससी । **नक्षत्रमालां** मुकुटं महारत्नं च **कौस्तुभम्** ॥४१९॥
**शौङ्र्गं**[11] धन्वाऽक्षय्यतरौ तूणौ खड्गं च **नन्दकम् । कौमोदकीं** गदां चैव रथं च **गरुडध्वजम्** ॥४२०॥
**रामायाऽदाद् वनमालां मुसलं** नीलवाससी । **तालध्वजं** रथं तूणावक्षय्येषू धनु**र्हलम्** ॥४२१॥
दशभ्योऽपि **दशार्हे**भ्यो रत्नान्याभरणानि च । व्यश्राणयद्[12] **वैश्रवण**स्ते ह्यर्च्यौ **राम-कृष्णयोः** ॥४२२॥
ज्ञात्वा द्विट्सूदनं **कृष्णं** सर्वेऽपि यदवस्ततः । अभ्यषिञ्चन् प्रमुदिता अपरोदधि[13]रोधसि ॥४२३॥
**सिद्धार्थ**सारथिं **रामः कृष्णो दारुक**सारथिम् । रथमारोहतां वीरौ प्रवेष्टुं **द्वारका**[14]पुरीम् ॥४२४॥
वृतौ रथस्थैर्यदुभिश्चन्द्रा-ऽर्कौ भैः[15]-ग्रहैरिव । तौ तां पुरीं प्राविशतां भवज्जयजयारवाम्[16] ॥४२५॥
तस्यां **वैश्रवणे**[17]न दर्शितगृहेष्वस्थु**र्दशार्हा हरी, रामो**ऽन्ये यदवः कुलानि च परीवारोऽथ **कृष्णा**ज्ञया ।
रत्न-स्वर्ण-धनैर्विचित्रवसनैर्धान्यैश्च [18]सार्धं त्र्यहं, वर्षन् यक्षपतिः[19] पुरीमभिनवां तां पूरयामास सः ॥४२६॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरित्रे
महाकाव्ये अष्टमे[20] पर्वणि **राम-कृष्णा-ऽरिष्टनेमि-**
जन्म-**कंस**वध-**द्वारिका**[21]निवेशकीर्तनो नाम
पञ्चमः सर्गः ॥

१. **आग्नेय्यदिशि** खं० २ । २. ०**पत्रोऽभूद् वायव्याम्** पु० ॥ ३. गजशालासहिताः, अश्वशालासहिताः । ४. **पताकामालधारिणः** । ५. ०**भद्रसंज्ञकः** पु० मु० आ० खं० १-२, ला० । ६. **सर्वप्रवासाख्या** ता०सं०छा०पा० । **सर्वप्रसादाख्या** ला० । ७. **द्वारिके**० खं० १-२, ला० । ८. पूर्वस्याम् । ९. दक्षिणदिशि । १०. ०**च्यां कौबेर्याम्** पा० आ०, उत्तरदिशि । ११. **शाङ्र्गधन्वा**० मु० र० । १२. अयच्छत् । १३. पश्चिमसमुद्रतटे । १४. **द्वारिका**० खं० २, ला० । १५. नक्षत्र-ग्रहैः । १६. ०**जयारवम्** मु० । १७. **वैश्रमणेन** खं० २ । १८. सार्धानि त्रीणि दिनानि । १९. धनदः । २०. ०**ऽष्टमपर्वणि** खं० २, ला० सू० । २१. **द्वारका**० खं० २, सू० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ षष्ठः सर्गः ॥

तत्र **कृष्णः** स**रामो**ऽपि **दशार्हान्**[1]**न**नुवर्तयन् । रममाणः सुखं तस्थौ यदुभिः परिवारितः ॥१॥
तन्वन्मुदं **दशार्हाणां** भ्रात्रोश्च[2] **हलि-कृष्णयोः** । **अरिष्टनेमि**र्भगवान् ववृधे तत्र च क्रमात् ॥२॥
ज्यायांसोऽपि लघूभूय चिक्रीडुः स्वामिना समम् । सर्वेऽपि भ्रातरः क्रीडाशैलोद्यानादिभूमिषु ॥३॥
स्वामी दशधनुस्तुङ्गः क्रमात् प्राप च यौवनम् । आजन्म कामविजयी तेनाऽविकृतमानसः ॥४॥
पितृभ्यां **राम-कृष्णा**द्यैर्भ्रातृभिश्च दिने दिने । अर्थ्यमानोऽपि कन्यानामुद्वाहं न ह्यमन्यत ॥५॥
**राम-कृष्णौ** च तौ भूपान् समाचक्रमतुर्बहून् । शक्रेशानाविव युतौ पर्यपाताम्[3]उभौ प्रजाः ॥६॥
॥पर्यटन्**नारदो**ऽन्येद्युः **कृष्णौ**कसि समाययौ । **कृष्णे**न च **सरामे**ण स्वयं विधिवदर्चितः ॥७॥
सोऽथ **कृष्णा**न्तःपुरेऽगात् तत्र स्वं **सत्यभामया** । पश्यन्त्या दर्पणे नाऽर्चि व्यग्रत्वाद्विष्टरादिना ॥८॥
ततः स निरगात् क्रुद्धो विरुद्धं चेत्यचिन्तयत् । **केशवान्तःपुरैः** सर्वैरर्चिता **नारदाः** सदा ॥९॥
इयं तु पतिवाल्लभ्याद् रूप-यौवनगर्विता । अभ्युत्थानं दूरतोऽस्तु दृग्मात्रमपि न ह्यदात् ॥१०॥
ततोऽमूमतिरूपायाः सपत्न्याः प्राप्तिसङ्कटे । पातयामीति विमृशन् स ययौ **कुण्डिनं** पुरम् ॥११॥
॥तत्रा[4]ऽभूद् **भीष्मको** राजा तस्य पत्नी **यशोमती** । तयो **रुक्मी** सुतः कन्या **रुक्मिणी** रूपशालिनी ॥१२॥
गतश्च **नारद**स्तत्र **रुक्मिण्या** च नमस्कृतः । वरोऽर्ध**भरतेश**स्ते **कृष्णः** स्तादित्युवाच च ॥१३॥
**कृष्णः** कोऽसाविति तया पृष्ट आख्यच्च **नारदः** । अद्वैतान् रूप-सौभाग्य-शौर्यादीन् **कृष्ण**गान् गुणान् ॥१४॥
तच्छ्रुत्वा **रुक्मिणी कृष्णे** सानुरागाऽभवत् क्षणात् । **कृष्ण**मेवाऽभिलष्यन्ती तस्थौ मन्मथविह्वला ॥१५॥
पटे लिखित्वा तद्रूपं **द्वारिका**मेत्य **नारदः** । दर्शयामास **कृष्णस्य** सुधावर्तिनिभं दृशोः ॥१६॥
दृष्ट्वा च **कृष्णः** पप्रच्छ **नारदं** भगवन्नियम् । का नाम देवताऽलेखि पटेऽस्मिन् भवता वद ॥१७॥
स्मित्वोचे **नारदो** नेयं देवता किन्तु मानुषी । कुमारी **रुक्मिणी** जामिः **कुण्डिनेश**स्य **रुक्मिणः** ॥१८॥
तद्रूपविस्मितः **कृष्णः** सद्योऽपि प्रेष्य पूरुषम् । **रुक्मिणीं रुक्मिणः** पार्श्वे ययाचे प्रियया गिरा ॥१९॥
हसित्वोवाच **रुक्म्येवं गोपो** हीनकुलोऽप्यहो । मज्जामिं[5] याचते मूढः कोऽयं तस्य मनोरथः ॥२०॥
दास्ये मैथुनिकाया[6]ऽमूं **शिशुपालाय** भूभुजे । उचितो ह्यनयोर्योगो रोहिणी-शशिनोरिव ॥२१॥
इति श्रुत्वा स दूतोऽपि तद्वाचं परुषाक्षराम् । आगम्य[7] कथयामास स्वामिने पीत[8]वाससे ॥२२॥
॥तं च व्यतिकरं ज्ञात्वा नीत्वा रहसि[9] **रुक्मिणी**म् । ऊचे पितृष्वसा धात्री गिरा प्रेमपवित्रया ॥२३॥
शैशवे त्वां ममाऽङ्कस्थां प्रेक्ष्यर्षि**रतिमुक्तकः** । आख्याद् यदग्रमहिषी **कृष्णस्यैषा** भविष्यति ॥२४॥
कथं **कृष्णः** परिज्ञेय इति पृष्टस्तु सोऽवदत् । ज्ञेयः **कृष्णो**ऽपराम्भोधौ[10] **द्वारका**सन्निवेशनात् ॥२५॥
**कृष्णा**य याचमानायाऽप्यसि दत्ता न **रुक्मिणा** । **शिशुपालाय** किन्तु त्वं प्रदत्ता [11]**दामघोषये** ॥२६॥
**रुक्मिण्यू**चे किमृषीणां विसंवदति भाषितम् । प्रातः[12]स्तनितमब्धानां किं वा भवति निष्फलम् ॥२७॥
॥**कृष्णो**ऽभिलाषां **रुक्मिण्या** ज्ञात्वैवं सा पितृष्वसा । सद्यः प्रच्छन्नदूतेन **कृष्णा**यैवमजिज्ञपत् ॥२८॥
माघमासे सिताष्टम्यां नागपूजामिषादहम् । **रुक्मिण्**या सह निर्गत्य यास्याम्युद्यानवीथिकाम् ॥२९॥
आगन्तव्यं त्वया तत्र **रुक्मिण्या** चेत् प्रयोजनम् । अन्यथा **शिशुपालो**[13]ऽमूं परिणेष्यति मानद ! ॥३०॥
॥इतश्च **शिशुपालैः**[14] स आहूतस्तेन **रुक्मिणा** । उद्वोढुं **रुक्मिणी**मागात् ससैन्यः **कुण्डिनं** पुरम् ॥३१॥
तत्राऽऽयातं **शिशुपालं रुक्मिणी**वरणोद्यतम् । ज्ञापयामास **कृष्णाय नारदः** कलिकौतुकी ॥३२॥

---

१. अनुसरन् । २. बलदेव । ३. अरक्षताम् । ४. **तत्रासीत्** की. ला० । ५. मद्भगिनीम् । ६. विवाहाय । ७. **आगत्य** ला० मु० । ८. कृष्णाय । ९. एकान्ते । १०. पश्चिमसमुद्रे । ११. दमघोषपुत्राय । १२. प्रातः मेघानां गर्जितम् । १३. **शिशुपालोऽयम्** ता० सं० । १४. **०पालोऽपि** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶**कृष्णो**ऽपि सह **रामेण** विभिन्नं रथमास्थितः । जगाम **कुण्डिनपुरं** स्वैरप्यनुपलक्षितः ॥३३॥
तदा तया पितृष्वस्रा सखीभिश्च [1]समावृता । नागपूजाकृते **रुक्मिण्**युद्यानभुवमाययौ ॥३४॥
अवतीर्य रथात् **कृष्णो** ज्ञापयित्वा स्वमादितः । नत्वा पितृष्वसारं तामित्यवोचत **रुक्मिणीम्** ॥३५॥
त्वामागां दूरतोऽप्येष द्विरेफ[2] इव मालतीम् । **कृष्णो**ऽहं त्वद्गुणाकृष्टो रथमध्यास्स्व तन्मम ॥३६॥
अनुज्ञाता पितृष्वस्रा तया तद्भावविज्ञया । आरुरोह रथं स्वान्तमिव **कृष्णस्य रुक्मिणी** ॥३७॥
ततः किञ्चिद् गते **कृष्णे** [3]स्वदोषापोहहेतवे । पितृष्वसाऽन्यदास्यश्च तस्याः पूच्चक्रुरुच्चकैः ॥३८॥
**रुक्मिन्**! **रुक्मिन्**! स्वसा तेऽसौ प्रसह्य[4] ननु **रुक्मिणी** । ह्रियते तस्करेणेव **सरामेणा**ऽद्य **शार्ङ्गिणा** ॥३९॥
**पाञ्चजन्यं सुघोषं** च [5]दध्मतुस्तौ च यादवौ । यादो[6]राशिरिवाऽक्षुभ्यदभितो **रुक्मिणः** पुरम् ॥४०॥
¶**रुक्मी** च **शिशुपालश्च** महाबाहू महाबलौ । महासैन्यावनुपदं चेलतू **राम-कृष्णयोः** ॥४१॥
दृष्ट्वा च चकिता **रुक्मिण्**युवाचाऽङ्कस्थिता **हरिम्** । क्रूरो महौजा मद्भ्राता **शिशुपालश्च** तत्समः ॥४२॥
तद्गृह्या बहवोऽन्येऽपि वीराः संवर्मिता इह । युवां त्वेकाकिनावत्र तेन भीताऽस्मि, का गतिः? ॥४३॥
हसित्वा **हरि**रप्यूचे मा भैषीः क्षत्रिया ह्यसि । केऽमी वराका **रुक्म्याद्याः** पश्याऽदः सुभ्रु! मद्बलम् ॥४४॥
इत्युक्त्वा तत्प्रत्ययार्थम[7]र्धचन्द्रेण **शार्ङ्गभृत्** । [8]तालालीमेकघातेन [9]नलपङ्क्तिमिवाऽच्छिदत् ॥४५॥
[10]अङ्गुलीयकवज्रं चाऽङ्गुष्ठाङ्गुलिनिपीडनात् । दलयामास [11]निर्भ्रष्टमसूरकणलीलया ॥४६॥
तेन पत्योजसाऽत्यन्तं **रुक्मिणी** प्रमदं दधौ । पद्मिनीव प्रभातार्कतेजसा विकचा[12]नना ॥४७॥
**रामं** बभाषे **गोविन्दो** गृहीत्वेमां वधूं व्रज । अहमेतान् हनिष्यामि **रुक्म्या**दीननुधावतः ॥४८॥
**रामो**ऽप्युवाच गच्छ त्वं हनिष्याम्यहमेव तान् । **रुक्मिण्**यप्यवदद् भीता[13] त्रातव्यः सोदरो मम ॥४९॥
**रामो**ऽपि **कृष्णानुमतः** प्रत्यपद्यत तद्वचः । योद्धुं तत्रैव तस्थौ च जगाम तु **जनार्दनः** ॥५०॥
¶अथाऽऽयातं परबलं प्रोत्क्षिप्तमुशलो **बलः** । मन्थाचल इवाऽम्भोधिं ममन्थाऽ[14]मन्थरो रणे ॥५१॥
वज्रेणेवाऽद्रयः पेतुस्तस्याऽयोऽग्रे[15]ण दन्तिनः । चूर्णसादभवंश्चाऽपि घटकर्परवद् रथाः ॥५२॥
सहैव **शिशुपालेन** [16]व्यद्रवद् **रुक्मिण**श्चमूः । वीरमानी पुना **रुक्मी बलभद्र**मदोऽवदत् ॥५३॥
अहो धृ[17]ष्टोऽसि गोपाल! तिष्ठ तिष्ठाऽग्रतो मम । एषोऽहं ते [18]हरिष्यामि गोपयःपानजं मदम् ॥५४॥
प्रतिपन्नं स्मरन् **रामः** सन्त्यज्य मुशलं शरैः । तस्याऽभाङ्क्षीद् रथं वर्माऽच्छिदद् रथ्या[19]न् जघान च ॥५५॥
ततश्च **रुक्मिणं रामो** वध्यकोटिमुपागतम् । [20]लूनकेशं क्षुरप्रेण कृत्वोवाच हसन्निति ॥५६॥
मद्वध्वा बान्धव इति न वध्योऽसि प्रयाहि रे । मुण्डोऽपि हि स्वपत्नीभिर्विलसाऽस्मत्प्रसादतः ॥५७॥
एवमुक्तश्च मुक्तश्च ह्रिया नेयाय **कुण्डिनम्** । **रुक्म्य**स्थात् किन्तु तत्रैव न्यस्य **भोजकटं** पुरम् ॥५८॥
¶**कृष्णो**ऽपि **रुक्मिणी**मूचे प्रवि[21]शन् **द्वार**[22]**कापुरीम्** । देवीयं देवरचिता पुरी रत्नमयी मम ॥५९॥
सुरद्रुममयोद्यानेष्वस्यां सुभ्रु! मया सह । रंस्यसे त्वमविच्छिन्नसुखा सुरवधूरिव ॥६०॥
बभाषे **रुक्मिणी कृष्णं** पत्न्यस्तव महर्द्धयः । प्रदत्ताः पितृभिः सन्ति सहाऽऽयातपरिच्छदाः ॥६१॥
एकाकिन्यहमानीता बन्दीव भवता प्रिया । हसनीया यथा तासां न भवामि तथा कुरु ॥६२॥
करिष्ये त्वां तदधिकामित्युक्त्वा **रुक्मिणीं** स्वयम् । **सत्यभामा**गृहाभ्यर्णप्रासादेऽमुञ्चदच्युतः ॥६३॥
गान्धर्वेण विवाहेन परिणीयाऽथ **रुक्मिणीम्** । स्वच्छन्दं रमयामास रजनीं तां **जनार्दनः** ॥६४॥
¶जनप्रवेशं **रुक्मिण्या** सदनेऽ[23]रक्षदच्युतः । स्वप्रियां मे दर्शयेति तं **भामो**चे च साग्रहम् ॥६५॥

१. **परावृता** खं० २, सू० । २. **भ्रमरः** । ३. स्वदोषच्छादनाय । ४. हठात् । ५. पूरयामासतुः । ६. समुद्रः । ७. अर्धचन्द्रबाणेन । ८. तालवृक्षपङ्क्तिम् । ९. तृणविशेष, **नालपङ्क्तिमिवाः** की० मु० । १०. मुद्रिकाहीरकम् । ११. रन्धितमसूरधान्यकणलीलया । १२. विकसितमुखा । १३. **भ्राता** खं० २ । १४. अमन्दः शीघ्रः । १५. मुशलेन । १६. **दुद्राव** मु० । १७. **दृप्तो**ऽसि मु० । १८. **हनिष्यामि** ला र० । १९. हयान् । २०. बाणेन मुण्डनं कृत्वा । २१. **प्राविशन्** मु० । २२. **द्वारिका०** ला० । **द्वारकां** सू० । २३. न्यषेधत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लीलोद्याने **श्रीगृहे श्रीप्र**तिमां [1]सज्जनच्छलात् । **हरि**रुत्सारयामास निपुणैश्चित्रकारकैः ॥६६॥
तत्रैत्य **कृष्णः श्री**स्थाने स्थापयामास **रुक्मिणीम्** । देवीनामागमे तिष्ठेर्निश्चलेत्यशिषच्च ताम् ॥६७॥
गतोऽथ **कृष्णः** स्वं स्थानं प्रप्रच्छे चेति **भामया** । कुत्र स्थाने त्वया मुक्ता विद्यते हन्त वल्लभा ॥६८॥
अस्ति सा **श्रीगृहे** मुक्तेत्याख्याते **शार्ङ्गधन्वना**[2] । सपत्नीभिः समं **सत्यभामा श्री**सदनं ययौ ॥६९॥
**श्रीस्थानस्थां** तत्र दृष्ट्वा **रुक्मिणीं** साऽब्रवीदिति । अहो ! रूपं **श्रियो** देव्याः कौशलं शिल्पिनामहो ! ॥७०॥
इत्युक्त्वा तां **प्रणम्योचे लक्ष्मि !** देवि ! तथा कुरु । यथा नव्यां **हरेः** पत्नीं रूपलक्ष्म्या जयाम्यहम् ॥७१॥
एवं जाते च ते पूजां करिष्यामीत्युदीर्य सा । जगाम पार्श्वे **कृष्णस्य** प्रिया ते क्वेत्युवाच च ॥७२॥
**सत्यया**ऽथाऽपराभिश्च सहाऽगाच्छ्रीगृहे **हरिः** । **रुक्मिणी** तत्र चोत्थाय कां नमामीत्यवोचत[3] ॥७३॥
**कृष्णेन** दर्शिता तस्याः **सत्यभामा**ऽब्रवीदिति । कथं वन्दिष्यतेऽसौ मामज्ञानाद् वन्दिता मया ॥७४॥
हसित्वा **हरि**रप्यूचे को दोषः स्वसृवन्दने । **सत्या** विलक्षा गेहेऽगाद् **रुक्मिणीं** [4]नतपूर्विणी ॥७५॥
**रुक्मिण्यै** महतीमृद्धिं ददौ **कंसनि**[5]**षूदनः** । प्रेमपीयूषनिर्मग्नो रेमे च सहितस्तया ॥७६॥
¶**कृष्णेना**ऽन्येद्युरायातो **नारदो**ऽभ्यर्च्य भाषितः । किं दृष्टं किञ्चिदाश्चर्यं भ्रमसि त्वं हि तत्कृते[6] ॥७७॥
**नारदो**ऽप्यब्रवीद् दृष्टं शृणु **वैताढ्य**पर्वते । **जाम्बवान्** खेचरेन्द्रोऽस्ति **शिवचन्द्रा** च तत्प्रिया ॥७८॥
**विष्वक्सेन**स्तयोः सूनुः कन्या **जाम्बवती** पुनः । रूपेण तस्याः सदृशी न काऽपि त्रिजगत्यपि ॥७९॥
क्रीडार्थं सा च **गङ्गा**यां नित्यं हंसीव गच्छति । आश्चर्यभूतां तां दृष्ट्वा तवाऽऽख्यातुमिहाऽऽगमम् ॥८०॥
तच्छ्रुत्वा **शार्ङ्गभृत्** तत्र ययौ सबलवाहनः । सखीवृतां **जाम्बवतीं** रममाणां ददर्श च ॥८१॥
यथोक्ता **नारदे**नेयं तथैवेति [7]विदन् **हरिः** । अपाहर**ज्जाम्बवतीं** जज्ञे च तुमुलो महान् ॥८२॥
खड्ग-खेटकभृच्चाऽऽगा**ज्जाम्बवान्** क्रोधमुद्वहन् । जिग्ये**ऽनाधृष्टिना** चाऽऽशु निन्येऽभ्यर्णे च **शार्ङ्गिणः** ॥८३॥
तां **जाम्बवान् जाम्बवतीं** ततश्चाऽदत्त **शार्ङ्गिणे**[8] । अपमानाद् विरक्तस्तु प्रव्रज्यां स्वयमाददे ॥८४॥
**जाम्बवत्**सूनुना **विषक्सेनेन** सहितो **हरिः** । आदाय तां **जाम्बवतीं** जगाम **द्वारकापुरीम्** ॥८५॥
**रुक्मिणी**सदनाभ्यर्णे तस्या हर्म्यं ददौ **हरिः** । योग्यमन्यच्च सा त्वासीद्**रुक्मिण्या** सह सख्यभाक् ॥८६॥
¶अन्यदा **सिंहलेशस्य श्लक्ष्णरोम्णो**ऽन्तिके गतः । निवृत्य चाऽऽगतो दूतः **कृष्णा**येति व्यजिज्ञपत् ॥८७॥
नोऽभ्यनन्दत् तवाऽऽदेशं **श्लक्ष्णरोमा**स्ति तस्य तु । कन्यका **लक्ष्मणा** नाम तवैवाऽर्हति लक्षणैः ॥८८॥
**द्रुमसेनेन** सेनान्या रक्षिता स्नातुमर्णवे । सेदानीमाययौ सप्तरात्रं स्नास्यति तत्र च ॥८९॥
श्रुत्वेति सह **रामेण कृष्ण**स्तत्र जगाम च । निहत्य तं च सेनान्यमगादादाय **लक्ष्मणाम्** ॥९०॥
उदुह्य **लक्ष्मणां कृष्णो जाम्बवत्यो**कसोऽन्तिके । निदधे रत्नसदने प्रददौ च परिच्छदम् ॥९१॥
¶[10]इतश्चाऽऽ**यस्खरीपुर्यां सुराष्ट्राराष्ट्र**भूपतिः । **राष्ट्रवर्धन** इत्यासीद् **विनया** तस्य तु प्रिया ॥९२॥
तयोश्च **नमुचिः** सूनुर्युवराजो महाभुजः । दुहिता तु **सुसीमेति** निःसीमा रूपसम्पदा ॥९३॥
**नमुचिः** सिद्धदिव्यास्त्रः **कृष्णा**ज्ञां न ह्यमन्यत । स्नातुं [11]**प्रभासे** सोऽन्येद्युर्ययौ सह **सुसीमया** ॥९४॥
निवेश्य शिबिरं तत्र स्थितं विज्ञाय तं **हरिः** । जघान सबलोऽभ्येत्य **सुसीमा**माददे च ताम् ॥९५॥
[12]तामप्युदुह्य **गोविन्दो लक्ष्मणा**सदनान्तिके । मुमोच हर्म्ये तस्यै च प्र[13]क्रियां महतीं ददौ ॥९६॥
**राष्ट्रवर्धन**राजोऽपि **सुसीमायै** परिच्छदम् । प्राहिणोत् **कृष्ण**हेतोश्च वि[14]वाहार्हं गजादिकम् ॥९७॥
¶मरौ **वीतभयेशस्य गौरीं** कन्यामुपायत । **हरिः सुसीमा**गेहस्योपान्तगेहे मुमोच च ॥९८॥

---

१. सज्जीकरणमिषात्, **मज्जनच्छलात्** पु० ला० २ । २. **धन्विना** मु० र०. । ३. **त्युवाच च** मु० २ । ४. **नतपूर्विणीम्** पा० ला० सं० आ० । ५. **निसूदनः** खं० १, २, ला० सू० । ६. **मत्कृते** ता० सं० । ७. **वदन्** मु० । ८. **शार्ङ्गिणः** मु०र० । ९. अङ्गीकृतवान् । १०. **इतश्चायःखुरीपुर्याम्** ला० की० ला० १, **इतश्चायुस्खुरी०** खं० २, ला० सू०, **इतश्चाजस्तुरी०** खं० १, **इतश्चाजस्करीपुर्याम्** ता० सं० पा० पु० । ११. प्रभासतीर्थे । १२. **तामप्युद्वाह्य** खं० १-२, ला० सू० मु० । १३. ऋद्धिपरिवारम् । १४. **विवाहार्थम्** ता० सं० मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाऽरिष्टपुरे **कृष्णः** प्रययौ **हलिना** सह । **हिरण्यनाभ**दुहितुः **पद्मावत्याः** स्वयंवरे ॥९९॥
राज्ञा **हिरण्यनाभेन रोहिणी**सोदरेण तौ । [1]पूजितौ विधिवद्वीरौ जामेयाविति सम्मदात् ॥१००॥
**हिरण्यनाभ**नृपते **रैवतो** नामतोऽग्रजः । प्रवव्राज समं पित्रा तीर्थे भगवतो **नमेः** ॥१०१॥
तत्सुता **रेवती रामा सीता बन्धुमतीति** च । पुरा प्रदत्ता **रामाय रोहिणी**तनुजन्मने ॥१०२॥
सर्वेषां पश्यतां राज्ञां जह्रे **पद्मावतीं हरिः** । स्वयंवरागतान् राज्ञो युध्यमानान् जिगाय च ॥१०३॥
पत्नीयुतौ **राम-कृष्णा**वीयतुर्**द्वारकां** ततः । **कृष्णो गौरी**गृहाभ्यर्णे[2] गृहे **पद्मावतीं** न्यधात् ॥१०४॥
¶इतश्च **पुष्कलावत्यां** पुर्यां **गान्धार**[3]नीवृति । **नग्नजित्त**नयश्**चारुदत्तो** नामाऽभवन्नृपः ॥१०५॥
**गान्धारी** नाम तस्याऽऽसीद् भगिनी सुभगाकृतिः । दत्त[4]पत्रेव लावण्यसम्पदा खेचरीष्वपि ॥१०६॥
मृते पितरि दायादै[5]श्**चारुदत्तः** पराजितः । दूतेन शिश्रिये **कृष्णं** शरण्यं शरणाय सः ॥१०७॥
**गन्धारेषु हरि**र्गत्वा तद्दायादान् रणेऽवधीत् । **चारुदत्त**प्रदत्तां च तां **गान्धारी**मुपायत ॥१०८॥
**पद्मावती**गृहाभ्यर्णे तस्या वेश्म ददौ **हरिः** । इत्यभूवन्महिष्योऽष्टौ [6]**कृष्णस्य** क्रमवेश्मगाः ॥१०९॥
¶**रुक्मिण्याश्च** गृहेऽन्येद्युर्**अतिमुक्तर्षि**रागतः । तं दृष्ट्वा **सत्यभामा**ऽपि तत्रैवाऽऽशु समाययौ ॥११०॥
**रुक्मिण्या**ऽप्रच्छि स मुनिः किं मे स्यात् तनयो न वा । भावी **कृष्ण**समः पुत्रस्तवेत्युक्त्वा ययौ च सः ॥१११॥
**सत्यभामा** मुनिवचो मन्यमाना तदात्मगम् । उवाच **रुक्मिणीं** सूनुर्भावी **कृष्ण**समो मम ॥११२॥
प्रत्यूचे **रुक्मिणी** नर्षिवचनं फलति च्छलात् । एवं विवदमाने ते **कृष्णा**भ्यर्णमुपेयतुः ॥११३॥
तदा **दुर्योधनो** राजा तत्राऽऽयातः स्वसोदरः । **भामयो**चे मम सुतो जामाता ते भविष्यति ॥११४॥
**रुक्मिण्या**ऽपि तथोक्तः स स्माऽऽह दास्ये सुतामहम् । तस्मै यं युवयोरेका तनयं प्रसविष्यते ॥११५॥
**भामो**वाच सुतो यस्याः प्रथमं [7]परिणेष्यते । तद्विवाहेऽन्यया केशा देयास्तस्याः स्वकाः खलु ॥११६॥
साक्षिणः प्रतिभुवश्च **रामपादा जनार्दनः** । **दुर्योधन**श्चेत्युदित्वा स्वौकौ[8] द्वे अपि जग्मतुः ॥११७॥
¶अन्यदा **रुक्मिणी** स्वप्ने [9]वलक्षवृषभस्थिते । विमाने स्वं समारूढं ददर्श प्रत्यबोधि च ॥११८॥
तदानीमेव च सुरो **महाशुक्रा**न्महर्द्धिकः । प्रच्युतो **रुक्मिणी**देव्या उदरे समवातरत् ॥११९॥
तं च स्वप्नं **हरे रुक्मिण्या**चख्यौ प्रातरुत्थिता । विश्वैकवीरस्ते सूनुर्भावीति व्याकरोच्च सः ॥१२०॥
तदा च दासी **भामायाः** स्वप्नव्याख्यां निशम्य ताम् । गत्वा शशंस **भामायै** तस्याः श्रवणदुःखदम् ॥१२१॥
साऽपि स्वप्नं कल्पयित्वोपेत्याऽऽख्याच्**छार्ङ्गपाणये** । [10]हस्तिमल्लोपमो हस्ती स्वप्नेऽद्य ददृशे मया ॥१२२॥
तत्कूट[11]मिङ्गितैर्ज्ञात्वाऽप्यसौ मा कुप्यदित्यथ । व्याख्यात् **कृष्ण**स्तव सुतो भविष्यति शुभः खलु ॥१२३॥
दैवात् तदाऽभवत् तस्याः[12] गर्भोऽवर्धिष्ट चोदरम् । **रुक्मिण्यु**त्तमगर्भत्वाद् यथावस्थोदरा त्वभूत् ॥१२४॥
**सत्यभामा**ऽन्यदा **विष्णु**मुवाच तव पत्न्यसौ । शशंस मायया गर्भं निरीक्षस्वोदरं द्वयोः ॥१२५॥
तदा चाऽवर्धयत् **कृष्णं** दास्येका यत् सुतोऽधुना । सुषुवे **रुक्मिणी**देव्या महात्मा काञ्चनप्रभः ॥१२६॥
**सत्यभामा**ऽपि तच्छ्रुत्वा विलक्षा क्रोधविह्वला । गृहं यान्त्येव सुषुवे **भानुकं** नामतः सुतम् ॥१२७॥
**कृष्णो**ऽपि मुदितोऽगच्छद्**रुक्मिण्याः** सदने तदा । [13]अर्वाक्सिंहासनासीन आनाय्याऽपश्यदात्मजम् ॥१२८॥
प्रद्योतयन् दिशः सर्वाः **प्रद्युम्नो**ऽस्त्वेष नामतः । तमित्युल्लाप[14]यन् बालं क्षणमस्थाज्**जनार्दनः** ॥१२९॥
¶प्राग्वैराद् **रुक्मिणी**वेषो **धूमकेतुः** सुरस्तदा । एत्य **कृष्णाद्** गृहीत्वाऽर्भं[15] प्रति **वैताढ्य**मभ्यगात् ॥१३०॥
ययौ च **भूतरमणो**द्याने **टङ्कशिलो**परि । दध्यौ चैनं किमास्फाल्य हन्मि नैवं हि[16] दुःखभाक् ॥१३१॥
तन्मुञ्चामि शिलापृष्ठे निराहारः क्षुधातुरः । क्रन्दन्नेष म्रियेतेति तं तत्रोत्सृज्य सोऽगमत् ॥१३२॥

१. **विधिवत् पूजयामास** पा० । २. **०भ्यर्णगृहे** खं.२, सू० । ३. **गान्धारभूषणे** खं० १. सू० ला० र०, गान्धारदेशे । ४. दत्तं पत्रं प्रशस्तिपत्रं यस्याः सा । ५. गोत्रिभिः । ६. कृष्णस्य अष्टौ पट्टराज्यः (१. सत्यभामा, २. रुक्मिणी, ३. लक्ष्मणा ४. जाम्बवती ५. सुसीमा ६. गौरी ७. पद्मावती ८. गान्धारी) । ७. **परिणेष्यति** मु० । ८. **स्वगृहम्** । ९. शुभ्र । १०. ऐरावतोपमः । ११. चेष्टाभिः । १२. सत्यभामायाः १३. पूर्वं । १४. **०पयित्वा स क्षण०** ला० । १५. बालकम् । १६. **स** मु० ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

सोऽर्भश्चरमदेहत्वान्निरुपक्रमजीवितः । [1]बहुपर्णाञ्चिते देशे [2]निपपाताऽविबाधितम् ॥१३३॥

प्रातश्चाऽ**ग्निज्वाल**पुरात् स्वपुरं गच्छतः सतः । यानं तत्राऽस्खलत् **कालसंवर**स्य ख[3]चारिणः ॥१३४॥

विमानस्खलने हेतुं खेचरेन्द्रः स चिन्तयन् । अधस्तादुत्ततताराऽर्भं तं चाऽपश्यन् महाद्युतिम् ॥१३५॥

विमानस्खलने हेतुर्महात्मा कोऽप्यसाविति । पत्न्यै **कनकमालायै** पुत्रत्वेनाऽऽर्पयत् स[4]तम् ॥१३६॥

स्वपुरे **मेघकूटा**ख्ये स गत्वा खेचरोऽवदत् । मम पत्नी गूढगर्भाऽऽसीत् तनयं सुषुवेऽधुना ॥१३७॥

पुत्रजन्मोत्सवं कृत्वा **संवरः** सुदिनेऽकरोत् । दिशां प्रद्योतनात् तस्य **प्रद्युम्न** इति चाऽभिधाम् ॥१३८॥

¶इतश्च **कृष्णो रुक्मिण्यो**पेत्याऽप्रच्छि क्व ते सुतः । सम्प्रत्येव त्वया नीत इत्यूचे सा च **विष्णुना** ॥१३९॥

प्रतारयसि किं नाथेत्युक्तः **कृष्ण**स्तया पुनः । केनाऽपि च्छलितोऽस्मीति [5]बहुधाऽन्वैषयत्[6] सुतम् ॥१४०॥

सुतोदन्ते त्वसम्प्राप्ते **रुक्मिणी** मूर्च्छिताऽपतत् । रुरोद लब्धसंज्ञा तु तारं परिजनैः समम् ॥१४१॥

**यदवो यदु**पत्न्यश्च तस्थुः सर्वेऽपि दुःखिताः । **सत्यभामां** विमुच्यैकां तदीयं च परिच्छदम् ॥१४२॥

[7]प्रभविष्णोर्न किं **विष्णोः** पुत्रोदन्तोऽधुनाऽपि हि । **रुक्मिण्ये**वं ब्रुवाणाऽदाद् दुःखं **कृष्ण**स्य दुःखिनः ॥१४३॥

अशेषैर्**यदु**भिः सार्धं तत्रोद्विग्नस्य **शार्ङ्गिणः** । सभायां **नारदो**ऽभ्यागात् किमेतदिति चावदत् ॥१४४॥

**कृष्णो** बभाषे **रुक्मिण्**या जातमात्रः करान्मम । हृतः केनाऽपि तनयः शुद्धिं जानासि तस्य किम् ॥१४५॥

उवाच **नारदो**ऽत्राऽऽसीन्महाज्ञान्य**तिमुक्तकः** । स गतो मोक्षमधुना न ज्ञानी कोऽपि **भारते** ॥१४६॥

**सीमन्धर**तीर्थकरः सर्वसंशयनाशनः । साम्प्रतं [8]प्राग्विदेहेषु गत्वा [9]प्रक्ष्यामि तं **हरे** ! ॥१४७॥

**कृष्णेन यदु**भिश्चान्यैरभ्यर्[10]च्याभ्यर्थितो ययौ । **नारद**स्त्वरितं तत्र यत्र **सीमन्धरः** प्रभुः ॥१४८॥

स्थितं समवसरणे तं जिनेन्द्रं प्रणम्य सः । पप्रच्छ **कृष्ण-रुक्मिण्यो**र्भगवन् ! क्व सुतोऽधुना? ॥१४९॥

स्वाम्या[11]ख्येयद् द्युसदा **धूमकेतु**ना प्राग्भवारिणा । हृतश्छलेन **कृष्णस्य प्रद्युम्नो** नाम नन्दनः ॥१५०॥

मुक्तस्तेनो**पवैताढ्यं** शिलायां न तु सोऽमृत । हन्तुं चरमदेहत्वात् स केनाऽपि न शक्यते ॥१५१॥

प्रातश्च गच्छता दृष्टः **संवरेण** खचारिणा । पुत्रत्वेनाऽर्पितः पत्न्यै वर्धमानोऽस्ति **सम्प्रति** ॥१५२॥

कथं वैरं **धूमकेतो**स्तेनाऽभूत् पूर्वजन्मनि? । भूयोऽपि **नारदे**नैवं पृष्टः स्वामीत्यवोचत् ॥१५३॥

¶**जम्बूद्वीपस्य भरते मगधे**षु महर्द्धिके । **शालिग्रामे**ऽस्त्युपवनं ख्यातं नाम्ना **मनोरमम्** ॥१५४॥

तस्योद्यानस्याऽधिपतिर्यक्षोऽभूत् **सुमना** इति । अवात्सीत् तत्र च ग्रामे **सोमदेव** इति द्विजः ॥१५५॥

**सोमदेवस्याऽग्निलायां** पत्न्यामभवतां सुतौ । **अग्निभूतिर्वायुभूति**श्चोभौ वेदार्थकोविदौ ॥१५६॥

विद्यया विश्रुतौ तत्र द्वावपि प्राप्तयौवनौ । भुञ्जानौ विविधान् भोगांस्तस्थतुस्तौ मदोद्धुरौ ॥१५७॥

तस्मिन् **मनोरमो**द्यानेऽपरेद्यु**र्नन्दिवर्धनः** । आचार्यः समवासार्षील्लोकैर्नत्य च वन्दितः ॥१५८॥

**अग्निभूति-वायुभूती** दृप्तौ [12]त्वेत्यैवमूचतुः । शास्त्रार्थं वेत्सि चेत् [13]कञ्चित् तद् भो ! वद सिताम्बर ! ॥१५९॥

**नन्दिवर्धन**शिष्यस्तौ **सत्यो**ऽवोचत् कुतो युवाम् । समायातौ **शालिग्रामा**दिति तावप्यशंसताम् ॥१६०॥

भूयः **सत्यो**ऽवदत् [14]प्राप्तौ मानुष्यं भोः ! कुतो भवात् । इति पृच्छामि तद् [15]ब्रूतं जानीथो यदि किञ्चन ॥१६१॥

ततस्तौ तस्थतुर्लज्जाधोमुखौ ज्ञानवर्जितौ । आख्यातुं तद्भवं [16]सद्यो मुनिरेवं प्रचक्रमे ॥१६२॥

ग्रामस्याऽस्य वनस्थल्यां शृगालौ पललाशिनौ । युवां [17]पूर्वभवेऽभूतमहो ! ब्राह्मणसत्तमौ ! ॥१६३॥

क्षेत्रे कुटुम्बिनैकेन चर्मरज्ज्वादिकं निशि । [18]मुक्तं वृष्ट्याऽऽर्द्रीकृतं तत् ताभ्यां सर्वमभक्ष्यत ॥१६४॥

अत्याहाराद् विपद्योभौ तौ युवां निजकर्मणा । **सोमदेव**द्विजसुतौ सञ्जाताविह जन्मनि ॥१६५॥

¶प्रभाते हालिकः सोऽपि सर्वं तत्प्रेक्ष्य भक्षितम् । गतः स्वगेहे कालेन मृत्वाऽभूत् स्व[19]स्नुषासुतः ॥१६६॥

---

१. **बहुपर्णाचिते** ता० सं० ला०, **बहुपर्णचिते** खं० १ । २. **निःपपाता०** मु० । ३. विद्याधरस्य । ४. **सुतम्** मु० र० । ५. **बहुत्रा०** खं० २, **बहु चा०** ला० । ६. **०न्वेषयत्** खं० १-२, मु० र० । ७. समर्थस्य । ८. पूर्वविदेहेषु । ९. **पृच्छामि** मु० । १०. **रत्यर्थाभ्यर्चितो** खं० २ । ११. **स्वाम्याख्याद्** मु० र० । १२. **गत्वैव०** खं० १ । १३. **किञ्चित्** खं० २, ला० सू० । १४. **प्राप्तं** खं० १ । १५. **तद्ब्रूत** खं० २ । **तदवृत्तं जानीषे** ला० । १६. **सत्यो** मु० । १७. **पूर्वभवेऽभूता०** ता० पा० ला० मु० । १८. **पृक्तं** ला० । १९. स्वपुत्रवधूसुतः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जातिस्मरत्वं [1]सम्प्राप्तः स्नुषा माता सुतः पिता । कथं वाच्यो मयेत्यासीज्जन्ममूकः स कैतवात् ॥१६७॥
न चेद् वां प्रत्ययस्तत् तं पृच्छतं मूकहालिकम् । वृत्तान्तमेनं स यथा मौनं मुक्त्वा ब्रवीति वाम् ॥१६८॥
लोकेन सद्योऽप्यानीतः स मौनी तत्र हालिकः । उचे च मुनिना ब्रूहि प्राग्जन्म निजमो[2]दितः ॥१६९॥
पुत्रः पिता पिता पुत्र ईदृक् प्रायो भवस्थितिः । प्राग्जन्मसम्बन्धभवां ह्रियं मौनं च तत् त्यज ॥१७०॥
आत्मसंवादमुदितः स नमस्कृत्य तं मुनिम् । सर्वेषां शृण्वतामाख्यत् प्राग्जन्म स्वं तथैव हि ॥१७१॥
प्राव्रजन् बहवस्तत्र प्रबन्ध्य स च हालिकः । हास्यमानौ जनैस्तौ तु विलक्षौ जग्मतुर्गृहम् ॥१७२॥
¶विप्रौ वैरायमाणौ तौ सासी[3] हन्तुं तु तं मुनिम् । निश्यायातौ **सुमनसा** यक्षेण स्तम्भितौ क्षणात् ॥१७३॥
प्रातश्च ददृशुर्लोकास्तन्माता-पितरौ च तौ । क्रन्द[4]न्तौ **सुमना** यक्षः प्रत्यक्षमिदमभ्यधात् ॥१७४॥
एतौ मुनिं जिघांसन्तौ दुर्मती स्तम्भितौ मया । प्रव्रज्यां यदि गृह्णीतस्तदा मुञ्चामि नाऽन्यथा ॥१७५॥
दुष्करः साधुधर्मो नौ धर्मं तु श्रावकोचितम् । करिष्याव इति ताभ्यामुक्ते मुक्तौ सुरेण तौ ॥१७६॥
तदादि चक्रतुस्तौ तु जिनधर्मं यथाविधि । नाऽर्हद्धर्मं तत्पितरौ प्रपेदाते मनागपि ॥१७७॥
**अग्निभूति-वायुभूती** तौ [5]मृत्वाऽभवतां सुरौ । षट्पल्यप्रमितायुष्कौ कल्पे **सौधर्म**नामनि ॥१७८॥
च्युत्वाऽभूतां **गजपुरे**ऽ**र्हद्दास**वणिजः सुतौ । **पूर्णभद्र-माणिभद्रौ** श्रावकौ प्राग्भवक्रमात् ॥१७९॥
¶[6]**महेन्द्रो** नाम तत्रर्षिरन्यदा समवासरत् । **अर्हद्दासः** प्रवव्राज श्रुत्वा धर्मं तदन्तिके ॥१८०॥
**पूर्णभद्र-माणिभद्रौ महेन्द्रं** वन्दितुं मुनिम् । यान्तौ शुनिकां चण्डालं दृष्ट्वा सिष्णिहतुः पथि ॥१८१॥
गत्वा नत्वा **महेन्द्रर्षिं** तौ पप्रच्छतुरेष कः । चण्डालः का च शुनिका स्नेहो यद्दर्शनेन नौ[7] ॥१८२॥
स आचख्यावग्**निभूति-वायुभूति**भवे हि वाम्[8] । पिता विप्रः **सोमदेवो**ऽभवन्माताऽ**ग्निला**भिधा ॥१८३॥
पिता स मृत्वा **भरते**ऽत्रैव **शङ्खपुरे**ऽभवत् । [9]**जितशत्रु**र्नाम नृपः परदाररतः सदा ॥१८४॥
मृत्वाऽ**ग्निला** तु तत्रैव पुरे **शङ्खपुरे**ऽजनि । **सोमभूते**र्ब्राह्मणस्य [10]**रुक्मिणी** नाम गेहिनी ॥१८५॥
तां स्वगेहाङ्गणगतां **जितशत्रु**नृपोऽन्यदा । व्रजन् ददर्श सद्योऽपि जज्ञे[11] कामवशी[12]श्च सः ॥१८६॥
उत्पाद्याऽऽ[13]गः **सोमभूते**स्तां राजाऽन्तःपुरे न्यधात् । सोऽग्निमग्न इवाऽस्थात् तु द्विजस्तद्विरहातुरः ॥१८७॥
**जितशत्रु**स्तया रन्त्वा सहस्रं शरदा[14]मथ । मृत्वा बभूव नरके त्रिपल्योपमजीवितः ॥१८८॥
[15]ततश्च हरिणः सोऽभूद्धतो [16]मृगयुणा पुनः । जज्ञे श्रेष्ठिसुतो **मायी** सोऽपि मृत्वाऽभवद् गजः ॥१८९॥
दैवाज्जातिस्मरः सोऽभूत् [17]प्रायं कृत्वा मृतोऽहनि । अष्टादशे त्रिपल्यायुर्वैमानिकसुरोऽभवत् ॥१९०॥
ततश्च्युत्वैष चण्डालः सोऽभूत् सा **रुक्मिणी** पुनः । भवं भ्रान्त्वाऽभूच्छुनीयं तेन वां स्नेह एतयोः ॥१९१॥
इति श्रुत्वा **पूर्णभद्र-माणिभद्रौ** तदाऽऽशया । जातिस्मृत्याऽबोधयतां चण्डालं शुनिकां च ताम् ॥१९२॥
ततो विरक्तश्चण्डालो मासं सोऽनशने स्थितः । मृत्वा **नन्दीश्वर**द्वीपे त्रिदशः समजायत ॥१९३॥
प्रबुद्धा शुनिका[18] साऽपि विहितानशना मृता । तत्रैवाऽभूत् **शङ्खपुरे** राजपुत्री **सुदर्शना** ॥१९४॥
पुनरप्यागतस्तत्र **महेन्द्रर्षिः** शशंस ताम् । पृष्टोऽ**र्हद्दास**पुत्राभ्यां शुनी-[19]चण्डालसद्गतिम् ॥१९५॥
ताभ्यां भूयोऽपि सा राजदुहिता प्रतिबोधिता । उपादाय परिव्रज्यां देवलोकमुपाययौ ॥१९६॥
¶**पूर्णभद्र-माणिभद्रौ** गृहिधर्मं तु तौ तदा । कृत्वा मृत्वा च **सौधर्मे**ऽभूतां सामानिकौ सुरौ ॥१९७॥
च्युत्वा च [20]**हास्तिनपुरे विष्वक्सेन**स्य भूपतेः । **मधु-कैटभ**नामानावभूतां तनयावुभौ ॥१९८॥
**नन्दीश्वर**सुरः सोऽपि च्युत्वा भ्रान्त्वा भवं चिरम् । अभूद् **वटपुरे** राजा नामतः **कनकप्रभः** ॥१९९॥

१. **स प्राप्तः** खं० सू० । २. **स्वकमादितः** खं० १, । ३. असिना सहितौ । ४. **सुमना यक्षः प्रत्यक्षं क्रन्दन्ताविदमभ्यधात्** कौ० । ५. **तौ विपद्य बभूवतुः** खं० १, सू० । ६. **माहेन्द्रो** मु० । ७. आवयोः । ८. युवयोः । ९. सोमदेवो द्वितीयभवे जितशत्रुनृपः । १०. अग्निला द्वितीयभवे रुक्मिणी । ११. जह्रे खं० २ । १२. **कामवशंवदः** मु० । १३. अपराधम् । १४. वर्षाणाम् । १५. **इतश्च** खं० २ । १६. व्याधेन । १७. अनशनम् । १८. **शुनकी** र० । १९. **चाण्डाल** खं० १, ला०, **चण्डालयोर्गतिम्** सू० । २०. **हस्तिना०** खं० २, **हस्तिन०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च्युत्वा **सुदर्शना** साऽपि भवं भ्रान्त्वा च भूरिशः । **कनकप्रभ**राजस्य **चन्द्राभे**ति महिष्यभूत् ॥२००॥
**विष्वक्सेनो मधुं** राज्ये यौवराज्ये च **कैटभम्** । निधाय व्रतमादाय **ब्रह्मलोक**[1]मुपागतः ॥२०१॥
वशीकृताशेषभुवोर्**मधु-कैटभ**योस्तयोः । पल्लीपतिश्छलात् श्वेव **भीमो** देशमुपाद्रवत् ॥२०२॥
**मधुः** प्रतस्थे तं हन्तुं मार्गे **वटपुरे**ऽथ सः । अभ्यर्चितो भोजनाद्यैः **कनकप्रभ**भूभुजा ॥२०३॥
स सेवकः स्वामिभक्त्या पत्न्या **चन्द्राभया** समम् । उपतस्थे भोजनान्ते प्राभृतेन **मधुं** नृपम् ॥२०४॥
**मधुं** प्रणम्य **चन्द्राभा** भूयोऽप्यन्तःपुरं ययौ । तदैवाऽऽदित्सैति **मधुः** कामार्तस्तां बलादपि ॥२०५॥
तदा निषिद्धोऽमात्येन ययौ **मधुनृपो**ऽग्रतः । **भीमं** पल्लीपतिं जित्वा निवृत्तस्तत्र चाऽऽययौ ॥२०६॥
**कनकप्रभ**राजेन भूयोऽपि **मधुर्**र्चितः । उवाच प्राभृतैस्ते[4]ऽलं **चन्द्राभैव** ममाऽर्प्यताम् ॥२०७॥
याच्यमानोऽपि **कनकप्रभ**स्तां न ददौ यदा । तदाऽऽच्छिद्यापि **चन्द्राभां** निनाय स्वपुरे **मधुः** ॥२०८॥
पपात मूर्छितः पृथ्व्यां विधुरः **कनकप्रभः** । उत्थाय विललापोच्चैरुन्मत्त इव चाऽभ्रमत् ॥२०९॥
¶[5]व्यवहारे सहाऽमात्यैस्तस्थौ **मधुनृपो**ऽन्यदा । तन्निर्णयमकृत्वाऽपि **चन्द्राभा**सदनं ययौ ॥२१०॥
[6]चिरायितं किमद्येति पृष्टश्चन्द्राभया **मधुः** । पारादारिकवादेऽस्थामहमद्येत्यवोचत ॥२११॥
तं स्मित्वोवाच **चन्द्राभा** स पूज्यः पारदारिकः । **मधुरूचे** कथं पूज्यो ? निग्राह्याः पारदारिकाः ॥२१२॥
भूयोऽप्युवाच **चन्द्राभा** यद्येवं न्यायनिष्ठुरः । आत्मानं किं न जानीषे प्रथमं पारदारिकम् ? ॥२१३॥
तच्छ्रुत्वा प्रतिबुद्धः स लज्जितोऽस्थादथाऽऽययौ । गायन्नृत्यन् राजमार्गे वृतोऽर्भैः **कनकप्रभः** ॥२१४॥
दध्यौ तं प्रेक्ष्य **चन्द्राभा** मद्वियोगे दशामिमाम् । मत्पतिः प्राप्तवानेष धिग् मां परवशामिमाम् ॥२१५॥
सा विचिन्त्येति **मधवे** तमा[7]यातमदर्शयत् । स्वेन दुष्कर्मणा तेन **मधु**रप्यन्वतप्यत ॥२१६॥
[8]**मधु**र्बन्धुसुतं राज्ये न्यस्य **कैटभ**संयुतः । व्रतं जग्राह **विमलवाहन**स्याऽन्तिके गुरोः ॥२१७॥
तौ तेपाते तपोऽत्युग्रं सहस्रान् शरदां बहून् । द्वादशाङ्गधरौ साधुवैयावृत्त्यकरौ सदा ॥२१८॥
विधायाऽनशने प्राप्ते विहितालोचनावुभौ । मृत्वाऽभूतां **महाशुक्रे** तौ सामानिकनाकिनौ ॥२१९॥
¶**कनकप्रभ**राजोऽपि क्षुत्तृषादिभिरर्दितः[9] । समांसहस्रत्रितयं क्षपयित्वा व्यपद्यत ॥२२०॥
स नामतो **धूमकेतुर्ज्योतिष्केषु** सुरोऽभवत् । ज्ञात्वाऽवधेः पूर्ववैरं **मधु**जीवं ममार्ग च ॥२२१॥
**मधुं** महर्द्धिदेवत्वादपश्यन्नैव सोऽमरः । च्युत्वा प्राप्य च मर्त्यत्वं तापसः समजायत ॥२२२॥
कृत्वा बालतपो मृत्वा सोऽथ वैमानिकोऽभवत् । **मधुं** महर्द्धिं तत्राऽपि नै[11]ह्यभूद् द्रष्टुमीश्वरः ॥२२३॥
च्युत्वा ततोऽपि संसारं भ्रान्त्वा कर्मवशात् पुनः । **धूमकेतु**रिति नाम्ना **ज्योतिष्के**षु सुरोऽभवत् ॥ २२४॥
¶अत्राऽन्तरे **मधुजीवो महाशुक्रा**त् परिच्युतः । **रुक्मिण्या वासुदेव**स्य महिष्या उदरेऽभवत् ॥२२५॥
**धूमकेतुः** पूर्ववैराज्जातमात्रं तमर्भकम् । जह्रे जिघांसुश्चाऽक्षैप्सीद् दुष्**टङ्कशिलो**परि ॥२२६॥
स्वप्रभावादक्षताङ्गः **संवरेणा**ऽऽददे च सः । **रुक्मिण्याः** षोडशाब्दान्ते भविता तस्य सङ्गमः ॥२२७॥
एवं वियोगः पुत्रेण **रुक्मिण्याः** केन कर्मणा ? । इति पृष्टे **नारदेन** प्रभुः **सीमन्धरो**ऽवदत् ॥२२८॥
¶**जम्बूद्वीप**स्य **भरत**क्षेत्रे **मगधमण्डले** । **लक्ष्मीग्रामा**भिधे ग्रामे **सोमदेवो**ऽभवद् द्विजः ॥२२९॥
तस्य **लक्ष्मीवती** भार्या कदाऽप्युपवने गता । दृष्ट्वाऽस्पृशन् मयूराण्डं कुङ्कुमाक्तेन पाणिना ॥२३०॥
तत्स्पर्शेन तदण्डं तु वर्ण-गन्धान्तरं गतम् । मात्रा स्वमित्यजा[12]नत्या घटिकाषोडशो[13]ज्झितम् ॥२३१॥
ततो [14]वृष्टाब्दतोयेन स्वभावस्थं तदण्डकम् । दृष्ट्वा सङ्गोपितं मात्रा कालेनाऽभून्मयूरकः ॥२३२॥
भूयो **लक्ष्मीवती** तत्राऽऽयाता तं केकिबालकम् । दृष्ट्वाऽतिरम्यं जग्राह रुद[15]त्यामपि मातरि ॥२३३॥
स्वगृहे पञ्जरे न्यस्य प्रीणाति पान-भोजनैः । तं तथा साऽशिक्षन्नृत्यं यथा चारु ननर्त सः ॥२३४॥

१. **देवलोक** खं० २, ता० सं० ला० पा० आ० । २. **पल्लीपतिच्छलादेव** मु० । ३. आदातुमैच्छत् । ४. **प्राभृतेनालं**० ला० । ५. न्याये । ६. **चिरायातं** खं० १, ला० सू० । ७. **तमायान्त**० मु० र० । ८. **मधुर्धुन्धुसुतम्** मु० र० । ९. पीडितः । १०. वर्ष । ११. **न ह्यमुं** मु० । १२. **त्यजानन्त्या** मु० र० । १३. **०षोडशोज्झ्य तम्** खं० १ । १४. **ततोऽदृष्टाब्द**० मु० । १५. **रुदन्त्या**० मु० र० ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

तन्माता तु मयूरी सा रँसन्ती विरसस्वरम् । न मुमोच प्रदेशं तं पुत्रस्नेहनियन्त्रिता ॥२३५॥
ततस्तां लोक इत्यूचे कौतुकं ते नं पूर्यते । इयं वराकी म्रियते मयूरी, मुञ्च तत्सुतम् ॥२३६॥
तद्गिरा साऽपि सकृपाऽमुञ्चत् **षोडशमासिकम्** । उद्यौवनं तत्र नीत्वा यतः स्थानादुपाददे ॥२३७॥
बद्धं तेन प्रमादेन ब्राह्मण्या षोडशाब्दिकम् । कर्म स्वपुत्रविरहवेदनीयं महत्तरम् ॥२३८॥
¶अन्येद्युर्दर्पणे तस्यौः पश्यन्त्याः स्वं विभूषितम् । मुनिः **समाधिगुप्ताख्यो** भिक्षार्थं प्राविशद् गृहे ॥२३९॥
भिक्षामस्मै प्रदेहीति तामूचे तत्पतिर्द्विजः । आहूतः केनचित्पुंसा तदैव स बहिर्ययौ ॥२४०॥
तया थुथ्थ्वँति कुर्वत्या जल्पित्वा परुषाक्षरम् । निर्वासितः स महर्षिर्द्वारं च पिहितं द्रुतम् ॥२४१॥
जुगुप्साकर्मणा तेन सप्तमेऽहनि साऽभवत् । सर्वाङ्गीणगलत्कुष्ठा विरक्ताऽग्नौ विवेश च ॥२४२॥
मृत्वा तत्राऽभवद् ग्रामे गर्दभी रजकस्य सा । भूयोऽपि मृत्वा तत्रैव ग्रामेऽभूद् गर्तसूकरी ॥२४३॥
साऽपि मृत्वा शुन्यभवद् दग्धा साऽपि दवाग्निना । भावभेदेन मर्त्यायुर्बद्धवा तत्र व्यपद्यत ॥२४४॥
पुरस्य **भृगुकच्छ**स्य समीपे **नर्मदा**तटे । दुर्गन्धा दुर्भागा **काणा**भिधाऽभूद् धीवरात्मजा ॥२४५॥
मुक्ता पितृभ्यां तद्गन्धासहाभ्यां **नर्मदा**तटे । उद्यौवना जनं नावोत्तारयामास साऽनिशम् ॥२४६॥
दैवात् **समाधिगुप्तर्षिः** शीततौं तत्र चाऽऽययौ । कायोत्सर्गेण निश्चयस्थान्निष्कम्पः साँनुमानिव ॥२४७॥
महात्मैष निशां सर्वां कथं शीतं सहिष्यते । विमृश्येत्यार्द्रचित्ता सा तं तृणैः प्रावृणोन्मुनिम् ॥२४८॥
व्यतीतायां विभावर्यां मुनिवर्यं ननाम सा । भद्रिकेत्यादिशद् धर्मं तस्यै सोऽपि महामुनिः ॥२४९॥
एषं क्वाऽपि मया दृष्ट इति ध्यात्वा चिरं तया । पृष्टः स मुनिराचख्यौ तस्यास्तान् प्राक्तंनान् भवान् ॥२५०॥
भूयोऽप्यूचे महर्षिः स कृतसाधुजुगुप्सया । इह जाताऽसि दुर्गन्धा सर्वं कर्मानुसारि हि ॥२५१॥
सा जातजातिस्मरणा जुगुप्सां प्राग्भवे कृताम् । तं मुनिं [11]क्षमयामास गर्हन्ती स्वं मुहुर्मुहुः ॥२५२॥
साऽभूच्च श्राविका तेन मुनिना च कृपालुना । **धर्मश्री**नामधेयाया आर्यिकायाः समर्पिता ॥२५३॥
सहैव विहरन्ती सा ग्रामे क्वाऽपि प्रयातया । **धर्मश्रिया नायलस्य** श्रावकस्य समर्पिता ॥२५४॥
एकान्तरोपवासस्था जिनपूजारता सदा । अनैषीद् द्वादशाब्दानि सा स्थिता **नायला**श्रये ॥२५५॥
सा कृतानशना मृत्वाऽ**च्युतेन्द्र**स्य महिष्यभूत् । पञ्चपञ्चाशत्पल्यायुः प्रच्युत्याऽभूत् तु **रुक्मिणी** ॥२५६॥
मयूरीपुत्रविरहदानादब्दानि षोडश । **रुक्मिणी** पुत्रविरहदुःखान्यनुभविष्यति ॥२५७॥
¶श्रुत्वेति भगवन्तं तं नमस्कृत्य च **नारदः** । उत्पत्येयाय **वैताढ्ये मेघकूटाह्वये** पुरे ॥२५८॥
दिष्ट्या तवाऽभवत् पुत्र इति जल्पंश्च **नारदः** । [12]**संवरेणा**ऽर्चितस्तस्य **प्रद्युम्न**श्च प्रदर्शितः ॥२५९॥
**नारदो**ऽपि च तं दृष्ट्वा **रुक्मिणी**सदृशं सुतम् । सप्रत्ययः [13]**संवरं** तमापृच्छ्य **द्वारकां** ययौ ॥२६०॥
**कृष्णा**दीनां स आचख्यौ पुत्रोदन्तमशेषतः । **रुक्मिण्यास्तु लक्ष्मीवती**भववृत्तान्तपूर्वकम् ॥२६१॥
ततश्च **रुक्मिणी** देवी भक्तितो रचिताञ्जलिः । **सीमन्धरं** भगवन्तं तत्रस्थाऽपि नमोऽकरोत् ॥२६२॥
भविता षोडशाब्दान्ते सुतेन सह सङ्गमः । इत्यार्हतेन वचसा स्वस्था तस्थौ च **रुक्मिणी** ॥२६३॥
¶इतश्च पूर्वं **वृषभस्वामिनः कुरु**रित्यभूत् । सुतो यस्याऽभिधानेन **कुरुक्षेत्र**मिहोच्यते ॥२६४॥
**कुरोः** सुतोऽभवद् **हस्ती** यन्नाम्ना **हस्तिनापुरम्** । **हस्तिं**[14]भूपतिसन्तानेऽ**नन्तवीर्यो**ऽभवन्नृपः ॥२६५॥
तस्माच्च **कृतवीर्यो**ऽभूत् **सुभूम**श्चक्रभृत् ततः । ततोऽप्यसङ्ख्यभूपेषु **शान्तनुः** पार्थिवोऽभवत् ॥२६६॥
**गङ्गा सत्यवती** चेति तस्याऽभूतामुभे [15]प्रिये । **गङ्गा**यामभवत् पुत्रो **भीष्मो** भीष्मपराक्रमः ॥२६७॥
**चित्राङ्गद-चित्रवीर्यौ सत्यवत्याः** सुतावुभौ । **अम्बिका-ऽम्बालिका-ऽम्बेति चित्रवीर्य**स्य तु प्रियाः ॥२६८॥
तासां **धृतराष्ट्र-पाण्डु-विदुरा**स्तनयाः क्रमात् । **धृतराष्ट्रे** न्यस्त[16]राज्योऽभूत् **पाण्डु**र्मृगयापरः ॥२६९॥

---

१. कूजन्ती । २. तु ला० । ३. **तस्यां पश्यन्त्यां** मु० । ४. **थुक्कातिकुर्वन्त्या** मु० । ५. विरूपा खं० २ । ६. **नाम्ना काणाऽभू०** खं० १, सू० । ७. पर्वतः । ८. दयालुचित्ता । ९. मुनिः । १०. **प्राकृतान्** मु०, **प्राक्तृतान्** र० । ११. **क्षामया०** मु० र० । १२. **शंवरे०** खं० १-२, ला० । १३. **शंवरं** खं० १, ला० । १४. **हस्तितोऽनेकभूपेष्वनन्तवीर्यो** पु० सू० । १५. पत्न्यौ । १६. **न्यस्तराज्ये** मु० र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**धृतराष्ट्रः** पर्यणैषीदष्टौ **सुबलं**[1]जन्मनः । [2]गन्धारराज-**शकुने**र्गान्धार्याद्याः सहोदराः ॥२७०॥
**दुर्योधना**दयस्तासु शतं सञ्जज्ञिरे सुताः । **पाण्डो**र्युधिष्ठिर-**भीमा**-ऽर्जुनाः **कुन्त्यां**[3] तु नन्दनाः ॥२७१॥
**पाण्डोः** पत्न्यां द्वितीयायां **शल्य**[4]स्वसरि नन्दनौ । **मद्र्या**मभूतां **नकुल-सहदेवौ** महाभुजौ ॥२७२॥
ते **पाण्डु**पुत्राः पञ्चाऽपि शूराः पञ्चानना इव । खेचराणामप्यजय्या विद्याभुजबलोर्जिताः ॥२७३॥
अनुज्येष्ठं विनीतास्ते दुर्नीतिमसहिष्णवः । अचित्रीयन्त पञ्चाऽपि लोके लोकोत्तरैर्गुणैः ॥२७४॥
¶अन्येद्युः **काम्पील्य**पुराद् **द्रुपद**स्य महीपतेः । आगत्य दूतो नत्वा च **पाण्डुराज**मदोऽवदत् ॥२७५॥
सुता **द्रुपदराज**स्य **धृष्टद्युम्न**स्य चाऽनुजा । **चुलनी**कुक्षिजाताऽस्ति **द्रौपदी** नाम कन्यका ॥२७६॥
तस्याः[5] स्वयंवरे सर्वे **दशार्हाः सीरि-शार्ङ्गिणौ** । **दमदन्त-शिशुपालौ रुक्मी कर्णः सुयोधनः** ॥२७७॥
अपरेऽपि हि राजानः कुमाराश्च महौजसः । राज्ञा[6]ऽऽहूताः प्रेष्य दूतान् गच्छन्तः सन्ति सम्प्रति ॥२७८॥ युग्मम् ॥
एभिर्देवकुमाराभैः कुमारैः पञ्चभिः सह । तत्राऽऽगत्याऽलङ्कुरुष्व तं स्वयंवरमण्डपम् ॥२७९॥
तैः सुतैः पञ्चभिर्जैत्रैर्युक्तो बाणैरिव स्मरः । **पाण्डु**स्तदाऽऽगात् **काम्पील्यं** राजानोऽन्येऽपि चाऽऽययुः ॥२८०॥
**द्रुपदे**नाऽर्चितास्तत्र प्रत्येकमपि पार्थिवाः । स्वयंवरसदोऽध्य[7]स्थुरन्तरिक्षमिव ग्रहाः ॥२८१॥
¶अथ स्नाता शुचिवेषा माल्या-ऽलङ्कारधारिणी । **द्रौपद्य**र्हन्तमर्चित्वा सखीभिः परिवारिता ॥२८२॥
रूपेणाऽमर[8]कन्येवाऽऽगात् स्वयंवरमण्डपम् । सामानिकैरिव सुरैः **कृष्णा**दिभिरलङ्कृतम् ॥२८३॥
तत्र सख्या नामग्राहं दर्श्यमानेषु राजसु । पश्यन्ती **द्रुपद**सुता प्रययौ यत्र **पाण्डवाः** ॥२८४॥
सा सानुरागा चिक्षेप स्वयंवरणमालिकाम् । पञ्चानामपि कण्ठेषु युगपत् **पाण्डु**जन्मनाम् ॥२८५॥
किमेतदिति साश्चर्यं तत्राऽभूद् राजमण्डलम् । यावत् तावच्चारणर्षिस्तत्र कश्चित् समाययौ ॥२८६॥
**द्रौपद्याः** पञ्च भर्तारः किं नु स्युरिति राजभिः । **कृष्णा**दिभिः सोऽ[9]नुयुक्तः समाचख्याविदं मुनिः ॥२८७॥
¶इयं हि पञ्चपतिका प्राग्भवार्जितकर्मणा । भविष्यति किमाश्चर्यं कर्मणां विषमा गतिः ॥२८८॥
तथा ह्यत्रैव **चम्पा**यां पुरि विप्रास्त्रयोऽभवन् । **सोमदेवः सोमभूतिः सोमदत्त**श्च सोदराः ॥२८९॥
तेषां धान्य-धनाढ्यानामासन् पत्न्यः क्रमादिमाः । **नागश्री**रथ **भूतश्री**र्**यक्षश्री**श्चेति नामतः ॥२९०॥
मिथः स्निग्धाश्च तेऽन्येद्युर्व्यवस्थामिति चक्रिरे । वारवारेण भोक्तव्यं सर्वैरेकैकवेश्मनि ॥२९१॥
तथैव कुर्वतां तेषां **सोमदेव**गृहेऽन्यदा । भोजनावसरे प्राप्ते **नागश्रीः** [10]प्रगुणं व्यधात् ॥२९२॥
तया विविधभोज्यानि पचन्त्या विविधं तदा । अर्जा[11]नत्या [12]कट्वलाबु विपच्य व्यञ्जनीकृतम् ॥२९३॥
एतत् कीदृग्जातमिति ज्ञातुमास्वादितं तया । अभोज्यमिति चाऽज्ञायि थूत्कृतं च तदैव हि ॥२९४॥
संस्कृतं स्वादुभिर्द्रव्यैरप्येतद्विविधैर्मया । कट्वेवेति विमृशन्ती विषण्णा तदगोपयत् ॥२९५॥
तद्वर्जमपरैर्भोज्यैर्भोजयामास सा तदा । सकुटुम्बानपि पति-देवरान् गृहमागतान् ॥२९६॥
¶तदा **सुभूमिभागाख्य** उद्याने समवासरत् । श्री**धर्मघोष** आचार्यो ज्ञानवान् सपरिच्छदः ॥२९७॥
शिष्यो **धर्मरुचि**स्तस्य मासक्षपणपारणे । **सोमदेवा**दिषु गतेष्वागान्**नागश्रियो** गृहम् ॥२९८॥
एषोऽपि तोषितोऽनेन भवत्विति विमृश्य सा । अलाबु[13]व्यञ्जनं तस्मै **नागश्री**र्मुनये ददौ ॥२९९॥
सोऽप्यपूर्वं मया द्रव्यं लब्धमित्यभिचिन्तयन् । गत्वा दर्शयितुं पात्रं गुरुहस्ते समार्पयत् ॥३००॥
गुरुस्तद्गन्धमाघ्रायोवाचेदं भोक्ष्यसे यदि । तदा विपत्स्यसे वत्स ! तत्परिष्ठापयाऽऽशिवदम् ॥३०१॥
सम्यग्ज्ञात्वाऽपरं पिण्डं गृहीत्वा पारयेरिति । तेनोक्तः स बहिर्गत्वा शुद्धं स्थण्डिलमासदत् ॥३०२॥
तत्र पात्रात् तुम्बरसबिन्दुरेकोऽपतत् स्वयम् । म्रियमाणा अपश्यच्च तत्र लग्नाः पिपीलिकाः ॥३०३॥

---

१. सुबलराजसुतस्य । २. गन्धारदेशाधिपशकुनेः अष्टौ भगिन्यः गान्धार्याद्याः पर्यणैषीत् । ३. **कुन्त्यास्तु** मु० र० । ४. शल्यनृपस्य भगिन्याम् । ५. **स्वयंवरे तत्र सर्वे** ला० । ६. **राजाहूताः** ला०१, पा० मु० । ७. **ऽध्यष्ठु०** ला० सू० । ८. **०णामरकन्याभाऽऽगात** ला० पा० मु० । ९. पृष्टः । १०. बहुप्रकारेण सज्जम् । ११. **अजानन्त्या** खं० २ । १२. कटुतुम्बम् । १३. **अलाबू०** मु० र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दध्यौ च बिन्दुनाऽप्यस्य म्रियन्तेऽनेकजन्तवः । स्यात् परिष्ठापितेऽस्मिंस्तु [1]कियतां प्राणिनां मृतिः ॥३०४॥
वरमेको विपन्नोऽहं न पुनः प्राणिराशयः । निश्चित्येति स तत्[2] तुम्बं स्वयमादं[3] समाहितः ॥३०४॥
विधायाऽऽराधनां सम्यक् स समाधिपरायणः । मृत्वा **सर्वार्थसिद्धे**ऽभूदहमिन्द्रः सुरोत्तमः ॥३०६॥
¶इतश्च ते **धर्मघोषा**चार्या **धर्मरुचेः** कुतः । विलम्बोऽभूदिति ज्ञातुमादिक्षन्नपरान् मुनीन् ॥३०७॥
तैर्बहिः स मृतो दृष्टस्तद्रजोहरणादि च । आदायाऽऽख्यायि गत्वा च गुरवे गुरुखेदिभिः ॥३०८॥
ततः सोऽतिशय[4]ज्ञानोपयोगेन गुरुर्जगौ । **नागश्रियो** दुश्चरितं श्रमणानामशेषतः ॥३०९॥
ततः सकोपा व्रतिनो व्रतिन्यश्चैत्य तत्र ते । **सोमदेव**प्रभृतीनां लोकानां चाऽऽचचक्षिरे ॥३१०॥
**सोमाद्यैः** साऽपि **नागश्री**र्विप्रैर्नि[5]र्वासिता गृहात् । निर्भर्त्स्यमाना लोकैश्च दुःखं पर्याट सर्वतः ॥३११॥
कास-श्वास-ज्वर-कुष्टादिभी रोगैः सुदारुणैः । क्रान्ता षोडशभिः साऽऽपन्नारकत्वमिहाऽपि हि ॥३१२॥
क्षुधिता तृषिता जीर्णखण्डवासा निराश्रया । पर्यटन्ती क्रमान्मृत्वा सा षष्ठं नरकं ययौ ॥३१३॥
उद्धृत्य नरकान्म्लेच्छेऽप्यजायत विपद्य च । सप्तमं नरकं प्राप तदु[6]द्वृत्ता झ[7]षेष्वभूत् ॥३१४॥
सप्तमं नरकं भूयो गत्वा म्लेच्छेष्वजायत । एवं द्विर्द्विर्ययौ पापा सर्वेषु नरकेषु सा ॥३१५॥
ततश्च पृथ्वीकायादिषूत्पद्याऽनेकशश्च सा । अकामनिर्जरायोगाद् दुष्कर्माऽ[8]शातयद् बहु ॥३१६॥
¶ततश्चाऽत्रैव **चम्पायां** नाम्नाऽभूत् **सुकुमारिका** । श्रेष्ठिसागरदत्तस्य **सुभद्रा**कुक्षिजा सुता ॥३१७॥
तत्रैवाऽऽसीज्जि**नदत्तः** सार्थवाहो महा[9]धनः । **भद्रा** च गेहिनी तस्य **सागरो** नाम तत्सुतः ॥३१८॥
उप**सागरदत्तौ**को **जिनदत्तो**ऽन्यदा व्रजन् । उद्यौवनामपश्यत् तां कुमारीं **सुकुमारिकाम्** ॥३१९॥
अधिसौधं कन्दुकेन रममाणामुदीक्ष्य ताम् । योग्येयं मत्सुतस्येति स ध्यायन् स्वगृहं ययौ ॥३२०॥
ततः सबन्धुरभ्येत्य **जिनदत्तः** स्वसूनवे । ययाचे **सागरदत्तात्** कुमारीं **सुकुमारिकाम्** ॥३२१॥
ऊचे **सागरदत्तो**ऽपि सुता प्राणप्रिया मम । न स्थातुमहमीशोऽस्मि मनागप्यनया विना ॥३२२॥
मम चेद् गृहजामाता त्वत्सुतः **सागरो** भवेत् । तदा स्वपुत्रीं यच्छामि तस्मै सह धनादिभिः ॥३२३॥
आलोचयिष्यामीत्युक्त्वा **जिनदत्तो** गृहं[10] ययौ । **सागरस्य** समाख्याच्च मौनेनाऽस्थाच्च **सागरः** ॥३२४॥
अनिषिद्धं ह्यनुमतमिति न्यायेन तत्पिता । मेने **सागरदत्ताय** गृहजामातरं सुतम् ॥३२५॥
तया **कुमार्या** ताभ्यां तु **सागरः** परिणायितः । तया समं वासगृहे गत्वा तल्पं च शिश्रिये ॥३२६॥
पूर्वकर्मवशात् तस्याः स्पर्शेनाऽङ्गारवद् भृशम् । दह्यमानः क्षणं तस्थौ कथञ्चित् तत्र **सागरः** ॥३२७॥
निद्रायमाणां तां मुक्त्वा नंष्ट्वा स स्वगृहं ययौ । अपश्यन्ती पतिं साऽपि निद्राच्छेदेऽरुदद्भृशम् ॥३२८॥
वधू-वरस्य दर्श[11]नशौचहेतोः **सुभद्रया** । चेट्यादिष्टा प्रगेऽद्राक्षीद्रुदतीं तां ध[12]वोज्झिताम् ॥३२९॥
सा गत्वाऽऽख्यात् **सुभद्रायै सुभद्रा** श्रेष्ठिने पुनः । श्रेष्ठी तु **जिनदत्ताये**पालम्भं प्रददौ स्वयम् ॥३३०॥
आहूय **जिनदत्तो**ऽपि रहः स्वसुतमब्रवीत् । त्वया न युक्तं विदधे त्यजता सज्जनात्मजाम् ॥३३१॥
इदानीमपि तद्गच्छ वत्सोप**सुकुमारि[13]कम्** । प्रतिपन्नं मया हीदृक् सज्जनानां पुरस्तदा ॥३३२॥
व्याहरत् **सागरो**ऽप्येवं वरमग्नौ विशाम्यहम् । यास्यामि न पुनस्तात ! जातूप**सुकुमारि[14]कम्** ॥३३३॥
एतत् **सागरदत्तो**ऽपि तत्कुड्यन्तरितोऽशृणोत् । निराशश्च ययौ गेहमूचे च **सुकुमारिकाम्** ॥३३४॥
विरक्तः **सागर**स्ते हि तत् तुभ्यमपरं पतिम् । अन्विष्याऽहं करिष्यामि पुत्रि ! मा खेदमुद्वह ॥३३५॥
¶सो[15]ऽथान्येद्युर्गवाक्षस्थोऽपश्यत् कर्परधारिणम् । जीर्णखण्डाम्बरं भिक्षायाचकं मक्षिकावृतम् ॥३३६॥
आहूय श्रेष्ठिना सोऽपि त्याजितः कर्परादिकम् । स्नपयित्वा भोजितश्च चर्चितश्चन्दनेन च ॥३३७॥

१. **संहारः प्राणिनां कियान्** ला० १ । २. **तं तुंब** खं० २, विना । ३. **स्वयमादत्** मु० । ४. **०तिशयाज्ज्ञानो०** खं० २ । ५. **०निः कासिता** मु० । ६. **तदुद्धृता** मु० २० । ७. मत्स्ययौनो । ८. **०ऽशोषयद्०** ला०, अक्षपयत् । ९. **धनाधिपः** मु० । १०. **गृहे** खं० १-२, ला० सू० । ११. दन्तधावनकारणात् । १२. पतिरहिताम् । १३. **सुकुमारिकाम्** मु० र० खं० १-२ । १४. **जातूपसुकुमारिकाम्** ला० सू० विना । १५. **स चान्येद्यु०** खं० १ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊचे च तं मया दत्ता पुत्रीयं **सुकुमारिका** । भोजनादिषु निश्चिन्त: सुखं तिष्ठ[1] सहाऽनया ॥३३८॥
इत्युक्त: प्रययौ वासगृहं सह तयाऽथ स: । सुप्तश्च तद्वपु:स्पर्शादग्निस्पृष्ट इवाऽभवत् ॥३३९॥
उत्थाय च निजं वेषमादाय स पलायित: । विषण्णा सा तथैवाऽस्थाद् दृष्टा[2] पित्रेत्यभाष्यत ॥३४०॥
वत्से ! प्राक्कर्मणामेष उदयोऽन्यत्र कारणम् । सन्तुष्टा तिष्ठ तद्दानं ददती मम वेश्मनि ॥३४१॥
¶तथैव सा ददौ दानं शान्ता धर्मरता सती । कदाचिदागुस्तद्वेश्मन्यार्या **गोपालिका** इति ॥३४२॥
सा प्रत्यलाभयत् ताश्च शुद्धै: पानाऽशनादिभि: । तत्पार्श्वे धर्ममाकर्ण्य प्रबुद्धा व्रतमाददे ॥३४३॥
तुर्य-षष्ठा-ऽष्टमादीनि सा तपांसि प्रकुर्वती । **गोपालिका**भिरार्याभि: सह व्यहरताऽन्वहम् ॥३४४॥
आर्यास्ता: सा कदाऽप्यूचे पश्यन्ती रविमण्डलम् । **सुभूमिभागोद्यान**स्थाऽऽतापनां विदधाम्यहम् ॥३४५॥
ता अप्यूचु: स्ववसतेर्बहिर्न खलु कल्पते । आतापना व्रतिनीनामाम्नातमिदमागमे ॥३४६॥
तदश्रुत्वेव **सुभूमिभागोद्याने**ऽभ्युपेत्य सा । आतापनामुपाक्रंस्त[3] सूर्ये निहितलोचना ॥३४७॥
¶अथैककामुकेनाऽङ्के स्थापितामपरेण तु । धृतातपत्रामन्येन वीज्यमानां सुखानिलम् ॥३४८॥
बध्यमानकचामेकेनाऽन्येनाऽङ्के धृतांह्रिकाम् । गणिकां **देवदत्ता**ख्यां तत्राऽऽयातां ददर्श सा ॥३४९॥ युग्मम् ॥
सा त्वसम्पूर्णभोगेच्छा निदानमकरोदिदम् । एषेव पञ्चपतिका भूयासं तपसाऽमुना ॥३५०॥
साऽङ्गशौचपरा चाऽऽसीदभ्युक्षन्ती[4] पदे पदे । आर्याभिर्वार्यमाणा च चेतस्येवमचिन्तयत् ॥३५१॥
आर्यिकाणां गौरवितौ[5] पुराऽभूवं[6] गृहं स्थिता। भिक्षाचरीमिदानीं मां तर्जयन्ति यथा तथा ॥३५२॥
किममूभिरिति ध्यात्वा विभिन्नेऽस्थात् [7]प्रतिश्रये । एकाकिनी स्वैरिणी सा चिरं व्रतमपालयत् ॥३५३॥
संलेखनामष्टमासान् कृत्वाऽनालोच्य सा मृता । नवपल्योपमायुष्का **सौधर्मे** देव्यजायत ॥३५४॥
च्युत्वा चाऽभूद् **द्रौपदी**यं निदानात् प्राक्तनादमी । अमुष्या: पतय: पञ्च सञ्जाता: कोऽत्र विस्मय:? ॥३५५॥
इत्युक्ते मुनिना व्योम्नि साधु साध्विति गीरभूत् । साध्वमी पतयोऽभूवन्निति **कृष्णाद**यो जगु: ॥३५६॥
तैरेव राजस्वजनै: स्वयंवरसमागतै: । कृतोत्सवा[8]: पर्यणैषु**र्द्रौपदी**मथ **पाण्डवा:** ॥३५७॥
तत: पाण्डुर्**दशार्हा**स्तान् **कृष्ण**मन्यांश्च भूभुज: । विवाहार्थमिंवा[9]ऽऽनीतान् गौरवात् स्वपुरेऽनयत् ॥३५८॥
अर्चित्वा सुचिरं तत्र **दशार्हान् सीरि-शार्ङ्गिणौ** । आपृच्छमानान् व्यसृजद् भूपानन्यांश्च **पाण्डुराट्** ॥३५९॥
¶**पाण्डुर्युधिष्ठिरा**याऽथ दत्त्वा राज्यं व्यपद्यत । अन्वियाय च तं **माद्री कुन्त्यै** दत्त्वा सुतद्वयम् ॥३६०॥
ततश्चास्तंगते **पाण्डौ पाण्डवां**स्तान्[10] समत्सरा: । न मेनिरे **धार्तराष्ट्रा** राष्ट्रै[11]लुब्धा दुराशया: ॥३६१॥
**दुर्योधनेन** तद्वृद्धास्तोषिता विनयादिना । जिताश्च पाण्डवा द्यूते राज्यं [12]तर्षात् पणीकृतम् ॥३६२॥
पणीकृतां **द्रौपदीं** च जित्वा **दुर्योधनो**ऽग्रहीत् । क्रोधरक्तेक्षणाद् **भीमाद्** बिभ्यत्तां पुनरार्पयत् ॥३६३॥
कृत्वाऽवमाननां ते च **धार्तराष्ट्रै:** स्वराष्ट्रत: । निर्वासिता: **पाण्डुसुता** वनवासमशिश्रियन् ॥३६४॥
वनाद् वनं चिरं भ्रान्त्वा **दशार्हा**नुजया तया । **कुन्त्या द्वारवतीं** नीतास्ते पञ्चाऽपि हि **पाण्डवा:** ॥३६५॥
दिव्यास्त्रयोधिन: सर्वे विद्याभुजबलोर्जिता: । ययु: **समुद्रविजय**स्यौकै:[13] प्रथमतोऽपि ते ॥३६६॥
**समुद्रविजय**स्तत्राऽक्षोभ्याद्या भ्रातरश्च ते । भगिनीं भागिनेयांश्च स्नेहादानर्चुरञ्जसा ॥३६७॥
ऊचुर्**दशार्हा**स्त्वं[14] तेभ्यो दौर्यादेभ्य:[15] समागता । दिष्ट्या दृष्टाऽसि जीवन्ती सापत्यापि हि हे स्वस: ! ॥३६८॥
**कुन्त्य**प्यूचे सपुत्राऽपि जीविताऽहं तदैव हि । मया यदैव जीवन्त: श्रुता यूयं ससूनव: ॥३६९॥
लोकोत्तरं चरित्रं च वत्सयो **राम-कृष्णयो:** । शृण्वती मुदितात्राऽऽगां तद्दर्शनसमुत्सुका ॥३७०॥
सानुज्ञाता भ्रातृभिस्तै: सपुत्राऽगात् सभां **हरे:** । तामभ्युत्तस्थतू **राम-कृष्णौ** भक्त्या च नेमतु: ॥३७१॥
**राम-कृष्णौ पाण्डवा**श्च यथापूर्वं परस्परम् । कृताश्लेष-नमस्कारा यथोचितमुपाविशन् ॥३७२॥

---

१. **तिष्ठे:** खं० २, ला० सू० । २. **दृष्ट्वा** ता० सं० पु० की० छा० ला० । ३ **मुपाक्रांस्त** ला० । ४. सिञ्चन्ती । ५. सम्मानिता । ६. **पुराऽभवं** खं० १ । ७. उपाश्रये । ८. **कृतोत्सवे** खं० २ बिना । ९. **मिहानीतान्** मु० र० । १०. **वांस्ते स०** ला० । ११. **क्षुद्रा लुब्धा** खं० २ । १२. तृष्णावशात् । १३. **विजयस्यौकसि प्रथमं च ते** ला० । १४. दशार्हास्तां मु० । १५. दुर्योधनादिभ्य: सकाशात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶ऊचे **कृष्णः** साधु यूयमिहाऽऽयाताः स्ववेश्मनि । युष्माकं च **यदूनां** च लक्ष्मीः **साधारणी**[1] खलु ॥३७३॥
ऊचे **युधिष्ठिरस्**तेषां सदा दास्यः श्रियो **हरे** ! । येषामभिमतोऽसि त्वं किं पुनर्ये मतास्तव॥३७४॥
अस्मन्मातृकुलमिदं त्वयाऽलङ्कुर्वता **हरे** ! । वर्त्तामहे [2]विश्वतोऽपि विशेषेण **महौजसः** ॥३७५॥
सत्कृत्य विविधालापैः **कुन्तीं**[3]-**कुन्ती**सुतानपि । **कृष्णो** नियोजयामास प्रासादेषु पृथक् पृथक् ॥३७६॥
**लक्ष्मीवतीं वेगवतीं सुभद्रां विजयां रतिम्** । ददुः क्रमात् **पाण्डवेभ्यो दशार्हा** निजकन्यकाः ॥३७७॥
**यदुभिः** पूज्यमानास्ते **कृष्णेन** च **बलेन** च । **युधिष्ठिराद्याः** पञ्चाऽपि सुखं तत्राऽवतस्थिरे ॥३७८॥
¶इतश्चाऽधिगतकलाकलापं प्राप्तयौवनम् । **प्रद्युम्नं** प्रेक्ष्य **कनकमाला**ऽभून्मदनातुरा ॥३७९॥
दध्यौ च सा न हीदृक्षः खेचरेष्वस्ति कश्चन । मन्ये देवोऽपि नेदृक्षः का कथा भूमिचारिषु? ॥३८०॥
तत्स्वयंवर्धितस्याऽस्य तरोरिव फलं ह्यदः । स्वयं भोगोऽन्यथा नूनं जन्माऽपि हि मुधा मम ॥३८१॥
विमृश्यैवं सा जगाद **प्रद्युम्नं** कलया[4] गिरा । इहैवाऽस्त्युत्तरश्रेण्यां नाम्ना **नलपुरं** पुरम् ॥३८२॥
**गौरी**वंशोद्भवस्तत्र **निषधो** नाम भूपतिः । तस्याऽहं राजसिंहस्य[5] पुत्री पुत्रस्तु **नैषधिः** ॥३८३॥
**गौरी** नाम महाविद्या दत्ता पित्रा मम स्वयम् । दत्त्वा **प्रज्ञप्ति**विद्यां च मामुपायत **संवरः**[6] ॥३८४॥
**शंवरो**[7] मयि रक्तस्तु नाऽन्यां युवतिमिच्छति । सिद्धविद्याद्वयाया मे बलात् तस्य तृणं जगत् ॥३८५॥
एवंविधाऽनुरक्ताऽहं त्वां वृणोमि भजस्व माम् । मा स्म प्रणयभङ्गं मे कार्षीरज्ञानतोऽपि हि ॥३८६॥
**प्रद्युम्नो**ऽप्यब्रवीच्छान्तं पापं किञ्चिद् ब्रवीष्यदः । माता त्वमसि पुत्रोऽहं पातयेदं[8] द्वयोरपि ॥३८७॥
साऽप्यूचे नाऽसि मे जातः किन्तु त्वां प्राप **शंवरः** । **अग्निज्वाल**पुरादायान्[9]मार्गे केनचिदुज्झितम् ॥३८८॥
ममाऽर्पितो [10]वर्धनाय त्वं कस्याऽपि हि नन्दनः । निःशङ्कं भुङ्क्ष्व तद्भोगान् मया सह यदृच्छया ॥३८९॥
स्त्रीगृहे पतितोऽस्मीति चिन्तयन् सोऽब्रवीत् ततः । **शंवरात्** त्वत्सुतेभ्यश्च लप्स्येऽहं जीवितुं[11] कथम् ? ॥३९०॥
सोचे सुभग! मा भैषीर्महाविद्ये उभे अपि । गृहाण **गौरी-प्रज्ञप्त्यौ** भवाऽजय्यो[12] जगत्यपि ॥३९१॥
न ह्यकृत्यं करिष्यामीत्यन्तर्निश्चित्य **कृष्णसूः**[13] । ऊचे प्रयच्छ मे विद्ये करिष्ये त्वद्वचस्ततः ॥३९२॥
**प्रज्ञप्ति-गौर्यौ** साऽदत्त महाविद्ये स्मरातुरा । असाधयच्च **प्रद्युम्नः** पुण्योदयवशाद् द्रुतम् ॥३९३॥
तया चाऽभ्यर्थितो रन्तुं व्याहार्षीत् **कृष्णनन्दनः** । मम संवर्धनात् पूर्वं केवलैव जनन्यभूः ॥३९४॥
आचार्या तु भवस्यद्य विद्यादानेन मेऽनघे । न वाच्यस्तत् त्वया किञ्चिदत्राऽहं पापकर्मणि ॥३९५॥
तामेवमुक्त्वा मुक्त्वा च **प्रद्युम्नो**ऽथ पुराद्बहिः । गत्वा **कालाम्बुकावापी**तटेऽ[14]वास्थित दुर्मनाः[15] ॥३९६॥
¶नखैः **कनकमाला** स्वं दीर्त्वा कलकलं व्यधात् । किमेतदिति पृच्छन्तस्तत्पुत्राश्च समाययुः ॥३९७॥
युष्मत्पितुः पुत्रकेणोद्यौवनेन दुरात्मना । **स्वैरं** विदारिताऽस्म्यैषा मार्जारेणेव पिण्डदा[16] ॥३९८॥
ततस्ते कुपिताः सर्वे गत्वा **कालाम्बुका**तटे । पाप पापेति जल्पन्तः **प्रद्युम्ने**[17] प्राहरन् द्रुतम् ॥३९९॥
विद्याद्वयोर्जितद्युम्नैः[18] **प्रद्युम्नो** लीलयाऽपि तान् । जघान **संवर**सुतान् शम्बरानिव[19] केशरी ॥४००॥
**शंवरो**ऽपि सुतवधात्[20] क्रुद्धस्तं हन्तुमागतः । विद्याजनितमायाभिः **प्रद्युम्नेन** जितश्च सः ॥४०१॥
**प्रद्युम्नः** सानुतापोऽथ **संवराय** यथातथम् । मूलादारभ्य **कनकमालो**दन्तं शशंस तम् ॥४०२॥
तेनाऽपि सानुतापेन **प्रद्युम्नः** परिपूजितः । तदा च **नारद** ऋषिः **प्रद्युम्ना**न्तिकमाययौ ॥४०३॥
**प्रज्ञप्त्या** ज्ञापितं तं च **प्रद्युम्नः** पर्यपूजयत् । अज्ञापयच्च **कनकमाला**वृत्तान्तमादितः ॥४०४॥
¶अथ **प्रद्युम्न-रुक्मिण्योः सीमन्धर**जिनोदितम् । सर्वं वृत्तान्तमाख्याय निजगादेति **नारदः** ॥४०५॥
आदौ पुत्रस्य वीवाहे[21] केशदानपणः पुरा । सपत्न्या **भामया** सार्धमस्ति त्वन्मातुरुद्यतः[22] ॥४०६॥

१. **साधारणा** ला० । २. **महे वयं योद्धाः ( धाः )** खं० २ । ३. कुन्तीकुन्ती सुता मु० र० । ४. मनोज्ञया । ५. **राजहंसस्य** खं० १ । ६. **शंवरः** खं.१-२, सू० । ७. **संवरो** मु० । ८. **पापायेदं** मु० खं० १-२, ला० सू० । ९. आगच्छन् । १०. **वर्धयितुं** पु० । ११. जीवितं खं० १, सू० विना । १२. **भवाऽजेयो** खं-२ । १३. **प्रद्युम्नः**, कृष्णभूः खं० २, ता० सं० । १४. **तटे चास्थित** मु० र० । १५. चिन्तातुरः । १६. भोजनदात्री । १७. **प्रद्युम्नं** खं० २ । १८. द्युम्नं बलम् । १९. शम्बरा मृगविशेषाः । २०. **०वधक्रुद्ध०** खं० २ । २१. **विवाहे** खं० २, र० । २२. प्रकटः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भामाया**[१] **भानुकः** सूनुः साम्प्रतं परिणेष्यते । त्वन्मात्रा तत्र दातव्याः स्वकेशाः पणहारिताः ॥४०७॥
केशदानविप्लवेन त्वद्वियोगरुजा च सा । सत्यपि त्वयि तनये मरिष्यत्येव **रुक्मिणी** ॥४०८॥
**सनारदो**ऽपि **प्रद्युम्नस्ततः प्रज्ञप्तिनिर्मितम्** । विमानमारुह्य ययावाश्वेव **द्वारकापुरीम्**[२] ॥४०९॥
¶आख्यच्च[३] **नारदः** सेयं त्वत्पितुर्द्वारकापुरी[४] । यां विधाय स्वयं रत्नैर्धनदोऽपूरयद् धनैः ॥४१०॥
**प्रद्युम्नो**ऽप्यभ्यधात् तिष्ठेर्विमाने त्वमिहैव हि । **द्वारकायां**[५] चमत्कारं यावत् किञ्चित् करोम्यहम् ॥४११॥
आमेति **नारदेनोक्ते** तत्रस्थां[६] **कृष्णनन्दनः** । **सत्यभामा**सुतोद्वाहजन्ययात्रामुदैक्षत[७] ॥४१२॥
हृत्वा कन्यां तदुद्वाह्याममुञ्चन्नारदान्तिके । मा भैषीः **कृष्णपुत्रो**ऽसावित्यूचे **नारदो**ऽपि ताम् ॥४१३॥
कपिभृत्पुरुषो भूत्वा **प्रद्युम्नो** वनपालकान् । ऊचे फलादि ददतां क्षुधितस्याऽस्य मत्कपेः ॥४१४॥
अयं **भानुक**वीवाहायाऽऽरामो रक्ष्यते खलु । न किञ्चित् तत् त्वया वाच्यमित्यूचुर्वनपालकाः ॥४१५॥
प्रलोभ्य भूरिभिर्द्युम्नैस्तान्[८] **प्रद्युम्नः** प्रविश्य च । कपिनाऽकारयत् तेनोद्यानं रिक्तं फलादिभिः ॥४१६॥
[९]जात्यवाजिवणिग्भूत्वा ततः सोऽगात् तृणापणे । [१०]तत्राऽऽपणिभ्योऽयाचिष्ट तृण्यां[११] स्वहयहेतवे ॥४१७॥
तथैवाऽददतस्तांस्तु प्रलोभ्य द्रविणेन सः । चकार सर्वमतृणं **प्रद्युम्नो** निजविद्यया ॥४१८॥
तथैव स्वादु सलिलस्थानान्यसलिलानि सः । पीत्वा चकार वाह्याल्यां वाहं चाऽवाहयत् स्वयम् ॥४१९॥
दृष्टश्च **भानुकेना**ऽश्वः पुष्टः कस्यैष इत्यथ । **प्रद्युम्नो**ऽपि ममैषोऽश्व इत्याचख्यौ कुतूहली ॥४२०॥
**भानुकः** सादरोऽवोचत् प्रयच्छाऽमुं तुरङ्गमम् । यत् त्वं याचिष्यसे मूल्यं तत् ते दास्यामि बह्वपि ॥४२१॥
[१२]**प्रद्युम्नस्त**मभाषिष्ट परीक्ष्याऽऽदत्स्व वाजिनम् । राजापराधोऽपरथाऽनागसोऽपि भवेन्मम ॥४२२॥
परीक्षितुमथाऽऽरोहद् **भानुकस्त**स्य वाजिनम् । वाजं नाटयता तेन पातितः स महीतले ॥४२३॥
स [१३]ऐडकमथारूढो हस्यमानः पुरीजनैः । **वसुदेव**सदस्यागात् पार्षद्यानपि हासयन् ॥४२४॥
¶**प्रद्युम्नो**ऽपि द्विजीभूय पठन् वेदं कलस्वरम् । प्राविशद् **द्वारिकां** भ्राम्यन् सर्वत्राऽपि त्रिकादिषु ॥४२५॥
**भामा**दासीमपश्यच्च कुब्जिकां तां च विद्यया । सरलाङ्गीं चकाराऽऽशु पथि वेत्रलतामिव ॥४२६॥
पतित्वा[१४] पादयोः सोचे क्व यूयं चलिता ननु ?-। **प्रद्युम्नो**ऽप्यब्रवीद् यत्र लप्स्ये भोजनमिच्छया ॥४२७॥
सोचे तर्ह्येहि दास्यामि **भामा**देव्या निकेतने । सज्जितं सुतवि(वी)वाहे मोदकादि यथारुचि ॥४२८॥
जगाम धाम **भामायाः प्रद्युम्ना**ऽपि तया सह । तोरणद्वारि तं मुक्त्वा दासी **भामान्तिकं**[१५] ययौ ॥४२९॥
काऽसीति **भाम**या पृष्टा दास्यूचे साऽस्मि कुब्जिका । भूयोऽपि **भामा**ऽभाषिष्ट केनाऽसि सरलीकृता ? ॥४३०॥
दास्याख्यद् ब्राह्मणोदन्तं **भामो**चे क्वाऽस्ति स द्विजः? । साऽप्यूचे तोरणद्वारे[१६] मया मुक्तोऽस्ति सम्प्रति ॥४३१॥
तमानय महात्मानमित्यादिष्टाऽथ[१७] **भामया** । तं वेगादानयत् तत्र सा दासी कपटद्विजम् ॥४३२॥
¶स दत्वाऽऽशिषमासीनो जगदे **सत्यभामया** । ब्रह्मन् ! सपत्न्या **रुक्मिण्या** मां रूपेणाऽधिकां कुरु ॥४३३॥
मायाविप्रोऽप्युवाचैवं सुरूपा त्वं हि दृश्यसे । ईदृग् नाऽपरनारीणां रूपं पश्यामि कुत्रचित् ॥४३४ ॥
बभाषे **सत्यभामा**ऽपि भद्र ! जल्पसि साध्विदम् । तथाऽपि रूपेऽनुपमां विशेषेण कुरुष्व माम् ॥४३५॥
सोऽप्यभाषत यद्येवं विरूपा भव सर्वतः । भवेद् रूपविशेषो हि वैरूप्ये सति मूलतः ॥४३६॥
किं करोमीति तत्पृष्ट उपादिशदिति द्विजः । शिरो मुण्डय मष्या च लिम्प देहमशेषतः ॥४३७॥
जीर्णखण्डस्यूतवासा भूत्वा भव ममाऽग्रतः । यथा लावण्यसौभाग्यश्रियमारोपयामि ते ॥४३८॥
सा तदप्यर्थिनी चक्रे विप्रोऽप्येवमवोचत । बुभुक्षया पीडितोऽहमस्वस्थः किं करोमि तत्? ॥४३९॥

---

१. **भामया** खं-१-२ । २. **द्वारिका०** खं.२ । ३. **आख्याच्च** खं.२ । ४. **द्वारिका०** खं० २, ला० । ५. **द्वारिकायां** खं-२, ला० । ६. **तत्रस्थः** ला० । ७. जान । ८. धनैः । ९. जात्य-अश्व-व्यापारी । १०. **तत्र वणिग्भ्यो०** ता० सं० । ११. तृणसमूहस्तृण्या, **तृणान्** ला० सू० । १२. **प्रद्युम्नः प्रत्यभाषिष्ट** खं.१, ला० सू०, ता० सं० ला० ला०२० छा० । १३. **इडिक्कमथा०** ता० सं० छा० ला० २. पु० । **स हिडिक्क** खं.१-२, **तदेडिक०** सू० । महाजं-मेषम् १४. **पतिता** ला० । १५. **भामान्तिके** खं.२ । १६. **द्वारि** खं० २ । १७. **दिष्टा च** खं० १, २ ला० मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भामा**ऽपि तं भोजयितुं सूपकारान् समादिशत् । विप्रोऽप्येवमुपादिक्षद् **भामायाः** श्रवणान्तिके ॥४४०॥
रुडुबुडु[1] रुडुबुडु इति मन्त्रस्त्वयाऽनघे । पुरतः कुलदेवीनां जप्यो[2] मद्भोजनावधि ॥४४१॥
स तथा कुर्वती तस्थौ भुञ्जानो द्विजकश्च सः । सर्वं रसवतीसारं विद्याशक्त्या समापयत् ॥४४२॥
**भामा**तो बिभ्यतीभिः स पयःकरकपाणिभिः । कथञ्चित् सूपकारीभिः समुत्तिष्ठेत्यभाष्यत ॥४४३॥
अहमद्याऽपि नो तृप्तस्तृप्तिर्यत्र भविष्यति । तत्र यास्यामीति वदन् स मायाब्राह्मणो ययौ ॥४४४॥
¶बालसाधुवपुर्भूत्वा ततोऽगाद् **रुक्मिणी**गृहे । **रुक्मिण्या** ददृशे दूरात् स नेत्रानन्दचन्द्रमाः ॥४४५॥
तस्याऽऽसनार्थं वेश्मान्तः प्रविवेश च **रुक्मिणी । कृष्ण**सिंहासने सोऽपि पूर्वन्यस्त उपाविशत् ॥४४६॥
आत्तासना निर्गता च तथाऽऽसीनमुदीक्ष्य तम् । बभाषे **रुक्मिणी** देवी विस्मयस्मेरलोचना ॥४४७॥
**कृष्णं** वा **कृष्ण**जातं वा विना सिंहासनेऽत्र हि । अन्यं पुमांसमासीनं सहन्ते[3] न हि देवताः[4] ॥४४८॥
स मायासाधुरप्यूचे प्रभावात् तपसो मम । न किञ्चिद्देवताः कर्तुमलंकर्मीणविक्रमाः ॥४४९॥
आगोस्तर्हि[5] कुतो हेतोरिति पृष्टस्तयाऽथ सः । ऊचे तपो निराहारं षोडशाब्दीं मया कृतम् ॥४५०॥
मातुः स्तन्यमपि मया न पीतं जन्मतोऽपि हि । तत्पारणार्थमत्राऽऽगां देहि किञ्चिद् यथोचितम् ॥४५१॥
**रुक्मिण्यु**वाच न क्वाऽपि षोडशाब्दं तपः श्रुतम् । श्रुतं चतुर्थादारभ्य वत्सरावधिकं मुने ! ॥४५२॥
सोऽप्यूचे किं तवाऽनेन ? यद्यस्ति यदि दित्ससि । तद्देहि नो चेद् यास्यामि **सत्यभामा**निकेतनम् ॥४५३॥
साऽप्यवोचन्नाऽद्य किञ्चिदुद्वेगात् पाचितं मया । सोऽपि पप्रच्छ किं नाम तवोद्वेगस्य कारणम् ? ॥४५४॥
उवाच साऽपि तनयवियोगे कुलदेवताः । आराधयमियत्कालमहं तत्सङ्गमाशया ॥४५५॥
इदानीं कुलदेवीनां दातुकामा शिरोबलिम् । ग्रीवायां प्राहरं यावत् तावद् देवीत्यवोचत् ॥४५६॥
पुत्रि ! मा साहसं कार्षीः पुष्पिष्यति यदा तव । अकालेऽप्येष माकन्दस्तदा त्वत्सूनुरेष्यति ॥४५७॥
अयं मुकुरितश्चाऽद्य न च सूनुः समेति मे । तत्साधो ! पश्य होरां त्वं कदा मे पुत्रसङ्गमः ? ॥४५८॥
सोऽप्यूचे रिक्तहस्तानां न होरा फलदायिनी । **रुक्मिण्य**पि प्रत्युवाच ब्रूहि तुभ्यं ददामि किम् ? ॥४५९॥
सोऽप्यवादीत् तपःक्षामकुक्षेः पेयां[6] प्रयच्छ मे । उदयुङ्क्त[7] च पेयार्थं तद्द्रव्यान्वेषणेन सा ॥४६०॥
भूयो बभाषे तां साधुरत्यन्तं क्षुधितोऽस्म्यहम् । द्रव्येन येन केनाऽपि पेयां कृत्वा प्रयच्छ मे ॥४६१॥
प्राक्सिद्धैर्मोदकैः साऽथ पेयां कर्तुं प्रचक्रमे । तस्य विद्याप्रभावेण ज्वलनः[8] प्राज्वलन्न तु ॥४६२॥
खिन्नां प्रेक्ष्य[9] स तामूचे पेया निष्पद्यते न चेत् । प्रीणयाऽतिक्षुधितं मां तदेभिरपि मोदकैः ॥४६३॥
साऽप्यूचे मोदका ह्येते **कृष्ण**स्याऽन्यैः सुदुर्जराः । नर्षिहत्यां करिष्यामि दत्त्वैतान् भवते मुने ! ॥४६४॥
सोऽप्यभाषिष्ट तपसा न मे किमपि दुर्जरम् । सा साशङ्का ततस्तस्मायेकैकं मोदकं ददौ ॥४६५॥
दत्तान् दत्तान् शीघ्रमेव भुञ्जानं तं तु मोदकान् । सस्मिता[10] विस्मिता सोचे महर्षे ! बलवानसि ॥४६६॥
¶इतस्तथा जपन्तीं तां **भामा**मित्यवदन्नराः । फलादिरिक्तमारामं चक्रे स्वामिनि ! कोऽपि ना ॥४६७॥
तृणाट्टान्निस्तृणांश्चक्रे कोऽपि कोऽपि जलाशयान् । निर्जलान् कोऽपि ते **भानु**मश्वेनोपाद्रवत् सुतम् ॥४६८॥
श्रुत्वेति **भामा** पप्रच्छ क्व नु स ब्राह्मणो हलाः !? । तद्दास्योऽपि यथावस्थमाचख्युस्तस्य चेष्टितम् ॥४६९॥
ततो विषण्णा सामर्षा केशानयनहेतवे । दासीः पटलिकाहस्ताः प्राहिणोद् **रुक्मिणीं** प्रति ॥४७०॥
ऊचिरे **रुक्मिणीं** ताश्च केशानर्पय मङ्क्षु नः । श्री**भामा**स्वामिनी ह्येवं समादिशति मानिनी ॥४७१॥
मायासाधुः स तच्छ्रुत्वा तासामेव हि कुन्तलैः । भृत्वा पटलिकां **भामा**समीपं प्रजिघाय ताः[11] ॥४७२॥
किमेतदिति **भामो**क्ता दास्य ऊचुर्न वेत्सि किम्? । यादृशः स्वामिनि ! स्वामी परिवारोऽपि तादृशः ॥४७३॥
**भामो**द्दामी[12] ततः प्रैषीन्नापितान् **रुक्मिणी**गृहे । तानेवाऽमुण्डयत् साधुः शिरस्त्वक्छेदपूर्वकम् ॥४७४॥

१. **रुडूबुडू रुडूबुडू** ला० । २. **जाप्यो** सं० की० पा. ला० ला० र० । ३. **सहते** खं० २, ला० सू० । ४. **देवता** खं० २, ला० सू० । ५. **आगात् तर्हि** खं० २ । ६. क्षीरम् । ७. उद्योगमकार्षीत् । ८. अग्निः । ९. **संप्रेक्ष्य** पा० । १०. **दृष्ट्वा च सस्मिता** खं० २ । ११. **सः** खं० २ । १२. अधिकक्रोधा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आयातान्नापितान् मुण्डान् प्रेक्ष्य **भामा** क्रुधा **हरिम्** । गत्वाऽभाषिष्ट **रुक्मिण्या**स्त्वं केशप्रतिभूरभूः ॥४७५॥
केशदानपणः सोऽद्य दाप्यतां मम **केशव** ! । उत्थाय स्वयमाहूय मुण्डां कारय **रुक्मिणीम्** ॥४७६॥
हसित्वा **हरि**रप्यूचे त्वमेवाऽसीह मुण्डिता । साऽप्यूचे नर्मणाऽद्याऽलं तत्केशानद्य दापय ॥४७७॥
**कृष्णे**न प्रेषितो **रामो रुक्मिण्याः** सदने ततः । **प्रद्युम्नः कृष्ण**रूपं च विचक्रे तत्र विद्यया ॥४७८॥
ह्रीणो वलित्वा **रामो**ऽपि पूर्वस्थानं पुनर्ययौ । तत्राऽपि **कृष्णं** प्रेक्ष्योचे हास्यं किं प्रस्तुतं त्वया ? ॥४७९॥
केशार्थं तत्र मां प्रेष्य स्वयं गत्वेह चाऽऽगतः । वधूर्वयं च सहसा ह्रेपिता युगपत् त्वया ॥४८०॥
तत्र नाऽगामिति **हरि**श्चोचे शपथपूर्वकम् । माया तवैवेति वदन्त्यगाद् **भामा** निजे गृहे ॥४८१॥
प्रत्याययितुमारेभे तां **विष्णु**स्तद्गृहे गतः । **रुक्मिण्या नारद**श्चाऽऽख्यत् **प्रद्युम्नो**ऽयं सुतस्तव ॥४८२॥
आविष्कृत्य निजं रूपं **प्रद्युम्नो** देवसन्निभम् । पपात पादयोर्मातुश्चिरदुःखतमोरविः ॥४८३॥
**रुक्मिणी** प्रक्षरत्स्तन्या बाहुभ्यामालिलिङ्ग तम् । चुचुम्ब च मूर्ध्नि मुहुर्हर्षाश्रुप्लावितेक्षणा ॥४८४॥
**प्रद्युम्न**स्तां जगादाऽथ ज्ञाप्यस्तावन्न खल्वहम् । दर्शयामि पितुर्यावदाश्चर्यं किञ्चनाऽपि हि ॥४८५॥
हर्ष-व्यग्रा **रुक्मिणी** तु न हि प्रत्युत्तरं ददौ । मायारथे समारोप्य **रुक्मिणीं** प्रचचाल सः ॥४८६॥
**प्रद्युम्नः** पूरयन् शङ्खं क्षोभयन् जनमब्रवीत् । हरामि **रुक्मिणी**मेष **कृष्णो** रक्षतु चेद् बली ॥४८७॥
कोऽयं मुमूर्षुर्दुर्बुद्धिरिति जल्पन् **जनार्दनः** । ससैन्योऽप्यन्वधाविष्ट **शार्ङ्ग**मास्फालयन् मुहुः ॥४८८॥
**प्रद्युम्न**स्तच्चमूं भङ्क्त्वा विद्यासामर्थ्यतो **हरिम्** । सद्यो निरायुधीचक्रे निर्दन्तमिव दन्तिनम् ॥४८९॥
यावद् **विष्णु**र्विषण्णोऽभूत् तावद् वामेतरो भुजः । स्पन्दितस्तेन सहसा **बलाय** च निवेदितम् ॥४९०॥
तदैत्य **नारदो**ऽवादीद् गृह्यतामेष ते सुतः । **रुक्मिणी**सहितः **कृष्ण** ! पर्याप्तं युद्धवार्तया ॥४९१॥
**कृष्णं** ननाम **प्रद्युम्नो रामं** च चरणान् स्पृशन् । ताभ्यां च सस्वजे गाढं चुम्बद्भ्यामसकृच्छिरः ॥४९२॥
**प्रद्युम्नं** सहजातयौवनमिव स्वर्वासिलीलास्पृशं, स्वाङ्के न्यस्य **जनार्दनो** जनमनःकौतूहलोत्पादकम् ।
**रुक्मिण्या** सहितो विवेश नगरीं तामिन्द्रवद् **द्वारिकां**, द्वारे न्यस्तनवीनतोरणकृतभ्रूविभ्रमां सम्भ्रमात् ॥४९३॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुषचरिते**
महाकाव्ये अष्टमे पर्वणि **रुक्मिण्या**दिपरिणयन-
**पाण्डव**-**द्रौपदी**स्वयंवर-**प्रद्युम्न**चरितवर्णनो नाम
षष्ठः सर्गः ॥

१. साक्षी । २. रुक्मिणी । ३. लज्जिताः । ४. **वदन्त्यगा०** मु० र० । ५. सत्यभामागृहे । ६. **अधिकृत्य** ला० । ७. देवलीला ।
८. **०ष्टमपर्वणि** मु० । ९. **कीर्तनो** मु० ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

## सप्तमः सर्गः

अथ प्रवर्तमानेऽत्र **प्रद्युम्नागमनोत्सवे** । **दुर्योधनः** समुत्थाय **वासुदेवं** व्यजिज्ञपत् ॥१॥
पुत्री मे ते स्[1]नुषा स्वामिन् ! केनाऽप्यपहृताऽधुना । तन्मृग्यतां क्वाऽपि यथा **भानुकः** परिणीयते ॥२॥
**कृष्णो**ऽप्युवाच सर्वज्ञो नाऽहं स्यां तादृशोऽपि चेत् । तत् किं मया **रौ[2]क्मिणेयो** न ज्ञातः केनचिद् हृतः? ॥३॥
**प्रज्ञप्त्या** तामहं ज्ञात्वाऽत्राऽऽनेष्यामीत्युदीरयन् । तत्र **प्रद्युम्न** आनैषीत् तां स्वयंवरकन्यकाम् ॥४॥
**कृष्णेन** दीयमानां तां मम ह्येषा वधूरिति । **प्रद्युम्नो** न हि जग्राह पर्यणैषीच्च **भानुकः** ॥५॥
अनिच्छुनाऽपि **प्रद्युम्नेनोत्सवेन** महीयसा । [3]खेचरीः क्ष्मापकन्याश्च **गोविन्द** उदवाहयत् ॥६॥
**प्रद्युम्नानयनहेतोरुपकारिण[4]मार्चतम्** । **नारदं** व्यसृजतां च **रुक्मिणी-शार्ङ्गधारिणौ** ॥७॥
¶**प्रद्युम्नस्य** महाऋद्ध्या ताम्यन्ती श्लाघयाऽपि च । **भामा** कोपगृहे गत्वा शिश्ये जर्जरमञ्चके ॥८॥
तत्राऽऽयातश्च **कंसारि**र्व्याजहार ससम्भ्रमः । केनाऽपमानिताऽसि त्वं येनैवं सुभ्रु ! ताम्यसि ? ॥९॥
साऽप्यूचे नाऽपमानो मे किन्तु **प्रद्युम्न**सन्निभः । न चेन्मे भविता सूनुर्मरिष्यामि तदा ध्रुवम् ॥१०॥
¶**कृष्णस्तदाग्रहं** ज्ञात्वा त्रिदशं **नैगमेषिणम्** । उद्दिश्याऽष्टमभक्तेन पौषधं प्रत्यपद्यत ॥११॥
आविर्भूय **नैगमेषी** तमूचे किं करोमि ते ? । **कृष्णो**ऽप्युवाच **भामायै** देहि **प्रद्युम्न**वत् सुतम् ॥१२॥
**नैगमेष्यवदद्** यस्यां पुत्रेच्छा ते भजस्व ताम् । त्व[5]ममुं हारमा[6]मोच्य ततो भावीप्सितः सुतः ॥१३॥
अर्पयित्वा च तं हारं **नैगमेषी** तिरोदधे । वास[7]कं **वासुदेवो**ऽपि **सत्यायै** मुदितो ददौ ॥१४॥
**प्रज्ञप्त्या** ज्ञापितस्तच्च **प्रद्युम्नो**ऽम्बामजिज्ञपत् । ऊचे चाऽऽदत्स्व तं हारं मत्तुल्यसुतकाङ्क्षया ॥१५॥
**रुक्मिण्यूचे** त्वयैवाऽस्मि कृतार्था वत्स ! सुनूना । किञ्च प्रसूते भूयोऽपि न स्त्रीरत्नं कदाचन ॥१६॥
का सपत्नीषु तेऽभीष्टा यस्यां पुत्रं ददाम्यहम् ? । **प्रद्युम्नेनेति** सा भूयः पृष्टाऽभाषिष्ट **रुक्मिणी** ॥१७॥
त्वद्वियोगे दुःखितायाः समुदुःखा ममाऽभवत् । पुरा **जाम्बवती** वत्स ! तस्यां स्तात् त्वत्समः सुतः ॥१८॥
**प्रद्युम्नानुज्ञया** साऽथाऽऽजूहव**ज्जाम्बवत्सुताम्** । **प्रद्युम्नो**ऽपि हि तां **भामारूपा**मकृत विद्यया ॥१९॥
सा तदाख्याय **रुक्मिण्या** प्रेषिता सदने **हरेः** । सायं ययौ तेन हारं दत्त्वा च बुभुजे मुदा ॥२०॥
तदैव च **महाशुक्राद्** देवः प्रच्युत्य **कैटभः** । आगात् कुक्षौ **जाम्बवत्याः** सिंहस्वप्नोपसूचितः ॥२१॥
ततो ययौ **जाम्बवती** हृष्टा निजनिर्के[8]तनम् । आययौ **सत्यभामा** च **कृ[9]ष्णौ**कोवासकार्थिनी ॥२२॥
तां दृष्ट्वाऽचिन्तयत् **कृष्णो** भोगातृप्ता अहो ! स्त्रियः । अधुनैव गता ह्येषा यद् भूयोऽप्येति सत्वरा ॥२३॥
**सत्यारूपं** विधायाथ कयाऽपि च्छलितो[10]ऽस्मि किम् ? । यदेषा मा विलक्षा भूदिति रेमे तया सह ॥२४॥
तस्या रमणसमयं **रौक्मिणेयो**ऽवगम्य तम्[11] । भेरीमताडयद् **विष्णोर्वि[12]श्व**प्रक्षोभकारिणीम् ॥२५॥
केनेयं ताडिता भेरीत्यपृच्छत् क्षुभितो **हरिः** । ताडिता **रौक्मिणेयेन** शशंसेति परिच्छदः ॥२६॥
स्मित्वा दध्यौ **हरिर्नूनं** **भामा**ऽद्य च्छलिताऽमुना । तनयोऽपि हि **सापत्नः** सपत्नीदशकोपमः ॥२७॥
किञ्चित् स[13]भयसम्भोगाद् **भामाया** भीरुरात्मजः । भविता भवति खलु नाऽन्यथा भवितव्यता ॥२८॥
¶प्रातश्च **रुक्मिणी**गेहे गतोऽपश्य**ज्जनार्दनः** । तेन दिव्येन हारेण भूषितां **जाम्बवत्सुताम्** ॥२९॥
निस्पन्दाक्षं प्रेक्षमाणमूचे **जाम्बवती हरिम्** । [14]किमेवमीक्षसे स्वामिन् ! सैवाऽस्मि तव पत्न्यहम् ॥३०॥
ऊचे च **विष्णुर्हारो**ऽयं दिव्यो देवि ! कुतो न्विति । साऽप्यूचे त्वत्प्रसादेन किं न वेत्सि स्वयं कृतम् ? ॥३१॥

---

१. पुत्रवधूः । २. प्रद्युम्नः । ३. **खेचर-क्षमाप०** आ० मु०, विद्याधरीः राजकन्यकाश्च । ४. **०णमर्चितम्** मु० र० । ५. **त्वमिमं** र० । ६. परिधाप्य । ७. सहशयनम् । ८. **निकेतने** मु० । ९. कृष्णस्य गृहं तस्मिन् भोगार्थिनी सत्यभामा आययौ । १०. **च्छलितोऽस्म्यहम्** खं० २ । ११. **ताम्** खं० १,२, ला० सू० । १२. **विश्वविक्षोभ०** पा०मु० । १३. **सभयं** मु० र० । १४. **किमेवं वीक्षसे** कौ०मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिंहस्वप्नं च साऽऽचख्यौ व्याचख्यौ च **जनार्दनः** । **प्रद्युम्न**तुल्यस्तनयस्तव देवि ! भविष्यति ॥३२॥

¶इत्युक्त्वा प्रययौ विष्णुः समये **जाम्बवत्य**पि । **शाम्बं** नामाऽसूत सुतं सिंहीवाऽद्वैतविक्रमम् ॥३३॥

**दारुको जयसेन**श्च सारथेर्मन्त्रिणः पुनः । **सुबुद्धि**रेते तनयाः समं **शाम्बेन** जज्ञिरे ॥३४॥

अभूच्च **सत्यभामायाः** सूनुर्नाम्ना[1]ऽ**नुभानुकः** । गर्भाधानानुसारात् तु **भीरु**रित्यपराभिधः ॥३५॥

अन्यासामपि **गोविन्द**पत्नीनां जज्ञिरे सुताः । महौजसो महावीर्या भद्रेभकलभा इव ॥३६॥

मन्त्रि-सारथिपुत्रैश्च समं **शाम्बो** व्यवर्धत । क्रमात् कलाकलापं च प्राज्ञो जग्राह लीलया ॥३७॥

¶अन्येद्यू **रुक्मिणी** पुत्रीं **वैदर्भी** नाम **रुक्मिणः** । **प्रद्युम्ने**नोद्वाहयितुं प्रैषीद् **भोजकटे** नरम् ॥३८॥

सोऽवोचद् **रुक्मिणं** नत्वा देवी त्वां वक्ति **रुक्मिणी** । **वैदर्भी**यं निजसुता **प्रद्युम्ना**य प्रदीयताम् ॥३९॥

उचितो मम **विष्णो**श्च दैवाद्योगः पुरा ह्यभूत् । योगः **प्रद्युम्न-वैदर्भ्यो**र्भवतु त्वत्कृतोऽधुना ॥४०॥

प्राग्वैरं संस्मरन् **रुक्मी**त्यूचे दास्ये निजां सुताम् । चण्डालेभ्यो वरमहं न तु **विष्णोः** कुलेऽपि हि ॥४१॥

दूतोऽपि गत्वा **रुक्मिण्या**स्तदाऽऽचख्यौ यथातथम् । भ्रात्राऽपमानिता साऽस्थात् म्लाना नक्तमिवाऽब्जिनी ॥४२॥

किमेवं खिद्यसेऽम्बेति **प्रद्युम्ने**न तु सोदिता । शशंस **रुक्मि**वृत्तान्तं मनःशल्यनिबन्धनम् ॥४३॥

**प्रद्युम्नो**ऽप्यब्रवीन्मातर्मा ताम्य स हि मातुलः । न सामो[2]र्हस्तदुचितं ततस्तातोऽकरोत् तदा ॥४४॥

¶तस्योचितं विधायैष तत्पुत्रीमुद्वहाम्यहम् । इत्युक्त्वा सह **शाम्बे**नोत्पत्य **भोजकटे** ययौ ॥४५॥

किन्नरस्वरचाण्डालरूपौ भूत्वा च तत्र तौ । गायन्तौ जहृतुः सर्वपौराणां मृगवन्मनः ॥४६॥

ज्ञात्वाऽऽहूय च तौ मायामातङ्गौ मधुरस्वै[3]रौ । अगापयद् **रुक्मिनृपः** स्वोत्सङ्गे तां सुतां दधत् ॥४७॥

तयोर्गीतेन मुदितो **रुक्मिराट्** सपरिच्छदः । दत्त्वा द्रव्यमपृच्छत् तावत्राऽऽयातौ कुतो युवाम् ? ॥४८॥

तावप्याचख्यतुः स्वर्गादा[4]यातौ **द्वारकां**[5] पुरीम् । विदधे स्वर्गिभिः सा हि कृते देवस्य **शार्ङ्गिणः** ॥४९॥

मुदिता तौ च[6] प्रपच्छ **वैदर्भी** तत्र किं युवाम् । जानीथः **कृष्ण-रुक्मिण्योः प्रद्युम्नं** नाम नन्दनम् ? ॥५०॥

उवाच **शाम्बः** को नाम **प्रद्युम्नं** रूपमन्मथम् । पृथ्व्यलङ्काररति[7]लकं न जानाति महौजसम् ? ॥५१॥

¶तच्छ्रुत्वोत्कण्ठिता जज्ञे **वैदर्भी** रागगर्भिता । तदा च स्तम्भमुन्मूल्य मत्तेभः कोऽप्यधावत ॥५२॥

उपद्रवन् पुरं सर्वमकाण्डकृतविड्वरः[8] । नाऽशक्यत स केनाऽपि वशीकर्तुं निषा[9]दिना ॥५३॥

वशीकरोति यः [10]कश्चिदिमं तस्मै ददाम्यहम् । अभीप्सितमिति [11]क्ष्मापः पटहं पर्यदापयत् ॥५४॥

पटहो न स केनाऽपि दध्रे ताभ्यां च धारितः । गीत्या[12] **प्रद्युम्न-शाम्बा**भ्यां स्तम्भितश्च महागजः ॥५५॥

द्वावप्यारुह्य तं नागं[13] नीत्वाऽऽलाने बबन्धतुः । चित्रीयमाणौ पौराणां राज्ञाऽप्याह्वायितौ मुदा ॥५६॥

याचेथां रुचितं यद्वामित्युक्तौ **रुक्मिणा** च तौ । इमां प्रदेहि **वैदर्भीं** नास्ति नौ[14] धान्यै[15]रन्धनी ॥५७॥

तच्छ्रुत्वा कुपितो **रुक्मी** तौ पुरान्निरवासयत् । **प्रद्युम्नो**ऽप्यब्रवीच्**छाम्बं** दुःखं तिष्ठति **रुक्मिणी** ॥५८॥

¶**वैदर्भ्याः** परिणयने विलम्बस्तत्र युज्यते । इति तत्र ब्रुवाणेऽपि रजन्यजनि निर्मला ॥५९॥

ततः सुप्तेषु लोकेषु **प्रद्युम्नो** निजविद्यया । प्रासादभू[16]म्या उपरि स्थितां **रुक्मि**सुतां ययौ ॥६०॥

**रुक्मिणी**स्नेहलेखं स तस्याः [17]कृतकमार्पयत् । वाचयित्वा साऽप्यवोचद् ब्रूहि किं ते [18]ददाम्यहम् ? ॥६१॥

सोऽप्यूचे मह्यमात्मानमेव देहि सुलोचने ! । यदर्थे याचिताऽसि त्वं **प्रद्युम्नः** सोऽस्मि सुन्दरि ! ॥६२॥

अहो ! सुघटितं दैवाज्जातं ननु विधेरिति । ब्रुवाणा **रुक्मि**तनया तद्वचः प्रत्यपद्यत ॥६३॥

कृत्वा विद्याबलादग्निं साक्षीकृत्य च **कृष्ण**सूः । आ[19]मुक्तकङ्कणां श्वेतदुकूलां तामुपायत ॥६४॥

रमयामास तां स्वैरं [20]कार्ष्णिर्विविधभङ्गिभिः । निशाशेषेऽब्रवीच्चैवं याम्यहं **शाम्ब**सन्निधौ ॥६५॥

---

१. **नाम्ना तु भा०** मु० । २. सामवचनयोग्यो न । ३. **स्वरम्** ला० । ४. **०दायावः** खं० २, **०दायाव** खं०१, सू० । ५. **द्वारिकां** खं०२, ला०, **द्वारकावतीम्** सं० । ६. **तु** मु० र० । ७. **ङ्कारभूतं को** खं० २ । ८. भयं, जनक्षोभः । ९. हस्त्यारोहकेन । १०. **कश्चिदिभम्** की० । ११. रुक्मिनृपः । १२. **०गीतात्** ता० । १३. हस्तिनम् । १४. आवयोः । १५. अन्नपाचिका । १६. **०भूम्यां सप्तम्यां** मु० र० । १७. कृत्रिमम् । १८. **वदा०** ला० । १९. **आयुक्तकङ्कणां** की० । **आमुक्तकङ्कणः** खं०१-२, ला० सू० । २०. प्रद्युम्नः कृष्णपुत्रः ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

पितृभ्यां परिवारेण पृच्छ्यमानाऽपि मा ब्रवीः । त्वद्देहोपद्रवरक्षा विहिताऽस्ति मयाऽनघे ! ॥६६॥
इत्युक्त्वा कार्ष्णिरगमद् **वैदर्भ्य**प्यतिजागरात् । रतश्रमाच्च सुष्वाप जजागार प्रगेऽपि न ॥६७॥
तत्राऽऽययौ च तद्धात्री [1]तद् दृष्ट्वा कङ्कणादिकम् । विवाहचिह्नं साशङ्का तामुत्थाप्याऽन्[2]वयुक्त च ॥६८॥
नाऽऽख्यच्च किञ्चिद् **वैदर्भी** धात्री च [3]स्वागसश्छिदे । शशंस **रुक्मिणे** गत्वा राज्यै च भयविह्वला ॥६९॥
ताभ्यामपि समागत्य साऽनुयुक्ता शशंस न । व्यक्तं विवाहसम्भोगचिह्नं ददृशतुश्च तौ ॥७०॥
दधौ मनसि **रुक्म्येवं** कन्येयं कुल[4]पांसना । अदत्ताऽपि हि केनापि सह रेमे य[5]दृच्छया ॥७१॥
चाण्डालाभ्यां वरं ताभ्यां दत्ताऽऽसीत् कन्यकाधमा । ध्यात्वेत्याजूहवद् रोषात् तौ चाण्डालौ स्ववेत्रिणा ॥७२॥
कन्यका गृह्यतामेषा यातं तत्र न यत्र वाम् । पश्यामीति वदन् रोषाद् **वैदर्भी** प्रददौ तयोः ॥७३॥
**वैदर्भी**मूचतुस्तौ च राज[6]पुत्र्यावयोर्गृहे । [7]जलौकश्चर्मरज्ज्वादिविक्रयं किं करिष्यसि ? ॥७४॥
साऽप्यूचे परमार्थज्ञा यद्दैवं कारयिष्यति । तदवश्यं करिष्यामि [8]दुर्लङ्घ्यं दैवशासनम् ॥७५॥
¶ततस्तौ तामुपादाय वीरौ जग्मतुरन्यतः । पश्चात्तापाद् **रुक्मि**राजोऽप्यरोदीदिति पर्षदि ॥७६॥
हा वत्से ! क्वाऽसि **वैदर्भि** ! सन्दर्भो नोचितो[9] ह्यभूत् । मया गौरिव चण्डालद्वारे क्षिप्ताऽसि नन्दने ! ॥७७॥
सत्यं हि कोपश्चाण्डालश्चाण्डालाभ्यां स तन्मया । अदापयत् सुतां सर्वो ह्यात्मवर्गहितैषकः ॥७८॥
**रुक्मिण्या** याच्यमानाऽपि **प्रद्युम्ना**याऽऽत्मसूनवे । क्रोधान्धेन न दत्ताऽसि धिग् मया [10]मन्दमेधसा ॥७९॥
रुदन्नेवं च शुश्राव गम्भीरं तूर्यनिस्वनम् । कुतोऽयमिति पृष्टाश्च ज्ञात्वाऽऽचख्युर्नि[11]योगिनः ॥८०॥
**प्रद्युम्न-शाम्बौ वैदर्भ्या** [12]संहितौ नगराद् बहिः । विमानतुल्ये प्रासादे तिष्ठतो नाकिनाविव ॥८१॥
चारणैः स्तूयमानौ तौ वर्यतूर्यमनोहरम् । सङ्गीतकं कारयतो नादोऽयं तद्भवः प्रभो ! ॥८२॥
ततः प्रमुदितो **रुक्मी** तावानिन्ये निजे गृहे । स्वयं जामेय-जामातृस्नेहादानर्च चाऽधिकम् ॥८३॥
ततो **रुक्मिण**मापृच्छ्य **वैदर्भी-शाम्ब**संयुतः । **प्रद्युम्नो**ऽगाद् [13]**द्वारवतीं रुक्मिणी**नयनोत्सवम्(वः?) ॥८४॥
नवयौवनया **रुक्मि**पुत्र्या रत्येव नव्यया । रममाणः सुखं तस्थौ **प्रद्युम्नो** नवयौवनः ॥८५॥
**शाम्बो हेमाङ्गद**नृपपुत्र्या वेश्याप्रसूतया । **सुहरिण्या**ख्यया रेमे रूपाद[14]त्यप्सरःश्रिया ॥८६॥
¶जघान क्रीडयन्नित्यं **शाम्बो भीरुं** तथा धनम् । प्राज्यं द्यूते हारयित्वा [15]रोदयामास कौतुकी ॥८७॥
रुदन् गत्वा **भीरु**राख्यद् **भामायै** साऽपि **विष्णवे** । सोऽपि देव्यै **जाम्बवत्यै** तच्छाम्बस्य विचेष्टितम् ॥८८॥
जगाद **जाम्बवत्ये**वमियत्कालं मया न हि । **शाम्ब**दुर्विनयोऽश्रावि किमिदं **विष्ट[16]रश्रवः** ! ॥८९॥
ऊचे **विष्णुः** सुतं सिंही सौम्यं भद्रं च मन्यते । गजा एव हि जानन्ति तस्य क्रीडां शिशोरपि ॥९०॥
दर्शयाम्यद्य तच्चेष्टा इत्युक्त्वाऽऽभीररूपभृत् । चक्रे **हरि**स्तामाभीरीरूपां **जाम्बवती**मपि ॥९१॥
विक्रीणानावुभौ तक्रं विशन्तौ **द्वारकापुरीम्** । दृष्टौ **शाम्ब**कुमारेण सदा स्वैरविहारिणा ॥९२॥
**शाम्बो**ऽवोचदथाऽऽभीरीमेहि क्रीणामि गोरसम् । इत्युक्ता साऽन्वगाच्**छाम्बं** स आभीरश्च तां पुनः ॥९३॥
एकं देवकुलं **शाम्बः** प्रविष्टस्तामथाऽऽह्वत । सोचे नाऽत्र प्रवेक्ष्यामि मूल्यमत्रैव देहि मे ॥९४॥
अत्राऽवश्यं प्रवेष्टव्यमित्युदित्वा करेण ताम् । गृहीत्वा कष्टुमारेभे **शाम्बो** हस्ती लतामिव ॥९५॥
रे ! किं गृह्णासि मद्भार्यामित्याभीरः स तं द्रुतम् । जघानाऽऽविरभूतां च तौ तु **जाम्बवती-हरी** ॥९६॥
सम्प्रेक्ष्य पितरौ **शाम्बः** पिधायाऽऽस्यं पलायितः । अदर्शि सुतदुश्चेष्टेत्यूचे **जाम्बवतीं हरिः** ॥९७॥
प्रसह्याऽऽनीयमानः स द्वितीयेऽहनि **शार्ङ्गिणा** । कीलिकां घटयन्नागात् पृष्टश्चैवमवोचत ॥९८॥
वचनं ह्यस्तनं योऽद्य वदिष्यति तदानने । क्षेपणीया कीलिकेयमतोऽहं घटयाम्यमूम् ॥९९॥

---

१. **तं दृष्ट्वा** ला० । २. **०प्याऽन्वयुक्त** मु०, अपृच्छत् । ३. निजापराधनाशाय । ४. **कुलपांसुना** मु० । **कुलपांशुना** मु० सं० छा० ला० १. आ० पु० । ५. **निजेच्छया** मु० र० । ६. हे राजपुत्रि । ७. जलौकः जलो इति भाषायाम् । ८. **दुर्लङ्घ्यं** र० । ९. **तोऽप्यभूत** ला० । १०. मन्दबुद्ध्या । ११. सेवकाः । १२. **सह तौ** खं० १, सू० । १३. **द्वारवत्याम्** पा० आ० मु० । १४. अप्सरसां श्रियमतिक्रान्तात्यप्सरःश्रीः तया । १५. **दापयामास** खं० २ विना । १६. हे गोविन्द ! ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निर्लज्जः कामविवशः स्वैरमत्र विचेष्टते । इति निर्वासितः **शाम्बः** स्वपुर्याः **शार्ङ्गपाणिना** ॥१००॥
**प्रज्ञप्तिविद्यां प्रद्युम्नो**ऽप्यन्तःस्नेहाधिवासितः । **शाम्बाय** गच्छतेऽदत्त प्राग्जन्मन्यपि बन्धवे ॥१०१॥
¶**प्रद्युम्नो भीरुकं** नित्यमर्द[1]यन् **भामयौ**च्यत । नगर्याः किं न निर्यासि रे ! **शाम्ब** इव दुर्मते ॥१०२॥
सोऽप्यूचे कुत्र गच्छामि स्मशान इति साऽवदत् । कदा मया समागम्यमित्युवाच स तां पुनः ॥१०३॥
यदा हस्ते गृहीत्वाऽहं **शाम्बम**त्राऽऽनयाम्यरे ! । तदा त्वया समागम्यमित्यूचे साऽपि तं क्रुधा ॥१०४॥
यदादिशति मे मातेत्युदित्वा **रुक्मिणी**सुतः । ययौ स्मशाने **शाम्बो**ऽपि भ्रान्त्वा तत्र समाययौ ॥१०५॥
उभौ श्मशानभूम्यां तौ [2]दाघशुल्कं महत्तरम् । गृहीत्वा ददतुर्दग्धुं मृतकानि पुरी[3]सदाम् ॥१०६॥
¶इतश्च **भीरवे भामै**कोनकन्याशतं शुभम् । अमेलयत् प्रयत्नाच्च कन्यामेकामियेष च ॥१०७॥
**प्रज्ञप्त्या** तत्तु विज्ञाय **प्रद्युम्नो** व्यकरोच्चमूम् । **जितशत्रु**र्नाम नृपः स्वयं जज्ञे च तत्क्षणात् ॥१०८॥
**शाम्ब**श्च जज्ञे तत्कन्या देवकन्यासहोदरा । **भीरु**धात्र्या च ददृशे क्रीडन्ती सा सखीवृता ॥१०९॥
तां ज्ञात्वा **सत्यभामायै** सा सद्योऽपि व्यजिज्ञपत् । **भामा**ऽयाचिष्ट **भीर्वर्थे जितशत्रुं** नरेण ताम् ॥११०॥
**जितशत्रु**र्बभाषे तं तदा कन्यां ददाम्यहम् । **भामा** हस्ते गृहीत्वाऽमूं **द्वारकां** प्रविशेद् यदि ॥१११॥
अन्यच्चोद्वाहकालेऽस्याः करं **भीरु**करोपरि । चेत् कारयति **भामा** **तद्भीरवे**ऽस्तु ममाऽऽत्मजा ॥११२॥
इत्युक्तः स नरो गत्वा **भामायै** तद्व्यजिज्ञपत् । आमेत्युक्त्वा ययौ **भामा**ऽर्थिनी तच्छिबिरे द्रुतम् ॥११३॥
**शाम्बो** बभाषे **प्रज्ञप्तिं भामा** तस्या जनोऽपि च । कन्यारूपं पश्यतु मां **शाम्ब**मेवाऽपरो जनः ॥११४॥
तथा कृते च **प्रज्ञप्त्या भामया** दक्षिणे करे । गृहीतः **शाम्ब**कुमारः प्राविशद् **द्वारकां पुरीम्** ॥११५॥
आनिन्ये **भामया शाम्बो भीरोः** पाणिग्रहोत्सवे । अहो ! चित्रमहो ! चित्रमित्यूचुर्नागरस्त्रियः ॥११६॥
**भामौ**कसि गतः **शाम्बो भीरो**र्वामे[4]तरं करम् । स्वहस्तेनोपरिस्थेनाऽऽदाय वामेन [5]वामधीः ॥११७॥
एकोनकन्याशतस्य पाणीन् दक्षिणपाणिना । धृत्वा च युगपद् वह्निं परितो विधिनाऽभ्रमत् ॥११८॥ युग्मम् ॥
पश्यन्त्यः कन्यकाः **शाम्ब**मूचुः पुण्योदयादसि । विधिना योजितो नस्त्वं पती रति[6]पतेः समः ॥११९॥
वृत्तोद्वाहः समं ताभिः **शाम्बो** वासगृहे ययौ । **भीरुः शाम्बेन** तत्राऽऽयान् भ्रुकुट्या भीषितो ययौ ॥१२०॥
गत्वा स आख्यद् **भामायै** साऽप्यश्रद्दधती स्वयम् । तत्राऽऽगत्यैक्षिष्ट **शाम्बं शाम्बो**ऽपि प्रणनाम ताम् ॥१२१॥
सकोपा साऽप्युवाचैवं केनाऽऽनीतोऽसि धृष्ट रे ! । सोऽप्यूचेऽहं त्वयाऽऽनीतः कन्योद्वाहं च कारितः ॥१२२॥
प्रमाणमत्र निःशेषो मध्यस्थो **द्वारिका**जनः । इत्युक्ता साऽपि पप्रच्छ तत्राऽऽयातान् पुरीजनान् ॥१२३॥
तेऽप्यूचे देवि ! मा कुप्य त्वया **शाम्बः** प्रवेशितः । अस्माकं पश्यतामेव कन्योद्वाहं च कारितः ॥१२४॥
मायी मायिसुतो मायिकनिष्ठो मायिनीभवः । कन्यारूपोऽच्छलयन्मामित्युक्त्वा सा ययौ रुषा ॥१२५॥
¶प्रत्यक्षं सर्वलोकानां **कृष्णा**स्ताः कन्यकाः स्वयम् । ददौ **शाम्बाय** चक्रे च **जाम्बवत्यु**त्सवं परम् ॥१२६॥
**वसुदेवं** नमस्कर्तुं गतः **शाम्बो**ऽब्रवीदिति । भ्रान्त्वा क्ष्मां तात ! युष्माभिश्चिरेणोढाः खलु स्त्रियः ॥१२७॥
अभ्रान्त्वाऽपि मयैकत्र युगपत्कन्यकाशतम् । परिणीतमिति व्यक्तं युष्माकं मम चान्तरम् ॥१२८॥
प्रत्यूचे **वसुदेवो**ऽपि कूप[7]मण्डूककल्प रे ! । पित्रा[8] निःसारितोऽप्यैषि[9] धिग् धिक् त्वां मानवर्जितम् ॥१२९॥
[10]भ्रात्राऽवमानितोऽहं तु वीरवृत्त्या निरीय रे ! । सर्वत्राऽस्खलितोऽभ्राम्यं पर्यणैषं च कन्यकाः ॥१३०॥
यथावसरमिलितैर्बन्धुभिश्चैभिरादरात् । [11]अर्थितः स्वगृहाण्यागां न पुनस्त्वमिव स्वयम् ॥१३१॥
**शाम्बः** पूज्यतिरस्कारमथ ज्ञात्वा स्वयंकृतम् । कृताञ्जलिः प्रणम्योच्चैरित्युवाच पितामहम् ॥१३२॥
उक्तं मयैतदज्ञानाद् बालदुर्ललितं ह्यदः । क्षन्तव्यं तातपादैस्तत्तातो लोकोत्तरो गुणैः ॥१३३॥
¶इतश्च [12]**जवनद्वीपात्** तत्रेयुर्जलवर्त्मना । महाभाण्डान्युपादाय वणिजः केचिदीश्वराः ॥१३४॥

१. ताडयन् । २. **दाहशुल्कम्** मु० र० । ३. नगरीवासिनाम् । ४. दक्षिणम् । ५. वामा सुन्दरा धीः बुद्धिःयस्य सः । ६. कामदेवस्य । ७. कूपदर्दुरसदृशः । ८. कृष्णेन । ९. **०प्येष** मु० र० । १०. **भ्रात्राऽपमा०** खं० १, ला० सू०, समुद्रविजयेन । ११. प्रार्थितः । १२. **यवन०** मु० र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यक्रीर्णता[1]ऽन्यवस्तूनि न पुना **रत्नकम्बलान्** । विशेषलाभमिच्छन्तः पुरे **राजगृहे** ययुः ॥१३५॥
वणिग्भिस्तत्र वास्तव्यैरग्रे भूत्वाऽथ निन्यिरे । **मगधाधीश**[2]**दुहितुस्ते** **जीवयशसो** गृहे ॥१३६॥
अदर्शयंश्च ते **जीवयशसो** **रत्नकम्बलान्** । [3]उष्णे शीतान् शीते चोष्णान् बहल[4]श्लक्ष्णरोमकान् ॥१३७॥
मूल्यार्धे कम्बलानां तु कृते पूच्चक्रिरेऽथ ते । आयामो **द्वारकां** मुक्त्वा वयं किमधि[5]लिप्सवः ॥१३८॥
पप्रच्छ तान् **जीवयशाः** का नाम **द्वारका** पुरी । को नाम नृपतिस्तत्र वणिजस्तेऽप्यदोऽवदन् ॥१३९॥
दत्ते स्थाने समुद्रेण **द्वारिका** पूः सुरैः कृता । तत्र **कृष्णो** नृपः सूनुर्**देवकी-वसुदेवयोः** ॥१४०॥
¶तच्च श्रुत्वा **जीवयशा** जगादैवं रुदत्यथ । जीवत्यद्याऽपि मद्भर्तुः संहर्ता शास्ति चाऽवनिम् ? ॥१४१॥
तां च दृष्ट्वा **जरासन्धो**ऽपृच्छद् रोदनकारणम् । साऽप्याख्यत् **कृष्ण**वृत्तान्तमित्यूचे च कृताञ्जलिः ॥१४२॥
तात ! मां विसृजाऽद्यैव प्रवेक्ष्यामि हुताशनम् । [6]स्वसन्धां पूरयिष्यामि न जीविष्याम्यतः परम् ॥१४३॥
**जरासन्धो**ऽभ्यधात् पुत्रि ! मा रोदीरेष नन्वहम् । रोदयिष्यामि **कंसारे**र्मातृ-स्वसृ-वधूजनम् ॥१४४॥
¶**अयादवं** भवत्वद्येत्युदित्वा **मगधेश्वरः** । प्रयाणायाऽऽदिशत् सेनां वार्यमाणोऽपि **मन्त्रिभिः** ॥१४५॥
महौजसस्तमन्वीयुः **सहदेवादयः** सुताः । **चेदिराजः शिशुपालो** धुरीणः स च दोष्मताम् ॥१४६॥
राजा **हिरण्यनाभश्च** महाबलपराक्रमः । **दुर्योधनश्च कौरव्य** आयो[7]धनधुरन्धरः ॥१४७॥
अन्येऽपि बहवो भूपाः सामन्ताश्च सहस्रशः । **जरासन्धं**[8] समापेतुः प्रवाहा इव सागरम् ॥१४८॥ युग्मम् ॥
पपात मुकुटो मूर्ध्नो हारस्तुत्रोट चोरसः । स्खलितश्चाऽञ्चलेनांऽह्रिस्तस्याऽग्रे चाऽभवत् क्षुतम् ॥१४९॥
पस्पन्दे नयनं वामं विण्मूत्रे तद्गजोऽकरोत् । प्रतिकूलः समीरो[9]ऽवाद् गृध्राश्च भ्रेमुरम्बरे ॥१५०॥
[10]आप्तैरिवाऽनिमित्तैश्चाऽशकुनैश्चैवमादिभिः । कथ्यमाना[11]शुभोदर्कोऽप्यस्थात्र स मनागपि ॥१५१॥
रजोभिरिव सैन्योत्थैस्तुमुलैः पूरयन् दिशः । दिशां गज इवोद्भ्रान्तः कम्पयन्नवनीतलम् ॥१५२॥
**जरासन्धः** क्रूरसन्धोऽध्यारूढो गन्धसिन्धुरम् । प्रति [12]प्राचेतसीमाशां प्रचचाल महाबलः ॥१५३॥ युग्मम् ॥
[13]समायान्तं **जरासन्धं नारदः** [14]कलिकौतुकी । चराश्च गत्वा त्वरितं शशंसुः **शार्ङ्गपाणये** ॥१५४॥
[15]कृष्णवर्त्मेव **कृष्णो**ऽपि तेजसामेकमास्पदम् । प्रयाणाय समुत्तस्थे भम्भाताडनपूर्वकम् ॥१५५॥
तत्रादेनाऽमिलन् सर्वे [16]यदवो भूभुजोऽपि च । **सुघोषा**घण्टाघोषेण **सौधर्म**त्रिदशा इव ॥१५६॥
**समुद्रविजय**स्तेषु समुद्र इव दुर्धरः । तत्राऽऽगात् सर्वसन्नाही तस्यैते तनया अपि ॥१५७॥
**महानेमिः** [17]**सत्यनेमिर्दृढनेमि-सुनेमिनौ । अरिष्टनेमिर्भगवान् जयसेनो महीजयः** ॥१५८॥
**तेजःसेनो** [18]**जयो मेघश्चित्रको** [19]**गौतमो**ऽपि च । **श्वफल्कः शिवनन्दश्च विश्वक्सेनो** महा[20]रथाः ॥१५९॥
**अक्षोभ्यो** द्विषदक्षोभ्यः **समुद्रविजया**नुजः । आययौ युधि धौरेयास्तस्याऽष्टौ च सुता इमे ॥१६०॥
**उद्धवश्च धवश्चैव क्षुभितोऽथ महोदधिः । अम्भोनिधिर्जलनिधिर्वामदेवो दृढव्रतः** ॥१६१॥
**स्तिमितो**ऽपि हि तत्राऽऽगात् पञ्चैते तत्सुतोत्तमाः । **ऊर्मिमान् वसुमान् वीरः पातालः स्थिर** एव च ॥१६२॥
**सागरः** षड् च तत्पुत्रा **निष्कम्पः कम्पन**स्तथा । **लक्ष्मीवान् केशरी श्रीमान् युगान्तश्च** समाययुः ॥१६३॥
आययौ **हिमवां**स्तत्र तत्तनूजास्त्रयोऽप्यमी । **विद्युत्प्रभ**स्तथा **गन्धमादनो माल्यवान**पि ॥१६४॥
**अचलोऽचल**पुत्राश्च सप्ताऽऽजग्मुर्महौजसः । [21]**महेन्द्रो मलयः सह्यो गिरिः शैलो नगो बलः** ॥१६५॥
**धरणः** पञ्च तत्पुत्राः **कर्कोटक-धनञ्जयौ । विश्वरूपः श्वेतमुखो वासुकिश्च** समाययुः ॥१६६॥
**पूरणः पूरण**पुत्राश्चत्वारश्च समाययुः । **दूष्पूरो दुर्मुखश्चैव दुर्दशो दुर्धर**स्तथा ॥१६७॥

---

१. **व्यक्रीणन्ता०** मु० । २. जरासन्धपुत्र्याः । ३. **उष्णाशीतान्** खं० २ । ४. बहुल० ला० । ५. अधिकं लब्धुमिच्छवः, **किमवलिप्सवः** पा० । ६. निजप्रतिज्ञाम् । ७. **युद्धनिपुणः** । ८. **०सन्धसमीपेऽयुः** खं० २ । ९. **समीरोऽभूद्** पा०ला२, आ०मु० । १०. स्वजनैरिव । ११. अशुभफलः । १२. वारुणीम् । १३. **सीमायातं** खं० १, ला० । **समायातं** खं० २, सू० । १४. **किल कौ०** मु०र० । १५. अग्निरिव । १६. **यादवा** मु० । १७. **सत्यनेमी रथनेमिसुनेमिनौ** की० । १८. **नयो** खं०१-२, सू० । १९. **गोतमो०** खं०१, ला० सू० । २०. **महारथः** ला० सू० । २१. **माहेन्द्रो** सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आययाव**भिचन्द्रो**ऽपि षट् तस्य च सुता इमे । **चन्द्र शशाङ्कश्चन्द्राभः शशी सोमोऽमृतप्रभः** ॥१६८॥
**वसुदेवो**ऽपि तत्राऽऽगाद् देवदेव इवौजसा । तत्सूनवश्च बहवो दोष्मन्तो नामतस्त्वमी ॥१६९॥
जातौ **विजयसेनाया अक्रूरः क्रूर** इत्यपि । **ज्वलनाऽशनिवेगौ** च **श्यामायास्तनयावुभौ** ॥१७०॥
पुत्रा **गन्धर्वसेनायास्त्रयो**[1]ऽग्नय इवाङ्गिनः । **वायुवेगोऽमितगतिर्महेन्द्रगतिरेव** च ॥१७१॥
**पद्मावत्या** मन्त्रिपुत्र्यास्त्रयः पुत्रा महौजसः । **सिद्धार्थो दारुकश्चापि सुदारुरपि** विक्रमी ॥१७२॥
उभौ च **नीलयशसः** पुत्रौ **सिंह-मतङ्गजौ** । **नारदो मरुदेवश्चे**त्युभौ **सोमश्रियः** सुतौ ॥१७३॥
**मित्रश्रियः सुमित्रश्च कपिलः कपिलाभवः** । **पद्मावत्या** अपि सुतौ **पद्मः कुमुद** एव च ॥१७४॥
**अश्वसेनो**[2]**ऽश्वसेनाजः पुण्ड्रः पुण्ड्राभवः** पुनः । **रत्नवत्या रत्नगर्भो वज्रबाहुश्च बाहुभृत्** ॥१७५॥
**सोमश्रियः सोम**पुत्र्या**श्चन्द्रकान्त-शशिप्रभौ** । **वेगवान् वायुवेगश्च वेगवत्याः** सुतावुभौ ॥१७६॥
पुत्रा **मदनवेगायास्त्रै**लोक्यप्रथितौजसः । **अनाधृष्टि**[3]**र्दृढमुष्टिर्हिममुष्टि**रिति त्रयः ॥१७७॥
**बन्धुमत्या बन्धुषेणः सिंहसेनश्च** नन्दनौ । पुत्रः **प्रियङ्गुसुन्दर्या** युधि धुर्यः **शिलायुधः** ॥१७८॥
तनयौ तु **प्रभावत्याः** ख्यातौ **गन्धार-पिङ्गलौ** । [4]**जरत्कुमार-वाह्लीकौ जरादेव्याश्च** नन्दनौ ॥१७९॥
**अवन्तिदेव्यास्तनयौ सुमुखो दुर्मुखो**ऽपि च । **रोहिण्यास्तु** सुतो **रामः सारणो**ऽथ **विदूरथः**[5] ॥१८०॥
तनयौ **बालचन्द्राया वज्रदृष्ट्रा-ऽमितप्रभौ** । पुत्रा रामस्य बहवो मुख्यास्त्वेते[6]ऽभिधानतः ॥१८१॥
**उल्मुंको**[7] **निषधश्चैव प्रकृतिद्युतिरेव** च । **चारुदत्तो ध्रुवः शत्रुदमनः पीठ**[8] एव च ॥१८२॥
**श्रीध्वजो नन्दनश्चैव श्रीमान् दशरथ**स्तथा । **देवानन्द**स्तथाऽऽ**नन्दो विद्रथुः**[9] **शान्तनु**स्तथा ॥१८३॥
**पृथुः शतधनुश्चैव नरदेवो महाधनुः** । **दृढधन्वा** तथा **विष्णो**रप्याययुरमी सुताः ॥१८४॥
**भानुश्च भामरश्चैव महाभान्वनुभानकौ** । **बृहद्ध्वजश्चाऽग्निशिखो धृष्णुः**[10] **सञ्जय** एव च ॥१८५॥
**अकम्पनो महासेनो धीरो गम्भीर** एव च । **उदधिर्गौतमश्चैव**[11] **वसुधर्मा प्रसेनजित्** ॥१८६॥
**सूर्यश्च चन्द्रवर्मा**[12] च [13]**चारुकृष्णाक** इत्यपि । **सुचारुर्देवदत्तश्च भरतः शङ्ख** एव च ॥१८७॥
**प्रद्युम्न-शाम्ब**प्रमुखा अपरेऽपि महौजसः । सहस्रशो **विष्णुपुत्रा**स्तत्राऽऽपेतुर्युयुत्सवः ॥१८८॥
**उग्रसेन**स्तत्सुताश्च **धरो गुणधरो**ऽपि च । **शक्तिको दुर्धरश्चन्द्रः सागरश्चा**ऽऽययुर्युधि ॥१८९॥
पितृव्यो **ज्येष्ठनृ**[14]पतेः **सान्त्वन**स्तत्सुतास्त्वमी । **महासेनो विषमित्रो** [15]**नमित्रो दानमित्रकः**[16] ॥१९०॥
**महासेन**स्याऽपि सुतः **सुषेणो** नाम पार्थिवः । **विषमित्रस्य हृदिकः सिनिः** [17]**सत्यक** एव च ॥१९१॥
**हृदिकात् कृतवर्माख्यो दृढधर्मा**[18] च पार्थिवः । **सत्यकाद् युयुधाना**ख्यस्तत्सुतो **गन्ध** एव च ॥१९२॥
**दशार्हाणां** सुताश्चाऽन्ये **राम-विष्णवोश्च** भूरिशः । पितृष्वसृ-स्वसृसुता अप्याजग्मुर्महीभुजाः[19] ॥१९३॥
¶ततः **क्रौष्टुकिना**ऽऽख्याते दिने **दारुकसारथिम्**[20] । **तार्क्ष्याङ्कं** रथमारूढः सर्वैर्यदुभिरावृतः ॥१९४॥
शुभैर्निमित्तैः शकुनैः संसूचितजयोत्सवः । प्रति [21]पूर्वोत्तरामाशां प्रचचाल **जनार्दनः** ॥१९५॥ युग्मम् ॥
पञ्चचत्वारिंशतं तु योजनानि निजात् पुरात् । गत्वा तस्थौ **सिनपल्ल्यां**[22] ग्रामे सङ्ग्रामकोविदः ॥१९६॥
¶अर्वाग् **जरासन्ध**सैन्यांच्चतुर्भिर्योजनैः स्थिते । तत्र **कृष्ण**बले केचिदागुर्विद्याधरोत्तमाः ॥१९७॥
**समुद्रविजयं** नत्वा तेऽवोचन्नृपते ! वयम् । गुणगृह्यास्त्वदीयस्य भ्रातु**रानकदुन्दुभेः** ॥१९८॥ युग्मम् ॥
येषां कुलेऽ**रिष्टनेमि**र्जगद्रक्षा-क्षयक्षमः । एतौ च **राम-गोविन्दा**वद्वितीयपराक्रमौ ॥१९९॥
**प्रद्युम्न-शाम्ब**प्रमुखा नप्तारोऽमी च कोटिशः । तेषां वो युधि साहाय्यमन्येभ्यः कीदृशं ननु? ॥२००॥

---

१. दक्षिणाग्निः गार्हपत्याग्निः आहवनीयाग्निः एते त्रयोऽग्नयः । २. **पद्मसेनो०** ला० । ३. **०धृष्णि०** खं० २ । ४. **जरा०** वा० । ५. **विदूखरः** खं० २ । ६. **मुख्यास्त्वित्यभि०** खं०१-२, सू० । ७. **उल्मूको** मु० र० । ८. **पीत** सू० । ९. **विप्रथुः** मु० र० । **विद्रथः** खं०१, सू० । १०. **विष्णुः** ला० । ११. **०गौतिम०** मु० र० । १२. **चन्द्रधर्मा** ता० सं० ला० । १३. **चारुः कृष्णाक** खं०२, ला० सू० । १४. **०नृपतिः** ला० । १५. **सुमित्रो** को० । **निमित्रो** पु० । **हृदिकः** मु० । **हृदको** खं० २ । १६. **सत्यमित्रकः** मु० खं० २ । १७. **सात्यक** मु० । १८. **दृढवर्मा** खं० २ । १९. **महीभुजः** सू० । २०. **सारथिः** खं०२, ला० । २१. ईशानदिशम् । २२. **सित०** सू०, **संनि०** खं०२, **सेन०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**तथाप्यवसरं ज्ञात्वा** त्वद्भक्त्या वयमागताः । समादिश स्वसामन्तवर्गे **गणय नः** प्रभो ! ॥२०१॥
एवमस्त्विति राज्ञोक्ते ते भूयोऽप्येवमूचिरे । **जरासन्ध**स्तृणमसौ केवलस्याऽपि **शार्ङ्गिणः** ॥२०२॥
**वैताढ्याद्रौ जरासन्ध**गृह्या ये सन्ति खेचराः । इहाऽऽयान्ति न यावत् ते तान् प्रति तावदादिश ॥२०३॥
सेनानीश्चाऽयमस्मासु **वसुदेवो**ऽस्तु तेऽनुजः । **प्रद्युम्न-शाम्ब**सहितः सत्येवं ते जिताः खलु ॥२०४॥
**समुद्रविजयः कृष्णा**नुज्ञयाऽऽनकदुन्दुभिम् । प्रैषीत् **प्रद्युम्न-शाम्बौ** च पौत्रौ तैः खेचरैः समम् ॥२०५॥
तदा च **वसुदेवाय** प्रददेऽ**रिष्टनेमि**ना । जन्मस्नात्रे सुरैर्दोष्णि बद्धौषध्यस्त्रवारणी ॥२०६॥
¶इतश्च **मगधा**धीशं सहैत्याऽपरमन्त्रिभिः । उवाच **हंसको** मन्त्री मन्त्रपूर्वमिदं वचः ॥२०७॥
अमन्त्रितं पुराऽकार्षीत् **कंसः** सोऽप्याप तत्फलम् । मन्त्रशक्ति[1] विनोत्साह-प्रभुशक्ती दुरायती ॥२०८॥
परः[2] स्तोकः समो[3] वाऽपि द्रष्टव्यः स्वाधिकः खलु । किं पुनर्योऽधिकः स्वस्माद् **विष्णु**रेष महाबलः ॥२०९॥
स्वयंवरे हि **रोहिण्या दशार्हो** दशमश्च सः । मुखान्धकारो[4] भूपानां तदैक्षि स्वामिना स्वयम् ॥२१०॥
तदाऽभूत् त्वद्बले नाऽलं **वसुदेवाय** कोऽपि हि । तज्ज्यायसा **समुद्रेण** त्वत्सैन्याः परिरक्षिताः ॥२११॥
द्यूते कोटिजयाद् ज्ञातः स्वसुतायाश्च जीवनात् । घातितोऽपि **वसुदेवो** न मृतः स्वप्रभावतः ॥२१२॥
जातौ चाऽस्माद् **राम-कृष्णौ** वृद्धिं चैतावतीं गतौ । ययोः कृते **वैश्रवणो द्वारकां** निर्ममे पुरीम् ॥२१३॥
एतावतिरथौ वीरौ शरणं यौ महारथौ[5]: । **युधिष्ठिराद्या** व्यसने शिश्रियुः **पाण्डवा** अपि ॥२१४॥
**प्रद्युम्न-शाम्बौ** तनयौ **राम-कृष्णा**विवाऽपरौ । तौ च **भीमा-ऽर्जुनौ** भीमौ कृतान्तस्याऽपि दोर्बलात् ॥२१५॥
किं चाऽन्यैर्व्याहतैर्वीरैर्**नेमि**रेकोऽपि तत्र यत् । लीलया निजदोर्दण्डे[6] छत्रीकर्तुमलं महीम् ॥२१६॥
सैन्ये त्वदीये धौरेयौ[7] **दमघोषज[8]-रुक्मिणौ** । **रुक्मिणी**हरणे दृष्टं बलं **बलै**[9]रणे तयोः ॥२१७॥
**दुर्योधनश्च कौरव्यो गान्धारः शकुनि**स्तथा । श्ववच्छलबलौ ह्येतौ न वीरगणना तयोः ॥२१८॥
**अङ्गाधिराजः कर्णो**ऽपि सक्तुमुष्टिरिवाऽर्णवे । शङ्के **कृष्ण**बले स्वामिन् ! कोटिसङ्ख्य[10]महारथे ॥२१९॥
**नेमिः कृष्णो बल**श्चाऽतिरथाः परबले त्रयः । त्वमेक एव स्वबले बलयोर्महदन्तरम् ॥२२०॥
**अच्युताद्याः** सुरेन्द्रा यं नमस्कुर्वन्ति भक्तितः । तेन श्री**नेमि**ना सार्धं युद्धाय प्रोत्सहेत कः? ॥२२१॥
छलयित्वा सुरैरेव **कृष्ण**गृह्यैर्निपातितः । **काल**स्तव सुतस्तेन विद्धि दैवं पराङ्मुखम् ॥२२२॥
नैयं[11] प्रमाणयन्तोऽमी यदवो बलिनोऽपि हि । प्रणश्य **मथुरापुर्या द्वारकां** नगरीं ययुः ॥२२३॥
बिलादिव त्वया सर्पः कृष्टे[12] आहत्य यष्टिना । आययौ सम्मुखीनस्ते **कृष्णो**ऽसौ न पुनः स्वयम् ॥२२४॥
इयत्यपि गते स्वामिन् ! न योद्धुं युज्यतेऽमुना । अयुध्यमाने त्वय्येष स्वयं व्यावृत्त्य यास्यति ॥२२५॥
इति तद्वचसा क्रुद्धो **जरासन्धो**ऽभ्यधादिति । यदुभिर्मायिभिर्नूनं भेदितोऽसि दुराशय ! ॥२२६॥
यत्तु भैषयसि[13] त्वं[14] मां शत्रुं शंसन् वृथैव तत् । किं बिभेति हरिः[15] फेरु[16]फेत्कारैः क्वाऽपि दुर्मते ! ॥२२७॥
करोमि भस्मसादेषां[17] गोपालानां बलं बलात् । धिक् ते मनोरथमिमं निवर्तनकरं रणात् ॥२२८॥
¶अथोचे **डिम्भको** मन्त्री तद्भावसदृशं वचः । प्राप्तकालो रणो ह्येष न त्याज्यः स्वामिनाऽधुना ॥२२९॥
सङ्ग्रामे सम्मुखीनानां वरं मृत्युर्यशस्करः । रणात् पराङ्मुखानां तु न जीवितमपि प्रभो ! ॥२३०॥
चक्ररत्नमिवाऽभेद्यं चक्रव्यूहं निजे बले । विरचय्य हनिष्यामः परानीकं[18]मनीकगम् ॥२३१॥
¶अथ हृष्टो **जरासन्ध**स्तमूचे साधु साध्विति । चक्रव्यूहाय चाऽऽदिक्षत् सेनानाथान् महौजसः ॥२३२॥
**हंसको डिम्भको**ऽमात्यौ चमूनाथास्तथाऽपरे । **चक्रव्यूहं** चक्रिरेऽथ शासनादर्धचक्रिणः ॥२३३॥

---

१. मन्त्रशक्ति विना उत्साहशक्ति - प्रभुशक्ती अशुभफले । २. शत्रुः । ३. सदृशः । ४. मुखकालिमा । ५. ''एकादशसहस्राणि हस्तिनां यस्तु योधयेत् । शस्त्रशास्त्रप्रवीणश्च स महारथ उच्यते'' इति ता० प्रतौ टि० । ६. **दोर्दण्डछत्री** मु० र० । ७. मुख्यौ । ८. शिशुपाल । ९. बलदेवेन सह रणे । १०. **कोटिसङ्ख्यामहा०** खं०२, सू० । ११. राजनीतिम् । १२. **कृष्ण** खं०२ । १३. **भीषयसि** खं०२। **भीषयसे** खं०१, सू० । १४. **मामप्यरिं शंसन्** खं०१, सू० । १५. सिंहः । १६. शृगालः तस्य फैत्कारैः शब्दैः । १७. देष खं०१, सू० विना० । १८. परसैन्यं स्वसेनायां प्रविष्टम् । **०नीकमनेकगम्** ला० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चक्रे तत्र [1]सहस्रारे राजैकैकोऽध्यरं[2] स्थितः । तेषां च राज्ञां प्रत्येकं शतमेकं च दन्तिनाम् ॥२३४॥

स्यन्दनानां द्वे सहस्रे सहस्राः पञ्च वाजिनाम् । पदातीनां सहस्राणि षोडशाऽमिततेजसाम् ॥२३५॥

प्रधेश्च[3] परिधौ राज्ञां सपादा षट्सहस्र्यभूत् । सहस्रैः पञ्चभिः साग्रैस्तु[4]म्बान्तर्मगधेश्वरः ॥२३६॥

**गान्धारसैन्धवबलं** पृष्ठेऽभून्**मगधेशितुः** । **धार्तराष्ट्राः** शतं ते च राज्ञो दक्षिणतोऽभवन् ॥२३७॥

**मध्यदेश**नृपा वामे पुरो गणै[5]र्नरेश्वराः । पञ्चाशच्**छकटव्यूहाः** सन्धौ सन्धौ प्रधेर्नृपाः ॥२३८॥

अन्तरान्तरसंस्थाश्च गुल्मा[6] गुल्मान्तराद् गणाः । व्यूहतो[7] बहिरप्यस्थुश्चित्रैर्व्यूहैर्महीभुजः ॥२३९॥

अथ राजा **जरासन्धः** सत्यसन्धं महाभुजम् । नानसङ्ग्रामविख्यातकौशलं **कोशले[8]श्वरम्** ॥२४०॥

**हिरण्यनाभ**नामानं **चक्रव्यूह**स्य तस्य च । सेनानीत्वेऽभिषिषेच ययौ चाऽस्तं दिवाकरः ॥२४१॥युग्मम् ॥

¶**चक्रव्यूह**प्रतिद्वन्द्वं निशायां यदवोऽपि हि । विदधुर्**गरुडव्यूहं** दुर्भेदमरिपार्थिवैः ॥२४२॥

व्यूहस्या[9]ऽऽस्ये कुमाराणामर्धकोटी महात्मनाम् । **सीरपाणि-शार्ङ्गपाणी** स्थितौ तस्य तु मूर्धनि ॥२४३॥

**अक्रूर[10]: कुमुदः पद्मः सारणो विजयी जयः** । **जरत्कुमारः सुमुखो दृढमुष्टिर्विदूरथः** ॥२४४॥

**अनाधृष्टिर्दुर्मुखश्च वसुदेव**सुता इमे । रथलक्षयुताः पृष्ठारक्षाः **कंसद्विषो**ऽभवन् ॥२४५॥

तेषां पृष्ठे **चोग्रसेनो** रथकोटी[11]वृतोऽभवत् । तस्याऽपि पृष्ठरक्षत्वेऽभूवंश्चत्वार आत्मजाः ॥२४६॥

सपुत्रं रक्षितुं **भोजं[12]** पृष्ठे तस्थुर्नृपा अमी । **धरः सारण-चन्द्रौ** च **दुर्धरः सत्यक**स्तथा ॥२४७॥

आश्रित्य दक्षिणं पक्षं **समुद्रविजयः** स्वयम् । भ्रातृभिर्भ्रातृपुत्रैश्च सह तस्थौ महाभुजैः[13] ॥२४८॥

**महानेमिः सत्यनेमिर्दृढनेमि-सुनेमिनौ । अरिष्टनेमिर्विजयसेनो मेघो महीजयः** ॥२४९॥

**तेजःसेनो जयसेनस्तथा जय-महाद्युती** । **समुद्रविजय**स्यैते कुमाराः पार्श्वतोऽभवन् ॥२५०॥

रथानां पञ्चविंशत्या लक्षैरन्येऽपि भूभुजः । **समुद्रविजय**स्याऽस्थुः पुत्रवत् पारिपार्श्विकाः[14] ॥२५१॥

आश्रित्य वामपक्षं तु तस्थू **रामस्य** सूनवः । **युधिष्ठिर**प्रभृतयः **पाण्डवा**श्चाऽमितौजसः ॥२५२॥

**उल्मुको निषधः शत्रुदमनः प्रकृतिद्युतिः । सात्यकिः श्रीध्वजो देवानन्द आनन्द-शान्तनू** ॥२५३॥

**शतधन्वा दशरथो ध्रुवश्च पृथु-विप्रथू । महाधनुर्दृढधन्वाऽतिवीर्यो देवनन्दनः** ॥२५४॥

रथानां पञ्चविंशत्या लक्षैः परिवृता इमे । पृष्ठे तस्थुः **पाण्डवानां धार्तराष्ट्र**वधोद्यताः ॥२५५॥

पृष्ठे तेषामभूच्च**न्द्रयशाः सिंहल-बर्बरौ । काम्बोजः केरल**श्चाऽपि **द्रविडो**ऽपि च भूपतिः ॥२५६॥

षष्ट्या रथसहस्रैश्च तेषामपि च पृष्ठतः । **महासेन**पिता तस्थौ स्थैर्य[15]स्थामैकपर्वतः ॥२५७॥

पक्षिणो रक्षणायाऽस्थुर्**भानु-भामर-भीरवः**[16] । **असितः सज्जयो भानुर्धृष्णुः[17] कम्पित-गौतमौ** ॥२५८॥

[18]**शत्रुञ्जयो महासेनो गम्भीरश्च बृहद्ध्वजः** । [19]**वसुवर्मोदय**श्चैव **कृतवर्मा प्रसेनजित्** ॥२५९॥

[20]**दृढधर्मा** च **विक्रान्तश्चन्द्रवर्मा** च पार्थिवः । इत्यभूद् **गरुडव्यूहो** [21]गरुडध्वजनिर्मितः ॥२६०॥

भ्रातृस्नेहाद्युयुत्सुं च **शक्रो** विज्ञाय **नेमिनम्** । प्रैषीद् रथं **मातलिना**[22] जैत्रै[23]शस्त्राञ्चितं निजम् ॥२६१॥

सूर्योदयमिवाऽऽतन्वन् स रथो रत्नभासुरः । [24]उपनीतो **मातलिना**ऽलञ्चक्रेऽ**रिष्टनेमि**ना ॥२६२॥

**कृष्णाग्रजमनाधृष्टिं[25] समुद्रविजयः** स्वयम् । अभ्यषिञ्चच्चमूपत्वे[26] पट्टबन्धनपूर्वकम् ॥२६३॥

जज्ञे जयजयारावः सकलेऽपि **हरेर्बले** । **जरासन्धबले** चाऽभूत् **प्रक्षोभः** सर्वतोऽपि हि ॥२६४॥

व्यूहयोरग्रसुभटैः प्रारेभे युद्धमुद्धतम् । अविस्फोटं प्रसर्पद्भिर्मिथो बद्धाञ्जलैरिव ॥२६५॥

---

१. सहस्रं अरा यस्मिन् चक्रे तत्र । २. **०ध्यरस्थितः** खं०२ । ३. प्रधि-चक्रनाभिः । ४. **पञ्चभी राज्ञां तुम्बा०** खं० १, सू० पु० । **साग्रैस्तत्रान्त०** ता० ला० सा० की० खं०, मु० । ५. गणः प्रजातन्त्रं, तन्त्ररेशाः । ६. सेनामुखं गुल्मगणौ (अमरकोशे-क्षत्रियवर्गे) । ७. **व्यूहस्य** मु० । ८. **कौशले०** मु० र० । ९. व्यूहस्य मुखे । १०. **अंकूरः** ला० । ११. **कोटीयुतो०** खं० २ । १२. उग्रसेनम् । १३. **महाभुजः** खं०२, पा० मु० । १४. **पार्श्वकाः** मु० र० । १५. **धैर्यस्थामैकपर्वतः** ता० सं० ला० पु० छा० ला० खं०१, ला० सू० । १६. **भीरुकाः** मु० । १७. **विष्णुः** खं० २ । १८. **शत्रुञ्जयमहासेनौ** मु० र० । १९. **वसुधर्मोदयश्चैव** ता० की० ला० सं० । २०. **दृढवर्मा** खं० २ । २१. कृष्णनिर्मितः । २२. इन्द्रस्य सारथिना सह । २३. **शास्त्रार्चितं** खं० २ । **शस्त्राचितं** खं०१, ला० सू० । २४. **उपानीतो** मु० र० । २५. **मनाधृष्णि** खं०२, ला० । २६. सेनापतित्वे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चित्राण्युत्पेतुरस्त्राणि सम्फेटे[1] व्यूहयोर्द्वयोः । युगान्तोद्भ्रान्तयोः पूर्वापराब्ध्योरिव वीचयः ॥२६६॥
द्वयोरपि हि सेनान्योरुभौ व्यूहौ परस्परम् । प्रहेलिकावन्नितरां दुर्भेदत्वं प्रजग्मतुः[2] ॥२६७॥
चिरं युद्ध्वा **जरासन्ध**सैनिकैः स्वामिभर्त्सितैः[3] । द्रढीयांसोऽप्यभज्यन्त **तार्क्ष्यव्यूहा**ग्रसैनिकाः ॥२६८॥
आत्मेव **तार्क्ष्यव्यूह**स्य स्वयं **तार्क्ष्यध्वज**स्ततः । सैनिकांस्तान् स्थिरीचक्रे पताकं[कां] करमुत्क्षिपन् ॥२६९॥
पक्षाविव **महानेमि-पार्थौ**[4] दक्षिण-वामगौ । चञ्चूरिवाऽग्रव्यूहस्याऽ**नाधृष्टि**श्चुकुपुस्त्रयः ॥२७०॥
दध्मौ शङ्खं **सिंहनादं महानेमि**र्महाभुजः । **बलाहकमनाधृष्टिर्देवदत्तं** च **फाल्गुनः** ॥२७१॥
यदवोऽताडयंस्तूर्यकोटीस्तन्निनदैरथ । अनुजग्मे शङ्खनादः शङ्खैः शङ्खराजवत् ॥२७२॥
शङ्खत्रयनिनादेन तूर्यनादेन तेन च । भटाः परबलेऽक्षुभ्यन्नक्रा इव महोदधौ ॥२७३॥
**नेम्यनाधृष्टि-पार्था**स्ते सेनान्यः शरवर्षिणः । चक्रमुर्विक्रमपराः कल्पान्त इव सागराः ॥२७४॥
नैमिसन्धिषु राजानः **शकटव्यूह**संस्थिताः । [6]परे विदुद्रुवुस्तेषां दोर्वीर्यमसहिष्णवः ॥२७५॥
**चक्रव्यूहः** स चाऽभञ्जि त्रिषु स्थानेषु तैस्त्रिभिः । वन्यद्विपैरिव परिणतैर्[7]गिरिनदीतटम् ॥२७६॥
स्वयं विहितमार्गास्ते प्रवाहाः सरितामिव । **चक्रव्यूहं** प्रविविशुस्तदन्वन्ये[8]ऽपि सैनिकाः ॥२७७॥
**दुर्योधनो रौधिरिश्च रुक्मी** चेति नृपास्त्रयः । सैन्यान् संस्थापर्यन्त[9]स्तस्तानुत्थितास्ते युयुत्सवः ॥२७८॥
**दुर्योधनो**ऽरुधत् **पार्थमनाधृष्टिं** तु **रौधिरिः** । **रुक्मी** पुनर्**महानेमिं** महारथनृपैर्वृतः[10] ॥२७९॥
द्वन्द्वयुद्धमभूत् तेषां षण्णामपि परस्परम् । महारथानां चाऽन्येषां तद्गृह्याणां सहस्रशः ॥२८०॥
वीरंमन्यं विब्रुवाणं **रुक्मिणं** तत्र दुर्मदम् । निरस्त्रं विरथं चक्रे **महानेमि**रमर्षणः ॥२८१॥
रक्षार्थं **रुक्मिण**स्तत्र वध्यकोटिमुपेयुषः । निपेतुरन्तरा **शत्रुन्तपाद्याः** सप्त पार्थिवाः ॥२८२॥
युगपद्वर्षतां तेषां सप्तानामपि सायकान् । [11]चिच्छेद बाणैः **शैवेयो** धनूंषि च मृणालवत् ॥२८३॥
**शत्रुन्तप**श्चिरं युद्ध्वा शक्तिं चिक्षेप विद्विषे । जाज्वल्यमानां तां प्रेक्ष्य चुक्षुभुर्यदवोऽखिलाः ॥२८४॥
तस्याः शक्तेर्मुखोद्भूता[12] विविधायुधधारिणः । किङ्कराः क्रूरकर्माणोऽन्तरे पेतुः सहस्रशः ॥२८५॥
[13]अथोवाचाऽ**रिष्टनेमिं मातलि**स्तपसा ह्यमूम् । **बलीन्द्रात्** प्राप राजाऽयं **धरणा**दिव **रावणः** ॥२८६॥
वज्रेण भेद्या तदियं[14]मित्युक्त्वा **नेमिशासनात्** । **महानेमि**शरे [15]वज्रं स समाक्रमयद्[16] द्रुतम् ॥२८७॥
तं वज्रेषुं विमुच्याऽऽशु तां शक्तिं भुव्यपातयत् । तं नृपं विरथं व्यस्त्रं **महानेमि**श्चकार च[17] ॥२८८॥
षण्णां नृपाणामन्येषां चापान् **सामुद्रिजो**[18]ऽच्छिदत । तदा रथान्तरारूढो **रुक्मी** भूयोऽप्यढौकत ॥२८९॥
**शत्रुन्तपाद्या रुक्मी** च सम्भूयाऽष्टाऽपि ते नृपाः । **शैवेयेन**[19] युयुधिरे धुरि मानवतां स्थिताः ॥२९०॥
यद्यद्धन्वाऽऽददे **रुक्मी** कुमार[20]स्तत्तदच्छिदत् । धनूंषि विंशतिच्छिन्नान्येवं तस्य निरन्तरम् ॥२९१॥
गदां चिक्षेप **कौबेरीं** स **महानेमये** ततः । **आग्नेये**नेषुणा तां च भस्मीचक्रे **शिवात्मजः**[21] ॥२९२॥
शरलक्षाणि वर्षन्तं **रुक्मी वैरोचनं** शरम् । **शैवेयाय**[22] प्रचिक्षेप पराक्षेपासहो युधि ॥२९३॥
तं **माहेन्द्रेण** बाणेन **महानेमि**र्न्यवारयत् । **रुक्मिणं** ताडयामास भाले चाऽन्येन पत्रिणा[23] ॥२९४॥
घातेन विधुरं तेन **वेणुदारी** जहार तम् । दुद्रुवुः सप्त भूपालास्ते **महानेमि**नो द्रुतम् ॥२९५॥
[24]**द्रुमं समुद्रविजयः स्तिमितो भद्रकं** नृपम् । **वसुसेनमथाऽक्षोभ्यो**ऽजैषीदक्षोभ्यविक्रमः ॥२९६॥
[25]अमित्रं **पुरिमित्राख्यं सागरश्चा**ऽवधीद्युधि । **धृष्टद्युम्न**मभाङ्क्षीच्च **हिमवान्** हिमवत्[26]स्थिरः ॥२९७॥

---

१. सम्मिलने । २. **निजग्मतुः** मु० । ३. **स्वामिभक्तितः** खं०२ विना ॥ ४. अर्जुनः । ५. चक्रधारासु । ६. **परिविदुद्रुवस्तेषाम्** मु० र० । ७. तिर्यग्दन्तप्रहारास्तु गजाः परिणताः तैः "तिर्यग्घाती परिणतो गजः" (अभि चिं. कां. ४ श्लो १२२१) । ८. तेषां पश्चात्तदनु । ९. **०यन्तः स्वानुत्थितास्ते** ता० पु० ला० की० । १०. **०नृपैर्वृताः** मु० । ११. **चिक्षेप** मु० । १२. **मुखे भूता** खं० २ । १३. **अथोचे मातलिर्नेमिं महता तपसा** खं०१, सू० । १४. शक्तिः । १५. **वज्रशरानक्राम०** खं०१, सू० । १६. **समक्रम०** खं० २ । १७. **सः** खं० १, ला०सू०ला०पु०की०छा० । १८. **समुद्रजो०** खं० १, सू० विना, महानेमिः । १९. महानेमिना । २०, २१. महानेमिः । २२. महानेमये । २३. बाणेन । २४. द्रुमनामानं नृपम् । २५. शत्रुम् । २६. हिमाचलवत् स्थिरः ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

**धरणेन्द्र** इव स्थाम्ना **धरणोऽम्बष्ठकं** नृपम् । अवधीद**भिचन्द्रो**ऽपि **शतधन्वान**मुद्धतम् ॥२९८॥
**द्रुपदं पूरणो**ऽभाङ्क्षीत् **कुन्तिभोजं सुनेम्यपि** । **महापक्षं सत्यनेमिः श्रीदेवं दृढनेम्यपि** ॥२९९॥
एवं च यदुवीरैस्तैर्भग्नाः [1]परनृपा ययुः । **हिरण्यनाभं** शरणं सेनानीत्वे प्रतिष्ठितम् ॥३००॥
¶इतो **भीमा-ऽर्जुनौ** वीरौ **राम**पुत्राश्च दोर्भृतः[2] । व्यद्रावयन् **धार्तराष्ट्रान्** धार्तराष्ट्रान्[3] घना इव ॥३०१॥
अन्धकारो दिशां जज्ञे पतद्भिः **पार्थ**पत्रिभिः । घोरैर्गाण्डीवनिर्घोषैर्विधुरं विश्वमप्यभूत् ॥३०२॥
आकर्षतः सन्दधतो मुञ्चतश्च शरान् रयात् । नाऽलक्ष्यताऽन्तरं तस्याऽनिमिषै[4]रपि खस्थितैः ॥३०३॥
¶अथ **दुर्योधनः काशिस्त्रिगर्तः सबलो**ऽपि च । [5]**कपोतो रोमराजश्च चित्रसेनो जयद्रथः** ॥३०४॥
**सौवीरो जयसेनश्च सूरसेनो**ऽथ **सोमकः** । सम्भूयाऽयोधयन् **पार्थ**मपास्तक्षत्रियव्रताः ॥३०५॥
**सहदेवः शकुनिना भीमो दुःशासनेन** च । **उलूकेन** च **नकुलः शल्येन** च **युधिष्ठिरः** ॥३०६॥
**दुर्मर्षणा**दिभिः षड्भिर्द्रौपदेयाः[6] [7]ससत्यकाः । शैषैर्नृपैः पुना **राम**पुत्रा युयुधिरेतराम् ॥३०७॥युग्मम् ॥
राज्ञां **दुर्योधना**दीनां युगपद्वर्षतां शरान् । शरैः **किरीटी**[8] चिच्छेद नलिनीनाललीलया ॥३०८॥
अवधीत् सारथिं रथ्यानभाङ्क्षीच्च रथं शरैः । **दुर्योधन**स्य **गाण्डीवी**[9] [10]वर्म चाऽपातयद् भुवि ॥३०९॥
अङ्गशेषो **धार्तराष्ट्रो**[11] विलक्षः पत्तिमात्रवत् । वेगाद् ययौ शकुनिवदु[12]त्पत्य **शकुने** रथम् ॥३१०॥
दशाऽपि **काशिप्रमुखा**निषुवृष्ट्या **धनञ्जयः**[13] । उपदुद्राव करकवृष्ट्याऽम्बुद इव द्विपान् ॥३११॥
चकर्त **शल्यो** बाणेन **युधिष्ठिररथ**ध्वजम् । **युधिष्ठिरो**ऽपि **शल्य**स्य सशरं चापमच्छिदत् ॥३१२॥
**शल्यो**ऽन्यद् धनुरारोप्य कङ्कपत्रै[14]**र्युधिष्ठिरम्** । तिरयामास मेघर्तुमेघैरिव दिवाकरम् ॥३१३॥
ततो मुमोच **कौन्तेयः**[15] शक्तिं **शल्याय** दुःसहाम् । अकालविद्युतमिव विश्वप्रक्षोभकारिणीम् ॥३१४॥
परबाणैरस्खलिता वेगाद् गोधामिवाऽशनिः[16] । निपत्य साऽवधी**च्छल्यं** नेशुश्च बहवो नृपाः ॥३१५॥
[17]**वृकोदरो**ऽपि सङ्क्रुद्धो **दुर्योधन**सहोदरम् । [18]दुरोदरच्छद्मजयं स्मारयन् लीलयाऽवधीत् ॥३१६॥
मायायुद्धैरस्त्रयुद्धै**र्गान्धारेणा**[19]ऽतियोधितः । चिक्षेप **सहदेवो**ऽपि जीवितान्तकरं शरम् ॥३१७॥
**शकुनौ** तमसम्प्राप्तमेव बाणं **सुयोधनः** । क्षत्राचारं विमुच्यैव चिच्छेद निशितेषुणा ॥३१८॥
**माद्रेय**[20]स्तमुवाचोच्चै**र्दुर्योधन** रणेऽपि ते । छलं द्यूत इव व्यक्तमशक्तानां ह्यदो बलम् ॥३१९॥
साधु वां[21] युगपत्प्राप्तौ मायिनौ भूरिमायवत्[22] । सममेव हनिष्यामि युवयोर्विरहोऽस्तु मा ॥३२०॥
इत्युक्त्वा पत्रिभिस्तीक्ष्णैः **सहदेवः सुयोधनम्** । तिरोदधे शरत्काल इव कौरैर्वनस्थलीम् ॥३२१॥
**दुर्योधनो**ऽपि **माद्रेय**मुपदुद्राव पत्रिभिः । चिच्छेद च धनुर्दण्डं मूलं रणमहातरोः ॥३२२॥
**दुर्योधनो** मुमोचोच्चै**रमोघं** मन्त्रसत्कृतम् । **सहदेव**विनाशाय कीनाशमिव[23] सायकम् ॥३२३॥
[24]गारुडेनेषुणेषुं तमन्तराऽपि **धनञ्जयः** । निवारयामास समं **सुयोधन**जयाशया ॥३२४॥
धनुः **शकुनि**रप्युच्चैरास्फाल्य शरवृष्टिभिः । **माद्रेय**मद्रिमम्भोद इव विष्वग्गुदानशे[25] ॥३२५॥
**शकुनेः सहदेवो**ऽपि रथं रथ्यान् ससारथीन् । [26]ममाथ तच्छिरश्चाऽथ चकर्त फलवत् तरोः ॥३२६॥
**उलूकं नकुलो**ऽप्यस्त्रै[27]रुस्रैरिव दिवाकरः । द्रुतं विद्रावयामास विरथीकृत्य हेलया ॥३२७॥
**दुर्मर्षण**रथं सोऽगात् ते च **दुर्मर्षणा**दयः । विद्राविताः षडपि हि **द्रौपदेयैः** ससैनिकैः ॥३२८॥
**दुर्योधनं** शिश्रियुस्ते सोऽपि **दुर्योधनो** नृपैः । सम्भूय **काशिप्रमुखैर्धनञ्जय**मयोधयत् ॥३२९॥

---

१. शत्रुनृपाः । २. बलवन्तः । ३. **गलद्गर्जिघना** खं०२, हंसविशेषान् "धार्तराष्ट्राः सितेतरैः" (अभि० चिं० कां० ४ श्लो. १३२६) । ४. देवैः । ५. **कपोतरोमराजश्च** ता० सं० ला० पु० आ० ला२० छा० । ६. द्रौपदीपुत्राः । ७. **ससैन्यका** खं०१, **ससैनिकाः** मु० । ८. अर्जुनः । ९. अर्जुनः । १०. कवचम् । ११. दुर्योधनः । १२. पक्षिवत् । १३. अर्जुनः । १४. **बाणैः** । १५. युधिष्ठिरः । १६. वज्रम् । १७. भीमः । १८. दुरोदरे-द्यूते एव छद्मना जयः तम् । १९. शकुनिना । २०. सहदेवः । २१. युवाम् । २२. शृगालवत्, **भूरिमायुवत्** खं०२, सू० **भूरिमायिवत्** पा० की० मु० । २३. यममिव । २४. **गरुडे०** मु० र० । २५. व्याप । २६. **ममन्थ** मु० । २७. **०रभ्रैरिव** खं० २, किरणैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**रामपुत्रै**र्वृतः **पार्थः** सुरैरिव पुरन्दरः । [1]दारयामास विशिखैश्चित्रैः [2]परवरूथिनीम् ॥३३०॥
प्राणान् **दुर्योधनस्येव पृथग्भूतान् जयद्रथम्** । **पार्थो**ऽवधीच्छरैरन्धीकुर्वन् सर्वानपि द्विषः ॥३३१॥
**कर्णो**ऽथाऽऽकर्णमाकृष्टकालपृष्ठो[3]ऽधरं दशन् । वीरप्रष्ठो[4]ऽभ्यधाविष्ट हन्तुकामः **किरीटिनम्** ॥३३२॥
चिरं चिक्रीडतुर्वीरावेक्षैरिव[5] शिलीमुखैः[6] । **कर्णा-ऽर्जुनौ** वीक्ष्यमाणौ देवैरपि कुतूहलात् ॥३३३॥
अनेकशो भग्नरथः क्षीणाऽन्यास्त्रोऽसिमात्रभृत् । **कर्णः किरीटि**ना जघ्ने कथञ्चिद् वीरकुञ्जरः ॥३३४॥
सिंहनादं व्यधाद् **भीमः** शङ्खं दध्मौ च **फाल्गुनः** । जगर्जुः **पार्थ**सैन्याश्च सर्वेऽपि जितकासिनः[7] ॥३३५॥
**दुर्योधनो**ऽथ क्रोधान्धो महासिन्धुरसेनया[8] । **भीमसेनं** हन्तुमना मानी द्रुतमधावत ॥३३६॥
रथं रथेनाऽश्वमश्वेनेभं चेभेन **मारुतिः**[9] । आस्फाल्याऽऽस्फाल्य निःशेषीचक्रे **दौर्योधनं** बलम् ॥३३७॥
तैरेवं युध्यमानस्य भुञ्जानस्येव मोदकैः । दोष्मतो **भीमसेनस्य** न हि श्रद्धाऽप्यपूर्यत ॥३३८॥
स्वयं **दुर्योधनो** वीरो निजानाश्वासयन् द्रुतम् । डुढौके **भीमसेनाय** कुञ्जरायेव कुञ्जरः ॥३३९॥
पर्जन्याविव गर्जन्तौ क्रुद्धौ केसरिणाविव । युयुधाते उभौ वीरौ विविधैरायुधैश्चिरम् ॥३४०॥
[10]द्यूतवैरं स्मरन् **भीम** उद्यम्य महतीं गदाम् । [11]**दुर्योधनं** निष्पिपेष[12] सरथ्य-रथ-सारथिम् ॥३४१॥
**दुर्योधने** विनिहते निर्नाथास्तस्य सैनिकाः । **हिरण्यनाभं** शरणं सेनान्यं प्रतिपेदिरे ॥३४२॥
**अनाधृष्टिं**[13] च सेनान्यं वाम-दक्षिणापक्षगाः । **पाण्डवा** यदवश्चाऽपि सर्वेऽपि परिवव्रिरे ॥३४३॥
पोताग्र[14]मिव निर्यामैः[15] सेनामुखमधिश्रितः । क्रुद्धो **हिरण्यनाभो**ऽथ दधावे विब्रुवन्[16] यदून् ॥३४४॥
**अभिचन्द्र**स्तमित्यूचे विटवद् विब्रवीषि किम्[17] ? । क्षत्रिया हि न वाक्शूराः किन्तु शूराः पराक्रमात् ॥३४५॥
**हिरण्यो**ऽथाऽ**भिचन्द्राय** चिक्षेप विशिखान् शितान्[18] । तांश्चिच्छेदाऽन्तरा **पार्थो** मेघधारा इवाऽनिलः ॥३४६॥
स चिक्षेपाऽ**र्जुनाया**ऽपि दुर्वारां शरधोरणीम् । तमापत्याऽन्तरा **भीमो** गदयाऽपातयद् रथात् ॥३४७॥
स ह्रीणः पुनरारुह्य रथं दष्टाधरः क्रुधा[19] । यदुसैन्ये समग्रेऽपि ववर्ष विशिखान् शितान् ॥३४८॥
न स सादी निषादी वा रथी पत्तिश्च यः शरैः । न तेन प्रहतस्तत्र यदुसैन्ये महत्यपि ॥३४९॥
**जयसेनो**ऽथ सङ्क्रुद्धः **समुद्रविजयात्मजः** । योद्धुं **हिरण्यनाभे**नाऽढौकिष्टाऽऽकृष्टकार्मुकः ॥३५०॥
[20]जामेय ! यमवक्त्रं किमायासीरिति विब्रुवन् । **हिरण्यनाभो** न्यवधीज्**जयसेन**स्य सारथिम् ॥३५१॥
**जयसेनो**ऽपि तस्याऽऽशु कवचं कार्मुकं ध्वजम् । चकर्त सारथिमथ निनाय यमवेश्मनि ॥३५२॥
क्रुद्धो **हिरण्यनाभो**ऽपि मर्माविद्भिः शिलीमुखैः । प्रहृत्य दशभिस्तीक्ष्णैर्**जयसेन**ममारयत् ॥३५३॥
**महीजयो जयसेन**भ्रातोत्तीर्य रथादथ । खड्ग-खेटकभृद्वीरो **हिरण्यं** प्रत्यधावत ॥३५४॥
दूरादपि क्षुरप्रेण **हिरण्य**स्तच्छिरोऽहरत् । भ्रातृद्वयवधक्रुद्धोऽ**नाधृष्टि**स्तमयोधयत् ॥३५५॥
अन्येऽपि हि **जरासन्ध**नृपा **भीमा-ऽर्जुना**दिभिः । यदुभिश्च समं द्वन्द्वेनाऽयुध्यन्त पृथक् पृथक् ॥३५६॥
ज्योतिष्काणामिव [21]पतिः **प्राग्ज्योतिष**महीपतिः । **भगदत्तो महानेमि**मभ्यधावद् गजस्थितः ॥३५७॥
सोऽवोचन्नाऽस्मि ते भ्रातुर्श्यालो[22] **रुक्मी** न वाऽ**श्मकः** । किन्त्वहं नारकिवैरिकृतान्तस्तदपेहि भोः ! ॥३५८॥
इत्युक्त्वा प्रेरयामास स जवेन मतङ्गजम् । **महानेमि**रथं [23]सूतोऽभ्रमयन्मण्डलेन च ॥३५९॥
तद्गजं तलपादेषु **महानेमिः** शरैरहन् । गजः स**भगदत्तो**ऽपि जर्जरांह्रिः पपात च ॥३६०॥
नाऽसि **रुक्मी** हसित्वेति धनुष्कोट्या[24] च ते स्पृशन् । वीरोऽमुञ्चन्**महानेमिः** प्रकृत्या करुणापरः ॥३६१॥
**भूरिश्रवाः**[25] **सात्यकिश्च** युयुधाते इतश्च तौ । **जरासन्ध-वासुदेव**जयश्रीकाङ्क्षिणावुभौ ॥३६२॥

१. नाशयामास । २. शत्रुसेनाम्, **कुरुवरु०** खं० २ । ३. कालपृष्ठं नाम धनुः । ४. वीराग्रेसरः । ५. पाशैः । ६. बाणैः । ७. जिताहवाः "जिताहवो जितकाशी" (अभिचि. कां. ३ श्लो. ८०६) । ८. महागजसेनया । ९. भीमसेनः । १०. **द्यूते वैरं** खं० १-२, **द्यूतं वैरं** ला० । ११. **सुयोधनम्** मु० विना । १२. **निष्पिपेषमरथ्य०** खं०२ । १३. **०धृष्णिं** खं० २ । १४. नावग्रम् । १५. निर्यामकः । १६. **विद्रुवन्** खं० २, **विद्रवन्** ला० । १७. **कम्** खं०१, ला० सू० । १८. तीक्ष्णान् । १९. **कुधीः** सं० । २०. हे भगिनीपुत्र ! । २१. सूर्यः । २२. **०शालो** खं० १-२-३ । २३. सारथिः । २४. धनुरग्रेण । २५. **भूरिश्रवो युयुधानौ** र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तौ दिव्यैरायसैश्चाऽस्त्रैर्दन्तैरिव सुरद्विपौ । युध्यमानौ समभूतां जगत्त्रयभयङ्करौ ॥३६३॥
चिरादुभौ च क्षीणास्त्रौ क्षीणतोयाविवाऽम्बुदौ । दोर्दण्डाभ्यामयुध्येतां मुष्टामुष्टिविधायिनौ ॥३६४॥
तावकम्पयतां भूमिं पतनोत्पतनैर्दृढैः । भुजास्फोटरवैश्चोभौ दिशोऽस्फोटयतामिव ॥३६५॥
बद्ध्वा च **भूरिश्रवसं** योक्त्रबन्धेन **सात्यकिः** । वालयित्वा गलं पृष्ठे जानुनाऽऽक्रम्य चाऽवधीत् ॥३६६॥
¶इतो **हिरण्यनाभस्या**ऽ**नाधृष्टि**श्चापमच्छिदत् । सोऽप्यनाधृष्टयेऽमुञ्चत् परिघं परघातनम् ॥३६७॥
तमापतन्तं विशिखैर**नाधृष्टि**रखण्डयत् । स्फुलिङ्गजालैरुद्यद्भिरुद्योतितदिगन्तरम् ॥३६८॥
**अनाधृष्टे**[1]रन्तचिकी रथादुत्तीर्य वेगवान् । **हिरण्यनाभ**श्चर्माऽसिपाणिः पद्भ्यामधावत ॥३६९॥
**कृष्णा**ग्रजोऽपि चोत्तीर्य खड्ग-खेटकभृद् द्रुतम् । चरन् विचित्रचारीभिः सुचिरं तमखेदयत् ॥३७०॥
**अनाधृष्टि**र्लघुहस्तश्छलं लब्ध्वाऽसिनाऽच्छिदत् । वपुर्**हिरण्यनाभ**स्य ब्रह्मसूत्रेण दारुवत् ॥३७१॥
**जरासन्धम**थोपेयुः शरणं तन्महीभुजः । पश्चिमाब्धावमज्जच्च तदानीमुष्णदीधितिः ॥३७२॥
ययौ **कृष्णमनाधृष्टिः** पूजितो **यदु-पाण्डवैः** । **कृष्णा**ज्ञया च सर्वेऽपि स्वं स्वं शिबिरमभ्ययुः ॥३७३॥
¶अथ राजा **जरासन्धो** मन्त्रयित्वा तदैव हि । अभ्यषिञ्चच्चमूपत्वे **शिशुपालं** महाबलम् ॥३७४॥
यदवो **गरुडव्यूहं गरुडध्वजशासनात्** । विधाय प्रातरातस्थुस्तथैव समरावनिम् ॥३७५॥
तथैव **शिशुपालो**ऽपि **चक्रव्यूहं** विनिर्ममे । ततो राजा **जरासन्धः** शिश्राय समरा[2]वनिम् ॥३७६॥
**जरासन्धे**न पृष्टोऽथ **हंसकः** परसैनिकान् । अङ्गुल्या दर्शयन्नामग्राहमित्याख्यदुच्चकैः ॥३७७॥
**कृष्णा**श्वेन रथेनाऽय**मनाधृष्टि**र्गजध्वजः । नीलाश्वेन रथैनैष **पाण्डुपुत्रो युधिष्ठिरः** ॥३७८॥
**धनञ्जयः** पुनरयं रथेन श्वेतवाजिना । नीलोत्पलदलाभाश्वरथस्त्वेष **वृकोदरः** ॥३७९॥
**समुद्रविजयः** स्वर्णवर्णाश्वोऽयं हरिध्वजः । अयं तु शुक्रवर्णाश्वोऽ**रिष्टनेमि**र्वृषध्वजः ॥३८०॥
अयं च शबलैरश्वैर**क्रूरः** कदलीध्वजः । एष तित्तिरकल्माषै[3]: **सात्यकि**स्तु तुरङ्गमैः ॥३८१॥
[4]**महानेमि**कुमारोऽयं कुमुदाभैस्तुरङ्गमैः । **उग्रसेनः** पुनरयं शुकतुण्डप्रभैर्हयैः ॥३८२॥
**जरत्कुमारः** कनकपृष्ठाश्वोऽयं मृगध्वजः । काम्बोजैर्वाजिभिश्चाऽयं **सिंहलः श्लक्ष्णरोमसूः** ॥३८३॥
**मेरुः** कपिलरक्ताश्वः शिशुमारध्वजस्त्वसौ । पद्माभैर्वाजिभिश्चैष राजा **पद्मरथः** पुरः ॥३८४॥
पारापतप्रभाश्वोऽयं **सारणः** पुष्करध्वजः । पञ्चपुण्ड्रैर्हयैरेष कुम्भकेतु**र्विदूरथः** ॥३८५॥
सैन्यान्तर्धवलैरश्वैः **कृष्णो**ऽयं गरुडध्वजः । अन्त[5]र्व्योम बलाकाभिः प्रावृषेण्य इवाऽम्बुदः ॥३८६॥
अस्य दक्षिणपक्षस्थो रिष्टवर्णैस्तुरङ्गमैः । तालध्वजो **रौहि[6]णेयः** कैलास इव जङ्गमः ॥३८७॥
भूयांसो यदवोऽन्येऽपि नानाहय-रथ-ध्वजाः । महारथाः साम्प्रतं ते शक्याः कथयितुं न हि ॥३८८॥
¶तच्च श्रुत्वा **जरासन्धः** क्रोधादास्फालयद् धनुः । **राम-कृष्णौ** प्रति रथं प्रेरयामास वेगतः ॥३८९॥
युवराजो **जरासन्धतनयो यवनः** क्रुधा । **वसुदेव**सुतान् हन्तुम**क्रूरा**दीनधावत ॥३९०॥
शरभस्येव पञ्चास्यैः सह तैरभवद् रणः । **यवन**स्य महाबाहोः संहार इव भीषणः ॥३९१॥
**रामानुजः सारणो**ऽथाऽद्वै[7]तसारो रुरोध तम् । विचित्रपत्रिभिर्वर्षन् वर्षाभव इवाऽम्बुदः ॥३९२॥
मलयै[8]नेव तुङ्गेन **मलयाख्ये**न दन्तिना । **यवनः सारणरथं** सह रथ्यैरभञ्जयत् ॥३९३॥
गजे परिणते तस्मिन् **यवनस्य** शिरोऽसिना । चिच्छेद **सारणो** वातान्दोलितद्रोः फलं यथा ॥३९४॥
तस्येभस्योत्तिष्ठतश्च हस्तदन्तं चकर्त सः । प्रावृषीव [9]शिखिकुलं **कृष्णसैन्यं** ननर्त च ॥३९५॥
दृष्ट्वा सुतवधं क्रुद्धो **जरासन्धो** धनुर्धरः । यदून् हन्तुं प्रववृते मृगा[10]रातिर्मृगानिव ॥३९६॥
**आनन्दः शत्रु[11]र्दमनो नन्दनः श्रीध्वजो ध्रुवः** । **देवानन्दश्चारुदत्तः पीठश्च हरिषेणकः** ॥३९७॥

१. नाशं चिकीर्षुः । २. रणभूमिम् । ३. कर्बुरैः । ४. **महानेमिः** खं० र, ला० सू० । ५. आकाशमध्ये । ६. बलदेवः । ७. अद्वैतपराक्रमः । ८. मलयाचलपर्वतेन । ९. मयूरसमूहः । १०. सिंहः । ११. **आनन्दशत्रुदमनौ** मु० र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नरदेवो बलस्यैते** सुता दश रणास्यगाः[1] । अजा इव क्रतुमुखे[2] **जरासन्धेन** जघ्निरे ॥३९८॥
**कृष्णसेना** पलायिष्ट कुमारवधदर्शनात् । निघ्नन् गोत्रामिव[3] व्याघ्रोऽन्वयासीत् तां च **मागधः**[4] ॥३९९॥
**शिशुपालो**[5]ऽपि सेनानीर्हसन् **कृष्णमवोचत** । न ह्येतद्गोकुलं **कृष्ण** ! क्षत्रियाणां रणो ह्ययम् ॥४००॥
**कृष्णो**ऽप्यूचे गच्छ राजन् ! गम्यं पश्चादपि त्वया । समरे **रौक्मिणे**[6]ऽप्यस्था **माद्रीमातः**[7]! कियच्चिरम्? ॥४०१॥
मर्माविधा शरेणेव विद्धो **हरिगिरा** तया । **चेदिराड्** धनुरास्फाल्य नाराचानमुचच्छितान् ॥४०२॥
**हरिस्तस्या**ऽच्छिदद्बाणैः कार्मुकं कवचं रथम् । असिमाकृष्य सोऽधावदुद्धूम इव पावकः ॥४०३॥
खड्गं च मुकुटं चाऽथ मूर्धानं च **हरिः** क्रमात् । चिच्छेद **चेदिराजस्य** विब्रुवाणस्य दुर्मतेः ॥४०४॥
**शिशुपालवधक्रुद्धः** कृतान्त इव भीषणः । **जरासन्धः** समं पुत्रै राजभिश्चाऽभ्यधावत ॥४०५॥
ऊचे चैवं यदूनुच्चैर्मा म्रियध्वं मुधैव रे ! । तावर्पयत गोपालौ क्षतं नाऽद्याऽपि किञ्चन ॥४०६॥
यदवस्तद्गिरा क्रुद्धवा दण्डाघृष्टा इवोरगाः । फूत्कुर्वन्तोऽभ्यधावन्त विविधायुधवर्षिणः ॥४०७॥
एकोऽप्यनेकीभूयेव **जरासन्धः** समन्ततः । यदुसैन्यान् शरैर्घोरैर्विव्याध व्याधवन्मृगान् ॥४०८॥
न पत्तयो न रथिनो न वा सादि-निषादि[8] च । अशकन् पुरतः स्थातुं **जरासन्धस्य** योधिनः ॥४०९॥
वातोद्धूतं तूलमिव यदुसैन्यमशेषतः । **जरासन्धशरै**र्दूनं विदुद्राव दिशो दिशि ॥४१०॥
**जरासन्धः** कासरवद्[9] यदुसैन्यमहासरः । जगाहे परितस्तत्र भेकत्वं यदवो ययुः ॥४११॥
**जरासन्धसुता** अष्टाविंशतिर्दृग्विषा इव । विक्षिपन्तः शस्त्रविषं **रामं** समुपदुद्रुवुः[10] ॥४१२॥
एकोनसप्ततिश्चाऽन्ये **जरासन्धस्य** सूनवः । **जनार्दनं** जिघांसन्तो रुरुधुर्दानवा इव ॥४१३॥
तैः समं ववृते घोरः समरो **राम-कृष्णयोः** । मिथोऽस्त्रच्छेदसम्भूतस्फुलिङ्गकणवर्षणः ॥४१४॥
**रामो**ऽष्टाविंशतिमपि तान् **जरासन्धनन्दनान्** । **सीरेणा**[11]ऽऽकृष्य मुशलेनाऽपिषत् तन्दुलानिव ॥४१५॥
अद्याऽप्युपेक्षितो हन्ति गोपोऽयमिति विब्रुवन् । **जरासन्धो** न्यहन् **रामं** गदया वज्रकल्पया[12] ॥४१६॥
ववाम रुधिरं **रामो** गदाघातेन तेन तु । यदुसैन्ये समग्रे च जज्ञे हाहारवो महान् ॥४१७॥
प्रजिहीर्षु पुना **रामे जरासन्धमयोधयत्** । अन्तराऽऽपत्य **कौन्तेयः**[13] कनिष्ठः श्वेतवाहनः ॥४१८॥
प्रेक्ष्य **रामस्य** वैधुर्यं **क्रुद्धः कृष्णो** धुताधरः । पुरस्थानवधीद् **जारासन्धी**[14]नेकोनसप्ततिम् ॥४१९॥
मरिष्यत्येव **रामो**ऽयं किं हतेन **किरीटिना**[15] ? । **कृष्णं** हन्मीति तमभिदधावे **मगधाधिपः** ॥४२०॥
**कृष्णो**ऽपि हत एवेति सर्वतोऽप्यभवद् ध्वनिः । अत्रान्तरेऽ**रिष्टनेमि**मित्यवोचत **मातलिः** ॥४२१॥
कलभः शरभस्येव **जरासन्धः** कियानयम्? । भुवनत्रयनाथस्य श्री**नेमे** ! भवतः पुरः? ॥४२२॥
अयादवं करोत्यद्य त्वया ह्ययमुपेक्षितः । तद्दर्शय जगन्नाथ ! मनाग् लीलायितं निजम् ॥४२३॥
यद्यप्याजन्मविमुखः सावद्यात् कर्मणः प्रभुः । तथापि द्विषदाक्रान्तं[16] नोपेक्ष्यं कुलमात्मनः ॥४२४॥
तेनेत्युक्तो विना कोपं **नेमि**रादाय पाणिना । दध्मौ पौरन्दरं[17] शङ्खमतिपर्जन्यनिःस्वनम् ॥४२५॥
तद्ध्वाने रोदसीकुक्षिम्भरिभिश्चुक्षुभुः परे । यदुसैन्यं पुनः स्वस्थीबभूव समरक्षमम् ॥४२६॥
अलातचक्रवन्[18]**नेमेराज्ञया मातली** रथम् । भ्रमयामास सङ्ग्राम[19]सागरावर्तसन्निभम् ॥४२७॥
आकृष्या[20]ऽऽखण्डलधनुर्नवाम्भोद इव **प्रभुः** । **ववर्ष शरधाराभिः** परितस्त्रासयन्नरीन् ॥४२८॥
ध्वजांश्चिच्छेद केषाञ्चित् केषाञ्चित् कार्मुकाणि च । रथानभाङ्क्षीत् केषाञ्चित् केषाञ्चिन्मुकुटान् प्रभुः ॥४२९॥
दूरे प्रहारवार्ता तु न वीक्षितुमपि क्षमाः । बभूवुः परसुभटाः कल्पान्तार्कप्रभं प्रभुम् ॥४३०॥
अभाङ्क्षीत् क्ष्माभुजां लक्षं स्वाम्येकोऽपि किरीटिनाम् । उद्भ्रान्तस्य महाम्भोधेः सानुमन्तो[21]ऽपि के पुरः? ॥४३१॥

१. रणमुखस्थिताः । २. यज्ञे । ३. गोसमूहम् । ४. जरासन्धः, **मागधि०** खं०२ । ५. **०पालोऽथ** खं०१, सू० विना । ६. रुक्मिणीसम्बन्धिनि । ७. माद्री माता यस्य सः तत्सम्बोधनम् । ८. सादिनश्च निषादिनश्च तेषां समाहारः । ९. महिषवत् । १०. **च समुपाद्रवन्** खं०१ सू० । ११. हलेन । १२. वज्रसदृशया । १३. अर्जुनः । १४. जरासन्धपुत्रान्, **ज्जरा०** खं० १-२ । १५. अर्जुनेन । १६. **द्विषदाघ्रातं** र० । १७. इन्द्रसम्बन्धिनम् । १८. **कुलालचक्रवत्** पु० । १९. **संग्रामे सागरा०** मु० र० । २०. **आकृष्टाऽऽखण्डल०** खं० । २१. पर्वताः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्रतिविष्णुर्विष्णु**[1]नैव वध्य इत्यनुपालयन् । स्वामी त्रैलोक्यमल्लोऽपि **जरासन्धं** जघान न । ॥४३२॥
परसैन्यानि रुद्ध्वाऽस्थाच्छ्री**नेमि**र्भ्रमयन्[2] रथम् । लब्धोत्साहा युयुधिरे भूयोऽपि यदुसैन्यकाः[3] ।४३३॥
अत्राऽन्तरे **पाण्डुपुत्रैः** सिंहैरिव कुरङ्गकाः । अवशिष्टा **धार्तराष्ट्रा** निजवैरान्निजघ्निरे ॥४३४॥
[4]स्वस्थीभूतो **बलदेवो**ऽप्युदस्तायो[5]ग्रलाङ्गलः । अनेकशो योधयित्वा जघान परसैनिकान् ॥४३५॥
इतश्च **कृष्णमवदद् जरासन्ध** इयच्चिरम् । जीवितो माययैवाऽसि भो गोपाल ! शृगालवत् ॥४३६॥
माययैव हतः **कंसो** हतः **कालो**ऽपि मायया । त्वया ह्यशिक्षितास्त्रेण **समरः क्रियते न हि** ॥४३७॥
तव प्राणैः सहैवाऽद्य मायां पर्यन्तयाम्यरे ! । एषोऽद्य **जीवयशसः** प्रतिज्ञां पूरयामि च ॥४३८॥
स्मित्वा **कृष्णो**ऽब्रवीद् राजन्नित्थं नि[6]र्मिथ्यमात्थ[7] भोः ! । ईदृक्षोऽस्मि परं स्वस्य दृश्यतां शिक्षितास्त्रता ॥४३९॥
नाऽहं स्वश्लाघनस्त्वद्वदेकमाख्यामि किं त्विदम् । पूरिष्यते त्वद्दुहितुः प्रतिज्ञाऽग्निप्रवेशनात् ॥४४०॥
इति **विष्णु**गिरा क्रुद्धो **जरासन्धो**ऽमुचच्छरान् । वि[8]कर्तनस्तमांसीव **कृष्णो**ऽपि विचकर्त तान् ॥४४१॥
उभावपि ससंरम्भौ शरभाविव धन्विनौ । अयुध्येतां धनुर्ध्वानैर्ध्वनयन्तो दिशोऽखिलाः ॥४४२॥
तयोः समरसम्मर्दाच्चुक्षुभुर्जलराशयः । वित्रेसुः खेचरा व्योम्नि गिरयश्च चकम्पिरे ॥४४३॥
ग[9]तागतं तद्रथयोर्दृढयोः शैलयोरिव । असहिष्णुर्मही सर्वंसहत्वममुचत् क्षणात् ॥४४४॥
दैवं[10]तैर्दैवतान्यस्त्राण्यायसैरायसानि तु । प्रत्यहन्**मगधेश**स्य लीलयैव **जनार्दनः** ॥४४५॥
जाते सर्वास्त्रवैफल्ये वैलक्ष्यामर्षपूरितः । चक्रं सस्मार दुर्वारमन्यास्त्रै**र्मगधेश्वरः** ॥४४६॥
चक्रं तदागतं सद्यो भ्रमयित्वा करेण खे । **कृष्णा**य जयतृष्णावान् कोपान्धो **मागधो**ऽमुचत् ॥४४७॥
चक्रे तत्राऽऽपतत्युच्चैस्त्रेसुः खे खेचरा अपि । चुक्षुभुः **कृष्ण**सैन्यानि लब्धदैन्यानि सर्वतः ॥४४८॥
तच्च स्खलयितुं **कृष्णो रामः** पञ्चाऽपि **पाण्डवाः** । महारथाश्चाऽपरेऽपि स्वान्यस्त्राणि प्रचिक्षिपुः ॥४४९॥
तैरस्खलितमुत्पूरसिन्धुस्रोत इव द्रुमैः । एत्य तुम्बेन तच्चक्रं **कृष्णं** वक्षस्यताडयत् ॥४५०॥
भेदितं भेदनीत्येव[11] तच्चक्रं पार्श्वतः स्थितिम् । आददे पाणिना **कृष्णः** स्वं प्रतापमिवोद्यतम् ॥४५१॥
नवमो **वासुदेवो**ऽयमुत्पन्न इति घोषिणः । गन्धाम्बु-कुसुमवृष्टिं **कृष्णे** व्योम्नोऽमुचन् सुराः ॥४५२॥
**कृष्णो**ऽपि जातकारुण्यो बभाषे **मगधाधिपम्** । एषाऽपि मम किं माया? विद्धयद्याऽपि गृहे व्रज ॥४५३॥
ममाऽऽज्ञां प्रतिपद्यस्व पुनरेधस्व सम्पदा । मुञ्च मानं दुर्विपाकं जीवाऽद्यापि [12]जरन्नपि ॥४५४॥
ममैतदुल्मुकप्रायं मयैव चिरलालितम् । चक्रं मुञ्चसि तन्मुञ्चेत्युवाच **मगधेश्वरः** ॥४५५॥
**जरासन्धाय** तच्चक्रं मुमोचाऽथ **जनार्दनः** । परेषामेव शस्त्राणि [13]शस्त्राणि स्युर्महात्मनाम् ॥४५६॥

[वसन्ततिलका]

तच्चक्र[14]कृत्तमपतन्**मगधेश्वर**स्य,
पृथ्व्यां शिरः स तु जगाम चतुर्थपृ[15]थ्व्याम् ।
**कृष्ण**स्य चोपरि सुराः सुरवृक्षपुष्प-
वृष्टिं व्यधुर्जय जयेति वदन्त उच्चैः ॥४५७॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये अष्टम[16]पर्वणि **शाम्ब[17]-प्रद्युम्न**विवाह-
**जरासन्ध**वधकीर्तनो नाम
सप्तमः **सर्गः** ॥

१. वासुदेवेनैव प्रतिवासुदेवो वध्य इति कारणात् श्रीनेमिना न हतः । २. **भ्रामयन्** खं० २ । ३. **सैनिकाः** खं० १, ला० सू० ।
४. **सुस्थी०** खं० २ । ५. मुशल-हल । ६. सत्यम् । ७. ब्रवीषि । ८. सूर्यः । ९. **तनोर्भारं त०** खं० २ । १०. **देवतैर्दैवता०**
खं० २ । ११. साम-दाम-भेद-दण्डेतिनीतिषु तृतीयनीत्या भेदितं इव चक्रमभूत् । १२. वृद्धः : १३. **स्वकानि** खं० २, मु० र० ।
१४. तेन चक्रेण कृत्तं-छिन्नम् । १५. चतुर्थे नरके । १६. **अष्टमे** मु० र० । १७. **शाम्ब** इति न खं० २ ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

## ॥ अष्टमः सर्गः ॥

अथ [1]रोधान्नेमिनाथोऽमुञ्चत् **कृष्णा**रिपार्थिवान् । तं नमस्कृत्य तेऽप्येवं रचिताञ्जलयोऽवदन् ॥१॥
तदैव ही **जरासन्धो** वयं च [2]विजिताः प्रभो ! । यदैव त्वं यदुकुलेऽवातारीस्त्रिजगत्प्रभुः ॥२॥
एकोऽपि **विष्णुर्हन्त्**येव **प्रतिविष्णो**र्न संशयः । किं पुनर्यस्य नाथ ! त्वं सहायो बान्धवोऽपि च ॥३॥
एतन्न ज्ञातमस्माभि**र्जरासन्धेन** चाऽग्रतः । तदकृष्महि कर्मेदमीदृशी भवितव्यता ॥४॥
अद्य त्वा शरणं प्राप्ताः सर्वेषां शिवमस्तु नः । [3]खलूक्त्वा यदि वाऽधित्वत्प्रणतानां स्वतः शिवम् ॥५॥
इत्युक्त्वा तैः स्थितैर्भूपैः सह **नेमि**र्ययौ **हरिम्** । अवतीर्य रथाद् गाढं **हरि**रप्यालिलिङ्ग तम् ॥६॥
**हरिर्नेमि**गिरा राज्ञस्तान् स्वीचक्रे तथा च तम् । **जारासन्धिं**[4] **सहदेवं समुद्रविजया**ज्ञया ॥७॥
दत्त्वा **मगध**तुर्यांशं **सहदेवं** पितुः पदे । **हरि**रारोपयामास कीर्तिस्तम्भमिवाऽऽत्मनः ॥८॥
**महानेमिं शौर्यपुरे समुद्रविजया**त्मजम् । **कोशलायां रुक्मनाभं हिरण्यनाभ**नन्दनम् ॥९॥
अनाददानस्य राज्य**मुग्रसेन**स्य नन्दनम् । **धर**संज्ञं **मथुरायां** स्थापयामास **केशवः** ॥१०॥ युग्मम् ॥
¶अथ [5]प्रत्यक्पयोराशौ ममज्जाऽर्यम[6]मण्डलम् । विसृष्टो **नेमिनाथेन मातलि**श्च दिवं ययौ ॥११॥
**कृष्णाः कृष्णा**ज्ञयाऽन्ये च स्वं स्वं शिबिरमभ्ययुः । **समुद्रविजय**श्चाऽस्थाद् **वसुदेवा**गमोत्सुकः ॥१२॥
¶**वासुदेवं** द्वितीयेऽह्नि **समुद्रविजया**न्वितम् । खेचर्यः स्थविरास्तत्र एयुरित्यूचिरे च ताः ॥१३॥
**प्रद्युम्न-शाम्ब**सहितो **वसुदेवः** सखेचरः । नचिरा[7]दयमायाति श्रूयतां तस्य चेष्टितम् ॥१४॥
तदेतः[8] स्थानतः सार्धं पौत्राभ्यां खेचरैश्च तैः । **वैताढ्यं वसुदेवो**ऽगाद् युयुधे चाऽरिखेचरैः ॥१५॥
**नीलकण्ठा-ऽङ्गारका**द्याः खेचराः पूर्वविद्विषः । सर्वे सम्भूय सम्भूय **वसुदेव**मयोधयन् ॥१६॥
[9]तद्युद्धान्तर्ह्यस्तनेऽहन्यूचुश्चाऽऽसन्नदेवताः । व्यापादितो **जरासन्धः कृष्णो** विष्णुरभूदिति ॥१७॥
तच्छ्रुत्वा खेचराः सर्वे रणं त्यक्त्वा व्यजिज्ञपन् । राज्ञे **मन्दरवेगाय** सोऽपि तानेवमादिशत् ॥१८॥
सर्वेऽप्यायात भो ! यूयं महाप्राभृतपाणयः । द्वारेण **वसुदेव**स्य यास्यामः शरणं **हरिम्** ॥१९॥
इत्युक्त्वा **वसुदेवा**न्ते गत्वा स भगिनीं निजाम् । **प्रद्युम्ना**य ददौ पुत्रीं राजाऽपि **त्रिपथर्षभः** ॥२०॥
राजा **देवर्षभो वायुपथ**श्च तनये निजे । श्रीम**च्छाम्ब**कुमाराय ददतुः परया मुदा ॥२१॥
सहैव **वसुदेवेन** सर्वे विद्याधरेश्वराः । अद्याऽऽयान्ति पुरश्चैतदाख्यातुं प्रेषिता वयम् ॥२२॥
एवं तासु ब्रुवाणासु **वसुदेवः** सखेचरः । **प्रद्युम्न-शाम्ब**सहितस्तत्राऽऽगान्नयनोत्सवः ॥२३॥
आनर्चुः खेचराः **कृष्णं** वसुधाराविडम्बिभिः । स्वर्णरत्नैर्विविधैश्च स्यन्दना-ऽश्व-गजादिभिः ॥२४॥
**जयसेन**प्रभृतीनां प्रेतकार्यं व्यधा**द्धरिः** । **जरासन्ध**प्रभृतीनां **सहदेव**नृपः पुनः ॥२५॥
पत्युः पितुश्च संहारं सकुलस्याऽपि वीक्ष्य सा । स्वजीवितं **जीवयशा** जहौ ज्वलनसाधनात् ॥२६॥
[10]चुत्कू(कू)न्दिरे यदानन्दं यदवस्त**ज्जनार्दनः** । तत्राऽऽ**नन्दपुरं** चक्रे **सिनपल्ली**पदे पुरम् ॥२७॥
¶ततः स्थानाच्च **गोविन्दः** खेचरैर्भूचरैर्वृतः । [11]षड्भिर्मासै**र्भरतार्धं** संसाध्य **मगधे**ष्वगात् ॥२८॥
तत्रैकयोजनोत्सेधां विस्तारेऽप्येकयोजनाम् । **भरतार्ध**वासिनीभिर्देवताभिरधिष्ठिताम् ॥२९॥
शिलां **कोटिशिलां** नाम [12]दक्षिणेतरबाहुना । चतुरङ्गुलमुद्दध्रे पृथ्वीतः **कंससूदनः** ॥३०॥युग्मम् ॥
¶तां भुजाग्रे दधौ **विष्णु**राद्यो मूर्ध्नि द्वितीयकः । कण्ठे तृतीयस्तुर्यस्तूरःस्थले पञ्चमो हृदि ॥३१॥
षष्ठः कट्यां [13]षडधिकस्तूर्वोराजानु चाऽष्टमः । चतुरङ्गुलमन्त्योऽवसर्पिण्यां ते [14]पैतद्बलाः ॥३२॥
ततोऽगाद् **द्वारकां कृष्णो**ऽर्धचक्रि[15]त्वेऽभ्यषेचि च । भक्त्या षोडशभी राज्ञां सहस्रैस्त्रिदशैस्तथा ॥३३॥

---

१. कारागारात् । २. वञ्चिताः मु० र० । ३. अत्र खलुशब्दोऽलमर्थे । ४. **जरासन्धि** मु० जरासन्धपुत्रम् । ५. पश्चिमसमुद्रे । ६. सूर्यमण्डलम् । ७. शीघ्रम् । ८. **तदितः** मु. । ९. **त्वद्युद्धा०** खं० २ । १०. **चुस्कुन्दिरे** मु० । ११. **असाधयद् भरतार्धं मगधेषु जगाम च** खं० १, सू० । १२. वामहस्तेन । १३. सप्तमः । १४. क्षीयमाणबलाः । १५. वासुदेवत्वे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पाण्डवान्** **कुरुदेशाय** स्वस्वस्थानाय चाऽपरान् । भूचरान् खेचरांश्चाऽथ विससर्ज **जनार्दनः** ॥३४॥
**दशार्हा** दश दोष्मन्तः **समुद्रविजयादयः** । पञ्चसङ्ख्या महावीरा **बलदेवादय**स्तथा ॥३५॥
राजान **उग्रसेनाद्याः** सहस्राणि च षोडश । **प्रद्युम्नादि**कुमाराणां सार्धं कोटित्रयं तथा ॥३६॥
**शाम्बादी**नां दुर्दान्तानां सहस्राः षष्टिरेव च । **वीरसेना**दयो वीरा सहस्राण्येकविंशतिः ॥३७॥
तथैव च **महासेन**प्रभृतीनां महौजसाम् । महतां [१]तलवर्गाणां षट्पञ्चाशत्सहस्र्यपि ॥३८॥
अन्येऽपीभ्य[२]श्रेष्ठि-सार्थपतिमुख्याः सहस्रशः । **कृष्णं** सिषेविरे मूर्ध्नि रचिताञ्जलिसम्पुटाः ॥३९॥
भूपाः षोडश सहस्राः **वासुदेवाय** भक्तितः । रत्नानि ढौकयामासुर्द्वे द्वे च[३] वरकन्यके ॥४०॥
ताभ्यः षोडश सहस्राः कन्याः **कृष्ण** उपायत । अष्टौ सहस्राणि **बलो**ऽन्ये कुमाराश्च तावतीः ॥४१॥
**कृष्णो राम**ः कुमाराश्च क्रीडोद्यान-नगादिषु । स्वच्छन्दं रेमिरे रम्यरमणीभिः [४]समावृताः ॥४२॥
¶तथा तान् क्रीडतः प्रेक्ष्य **समुद्रविजयो** नृपः । **शिवादेवी** चाऽभिदधे **नेमिं** प्रेमा[५]क्तया गिरा ॥४३॥
तात ! त्वां पश्यतां नेत्रोत्सवोऽस्माकं सदैव हि । अनुरूपवधूपाणिग्रहणेनाऽधिकोऽस्तु सः[६] ॥४४॥
जन्मतोऽपि भवोद्विग्नो ज्ञानत्रयधरः प्रभुः । ऊचे **नेमि**र्नाऽनुरूपाः क्वाऽपि पश्यामि योषितः ॥४५॥
भवन्त्येता हि पाताय दुःखेऽमूभिः कृतं हि नः । सम्पत्स्यन्तेऽनुरूपास्तु यदोद्वक्ष्यामि तास्तदा ॥४६॥
एवं गम्भीरया वाचा प्रकृत्या पितरावृजू । **नेमि**र्निवारयामास विवाहोपक्रमाग्रहात् ॥४७॥
¶इतोऽपि च **यशोमत्या** जीवश्च्युत्वाऽ**पराजितात्** । **उग्रसेन**स्य भार्याया **धारि[७]ण्या** उदरेऽभवत् ॥४८॥
**धारि[८]ण्याः** समये जज्ञे नाम्ना **राजीमती** सुता । अद्वैतरूपलावण्या क्रमेण ववृधे[९] च सा ॥४९॥
¶इतश्च **द्वा[१०]रका**वासी **धनसेनो** ददौ सुताम् । **नभःसेनाय कमलामेला**ख्या**मौग्रसे[११]नये** ॥५०॥
**नभःसेन**स्य सदने चाऽऽययौ **नारदो** भ्रमन् । विवाहव्यग्रचित्तेन स तेन न हि पूजितः ॥५१॥
तस्याऽनर्थेच्छया सोऽगाद् **रामसू-निषधा**त्मजम् । नामतः **सागरचन्द्रं शाम्बादी**नामतिप्रियम् ॥५२॥
तमभ्युत्थाय सोऽपृच्छद् देवर्षे ! भ्रमता त्वया । किमैक्षि किञ्चिदाश्चर्यं तदालोकप्रियो ह्यसि ॥५३॥
सोऽप्यूचे प्रेक्षिताऽत्रैवाऽऽश्चर्यभूता जगत्यपि । नामतः **कमलामेला धनसेन**स्य कन्यका ॥५४॥
**नभःसेनाय** सा दत्ताऽधुनैवेत्यभिधाय सः । उत्पत्याऽगमदन्यत्र त[१२]द्रक्तः **सागर**स्त्वभूत् ॥५५॥
तामेव **सागरो** दध्यौ तन्नामैव जगाद च । तामेव सर्वतोऽपश्यत् पीतोन्मत्तः सुवर्णवत् ॥५६॥
¶जगाम **कमलामेला**सदने **नारदो**ऽप्यथ । तया च पृष्ट आश्चर्यमित्यभाषिष्ट कूटधीः ॥५७॥
आश्चर्ये द्वे मया दृष्टे तत्रैकं रूपसम्पदा । कुमारः **सागरचन्द्रो नभःसेनः** कुरूपतः ॥५८॥
सद्यो मुक्त्वा **नभःसेन**मरज्यत् **सागरे**ऽथ सा । तद्रागं **नारदो** गत्वा **सागराय** शशंस च ॥५९॥
**सागरं** प्रेक्ष्य पतितं तस्या विरहसागरे । माताऽपरे कुमाराश्च बभूवुर्विधुरा भृशम् ॥६०॥
तदा तत्राऽऽययौ **शाम्ब**स्तथावस्थस्य पृष्ठतः । स्थित्वा **सागरचन्द्र**स्य पाणिभ्यां पिदधे दृशौ ॥६१॥
**सागरः** स्माऽऽह **कमलामेला** किमसि नन्विह? । एषोऽहं '[१३]कमलामेल' इति **शाम्बो**ऽप्यभाषत ॥६२॥
बभाषे **नै[१४]षधि**स्तर्हि त्वमेव **कमलां** मम । मेलयिष्यसि पर्याप्तमन्योपायविचिन्तया ॥६३॥
[१५]अप्रतीच्छंस्तद्वचनं **शाम्बः** सर्वैः कुमारकैः । पाययित्वा भूरिमद्यं छलयित्वा च मानितः ॥६४॥
¶**शाम्बो** गतमदावस्थोऽचिन्तयत् किं मया ननु । दुष्करं प्रत्यपादीदं निर्वाह्यं तत् तथापि हि ॥६५॥
ततश्च स्मृत्वा **प्रज्ञप्तिं** कुमारैरपरैः समम् । **नभःसेनो**द्वाहदिने **शाम्ब** उद्यानमभ्यगात् ॥६६॥
गृहाच्च **कमलामेलां** तत्राऽऽनाय्य सुरङ्गया । रक्तां **सागरचन्द्रेण** विधिवत् पर्यणायत ॥६७॥
गृहे च तामपश्यन्तो मार्गयन्त इतस्ततः । पितृ-श्वसुरवर्गीयास्तदुद्यानं समाययुः ॥६८॥

१. **बलवर्गाणाम्** की. ला०, तलारक्षकाणाम् । २. धनाढ्यः । ३. **प्रवरकन्यके** खं० २ । ४. **परावृताः** ता०सं० खं० २ । ५. प्रेमयुक्तया । ६. **नः** खं० २ । ७. **धारण्या** खं० १, सू० । ८. **धारण्यां** खं० १, सू० । ९. **ववृधेतराम्** खं० २ । १०. **द्वारिका** खं० २, ला० । ११. उग्रसेनपुत्राय । १२. कमलामेलाया रागवान् । १३. कमलां मेलयति इति तथा । १४. सागरचन्द्रः । १५. अनङ्गीकुर्वन् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कृतखेचररूपाणां **यदूनां** मध्यवर्तिनीम् । आलोक्य **कमलामेलां विष्णवे** ते व्यजिज्ञपन् ॥६९॥
क्रुद्धः **कृष्णो**ऽपि **कमलामेला**हर्तॄनुपेत्य तान् । [1]अयोधयद्धन्तुकामो दुर्नयासहनो हि सः ॥७०॥
कृत्वा स्वरूपं **शाम्बो**ऽपि **कमलामेल**या युतम् । गृहीत्वा **सागरचन्द्रं** न्यपतत् **कृष्ण**पादयोः ॥७१॥
ऊचे विलक्षः **कृष्णो**ऽपि किमिदं रे ! त्वया कृतम् ? । आश्रितोऽयं **नभःसेनो** यदेवं हन्त वञ्चितः ॥७२॥
अस्य किं क्रियतेऽद्येति **नभःसेन**मबोधयत् । ददौ च **कमलामेलां सागरायैव केशवः** ॥७३॥
[2]अपकर्तुं **नभःसेनो**ऽप्यक्षमस्तत्प्रभृत्यपि । छिद्रं **सागरचन्द्र**स्य मार्गयामास सर्वदा ॥७४॥
¶इतश्च पत्न्यां **वैदर्भ्यां प्रद्युम्न**स्य सुतोऽभवत् । **अनिरुद्धो**ऽभिधानेन यौवनं प्रत्यपादि च ॥७५॥
तदा **शुभनिवासा**ख्ये पुरेऽभूत् खेचरेश्वरः । **बाणो** नामोल्[3]बणबलस्तस्य **चोषे**ति कन्यका ॥७६॥
सा च रूपवती स्वानुरूपवल्लभलिप्सया । विद्यामाराधयद् **गौरीं** निश्चयेन गरीयसा ॥७७॥
सा तुष्टा तामभाषिष्ट पौत्रः **कृष्णस्य** शार्ङ्गिणः । भविष्यत्य**निरुद्धस्ते** वरः सुरवरोपमः ॥७८॥
आराधितश्च **बाणेन गौरी**विद्याप्रियः सुरः । **शङ्करा**ख्यो ददावस्याऽजय्यत्वं समराङ्गणे ॥७९॥
**गौरी** तमूचे सर्वत्रा[4]ऽजय्यत्वं यद् ददौ वरम् । तन्न युक्तं मया दत्तो ह्यस्त्य**ुषाया** वरो[5] ननु ॥८०॥
**शङ्करो**ऽप्यवदद् **बाणं** त्वम[6]जय्यो भविष्यति । स्त्रीकार्यादन्यत इति **बाण**स्तेनाऽपि पिप्रिये ॥८१॥
**उषा** रूपवतीत्वेन खेचरैर्भूचरैश्च सा । कैः कैर्ययाचे नो **बाणा**न्न ददौ स त्वरोचकी ॥८२॥
¶विद्याधरीं **चित्रलेखां** प्रेष्योषाऽप्यनुरागिणी । आनाययद**निरुद्धं** मनसीव निजे गृहे ॥८३॥
तां गान्धर्वविवाहेनोदुह्याऽऽदाय च सोऽचलत् । **उषां** हृत्वाऽ**निरुद्धो**ऽहं गच्छामीति जगाद च ॥८४॥
ततः क्रुद्धः खेचरेन्द्रो **बाणो** [7]बाणासनी बलैः । व्याधः श्वभिरिव [8]क्रोडम**निरुद्धं** निरुद्धवान् ॥८५॥
पत्युर्विद्यां तदानीं च पाठसिद्धाम**ुषा** ददौ । बृंहितौजास्तया सोऽपि **बाणेन** युयुधे चिरम् ॥८६॥
नागपाशैः कमलवद् बद्धः **प्रद्युम्ननन्दनः** । **बाणेना**ऽथ तदाख्यायि **प्रज्ञप्त्या शार्ङ्गपाण**ये ॥८७॥
तत्राऽऽययौ **हरिः सीरि-शाम्ब-प्रद्युम्न**संयुतः । दु[9]द्रुवुस्तेऽहिपाशां[10]स्तु **गरुडध्वज**दर्शनात् ॥८८॥
**बाणो**ऽपि **शङ्कर**वरेणाऽऽत्मस्थाम्ना[11] च गर्वितः । उचे **कृष्णं** मदोन्मत्तः किं त्वं वेत्सि न मद्बलम् ?॥८९॥
सदाऽन्यकन्याहरणं त्वमकार्षीस्ततश्च ते । पुत्रादीनां क्रमायातं तत्फलं दर्शयामि वः[12] ॥९०॥
ऊचे **कृष्णो**ऽपि केयं ते वाचोयुक्तिर्दुराशय !? । कन्या ह्यवश्यं दातव्या दोषस्तद्धरणेऽस्तु कः ? ॥९१॥
श्रुत्वेति खेचरवृतो भृकुटीभीषणाननः । कृष्टबाणासनो **बाणो** बाणांश्चिक्षेप **शार्ङ्गिणे** ॥९२॥
तानन्तराऽपि चिच्छेद छेदच्छेको **जनार्दनः** । शराशरि तयोरेवं वीरयोर्ववृते चिरम् ॥९३॥
निरस्त्रीकृत्य तं **कृष्णः** कृष्णाहिमिव पक्षिराट् । निकृत्य खण्डशोऽनैषीत् प्रेतराजस्य सद्मनि ॥९४॥
**अनिरुद्धमुषा**समन्वितं समुपादाय **जनार्दन**स्ततः । [13]मुदितः**स्मर-सीरि-शाम्ब**युग् नगरीं **द्वारवतीं** पुनर्ययौ ॥९५॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये अष्टमे[14] पर्वणि
**सागरचन्द्रोपाख्यान-उषाहरण-**
**बाणवध**वर्णनो नाम अष्टमः सर्गः ॥

—x—

१. **आयोध०** सं० १. ला० सू० । २. **अपहर्तुम्** लं. १. ला० सू० ला० पु० ला०२ । ३. उत्कटबलः । ४. **सर्वत्राजेयत्वं** खं० २ । ५. **वरः स नु** खं० २ । ६. **त्वजजेयो** खं० र । ७. धनुर्धरः । ८. वराहम् । ९. **तुत्रुटुस्ते** पु० । १०. नागपाशाः । ११. आत्मबलेन । १२. **च** खं० १.२ । १३. **हृष्टः प्रद्युम्नसीरि०** मु.; **रामप्रद्युम्नसीरि०** खं० १ । १४. **०ऽष्टमपर्वणि** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ नवमः सर्गः ॥

इतश्च क्रीडया **नेमिः** कुमारैः सह पर्यटन् । विवेश **वासुदेव**स्याऽऽयुधशा[1]लामशङ्कितम् ॥१॥
[2]तत्र चक्रमतिभास्वद् [3]भास्वद्बिम्बमिवोच्चकैः । **शार्ङ्ग-कौमोदकी**-खड्गान् भो[4]गिराड्भोगभीषणान् ॥२॥
**पाञ्चजन्यं** जन्य[5]नाट्यनान्दीतूर्यं महत्तरम् । **विष्णो**र्यशःकोशमिव **कुमारः** समुदैक्षत ॥३॥ युग्मम् ॥
कौतुकाच्छङ्खमादित्सुं विज्ञायाऽ**रिष्टनेमि**नम् । प्रणम्याऽस्त्रगृहारक्षश्चा**रुकृष्णो**ऽब्रवीदिति ॥४॥
यद्यप्यसि **हरे**र्भ्राता दोष्मानसि तथाऽपि हि । नाऽऽदातुमपि शक्नोषि शङ्खं पूरयितुं कुतः ? ॥५॥
इमं हि शङ्खमादातुमाध्मातुं च विना **हरिम्** । न क्षमः कोऽपि मा कार्षीस्तत्प्रयासं मुधैव हि ॥६॥
स्मित्वाऽथ **नेमि**स्तं शङ्खमुद्दध्रे लीलयाऽपि हि । दध्मौ चाऽधरविश्रान्तदन्तज्योत्स्नाविडम्बकम् ॥७॥
**द्वारका**वप्रसंमूर्छदुद्वेलजलधिध्वनेः । सब्रह्मचारी तद्ध्वानः पूरयामास रोदसी ॥८॥
[6]प्राकारः शैलशृङ्गाणि प्रासादाश्च चकम्पिरे । चुक्षुभुः **सीरभृच्छा[7]र्ङ्गी दशार्हा** अपरेऽपि च ॥९॥
स्तम्भानुन्मूल्य करिणस्त्रेसुस्त्रोटितशृङ्खलाः । पलायाञ्चक्रिरे चाऽश्वा निरस्तमुखबन्धनाः ॥१०॥
तद्ध्वनेर्वज्रनिर्घोषादिवाऽमूर्च्छन् पुरीजनाः । अस्त्रागाररक्षकाश्च निपत्याऽस्थुर्मृता इव ॥११॥
इति दध्यौ च **गोविन्दः** शङ्खः केनेष वादितः ? । किं चक्री कश्चिदुत्पन्नो ? व[8]ज्री वा भुवमागतः ? ॥१२॥
मयाऽपि वादिते शङ्खे क्षोभः सामान्यभूभुजाम् । अनेन शङ्खे त्वाध्माते मम **राम**स्य चाऽभवत् ॥१३॥
¶इति **कृष्णं** चिन्तयन्तमस्त्रारक्षा व्यजिज्ञपन् । लीलया **पाञ्चजन्यो**ऽद्य पूरितोऽ**रिष्टनेमिना** ॥१४॥
तच्छ्रुत्वा विस्मयापन्नोऽश्रद्दधानश्च चेतसि । यावत् तस्थौ हरिस्तावत् तत्रोपेयाय **नेम्य**पि ॥१५॥
**कृष्णः** [9]कृतावहित्थोऽथ **नेमिनाथं** ससम्भ्रमः । उपवेश्याऽऽसनेऽनर्घ्ये[10] सगौरवमभाषत ॥१६॥
**पाञ्चजन्यो**ऽऽधुना भ्रातः ! किमयं पूरितस्त्वया? । तन्नादेन मही सर्वा क्षु[11]भिताऽद्याऽपि वर्तते ॥१७॥
आमेति **नेमिना**ऽप्युक्ते तद्दोर्बलमपि स्वयम् । परीक्षितुमनाः **कृष्ण**स्तं सगौरवमब्रवीत् ॥१८॥
**पाञ्चजन्यं** पूरयितुं मदृते नाऽपरः क्षमः । भवता पूरिते त्वस्मिन् भ्रातः ! प्रीतोऽस्मि सम्प्रति ॥१९॥
मां विशेषात् प्रीणयितुं स्वदोःस्थामाऽपि दर्शय । युध्यस्व बाहुयुद्धेन मयैव सह मानद ! ॥२०॥
एवमस्त्विति तेनो[12]क्ते कुमारपरिवारितौ । अस्त्रागारं जग्मतुस्तौ भ्रातरौ वीरकुञ्जरौ ॥२१॥
¶प्रकृत्या सदयो **नेमि**र्दध्याविति ममोरसा[13] । दोष्णा पादेन वाऽऽक्रान्तः कथं **कृष्णो** भविष्यति ? ॥२२॥
यथाऽसौ याति नाऽनर्थं मद्भुजस्थाम वेत्ति च । तथा कार्यमिति ध्यात्वा **जनार्दन**मभाषत ॥२३॥
प्राकृतानामिदं युद्धं मुहुर्भूलुठनाकुलम् । मिथो दोर्नामनेनैव तद्भूयाद्युद्धमावयोः ॥२४॥
तत्प्रपद्य वचो **विष्णुः** शाखि[14]शाखामिवाऽऽयताम् । दध्रे भुजां तां च **नेमि**र्नालना[15]मेमनामयत् ॥२५॥
तथैव **नेमिनाथो**ऽपि दध्रे वामभुजं निजम् । तत्र सर्वौजसा **विष्णु**र्ललम्बे द्रौ[16] कपिर्यथा ॥२६॥
दोःस्तम्भो **विष्णुना नेमे**र्नाऽनाम्यत मनागपि । व[17]नस्तम्बेरमेणेव दन्तभूमिर्महागिरेः ॥२७॥
मुक्त्वा **नेमि**भुजस्तम्भं नि[18]ह्नुवानो विल[19]क्षिताम् । **नेमिनाथं** समालिङ्ग्नित्यवोचत **शाङ्र्गभृत्** ॥२८॥
यथा ममौजसा **रामो** मन्यते तृणवज्जगत् । तथा मन्ये तृणायाऽहं विश्वं भ्रातस्तवौजसा ॥२९॥
इत्युक्त्वा व्यसृजन्नेमिं **विष्णु**रूचे च [20]**सीरिणम्** । दृष्टं भ्रातस्त्वया भ्रातुर्वीर्यं त्रिभुवनोत्तरम् ॥३०॥
यथाऽर्धचक्री दो[21]ष्ण्यस्याऽभवं पक्षीव पादपे । मन्ये तथौजसाऽमुष्य चक्री वज्री च नो समः ॥३१॥

---

१. ०**शालामशङ्कितः** मु० । २. **तच्चक्रमतिभास्वच्च** ला०की० ॥ ३. सूर्यबिम्बवत् । ४. शेषनागवपुर्वद् भयङ्करान् । ५. जन्यं युद्धं तदेव नाट्यं तस्य नान्द्यां तूर्यं वाजित्रसमानम् । ६. **प्राकारशैल०** खं० २, ला० विना । ७. ०**च्छार्ङ्गिर्दशार्हा** मु० र० । ८. इन्द्रः । ९. कृतः अवहित्थः आकारगोपनं येन सः । १०. ०**ऽनर्घे** खं०१-२, सू० । ११. **क्षोभिता०** मु० र० । १२. **नेम्युक्ते** खं०१, ला० सू० । १३. वक्षःस्थलेन । १४. वृक्षशाखां इव दीर्घाम् । १५. नालं इव नमयित्वा इति नालनामम् । १६. वृक्षे । १७. वनगजेन । १८. गोपायन् । १९. **विलक्ष्यताम्** खं० २ । २०. **शीरिणम्** की०पु०ला०२, ला० । २१. **दोष्णास्या०** खं० १-२, ला० सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ईदृशेनौजसाऽसौ किं समग्रमपि **भारतम्** । न साधयति? किं तिष्ठत्येवमेवाऽनुजः स नौ ? ॥३२॥
ऊचे **रामो** यथा स्थाम्ना ज्ञायते चक्रितोऽधिकः । तथैव शान्तया मूर्त्या लक्ष्यते राज्यनिःस्पृहः ॥३३॥
¶इति **रामोक्ते**ऽपि **हरिं** साशङ्कमनुजौजसा । प्रेक्ष्योचे देवता मा स्म **तार्म्यः**[1] शृणु जिनोदितम् ॥३४॥
"पुरा **नमि**जिनेनोक्तं **नेमि**रर्हन् भविष्यति । कुमार एव सन्नेष नाऽर्थो राज्यश्रियाऽस्य तत् ॥३५॥
प्रतीक्षमाणः[2] समयं जन्मतो ब्रह्मचार्ययम् । आदास्यते परिव्रज्यां माऽन्यथा **कृष्ण** ! चिन्तय[3]" ॥३६॥
¶इति देवतयाऽप्युक्तः प्रीतो **रामं** विसृष्टवान् । जगामाऽन्तःपुरं **कृष्णो नेमिं** चाऽजूहवत् तदा ॥३७॥
रत्नस्नानासनासीनौ[4] तत्रोभौ **शार्ङ्गि-नेमिनौ** । वारस्त्रीलोठ्यमानाम्भःकुम्भा सपदि सस्नतुः ॥३८॥
उन्मृष्टाङ्गौ देवदूष्यैर्विलिप्तौ दिव्यचन्दनैः । तत्रैव विदधाते च भोजनं **हरि-नेमिनौ** ॥३९॥
अथोचे सौविदान् **कृष्णो** भ्राता **नेमि**रसौ मम । स्वस्मादप्यधिकस्तेन न स्खल्योऽन्तःपुरे क्वचित् ॥४०॥
समस्तानामपि भ्रातुर्जायानां मध्यवर्त्यसौ । रमतां **नेमिकुमारो** न दोषो वोऽस्ति कश्चन ॥४१॥
पत्नीश्चोवाच **भामाद्याः** प्राणभूतो मम ह्ययम् । **नेमि**र्वो देवरो मान्यः क्रीडनीयोऽपशङ्कितम् ॥४२॥
इत्युक्ते **शार्ङ्गिणा** तत्राऽन्तःपुरे ताभिरर्चितः । निर्विकारो विजहार **नेमि**र्भोगपराङ्मुखः ॥४३॥
आत्मनो निर्विशेषेण सहैवाऽ**रिष्टनेमि**ना । **हरिः** सान्तःपुरः प्रीतो रेमे क्रीडाचलादिषु ॥४४॥
¶**कृष्णो**ऽन्यदा वसन्तर्तौ पौरैः सर्वैश्च [6]**वृष्णि**भिः । सान्तःपुरो **रैवतको**द्याने **नेमि**युतो ययौ ॥४५॥
चिक्रीडुर्विविधं तत्र कुमारा नागरा अपि । उद्याने **नन्दन** इव सुराऽसुरकुमारकाः[7] ॥४६॥
बकुलस्य तले केऽपि बकुलामोदशालिनीम् । मदिरां स्मरजीवातुं पपुरापान[8]भूमिषु ॥४७॥
कोऽप्युपावीणयन् कोऽपि [9]वसन्तेनोच्चकैर्जगुः । ननृतुः केऽपि च क्षीवाः[10] सस्त्रियः किन्नरा इव ॥४८॥
चम्पकाऽशोकबकुलादिषु केऽप्यवचिच्यिरे । पुष्पाणि सप्रियाः पुष्पाहरविद्याधरा इव ॥४९॥
स्वयं ग्रथित्वा कुसुमाभरणानि मृगीदृशाम् । अङ्गेषु निदधुः केऽपि विदग्धा मालिकों[11] इव ॥५०॥
नव्यपल्लवतल्पेषु लतावेश्मसु केऽपि च । कान्दर्पिका इव सुरा रेमिरे रमणीजनैः ॥५१॥
केऽपि गाढरतश्रान्ता लुलन्तः [12]सारणीतटे । भोगिनो[13] भोगिन[14] इव पपुर्मलय[15]मारुतम् ॥५२॥
[16]केचित् [17]कङ्केल्लिशाखावलम्बिदोलासु साङ्गनाः । [18]अन्दोलनेन चिक्रीडू रतिस्मरविडम्बिनः ॥५३॥
प्रियायाः पादघातेन केचित् [19]कङ्केल्लिपादपान् । मद्यगण्डूषदानेन केचिच्च बकुलद्रुमान् ॥५४॥
सरागदृष्टिदानेन [20]केचित् तिलकशाखिनः । गाढालिङ्गनदानेनाऽपरे कुरुबकद्रुमान् ॥५५॥
अप्यन्यैर्दोहदैर्वृक्षानपरानपि कामिनः । विशेषपुष्पितीचक्रुः स्थिताः पुष्पेषुशासने[21] ॥५६॥ त्रिभिर्विशेषकम् ॥
¶**कृष्णो**ऽपि **नेमिना** सार्धं **भामादि**स्त्रीभिरावृतः । क्रीडन्नितस्ततोऽभ्राम्यद् वने वन्य इव द्विपः ॥५७॥
पश्यन्नेमिं **हरि**र्दध्यौ **नेमे**र्भोगेषु चेन्मनः । भवेत् तदा कृतार्था **श्रीः** सौभ्रात्रं[22] च तदैव मे [23]॥५८॥
आलम्बनोद्दीपनैस्तद्विभावै[24]रसकृन्मया । एषोऽनुकूल्यः पूर्येत यद्येवं **मे मनोरथः** ॥५९॥
एवं विचिन्त्य **गोविन्दो** ग्रथित्वा च स्वयं स्रजम् । **नेमेः** कण्ठे निचिक्षेप मुक्ताहारमिवाऽपरम् ॥६०॥
विदग्धा **सत्यभामा**द्या अपि भावविदो **हरेः** । कुसुमाभरणैश्चित्रैः श्री**नेमि**मुपतस्थिरे ॥६१॥
पीनोन्नतकुचाग्राभ्यां स्पृशन्ती काऽपि पृष्ठतः । **नेमे**र्बबन्ध धम्मिल्लं बन्धुरैः पुष्पदामभिः ॥६२॥
उदस्तदोर्लता [25]प्रादुर्दोर्मूला काऽपि **नेमिनः** । [26]शिरस्युत्तंसमग्रस्था विदधे **हरि**वल्लभा ॥६३॥
विधृत्य पाणिना कर्णे काऽपि कर्णावतंसकम् । **नेमिनो** रचयामास स्मरस्येव जयध्व[27]जम् ॥६४॥

---

१. **ताम्य** खं०२, ला० । २. **प्रतीक्ष्यमाणः** खं० २, । ३. **चिन्तया** खं० १ । ४. **रत्नस्थाना०** खं० २ । **रत्नसिंहा०** मु० । ५. पत्नीनाम् । ६. यदुभिः । ७. ४५-४६श्लोकौ खं० २, प्रतौ न । ८. मद्यपानस्थानेषु । ९. वसन्तेन रागविशेषेण । १०. मत्ताः । ११. मालाकारिकाः भाषायां मालण इति । १२. नीककण्ठे । १३. विलासिनः । १४. सर्पाः । १५. मलयाचलपवनम् । १६. **केऽपि** मु० । १७. **कंकिल्लि०** मु० । **किंकिल्लि०** ला० । १८. **आन्दो०** मु० । १९. **किंकिल्लि०** ला० **कंकिल्लि०** मु० । २०. **किंचित्** मु० । २१. कामदेवशासने । २२. सुभ्रातृत्वं । २३. ५८ श्लोकः खं० २, प्रतौ न । २४. 'रत्याद्युद्बोधको लोके विभावः काव्यनाट्ययोः । आलम्बनोद्दीपनाख्यौ तस्य भेदाविमौ स्मृतौ' (साहित्यदर्पणे) । २५. **बाहुदों०** खं० २, प्रादुर्भूतं दोर्मूलं यस्याः सा । २६. शिरोभूषणम् । २७. **ध्वजाम्** ला० र० मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाहौ[1] पुष्पाङ्गदं काऽपि भूयो भूयो नवं नवम्। बबन्ध **नेमिनः** क्रीडाकालक्षेपविधित्सया ॥६५॥
एवं ता विदधुर्**नेमे**रुपचारमृतूचितम्। तासु श्री**नेमिनाथो**ऽपि निर्विकारमुपाचरत् ॥६६॥
एवं विचित्रक्रीडाभिरहोरात्रं **जनार्दनः**। स्थित्वा पुन**र्द्वारिकायां** जगाम सपरिच्छदः ॥६७॥
**समुद्रविजयो**ऽप्युत्को[2] **नेमि**पाणिग्रहोत्सवे। तस्थौ **दशार्हा** अन्येऽपि **शार्ङ्गपाणिश्च** सर्वदा ॥६८॥
¶वसन्तर्तुरतीयाय स**नेमेः** क्रीडतो **हरेः**। [3]घर्मर्तुश्चाययौ प्रौढीकुर्वन्नर्कमिव स्मरम् ॥६९॥
बालातपोऽप्यसह्योऽभूत् प्रताप इव **शार्ङ्गिणः**। निशायामपि नाऽशाम्यद्[4] घर्मः[5] कर्मेव देहिनाम् ॥७०॥
वाससी श्वेतमसृणे रम्भान्तस्त्वक्सनाभिनी[6]। [7]मृगनाभीधूपिते च युवानस्तत्र पर्यधुः ॥७१॥
तालवृन्तं कराद् दन्तिकर्णतालचलाचलम्। नेषदप्यमुचन्नार्यो मन्मथस्येव शासनम् ॥७२॥
विचित्रकौसुमरसद्विगुणीकृतसौरभैः। भूयो भूयोऽभ्यषिञ्चन् स्वं युवानश्चन्दनाम्बुभिः ॥७३॥
नारीभिर्नलिनीनालान्याहितान्यभितो हृदि। मुक्ताहारेभ्योऽप्यधिकं सौभाग्यमुपलेभिरे ॥७४॥
निपीडयन्तो बाहुभ्यां गाढगाढं मुहुर्मुहुः। युवानो नोरसोऽमुञ्चन् जलार्द्रां[8] वल्लभामिव ॥७५॥
एवं ग्रीष्मे घर्मभीष्मे **कृष्णः** सान्तपुरोऽपि हि। ययौ **रैवतको**द्यानसरसीं **नेमिना** सह ॥७६॥
तदन्तर्मज्जनक्रीडां कर्तुं **विष्णुः** स**नेम्यथ**। सान्तःपुरः प्रविवेश हंसवन्मानसाम्भसि ॥७७॥
तत्राऽऽकण्ठं निमग्नानां वदनै**र्विष्णु**योषिताम्। नवोद्भिन्नाब्जिनीखण्डभ्रान्तिः सद्योऽप्यतन्यत[9] ॥७८॥
आचिक्षेप **हरिः** काञ्चित् स्वयमञ्जलिवारिणा। छेका प्रत्याक्षिपत् साऽपि गण्डूषपयसैव तम् ॥७९॥
काभिश्च विलगन्तीभिर्भीरुभिर्[10]जलभीरुभिः। दधौ सशालभञ्जीकस्तम्भशोभां[11] **जनार्दनः** ॥८०॥
असकृद्वीचय इवोल्ललन्त्यो हरिणीदृशः। रभसादास्फलन्ति स्म **शार्ङ्गपाणे**रुरस्तटे ॥८१॥
जलाघातेन ताम्रत्वं दधुर्मृगदृशां दृशः। स्वभूषणाञ्जनापोहजातयेव रुषाऽधिकम् ॥८२॥
विपक्षनामग्रहणेना[12]ऽऽहूता काऽपि **शार्ङ्गिणा**। ताडयामास पद्मेन [13]सार्वलेनेव दन्तिनम् ॥८३॥
हरिर्मन्यां[14] वीक्षमाणं[15] काचिदभ्येत्य चक्षुषोः। सरोरुहरजोमिश्रैर्जघानाऽम्भोभिरुद्धतैः ॥८४॥
**शार्ङ्गिणं** परितो भ्रेमुर्भूयो भूयो मृगीदृशः। स्मारयन्त्यो गोपभावलीलाहल्लीसक[16]श्रियम् ॥८५॥
निर्विकारो **नेमि**रपि तत्र भ्रातृपरोधतः। भ्रातुर्जायाभिरक्रीडद्वेष्ट्यमानः सनर्मभिः ॥८६॥
क्व यासि देवरेदानीमित्युक्त्वा हरियोषितः। **नेमिं** युगपदाजघ्नुश्चपेटाताडितैर्जलैः ॥८७॥
पाणिभिः **कृष्ण**पत्नीनां जलाच्छोटनपातिभिः। उत्पल्लवस्तरुरिवाऽ**रिष्टनेमि**रराजत ॥८८॥
स्त्रीस्पर्शज्ञापनायाऽम्भःक्रीडाव्याजेन **नेमिनः**[17]। ताः कण्ठे शिश्लिषुर्वक्षस्याजघ्नुर्दोष्णि चाऽप्यधुः ॥८९॥
सहस्रपत्रं श्री**नेमे**रातपत्रमिवोपरि। शुद्धान्त[18]च्छत्रधारीव क्रीडया काऽप्यधारयत् ॥९०॥
काचिच्च नलिनीनालं **नेमिनः** कण्ठकन्दले। चिक्षेप नर्मणा स्तम्बेरमस्याऽलानदामवत् ॥९१॥
यत् किञ्चनाऽप्यपदेश्य शतपत्रेण **नेमिनम्**। काऽप्याजघान हृदये स्मरास्त्रैरप्यनाहते ॥९२॥
अविकारः पुन**र्नेमिकुमारो**ऽपि प्रजावतीः[19]। क्रीडयामास ताः सर्वाः कृतप्रतिकृतैश्चिरम् ॥९३॥
क्रीडन्तं भ्रातरं पश्यंस्तथाऽह्यप्यज्**जनार्दनः**। [20]तत्राऽम्भसि चिरं तस्थौ नदीचर[21] इव द्विपः ॥९४॥
¶समापिताम्भःक्रीडोऽथ सरसो निर्ययौ **हरिः**। **भामा-रुक्मिण्या**दयोऽपि गत्वा तीरेऽवतस्थिरे ॥९५॥
सरसो निरगा**न्नेमि**कुमारोऽपि मरालवत्। शिश्रिये तीरदेशं च **रुक्मिण्या**दिभिराश्रितम् ॥९६॥

१. **बाह्वोः** मु०। २. उत्सुकः। ३. ग्रीष्मर्तुः। ४. **नाशम्यद्** खं० १। ५. स्वेद, निदाघः भाषायां गरमी-घाम इति ख्यातम्। ६. **सनाथिनी** खं० २, सदृशी। ७. कस्तूरीधूपिते। ८. क्लिन्नवस्त्रम्, जलार्द्रा क्लिन्नवाससि (अभिचि० कां०२ श्लो० ६७९)। ९. **प्यजायत** मु०। **०प्यजन्यत** खं० २। १०. कान्ताभिः। ११. सपुत्तलीकस्तम्भशोभाम्। १२. सपत्नीनामग्रहणेन। १३. **सर्वले** खं० १-२, मु०। तोमरः, "सर्वला तोमरे"। अभि०चिं० कां० ३ श्लो. ७८७, भाषायां रवैया आकारनुं शस्त्र। १४. **चिरमन्याम्** ता० सं० विना। १५. **वीक्ष्यमाणां** मु०। १६. रास। मण्डलेन तु यन्नृत्तं स्त्रीणां हल्लीसकं हि तत् (अभिचि. का. २. श्लो. २८१)। १७. **नेमिनम्** ला० को० पु०। १८. अन्तःपुरस्य छत्रधारीव। १९. **प्रजावतः** खं० १। भ्रातृजायाः। २०. **यथाम्भसि** खं० २। २१. **नन्दीवर०** मु०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्थाय **रुक्मिणी** तत्र स्वयं रत्नासनं ददौ । ममार्ज चाऽङ्गं श्रीनेमेर्निजेनोत्तरवाससा ॥९७॥
नर्मप्रश्रयपूर्वं च **सत्या**ऽभाषिष्ट **नेमिनम्** । सदा नः सहसे तेनाऽभीता त्वां वच्मि देवर ! ॥९८॥
षोडशस्त्रीसहस्राधिभर्तुर्भ्राताऽपि **शार्ङ्गिणः** । [1]अप्येकामपि किं कन्यां न ह्युद्वहसि सुन्दर ! ॥९९॥
त्रैलोक्ये तेऽप्रतिरूपं रूपं लावण्यपावितम् । यौवनं च नवोद्भेदं सत्येवं किमियं स्थितिः ? ॥१००॥
पितरौ भ्रातरश्चैते भ्रातुर्जाया वयं च ते । याचामहे विवाहाय कुरुष्वैषां समीहितम् ॥१०१॥
वण्ठमा[2]त्र इवैकाङ्गो विना पत्नीपरिग्रहम् । कालं कियन्तं नेताऽसि विमृश स्वयमप्यहो ! ॥१०२॥
[3]किमज्ञो नीरसो वाऽसि क्लीबो वाऽसीति शंस नः । स्त्रीभोगेन विनाऽसि त्वं कुमारोऽरण्यपुष्पवत् ॥१०३॥
यथा प्रावर्तयत् तीर्थं प्रथमं **वृषभध्वजः** । तथा स एव वीवाहमङ्गलान्यप्यदर्शयत् ॥१०४॥
समये प्रतिपद्येथा ब्रह्मा[4]ऽपि हि यथारुचि । गार्हस्थ्ये नोचितं ब्रह्म मन्त्रोद्गार इवाऽशुचौ ॥१०५॥
¶अथाऽवदज्**जाम्बवती** त्वद्वंशे **मुनिसुव्रतः** । कृतोद्वाहो जातसूनुर्जज्ञे तीर्थङ्करः प्रभुः ॥१०६॥
ततः परस्तादर्वाक् च श्रूयन्ते जिनशासने । कृतोद्वाहाश्च मुक्ताश्च वेत्सि त्वमपि तन्ननु ॥१०७॥
मुमुक्षुर्नूतनोऽसि त्वं मुक्तानामपि वर्त्म यः । विहाय जन्मतोऽप्येवं यदभूः स्त्रीपराङ्मुखः ॥१०८॥
¶कृतप्रणयकोपोचे **भामा** सखि ! वृथैव किम् । अमुं वदसि साम्ना त्वं? सामसाध्यो न खल्वयम् ॥१०९॥
उक्तः सानुनयं पित्रा भ्रात्रा च ज्यायसाऽप्ययम् । अपरैश्च विवाहार्थे मेने न खलु तानपि ॥११०॥
अस्माभिरेष सम्भूय तत्सर्वाभिर्निरुध्यताम् । न मंस्यतेऽस्मद्वचश्चेन्मोक्तव्यस्तत्र सर्वथा ॥१११॥
¶अथोचिरे **लक्ष्मणा**द्या आराध्यो देवरो ह्यसौ । सकोपमे[5]वं नो वाच्यमुपायोऽस्य प्रसादनम् ॥११२॥
इत्युक्ते पादयोर्**नेमे** **रुक्मिण्याद्या हरे**स्त्रियः । निपेतुः प्रार्थयमाना विवाहाय कृताग्रहाः ॥११३॥
तथाऽर्थ्यमानं ताभिश्च प्रेक्ष्य **कृष्णो**ऽपि **नेमिनम्** । उपेत्य प्रार्थनाञ्चक्रे [6]पाणिग्रहणकर्मणे ॥११४॥
अन्येऽपि **यदवो नेमि**मूचुर्भ्रातुर्वचः कुरु । **शिवा-समुद्रविजयौ** मोदयाऽन्यानपि स्वकान् ॥११५॥
¶एवं तैः साग्रहैर्**नेमि**रुपरुद्धो व्यचिन्तयत् । अहो ! [7]अज्ञत्वमेतेषां धिग् दाक्षिण्यं ममाऽप्यदः ॥११६॥
न केवलं स्वयममी पतन्ति भवसागरे । आबद्धस्नेहशिलया पातयन्ति परानपि ॥११७॥
वाङ्मात्रेणाऽ[8]नुमन्तव्यममीषामधुना वचः । [9]आत्मनीनं विधातव्यमवश्यं समये मया ॥११८॥
**ऋषभ**स्तीर्थकृद्यच्च विवाहं विदधे पुरा । तत् तथा भोग्यकर्मत्वाद् विभिन्ना कर्मणां गतिः ॥११९॥
एवं विमृश्य **श्रीनेमि**स्तद्वचः प्रत्यपद्यत । तच्छ्रुत्वा जहृषुः सर्वे **समुद्रविजया**दयः ॥१२०॥
तत्राऽतिवाह्य ग्रीष्मर्तुं **गोविन्दः** सपरिच्छदः । जगाम **द्वारिकां नेमि**योग्यकन्येक्षणोत्सुकः ॥१२१॥
तमूचे **सत्यभामा**ऽथ भगिनी मे कनीयसी । अस्ति **राजीमती** नाम्नाऽनुरूपाऽ**रिष्टनेमिनः** ॥१२२॥
**कृष्णो**ऽप्युवाच तामेवं **सत्ये** ! सत्यं हिताऽसि मे । **नेमिनाथा**नुरूपस्त्रीचिन्ताब्धेरुद्धृतोऽस्मि यत् ॥१२३॥
¶अथोत्थाय स्वयं **कृष्ण उग्रसेन**गृहं ययौ । **यदुभिः** [10]पुंरलोकैश्च वीक्ष्यमाणः ससम्भ्रमैः ॥१२४॥
**उग्रसेनो**ऽप्यर्घपा[11]द्यादिना सत्कृत्य **शार्ङ्गिणम्** । सिंहासने चोपवेश्य पप्रच्छाऽऽगमकारणम् ॥१२५॥
**कृष्णो**ऽप्युवाच ते कन्या राजन् ! **राजीमती**ति या । गुणैर्मदधिकस्याऽर्हा **नेमे**र्मदनुजस्य सा ॥१२६॥
**भोजो**[12]ऽपि निजगादैवं भाग्यैर्नः फलितं प्रभो ! । **हरि**र्यद्गृहमायाति कृतार्थांश्च करोति नः ॥१२७॥
एतद्गृहमियं लक्ष्मीरेते वयमियं सुता । सर्वं चाऽन्यत् तवाऽऽयत्तं स्वायत्ते प्रार्थनाऽपि का? ॥१२८॥
इत्युक्तो[13] मुदितः **कृष्णः समुद्रविजयाय** तत् । गत्वाऽऽचख्याववादीच्च **समुद्रविजयो**ऽप्यदः ॥१२९॥
भक्तिः पितृषु ते वत्स ! वात्सल्यं भ्रातृषूच्चकैः । भोगाभिमुख्यं यन्नेमेरकार्षीर्नः प्रमोदकृत् ॥१३०॥
इयत्कालं मनस्येव लीनो नोऽभून्मनोरथः । **अरिष्टनेमि**र्यत्कन्याविवाहमनुमंस्यते ॥१३१॥

१. **अद्यैका०** खं० १ । २. **वंडमात्र०** मु० । वांढो-वंठेलो इति भाषायाम् । ३. **किं मन्ये** खं० १, सू० । ४. ब्रह्मचर्य-संयमः । ५. **सकोपमिव** मु० । ६. **पाणिग्रहणकर्मणि** पा० मु०, **०कर्मणा** खं० १-२ । ७. **अन्यत्व०** खं० १, सू० । ८. **०णानुगन्तव्यम०** ला० । ९. आत्महितम् । १०. **पौर०** खं०१-२, ला० सू० । ११. **र्ध्यदानादिना** खं० २ । १२. उग्रसेनः । १३. **इत्युक्त्या** मु०र०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶अथ **क्रोष्टुकि**माहूय **समुद्रविजयो** नृपः । पप्रच्छ दिवसं **नेमि-राजीमत्यो**र्विवाहने ॥१३२॥
उवाच **क्रोष्टुकि**श्चैवं शुभारम्भास्तपात्यये । न खल्वन्येऽपि युज्यन्ते विवाहस्य तु का कथा? ॥१३३॥
**समुद्र**स्तं बभाषेऽथ कालक्षेपोऽत्र नाऽर्हति । **नेमिः** कथञ्चित् **कृष्णे**न विवाहाय प्रवर्तितः ॥१३४॥
मा भूद् विवाहप्रत्यूहो नेदीयस्तद्दिनं वद । गान्धर्व इव वीवाहो भूयाद् भवदनुज्ञया ॥१३५॥
विमृश्य **क्रोष्टुकि**श्चाऽऽख्यद् यद्येवं तद्यदूद्वह ! । श्रावणस्य श्वेतषष्ठ्यां कार्यमेतत् प्रयोजनम् ॥१३६॥
सत्कृत्य **क्रोष्टुकिं** राजा व्यसाक्षीत् तं च वासरम् । **भोजा**याऽऽख्यापयामास ततो द्वावप्यसज्जताम् ॥१३७॥
¶**कृष्णो**ऽपि **द्वारकापुर्यां** प्रत्यट्टं प्रतिगोपुरम् । प्रतिगेहं रत्नमञ्चतोरणादीनकारयत् ॥१३८॥
विवाहासन्नदिवसे **दशार्हाः सीरि-शार्ङ्गिणौ** । श्री**शिवा-रोहिणी-देवक्या**दयश्चाऽपि मातरः ॥१३९॥
**रेवत्याद्या बल**पत्न्यो **भामाद्याश्च हरि**प्रियाः । धात्र्यो महत्तराश्चाऽन्यास्तारमारब्धगीतयः ॥१४०॥
प्राङ्मुखं स्थापयामासु**र्नेमिनाथं** महासने । स्नापयामासतुः प्रीत्या स्वयं च **बल-शार्ङ्गिणौ** ॥१४१॥
[2]बद्धप्रतिसरं **नेमिं** करे नाराचधारिणम् । कृत्वा जगाम **गोविन्द उग्रसेन**निकेतने ॥१४२॥
तत्र **राजीमतीं** बालामबाले[3]न्दुसमाननाम् । **कृष्णो**ऽधिवासयामास तेनैव विधिना स्वयम् ॥१४३॥
पुनर्ययौ निजगृहं व्यतिक्रम्य च शर्वरीम् । **नेमिं** संवाह[4]यामास गन्तुं वैवाहिकौकसि ॥१४४॥
¶अथ श्वेतातपत्रेण विभान् श्वेतैश्च चामरैः । सदशश्वेतसंव्या[5]नो मुक्ताभरणभूषितः ॥१४५॥
[6]क्लृप्ताङ्गरागो गोशीर्षचन्दनेनाऽतिहारिणा । आरुरोहाऽ**रिष्टनेमिः** स्यन्दनं श्वेतवाजिनम् ॥१४६॥
पुरो **नेमिकुमार**स्य कुमाराः कोटिशोऽचलन् । तुरङ्गहेषानिर्घोषैर्बधिरीकृतदिङ्मुखाः ॥१४७॥
पार्श्वतो भूभुजोऽभूवन्निभारूढाः सहस्रशः । पृष्ठे **दशार्हा गोविन्दो मुशली** चाऽवतस्थिरे ॥१४८॥
महार्घ्यशिबिकारूढाः सर्वाश्चाऽन्तःपुरस्त्रियः । चेलुर्मङ्गलगा[7]यन्योऽपरा अपि वरस्त्रियः ॥१४९॥
एवं महर्द्ध्या श्री**नेमिः** प्रतस्थे राजवर्त्मना । पठद्भिर्मङ्गलान्युच्चैः पुरो मङ्गलपाठकैः ॥१५०॥
मार्गे गृहा-ट्ट-[9]वलभीस्थितानां पौरयोषिताम् । दृशो निपेतुः प्रेमार्द्रा **नेमौ** मङ्गललाजवत्[10] ॥१५१॥
पौरैर्मिथो दर्श्यमानो वर्ण्यमानश्च सम्मदात् । उपो**ग्रसेन**सदनमाससाद **शिवासुतः** ॥१५२॥
¶**नेम्या**गमतुमुलेन स्तनितेनेव केकिनी । गाढोत्कण्ठाऽभवद् **राजीमती** राजीवलोचना ॥१५३॥
सख्यस्तामूचिरे भावविदो धन्याऽसि सुन्दरि ! । त्रैलोक्यसुन्दरो यस्या **नेमिः** पाणिं ग्रहीष्यति ॥१५४॥
**नेम्या**[11]र्गन्ता यद्यपीह तथाऽप्यत्युत्सुका वयम् । तमायान्तं गवाक्षस्थाः पश्यामः कमलेक्षणे ! ॥१५५॥
मनोगतार्थाभिधानान्मुदिता साऽपि सम्भ्रमात् । **राजीम**त्यभिगवाक्षं प्रचचाल सखीवृता ॥१५६॥
धम्मिल्लं मालतीगर्भं बिभ्रती सेन्दुमेघवत् । पराभवन्ती नेत्राभ्यां श्रवणोत्तंसपङ्कजे ॥१५७॥
समुक्ताकुण्डलाभ्यां च कर्णाभ्यां जितशुक्तिका । सया[12]वकाधरदला पक्व[13]बिम्बेव [14]बिम्बिका ॥१५८॥
[15]सनिष्कं बिभ्रती कण्ठं[16] हेममेखल[17]कम्बुवत् । हाराङ्कितौ च वक्षोजौ [18]चक्रावात्तबिसाविव ॥१५९॥
[19]राजन्ती [20]पाणिपद्मेनाऽब्जखण्डेनेव निम्नगा । मुष्टिसङ्ग्राह्यमध्या[21] च मान्मथीव धनुर्लता ॥१६०॥
सौवर्णफलकेनेव नितम्बेन मनोरमा । रम्भोरुरैणिकाजङ्घा रत्नतुल्यनखावलिः ॥१६१॥
सदशश्वेतवसना सगोशीर्षविलेपना । विमानगर्भे देवीव गवाक्षे निषसाद सा ॥१६२॥ पञ्चभिः[षड्भिः] कुलकम् ॥
¶तत्र स्थिता च साऽपश्यद् दूरादपि हि **नेमिनम्** । प्रत्यक्षमिव कन्दर्पं हृदि कन्दर्पदी[22]पनम् ॥१६३॥
निध्यायन्ती दृशा **नेमिं** सा दध्याविति चेतसा । दुष्प्रापोऽयं वरोऽस्माकं मनसोऽपि न गोचरः ॥१६४॥

---

१. ग्रीष्मर्तुगमनानन्तरं, वर्षाऋतौ । २. बद्धं करसूत्रं-कङ्कणं यस्य सः तम् । ३. पूर्णेन्दुसमानमुखाम् । ४. सज्जीकृतवान् । ५. संव्यानं उत्तरीयवस्त्रम् । ६. **क्षुप्ताङ्ग०** खं० २, ला० सू० । **कृष्णाङ्ग०** मु० । ७. **०गायिन्यो** मु० र० । ८. **राजवर्त्मनि** ला० मु० । ९. छदिराधारः, छतनो आधार । १०. लाजाः अक्षताः । ११. **नेम्यागतो** खं० २ । १२. यावकः अधरयो रक्तीकरणार्थं उपयुज्यमानः पदार्थः । १३. **बिम्बेन** ता० सं० । १४. रक्तफला 'टींडोळा' । १५. सहारम् । १६. **कण्ठे** मु० । १७. हेम्नो मेखलया युतः शङ्खस्तद्वत् । १८. **चक्रो चात्त०** खं० १, ला० सू० । बिसधारिणौ चक्रवाकपक्षिणौ इव । १९. **राजती** मु०, खं० २ । २०. **पादपद्मे०** खं० १, सू० । २१. मध्यं कटिप्रदेशः । २२. **०दीपिनम्** खं० २, पा० ला० र० मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषोऽपि यदि मे भर्ता त्रैलोक्यस्यैकभूषणम् । सम्पद्यते तदा किं मे न पूर्णं जन्मनः फलम् ? ॥१६५॥
यद्यप्ययमिहाऽऽयातः परिणेतुमनाः स्वयम् । तथाऽपि नाऽहं प्रत्येमि कैः पुण्यैः प्राप्यते ह्यसौ ? ॥१६६॥
एवं तस्याश्चिन्तयन्त्याः पस्पन्दे दक्षिणेक्षणम् । बाहुश्च दक्षिणो जज्ञे सन्तापश्च मनोऽङ्गयोः ॥१६७॥
**राजीमती** तत्सखीनामाचख्यौ गद्गदाक्षरम् । नेत्राभ्यामश्रु वर्षन्ती धारागृहवधूरिव ॥१६८॥
सख्योऽप्यूचुः सखि ! शान्तं पापं हतममङ्गलम् । सकलाः कुलदेव्यस्ते भवन्तु शिवतात[1]यः ॥१६९॥
धीरा भव वरस्तेऽसावागात् पाणिग्रहोत्सुकः । अनिष्टचिन्ता ते केयं वर्तमाने महोत्सवे ? ॥१७०॥
¶शुश्राव **नेमिश्चा**ऽऽगच्छन् प्राणिनां करुणस्वरम् । किमेतदित्यपृच्छच्च संवि[2]दानोऽपि सारथिम् ॥१७१॥
अथाऽऽख्यत् सारथिर्नाथ ! किं न जानास्यमी हि ते । विवाहे भोज्यसात् कर्तुं नाना प्राणिन आहृताः ॥१७२॥
मेषादयो भूमिचरास्तित्तिर्याद्या नभश्चराः । ग्राम्या आटविकाश्चाऽमी स्वामिन् ! यास्यन्ति पञ्चताम् ॥१७३॥
आरक्षै रक्ष्यमाणाश्च सन्त्यमी वाटकान्तरे । आरटन्तः प्राणभयं सर्वेषां हि महद्भयम् ॥१७४॥
ततो **नेमि**र्दयावीरो बभाषे निजसारथिम् । यत्रैते प्राणिनः सन्ति स्यन्दनं नय तत्र मे ॥१७५॥
तथैव सारथिश्चक्रे ददर्श भगवानपि । विविधान् प्राणिनः प्राणापहारचकितात्मनः ॥१७६॥
ग्रीवायां रज्जुभिर्बद्धाः केऽपि केऽपि च पादयोः । केऽपि क्षिप्ताः पञ्जरान्तः केऽपि पाशेषु पातिताः ॥१७७॥
उन्मुखा दीननयना वेपमानशरीरकाः । ते प्रेक्षाञ्चक्रिरे **नेमिं** प्री[3]णकं दर्शनादपि ॥१७८॥
पाहि पाहीति ते **नेमिं** स्वस्वभाषाभिरब्रुवन् । तांश्च[4] सारथिमा[5]ज्ञाप्य **नेमिनाथो**ऽप्यमो[6]चयत् ॥१७९॥
स्वं स्वं स्थानं ततस्तेषु गतेषु प्राणिषु प्रभुः । रथं निवर्तयामास पुनर्निजगृहं प्रति ॥१८०॥
¶**शिवा समुद्रविजयः कृष्णो रामो**ऽपरेऽपि हि । विहाय स्वस्वयानानि **नेमिनः** पुरतोऽभवन् ॥[7]१८१॥
**शिवा-समुद्रविजया**[8]वूचाते साश्रुलोचनौ । कस्मादकस्मादप्यस्माद् विनिवृत्तस्त्वमुत्सवात् ॥१८२॥
**नेमिरप्यब्रवीदेते** प्राणिनो बन्धनैर्यथा । बद्धास्तथा वयमपि तिष्ठामः कर्मबन्धनैः ॥१८३॥
यथैषां बन्धनान्मोक्षः [9]कृतस्तद्वत्तमात्मनः । कर्तुं [10]दीक्षामुपादास्ये सौख्याद्वैतनिबन्धनम् ॥१८४॥
**तन्नेमि**वचनं श्रुत्वा तौ द्वावपि मुमूर्च्छतुः । रुरुदुर्**यदवः** सर्वेऽप्य[11]नुद्धानविलोचनाः ॥१८५॥
**शिवा-समुद्रविजयौ** समाश्वास्य **जनार्दनः** । रुदितं च प्रतिषिध्य बभाषे**ऽरिष्टनेमिनम्** ॥१८६॥
मम **रामस्य** तातानां सदा मान्योऽसि मानद ! । रूपं निरुपमं चेदं यौवनं च नवं तव ॥१८७॥
किं च साऽपि स्नुषा **राजीमती** राजीवलोचना । तवाऽनुरूपा तद् ब्रूहि किं ते वैराग्यकारणम् ? ॥१८८॥
[12]ये चैते पशवो दृष्टा[13]स्त्वया तेऽपि हि मोचिताः । पितॄणां बान्धवानां च तत्पूरय मनोरथम् ॥१८९॥
पितरौ शोकनिर्मग्नौ न ह्युपेक्षितुमर्हसि । तत्राऽपि हि कुरु भ्रातः ! सर्वसाधारणीं कृपाम् ॥१९०॥
प्रीणिताः प्राणिनो दीना यथैते भवता तथा । भ्रातॄन् प्रीणय **रामा**दीनपि स्वोद्वाहदर्शनात् ॥१९१॥
¶अथोचे भगवान्**नेमिः** पित्रोः शोकस्य कारणम् । न किञ्चिदपि पश्यामि भवतां चाऽपि बान्धवं[14] ! ॥१९२॥
वैराग्यकारणं मे तु चतुर्गतिरयं भवः । दुःखान्येवाऽनुभूयन्ते यत्रोत्पन्नैः शरीरिभिः ॥१९३॥
भवे भवे च पितरौ भ्रातरोऽन्येऽपि चाऽभवन् । न कोऽपि कर्मदाया[15]दः स्वयं स्वं कर्म भुज्यते ॥१९४॥
छिद्यते दुःखमन्यस्य य[16]द्यन्येन **हरे** ! तदा । पित्रोरर्थे प्रदीयेरन् प्राणा अपि विवेकिना ॥१९५॥
परं जन्तुर्जरा-मृत्युप्रायदुःखानि सत्स्वपि । पुत्रादिषु स्वयं भुङ्क्ते त्राता कोऽपि न कस्यचित् ॥१९६॥
दृष्टेरानन्दमात्रं चेत् पुत्रास्तातस्य सन्ति तत् । विनाऽपि मां **महानेमि**प्रमुखाः सुखहेत[17]वः ॥१९७॥
[18]जरत्पान्थ इवाऽहं तु संसाराध्वगतागतैः । खिन्नोऽस्मि प्रयतिष्ये तच्छेदे तद्धेतुकर्मणाम् ॥१९८॥

१. क्षेमङ्कराः । २. सम्यग्जानन्नपि । ३. **प्रीणन्तं** खं० १ । ४. **तं स्वसारथिं०** खं० २ । ५. **सारथिनाज्ञाप्य** ला० सू० । ६. **०प्यमोचत** खं० २ । ७. १८१ श्लोकः खं० २ न । ८. **०विजयौ ब्रुवाते** खं०१, सू० । ९. **कर्मबन्धात् तथाऽऽत्मनः** मु० । तं मोक्षम् । १०. **दीक्षां ग्रहीष्येऽहं** खं० २ । ११. अनुद्धानानि आर्द्राणि विलोचनानि येषां ते । **०प्यनुद्धतविलो०** मु. । १२. **यच्चैते** ता०सं०छा०पा०ला० । **यथैते** खं० २. । १३. **बद्धा०** खं० २ । १४. **बान्धवाः !** खं० १. सू० । १५. कर्मसु भागग्राही । १६. **यदन्येन** मु० र० । १७. **हेतवे** ला० । १८. वृद्धप्रवासी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कर्मच्छेदः परिव्रज्यां विना न खलु साध्यते। तामेवाऽहं तदादास्ये मा निर्बन्धं वृथा कृथाः ॥१९९॥

¶**समुद्रविजयो**ऽथोचे वत्स! गर्भे[1]श्वरो ह्यसि। सुकुमार[2]शरीरश्च कथं कष्टं सहिष्यसे? ॥२००॥

ग्रीष्मकालातपा घोराः सोढव्याः सन्तु दूरतः। विनाऽऽतपत्रमन्यर्तुतापा अपि सुदुःसहाः ॥२०१॥

क्षुत्-पिपासादयः सोढुं शक्यन्ते नेतरैरपि। किं पुनर्भवता तात! सुरभोगार्हव[3]र्ष्मणा? ॥२०२॥

¶अथाऽवद**न्नेमिनाथः** किमिदं दुःखमुच्यते। उत्तरोत्तरदुःखौघान्नारकान् जानतां नृणाम्? ॥२०३॥

आसाद्यते तपोदुःखैर्मोक्षोऽनन्तसुखात्मकः। विषयप्रभवैः सौख्यैर्नरकोऽनन्तदुःखदः ॥२०४॥

स्वयं विमृश्य तद् ब्रूत किं कर्तुं युज्यते नृणाम्?। सर्वोऽपि विमृशन् वेत्ति विमृशेद् विरलः पुनः ॥२०५॥

तच्छ्रुत्वा पितरौ **कृष्णो**ऽन्येऽपि **रामा**दयोऽविदन्। प्रव्रज्यानिश्चयं **नेमे** रुरुदुश्चोच्चकैःस्वरम् ॥२०६॥

स्वजनस्नेहनिगडांस्त्रोटय**न्नेमि**कुञ्जरः। सारथिप्रेरितरथो ययावथ निकेतनम् ॥२०७॥

¶ज्ञात्वा च समयं तत्राऽभ्येयु**र्लोकान्तिका**मराः। **नेमिं** नत्वा च ते प्रोचुर्नाथ! तीर्थं प्रवर्तय ॥२०८॥

द्रविणैर्वासवादिष्ट-**जृम्भका**मरपूरितैः। प्रारेभे वार्षिकं दानं प्रदातुं भगवानपि ॥२०९॥

¶[4]व्यावृत्तं **नेमिनं** दृष्ट्वा श्रुत्वा च व्रतकाङ्क्षिणम्। **राजीमत्य**पतत् पृथ्व्यां वल्लीवाऽऽकृष्टपादपा ॥२१०॥

तां सख्यः सिषिचुर्भीताः शीताम्भोभिः सुगन्धिभिः। अवीजयन् व्यजनैश्च कदलीदलनिर्मितैः ॥२११॥

अवाप्तसंज्ञा चोत्थाय कपोललुलितालका। [5]अश्रुधारातिम्यमानकञ्चुका विललाप सा ॥२१२॥

नाऽऽसीन् मनोरथोऽप्येष य**न्नेमिः** स्याद् वरो मम। केनाऽस्यभ्यर्थितो दैव!? य**न्नेमि**र्मे वरः कृतः ॥२१३॥

विपरीतं कुतोऽकार्षीरकाण्डे दण्डपातवत्?। [6]एकस्त्वमसि मायावी त्वं च विश्वासघातकः ॥२१४॥

[7]यद्वेदं प्रागपि ज्ञातं स्वभाग्यप्रत्ययान्मया। क्वाऽयं जगन्नयोत्कृष्टो वरो **नेमि**रहं क्व च? ॥२१५॥

आत्मनोऽननुरूपाऽहं ज्ञाता **नेमे**! त्वया यदि। तत्प्रपद्य विवाहं मे जनितः किं मनोरथः? ॥२१६॥

जनयित्वा च किं भग्नः स्वामिन्! मम मनोरथः?। महतां प्रतिपन्नं हि यावज्जीवमपि स्थिरम् ॥२१७॥

प्रतिपन्नाद् भवन्तोऽपि चलन्ति यदि तत्प्रभो!। मर्यादां लङ्घयिष्यन्ति निश्चितं [8]जलराशयः ॥२१८॥

यद्वा तवाऽपि नो दोषो दोषो मत्कर्मणामयम्। [9]भवत्पाणिगृहीतीत्वं वचसैव यदासदम् ॥२१९॥

चारु [10]मातृगृहं दिव्यमण्डपो रत्नवेदिकाः। विवाहायाऽऽवयोरन्यदप्येतदभवन्मुधा ॥२२०॥

धवलैर्गीयते यत् तत्र सर्वं सत्यमीदृशी। सत्योक्तिस्त्वं हि मे भर्ता गीतो[11]ऽस्यादौ न चाऽभवः ॥२२१॥

किं [12]युग्मिनां विघटनमकार्षं पूर्वजन्मनि?। पाणिस्पर्शसुखमपि यत् पत्युर्नाऽहमा[13]प्नुवम् ॥२२२॥

विलपन्तीति सा जघ्ने हस्ताब्जाभ्यामुरःस्थलम्। हारं च त्रोटयमास स्फोटयामास [14]कङ्कणे ॥२२३॥

सख्यस्तामूचि[15]रेऽथैवं विषादं सखि! मा कृथाः। कस्तेन त[16]व सम्बन्धः कार्यं वा तेन किं तव? ॥२२४॥

निःस्नेहो निःस्पृहो लोकव्यवहारपराङ्मुखः। [17]गृहवासात् सदा भीरुर्वसतेर्वन्यजीववत् ॥२२५॥

निर्दाक्षिण्यो निष्ठुरश्च स्वैरी वैरीव नन्वयम्। यातश्चेद्यातु त**न्नेमिः** साधु ज्ञातोऽधुनैव हि ॥२२६॥

य[18]द्यसौ परिणीय त्वां भवेदेवं हि निर्ममः। कूपे प्रक्षिप्य ते [19]वर्तिकर्तनं स्यात् तदा कृतम् ॥२२७॥

अन्येऽपि **यदु**कुमारा भूयांसः सन्ति सद्गुणाः। **प्रद्युम्न-शाम्ब**प्रमुखास्तेष्वस्तु रुचितो वरः ॥२२८॥

त्वं हि सङ्कल्पमात्रेण दत्ताऽभूः सुभ्रु! **नेमये**। कन्यैवाऽसि तदद्याऽपि मुग्धे! तदपरिग्रहात् ॥२२९॥

¶**राजीमती** सकोपोचे सख्यः! किमिदमुच्यते। अस्मत्कुलकलङ्काय कुलटाकुलसन्निभम्? ॥२३०॥

**नेमि**र्जगत्त्रयोत्कृष्टः कोऽन्यस्तत्सदृशो वरः?। सदृशो वाऽस्तु किं तेन? कन्यादानं सकृत् खलु ॥२३१॥

मया वृतश्च मनसा वचसा च स **वृष्णि[20]सूः**। [21]गुरूपरोधेनाऽप्यस्मि प्रपन्ना तेन गेहिनी ॥२३२॥

१. गर्भश्रीमान्। २. **सुकुमाल०** खं०। ३. शरीरेण। ४. पश्चाद्वलितम्। ५. अश्रुधारया आर्द्रं कञ्चुकं यस्याः सा १। ६. **एष त्वमसि** ला० पा० की०। ७. **यद्येवम्** ला० मु०। ८. समुद्रः। ९. भवतः नेमेः पत्नीत्वम्। १०. मांह्यरुं इति भाषायाम्। ११. **गीतोऽप्यादौ** ला०। १२. युगलानाम्। १३. **माप्नवम्** मु० र०। १४. **कङ्कणम्** खं० २। १५. **०रे सैवं** मु०। १६. **सह** मु० पु०। १७. **गृहे** खं० २। १८. **योऽसौ प्राक्** ला०। १९. रज्जुकर्तनम्। २०. **वृष्णिभूः** खं० १। २१. **गुरूपरोधिना०** मु० र०।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पर्यणैषीन्न मां सोऽद्य चेत् त्रैलोक्यवरो[1] वरः । भोगैरपि कृतं तर्हि प्रकृत्याऽनर्थहेतुभिः ॥२३३॥
न स्पृष्टा पाणिना तेन यद्यप्युद्वाहकर्मणि । पाणिः स्प्रक्ष्यति तस्यैव व्रतदानकृतेऽपि माम् ॥२३४॥
इत्थं कृतप्रतिज्ञा सा प्रतिषिध्य सखीजनम् । कालं निनाय ध्यायन्ती **नेमिमेवोग्रसेनजा** ॥२३५॥
¶इतश्च भगवान्नेमिर्ददौ दानं दिने दिने । रुरुदुश्च **समुद्राद्या** बाला इव सवेदनाः ॥२३६॥
**राजीमत्याः** प्रतिज्ञां तां जनात् ज्ञानत्रयादपि । विदाञ्चकार भगवान्निर्ममोऽस्थात् तथापि हि ॥२३७॥
ददौ च वार्षिकं दानं निर्निदानं, जगद्गुरोः[2] । दीक्षाभिषेकं चक्रुश्च शक्राद्या [3]नाकिनायकाः ॥२३८॥
नाम्नोत्त**रकुरौ** रत्नशिबिकायां **शिवासुतः** । आरुरोहोह्यमानायां सुरैर्नरवरैरपि ॥२३९॥
चामरे तत्र दध्राते **शक्रेशानौ** पुरः प्रभोः । छत्रं **सनत्कुमार**स्तु **माहेन्द्रः** खड्गमुत्तमम् ॥२४०॥
**ब्रह्मेन्द्रो** दर्पणं पूर्णकुम्भं **लान्तक**वासवः । स्वस्तिकं च **महाशुक्रः सहस्रारः** शरासनम्[4] ॥२४१॥
श्रीवत्सं **प्राणताधीशो** नन्द्यावर्तं तथाऽ**च्युतः** । **चमरा**द्यास्तु शेषेन्द्रा बभूवुः शस्त्रधारिणः ॥२४२॥
पितृभिर्मातृभी **राम-कृष्णा**द्यैश्च समावृतः । प्रतस्थे भगवान् राजपथेना[5]ऽथ महामनाः ॥२४३॥
स्वगृहाभ्यर्णमायातो **राजीमत्ये**क्षितः प्रभुः । सद्यो नवीभूतशुचा[6] साऽमूर्च्छच्च मुहुर्मुहुः ॥२४४॥
ततश्च प्रययौ **नेमिरुज्जयन्ताद्रि**भूषणम् । **सहस्राम्रवणं** नामोपवनं नन्दनोपमम् ॥२४५॥
आविष्कृतस्मितमिव प्रोन्मीलन्नवकेतकैः । गलितैर्जम्बुभिर्नीलबद्धोर्वीकमिवाऽभितः ॥२४६॥
कदम्बपुष्पपर्यङ्कशयानोन्मत्तषट्पदम् । उद्धर्हबर्हिणाऽऽरब्धकेकाव्याकुलताण्डवम् ॥२४७॥
स्मरास्त्रागारसदृशस्फुटत्कुटजकाननम् । मालतीयूथिकामोदपर्यस्तपथिकव्रजम् ॥२४८॥
प्रविश्योद्यानमुत्तीर्य शिबिकायाः **शिवात्मजः** । यन्मुमोचाऽऽभरणादि प्रादात्तद्**द्धरये**[7] **हरिः**[8] ॥२४९॥ चतुर्भिः कलापकम् ।
त्रिशत्यां जन्मतोऽब्दानामतीतायां **शिवात्मजः** । श्रावणस्य श्वेतषष्ठ्यां पूर्वाह्णे[9] त्वाष्ट्रगे[10] विधौ ॥२५०॥
कृतषष्ठः कचोत्पाटं विदधे पञ्चमुष्टिकम् । केशान् **शक्रः** प्रतीयेष स्कन्धे दूष्यं न्यधाद् विभोः ॥२५१॥युग्मम् ॥
प्रक्षिप्य केशान् **क्षीराब्धौ शक्रः** पुनरुपेत्य च । [11]न्यषेधत् तुमुलं सामायिकं च प्रभुराददे ॥२५२॥
मनःपर्ययसंज्ञं च जज्ञे ज्ञानं जगद्गुरोः । तदा सुखं समुत्पेदे नारकाणामपि क्षणम् ॥२५३॥
अनु**नेमिकुमारं** च सहस्रं प्राव्रजन्नृपाः । [12]**शक्रकृष्णा**दयो **नेमिं** नत्वा चाऽगुः स्वमाश्रमम् ॥२५४॥
¶अथ[13] गोष्ठे द्वितीयेऽह्नि **वरदत्त**द्विजौकसि । पारणं परमान्नेन चकार परमेश्वरः ॥२५५॥
वृष्टिं 'गन्धाम्बु-पुष्पाणां[2] गम्भीरं दुन्दुभिध्वनिम्[3] । चेलोत्क्षेपं[4] वसुधारां[5] विदधुर्विबुधास्तदा ॥२५६॥
ततो विहर्तुमन्यत्र घातिकर्मक्षयोद्यतः । **नेमिनाथः** प्रववृते निवृत्तः कर्मबन्धनात् ॥२५७॥
¶इतश्च **नेमेरनुजो रथनेमिः** स्मरातुरः । जज्ञे **राजीमतीं** पश्यन्निन्द्रियाणां वशंवदः ॥२५८॥
सोऽपूर्वैर्वस्तुभी **राजीमतीं** नित्यमुपाचरत् । [14]तद्भावाविदुरा साऽपि मुग्धा न निषिषेध तम् ॥२५९॥
भ्रातृस्नेहादुपास्तेऽसौ नित्यं मामित्यमंस्त सा । ममोपचारं रागेण गृह्णात्येषेति सोऽपि हि ॥२६०॥
ययौ च तुच्छधीर्नित्यं **राजीमत्याः** स वेश्मनि । भ्रातुर्जायापदेशेन तस्यां नर्म चकार च ॥२६१॥
रहःस्थितामन्यदा तां **रथनेमि**रदोऽवदत् । मुग्धे ! परिणयामि त्वां यौवनं मा मुधा नय ॥२६२॥
भोगानभिज्ञो मद्बन्धुस्त्यक्तवांस्त्वां मृगाक्षि ! यत् । स एव वञ्चितो भोगसु[15]खानां किं गतं तव? ॥२६३॥
प्रार्थ्यमानोऽपि नाऽभूत् ते स वरो वरवर्णिनि ! । अहं प्रार्थयमानस्त्वामस्ति पश्याऽन्तरं महत् ॥२६४॥
हेतुं पूर्वोपचाराणां तेन भावेन तस्य सा । तदानीमेव चाऽबोधि स्वभावसरलाशया ॥२६५॥
बोधयामास सा तं च धर्मज्ञा[16] धर्मशंसनात् । तस्मादध्यवसायात् तु न व्यरंसीत् स दुर्मतिः ॥२६६॥

---

१. **त्रैलोक्यैकवरो०** मु०र० । २. **जगद्गुरुः** खं० २ विना । ३. देवनायकाः । ४. धनुः शरावकं वा । ५. **राज्य०** खं० २ । ६. पुनरुद्भूतशोकेन । ७. कृष्णाय । ८. इन्द्रः । ९. प्रथमप्रहरे । १०. चित्रानक्षत्रे गते चन्द्रे । ११. **निषेध्य** ला० । १२. **शक्रः कृष्णा०** मु० र० । १३. **अथागात् स द्वि०** खं० १; **अथाभ्यगात् द्वि०** सू०; गोष्ठं गवां स्थानम् । १४. तद्भावमजानती । १५. **सुखेभ्यः** ला० । १६. **वृष्णिसू०** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्येद्युर्दुग्धमाकण्ठं पपौ **राजीमती** सुधीः । [१]तत्राऽऽयाते तु [२]मदनफलं जघ्रौ च वान्तिकृत् ॥२६७॥
ऊचे च **रथनेमिं** सा स्थालमानय काञ्चनम् । सोऽप्यानिनाय सा तत्र पीतदुग्धं ववाम च ॥२६८॥
**रथनेमे** ! पिबेदं त्वमित्युवाचो**ग्रसेनजा** । सोऽभ्यधात् किमहं श्वाऽस्मि [३]वान्तपानाय वक्षि यत् ॥२६९॥
साऽप्यब्रवीदपातव्यमिदं त्वमपि वेत्सि किम्? । सोऽवोचत् केवलो नाऽहं बाला अपि विदन्त्यदः ॥२७०॥
**राजीमती** जगादाऽथ यदि जानासि तर्हि रे ! । **नेमिनाथेन** वान्तां मामुपभोक्तुं किमिच्छसि ? ॥२७१॥
तस्य भ्राताऽपि भूत्वा त्वं कथमेवं चिकीर्षति ? । [४]माऽतः परमिदं वादीर्नरकायुर्निबन्धनम् ॥२७२॥
एवं तयोक्तस्तूष्णीको ह्रीणः क्षीणमनोरथः । **रथनेमि**र्निजं धाम जगाम विमनायितः ॥२७३॥
**राजीमती** च श्री**नेमा**वनुरागपरायणा । संविग्ना गमयन्त्यस्थाद् वासरान् वर्षसन्निभान् ॥२७४॥
¶**नेमिनाथो**ऽपि हि चतुःपञ्चाशद्वासरीं व्रतात् । विहृत्याऽऽगाद् **रैवतके सहस्राम्रवणे** वने ॥२७५॥
वेतसस्य तले तत्र ध्यानान्तरविवर्तिनः । श्री**नेमे**रष्टमस्थस्य घातिकर्माणि तुत्रुटुः ॥२७६॥
आश्विनस्याऽमावास्यायां पूर्वाह्ने त्वाष्ट्रगे विधौ । केवलज्ञानमुत्पेदे स्वामिनोऽ**रिष्टनेमिनः** ॥२७७॥
सद्यः सुरेन्द्राश्चलितासनास्तत्र समाययुः । चक्रुः समवसरणं प्राकारत्रयभूषितम् ॥२७८॥
प्रविश्य पूर्वद्वारेण [५]विंशधन्वशतो[६]न्नतम् । तत्र प्रदक्षिणीचक्रे चैत्यवृक्षं जगद्गुरुः ॥२७९॥
'तीर्थाय नमः' इत्युक्त्वा द्वाविंशः सोऽथ तीर्थकृत् । पूर्वसिंहासने पूर्वाभि[७]मुखं समुपाविशत् ॥२८०॥
श्री**नेमेः** प्रतिरूपाणि दिक्ष्वन्यास्वपि तत्क्षणम् । रत्नसिंहासनस्थानि विचक्रुर्व्यन्तरामराः ॥२८१॥
¶अथ तस्थुर्यथास्थानं देवा देव्यश्चतुर्विधाः । दत्तेक्षणाः स्वामिमुखे चकोरा इव शीतगौ ॥२८२॥
तथा च समवसृतं स्वामिनं शैलपालकाः । गत्वाऽऽचख्युः स्वनाथाय **देवकी**तनु[८]जन्मने ॥२८३॥
[९]रूप्यस्य द्वादश कोटीः सार्धास्तेभ्यः प्रदाय सः । प्रचचाल गजारूढो **नेमिनाथं** विवन्दिषुः ॥२८४॥
समं **दशार्है**र्दशभिर्मातृभिर्भ्रातृभिस्तथा । कोटिसङ्ख्यैः कुमारैश्च समग्रान्तःपुरेण च[१०] ॥२८५॥
महीभुजां षोडशभिः सहस्रैश्च समावृतः । ऋद्ध्या महत्या समवसरणं प्रययौ **हरिः** ॥२८६॥
दूरादप्यवरुह्येभाद् राज्यचिह्नान्यपास्य च । उदग्द्वारेण समवसरणे प्राविशद् **हरिः** ॥२८७॥
तत्र प्रदक्षिणीकृत्य **नेमिं** नत्वा च **शाङ्र्गभृत्** । अनुशक्रं निषसाद यथास्थानमथाऽपरे ॥२८८॥
इन्द्रो**पेन्द्रौ** पुनर्नत्वा जिनेन्द्रमथ **नेमिनम्** । प्रारेभाते स्तोतुमेवं गिरा भक्तिपवित्रया ॥२८९॥
¶"नमस्तुभ्यं जगन्नाथ ! विश्वविश्वोपकारिणे । आजन्म ब्रह्मनिष्ठाय दयावीराय तायिने ॥२९०॥
दिष्ट्या कर्माणि घातीनि स्वामिन् ! घातितवानसि । शुक्लध्यानेन दिवसैश्चतुःपञ्चाशताऽपि हि ॥२९१॥
न केवलं **यदुकुलं** त्वया नाथ ! विभूषितम् । इदं जगत्त्रयमपि केवलालोकभास्वता ॥२९२॥
अस्ता[११]घो यस्तथा स्वामिन्नपारश्च भवाम्बुधिः । गुल्फगोष्पदमात्रं स स्यात् त्वत्पादप्रसादतः ॥२९३॥
सर्वस्य भिद्यते स्वान्तं ललनाललितैः प्रभो ! । अभेद्यो वज्रहृदयस्त्वत्तो नाऽन्यो जगत्यपि ॥२९४॥
त्वयि व्रतनिषेधिन्यो बन्धूनां ता गिरोऽधुना । भवन्ति पश्चात्तापाय तवर्द्धिं पश्यतामिमाम् ॥२९५॥
[१२]दुराग्रहैर्बन्धुवर्गैर्दिष्ट्या न स्खलितस्तदा । जगत्पुण्यैरस्खलितोत्पन्नकेवल ! पाहि नः ॥२९६॥
यत्र तत्र स्थितस्याऽपि यद्वा तद्वाऽपि कुर्वतः । त्वमेवं देव ! हृदये भूयाः किमपरेण मे ?" ॥२९७॥
इति स्तुत्वा विरतयोस्तत्रेन्द्रो**पेन्द्रयोः** प्रभुः । सर्वभाषानुगगिरा प्रारेभे धर्मदेशनाम् ॥२९८॥
¶"विद्युद्विलासचपलाः श्रियः सर्वशरीरिणाम् । संयोगा विप्रयोगान्ताः स्वप्नप्राप्तार्थसन्निभाः ॥२९९॥
गत्वरं यौवनमपि मेघच्छायासहोदरम् । अम्बुबुद्बुदकल्पानि वपूंष्यपि वपुष्मताम् ॥३००॥
तस्मादसारे संसारे सारमत्र न किञ्चन । सारं तु दर्शन-ज्ञान-चारित्रपरि[१३]शीलनम् ॥३०१॥

१. रथनेमौ आगते सति । २. भाषायां 'मिंढल' इतिख्यातम् । ३. **वान्ति०** ला० । ४. **नाऽतः** सू० । ५. नेमेः देहं १० धनुःप्रमाणं तद्द्वाद्वशगुणं १२० धनुःप्रमाणं चैत्यवृक्षस्य । ६. **०शतोन्नति** खं० १, सू० । ७. **पूर्वाभिमुखः** खं० १, सू० विना । ८. कृष्णाय । ९. **रौप्यस्य** ता०सं० । १०. **सः** खं० १ । ११. अगाधः । १२. **पुराग्रहैः** ला० । १३. **०परिपालनम्** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्त्वानां श्रद्धानं[1]त्वं सम्यग्दर्शनमुच्यते । यथावस्थित[2]तत्त्वावबोधो ज्ञानं प्रकीर्तितम् ॥३०२॥
सावद्ययोगविरतिश्चारित्रं मुक्तिकारणम् । सर्वात्मना यतीन्द्राणां देशतः स्यादगारिणाम् ॥३०३॥
देशचारित्रनिरतो विरतानामुपासकः । भवस्वरूपं जानानः श्रावको जीवितो[3]वधिः ॥३०४॥
मद्यं मांसं नवनीतं मधूदुम्बरपञ्चकम् । अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ॥३०५॥
आमगोरससम्पृक्त[4]द्विदलं पुष्पितौदनम् । दध्यहर्द्वितयातीतं कुथितान्नं च वर्जयेत् ॥३०६॥
¶मदिरापानमात्रेण बुद्धिर्नश्यति दूरतः । वैदग्धी[5]बन्धुरस्याऽपि दौर्भाग्येणेव कामिनी ॥३०७॥
पापाः [6]कादम्बरीपानविवशीकृतचेतसः । जननीं हा ! प्रियी[7]यन्ति [8]जननीयन्ति च प्रियाम् ॥३०८॥
न जानाति परं स्वं वा मद्याच्चलितचेतनः । स्वामीयति वराकः स्वं स्वामिनं किङ्करीयति ॥३०९॥
मद्यपस्य शबस्येव लुठितस्य चतुष्पथे । मूत्रयन्ति मुखे श्वानो व्यात्ते विवरशङ्कया ॥३१०॥
मद्यपानरसे मग्नो नग्नः स्वपिति चत्वरे । गूढं च स्वमभिप्रायं प्रकाशयति लीलया ॥३११॥
वारुणीपानतो यान्ति कान्ति-कीर्ति-मति-श्रियः । विचित्राश्चित्ररचना विलुठत्कज्जलादिव ॥३१२॥
भूतात्तवन्नरीनर्ति रारटीति सशोकवत् । दाहज्वरार्त्तवद् भूमौ सुरापो लोलुठीति च ॥३१३॥[9]
विदधत्यङ्गशैथिल्यं ग्लपयन्तीन्द्रियाणि च । मूर्छामतुच्छां यच्छन्ती हाला[10] हाला[11]हलोपमा ॥३१४॥
विवेकः संयमो ज्ञानं सत्यं शौचं दया क्षमा । मद्यात् प्रलीयते सर्वं तृ[12]ण्या वह्निकणादिव ॥३१५॥
रसो[13]द्भवाश्च भूयांसो भवन्ति किल जन्तवः । तस्मान्मद्यं न पातव्यं हिंसापातकभीरुणा ॥३१६॥
दत्तं न दत्तमात्तं च नाऽऽत्तं कृतं च नो कृतम् । [14]मृषोद्यराज्यादिव हा ! स्वैरं वदति मद्यपः ॥३१७॥
गृहे बहिर्वा मार्गे वा परद्रव्याणि मूढधीः । वध-बन्धादिनिर्भीको गृह्णात्याच्छिद्य मद्यपः ॥३१८॥
बालिकां युवतीं वृद्धां ब्राह्मणीं [15]श्वपचीमपि । भुङ्क्ते परस्त्रियं सद्यो मद्योन्मादकदर्थितः ॥३१९॥
रटन् गायन् लुठन् धावन् कुप्यंस्तुष्यन् रुदन् हसन् । [16]स्तंभन्नमन् भ्रमंस्तिष्ठन् सुरापः पापरा[17]ण्नटः ॥३२०॥
पिबन्नपि मुहुर्मद्यं मद्यपो नैव तृ[18]ष्यति । जन्तुजातं कवलयन् कृतान्त इव सर्वदा ॥३२१॥
दोषाणां कारणं मद्यं मद्यं कारणमापदाम् । रोगातुर इवाऽपथ्यं तस्मान्मद्यं विवर्जयेत् ॥३२२॥
¶[19]चिखादिषति यो मांसं प्राणिप्राणापहारतः । उन्मूलयत्यसौ मूलं दयाख्यं धर्मशाखिनः ॥३२३॥
[20]अशनीयन् सदा मांसं दयां यो हि चि[21]कीर्षति । ज्वलति [22]ज्वलने वल्लीं स रोपयितुमिच्छति ॥३२४॥
हन्ता [23]पलस्य विक्रेता संस्कर्ता भक्षकस्तथा । क्रेताऽनुमन्ता दाता च घातकाः सर्व एव ते ॥३२५॥[24]
ये भक्षयन्त्यन्यपलं स्वकीयपल[25]पुष्टये । त एव घातका यन्न वधको भक्षकं विना ॥३२६॥
[26]मृष्टान्नान्यपि विष्ठा[27]सादमृतान्यपि मूत्र[28]सात् । स्युर्यस्मि[29]न्नङ्गकस्याऽस्य कृते कः पापमाचरेत् ? ॥३२७॥
मांसास्वादनलुब्धस्य देहिनं देहिनं प्रति । हन्तुं प्रवर्तते बुद्धिः शाकिन्या इव दुर्धियः ॥३२८॥
ये भक्षयन्ति पिशितं दिव्यभोज्येषु सत्स्वपि । सुधारसं परित्यज्य भुञ्जते ते हला[30]हलम् ॥३२९॥
न धर्मो निर्दयस्याऽस्ति पला[31]दस्य कुतो दया । पललुब्धो न तद्वेत्ति विद्या[32]द्वोपदिशेन्नहि ॥३३०॥
नाऽन्यस्ततो गतघृणो नर[33]कार्चिष्मदिन्धनम् । स्वमांसं परमांसेन यः पोषयितुमिच्छति ॥३३१॥
शुक्र-शोणितसम्भूतं विष्ठारसविवर्धितम् । लोहितं[34] स्त्यानतामाप्तं कोऽश्नीयादकृमिः[35] पलम् ? ॥३३२॥

१. **श्रद्धानं च** खं० २ । २. **०तत्त्वानां बोधो** मु० र० । ३. **जीविताबधि** मु० । ४. **०सम्पृक्तं द्वि०** खं० २, ला०सू० । ५. विदग्धस्यापि । ६. मदिरा । ७. **प्रियायन्ति** खं० २ । प्रियामिव आचरन्ति । ८. जननीमिवाचरन्ति । ९. ३०५ तः ३१३ पर्यन्ताः श्लोकाः 'योगशास्त्रे तृतीयप्रकाशे लभ्यन्ते, ६-१४ । १०. सुरा । ११. विषोपमा । १२. तृणानां समूहः । १३. **तदुद्भवा०** खं. १, सू० । मदिरोत्पन्नाः । १४. असत्यकथित राज्यादिव । १५. चाण्डालीम् । १६. **स्तम्भन्नमन्** मु० र० । १७. पापिष्ठः । १८. **तृप्यति** (यो.शा.तृ.प्र.टी.) । १९. खादितुमिच्छति । २०. अशनमिवाचरन् । २१. कर्तुमिच्छति । २२. अग्नौ । २३. मांसस्य । २४. ३१४तः ३२५ पर्यन्ताः श्लोकाः 'योगशास्त्रे' तृतीयप्रकाशेऽपि लभ्यन्ते । २५. **०बलपुष्टये** खं० २ । २६. **मिष्टान्नान्यपि** [यो.शा.तृ.प्र०] । २७. विष्ठात्वेन । २८. मूत्रत्वेन । २९. अङ्गकस्य-शरीरस्य । ३०. विषभेदम् । ३१. मांसोपजीविनः, रक्षसः । ३२. जानीयात् । ३३. नरक एव अग्निः तस्मिन् इन्धनम् । ३४. रक्तम् । ३५. **कोऽश्नीयात् कृमिसंकुलम्** ला० । **०दकृमिः फलम्** खं० १-२ । कृमिरहितोऽन्यः को जन्तुं पलं मांसं अश्नीयात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सद्यः सम्मूर्छितानन्तजन्तुसन्तानदूषितम् । नरकाध्वनि पाथेयं कोऽश्नीयात् पिशितं सुधीः ? ॥३३३॥
¶अन्तर्मुहूर्तात् परतः सुसूक्ष्मा जन्तुराशयः । यत्र मूर्च्छन्ति [1]तन्नाऽद्यं नवनीतं विवेकिभिः ॥३३४॥
एकस्याऽपि हि जीवस्य हिंसने[2] किमघं[3] भवेत् ? । जन्तुजातमयं तत् को नवनीतं निषेवते ? ॥३३५॥
¶अनेकजन्तुसङ्घातनिघातनसमुद्भवम् । जुगुप्सनीयं लालावत् कः स्वादयति माक्षिकम्[4] ? ॥३३६॥
भक्षयन्माक्षिकं क्षुद्रजन्तुलक्षक्षयोद्भवम् । स्तोकजन्तुनिहन्तृभ्यः शौनिके[5]भ्योऽतिरिच्यते ॥३३७॥[6]
एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः । यद् वमन्ति मधूच्छिष्टं तदश्नन्ति न धार्मिकाः ॥३३८॥
अप्यौषधकृते जग्धं[7] मधु श्वभ्र[8]निबन्धनम् । भक्षितः प्राणनाशाय [9]कालकूटकणोऽपि हि ॥३३९॥
मधुनोऽपि हि माधुर्यमबोधैरहहोच्यते । आसाद्यन्ते यदास्वादाच्चिरं नरकवेदनाः ॥३४०॥
¶उदुम्बर-वट-प्लक्ष-काकोदुम्बरशाखिनाम् । पिप्पलस्य च नाऽश्नीयात् फलं कृमिकुलाकुलम् ॥३४१॥
अप्राप्नुवन्नन्यभक्ष्यमपि क्षामो बुभुक्षया । न भक्षयति पुण्यात्मा पञ्चोदुम्बरजं फलम् ॥३४२॥
आर्द्रः कन्दः समग्रोऽपि सर्वः किसलयोऽपि च । स्नुही लवणवृक्षत्वक् कुमारी गिरिकर्णिकाः ॥३४३॥
शतावरी विरूढानि गुडूची कोमलाम्लिका । पल्यङ्कोऽमृतवल्ली च वल्लः शूकरसंज्ञितः ॥३४४॥
अनन्तकायाः सूत्रोक्ता अपरेऽपि कृपापरैः । मिथ्यादृशामविज्ञाता वर्जनीयाः प्रयत्नतः ॥३४५॥
स्वयं परेण वा ज्ञातं फलमद्याद् विशारदः । निषिद्धे विषफले वा मा भूदस्य प्रवर्तनम् ॥३४६॥
¶अन्नं प्रेतपिशाचाद्यैः सञ्चरद्भिर्निरङ्कुशैः । उच्छिष्टं क्रियते यत्र तत्र नाऽद्याद् दिनात्यये[10] ॥३४७॥
घोरा[11]न्धकाररुद्धाक्षैः पतन्तो यत्र जन्तवः । नैव भोज्ये निरीक्ष्यन्ते तत्र भुञ्जीत को निशि ? ॥३४८॥
मेधां पिपीलिका हन्ति यूका कुर्याज्जलोदरम् । कुरुते मक्षिका वान्तिं कुष्ठरोगं च कोलिकः[12] ॥३४९[13]॥
कण्टको दारुखण्डं च वितनोति गलव्यथाम् । व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥३५०॥
विलग्नश्च गले वालः स्वरभङ्गाय जायते । इत्यादयो दृष्टदोषाः सर्वेषां निशि भोजने ॥३५१॥
नाऽप्रे[13]क्ष्यसूक्ष्मजन्तूनि निश्यद्यात् प्रासुकान्यपि । [14]अवश्यं जन्तुसम्पातः सम्भवेदशने तदा[15] ॥३५२॥
संसजज्जीवसङ्घातं भुञ्जाना निशि भोजनम् । राक्षसेभ्यो विशिष्यन्ते मूढात्मानः कथं[16] न ते ? ॥३५३॥
वासरे च रजन्यां च यः खादन्नेव तिष्ठति । शृङ्ग-पुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥३५४॥
अह्नो मुखेऽवसानेऽपि यो द्वे द्वे घटिके त्यजन् । निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम् ॥३५५॥
अकृत्वा नियमं दोषा[17]भोजनाद् दिनभोज्यपि । फलं भजेन्न निर्व्याजं[18] न [19]वृद्धिर्भाषितं विना ॥३५६॥
ये वासरं[20] परित्यज्य रजन्यामेव भुञ्जते । ते परित्यज्य माणिक्यं काचमाददते जडाः ॥३५७॥
वासरे सति ये श्रेयस्काम्यया निशि भुञ्जते । ते वपन्त्यूषरक्षेत्रे शालीन् सत्यपि पल्वले ॥३५८॥
उलूक-काक-मार्जार-गृध्र-शम्बर-शूकराः । अहि-वृश्चिक-गोधाश्च जायन्ते रात्रिभोजनात् ॥३५९॥
करोति विरतिं धन्यो यः सदा निशि भोजनात् । सोऽर्धं पुरुषायुषस्य स्यादवश्यमुपोषितः ॥३६०॥
रजनीभोजनत्यागे ये गुणाः परितोऽपि तान् । [21]सद्वृतेरेव जनकान् कः सङ्ख्यातुमलं भवेत् ? ॥३६१॥
आमगोरससम्पृक्तद्विदलादिषु जन्तवः । दृश्यन्ते[22] बहवः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥३६२॥
जन्तुमिश्रं फलं पुष्पं पत्रं चाऽन्यदपि त्यजेत् । सन्धानमपि संसक्तं[23] दयाधर्मपरायणः ॥३६३॥

१. न भक्षणीयम् । २. **हिंसा न** ला० । ३. किं निर्देष्टुमशक्यं पापम् । ४. मधु । ५. **सौनिके०** खं० १-२, सू० । खट्टिकेभ्यः अधिकीभवति । ६. ३२६तः ३३७ पर्यन्ताः श्लोकाः 'योगशास्त्रे' तृतीयप्रकाशे दृश्यन्ते । ७. भक्षितम् । ८. नरककारणम् । ९. कालकूटं विषं, तस्य कणः । १०. रात्रौ । ११. प्रबलान्धकारनिरुद्धलोचनैः । १२. मर्कटकः, ऊर्णनाभः । १३. ३३८ तः ३४९ पर्यन्ताः श्लोकाः 'योगशास्त्रे' तृतीयप्रकाशे दृश्यन्ते । १३. अप्रेक्ष्याः प्रेक्षितुमशक्याः सूक्ष्मा जन्तवो यत्र तानि । १४. **अप्युद्यत्केवलज्ञानैर्नादृतं यन्निशाऽशनम्** (योग. तृ०प्र० ५३) । १५. **तथा** खं० १, ला०सू० । १६. **कथं नु** र० । १७. दोषा रात्रिः । १८. निश्छद्म । १९. भाषितं 'इदं मे मूलधनं, तदुपरि एतावद् व्याजं देयं त्वया' इतिरूपं निश्चयं विना न लभ्यते वृद्धिः कदापीति भावः । २०. अयं श्लोकः । खं० २, की० प्रत्योरेव प्राप्यते । २१. **न सर्वज्ञादृते कश्चिदपरो वक्तुमीश्वरः** (योग० तृ० प्र० ७०) । २२. **दृष्टाः केवलिभिः** मु० योग० तृ०प्र०च० । २३. सन्धानं-आचारं (अथाणुं), संसक्तं-जन्तुसंसक्तम् ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एवं दयाप्रधानः सन् भोज्येष्वपि विविक्तधीः । श्रावकोऽपि क्रमयोगात् संसारात् परिमुच्यते" ॥३६४॥[1]
देशनां तां प्रभोः श्रुत्वा **वरदत्तो** नरेश्वरः । परं संसारवैराग्यमाससाद व्रतोत्सुकः ॥३६५॥
नत्वाऽथ **कृष्णः** पप्रच्छ सर्वस्त्वय्यनुरागवान् । **राजीमत्या** विशेषानुरागे किं नाम कारणम् ? ॥३६६॥
ततो **धन-धनवती**भवादारभ्य **नेम्य**पि । तया सह स्वसम्बन्धमाख्यादष्टभवावधि ॥३६७॥
¶अथोत्थाय नमस्कृत्य **वरदत्त**महीपतिः । कृताञ्जलिर्जगन्नाथं **नेमिनाथं** व्यजिज्ञपत् ॥३६८॥
त्वत्तः श्रावकधर्मोऽपि प्रपन्नः स्यान्महाफलः । जन्तूनां स्वातिनक्षत्रजीमूतादिव पुष्क[2]रम् ॥३६९॥
परं गुरौ त्वयि प्राप्ते नाऽहं तुष्यामि तावता । को हि कल्पद्रुमे प्राप्ते पत्रमात्रमभीप्सति ॥३७०॥
तव प्रथमशिष्यत्वमभीप्सामि प्रयच्छ मे । संसारतारणीं दीक्षां दयां कुरु दयानिधे ! ॥३७१॥
इत्युक्तवन्तं तं भूपं स्वयं प्राव्राजयत् प्रभुः । क्षत्राणां विंशतिशती तदनु प्राव्रजत् तथा ॥३७२॥
**धनदेव-धनदत्तौ** बन्धू **धन**भवात् तु यौ । अमात्यो **विमलबोधोऽपराजित**भवात् तु यः ॥३७३॥
स्वामिना ते सह भ्रान्ता भवेऽस्मिन् भूभुजस्त्रयः । तत्राऽऽयाता **राजीम**त्याः प्रसङ्गात् प्राग्भवैः श्रुतैः ॥३७४॥
उत्पन्नजातिस्मरणा जातवैराग्यसम्पदः । **अरिष्टनेमि**पादान्ते तदैवाऽऽददिरे व्रतम् ॥३७५॥ त्रिभिर्विशेषकम् ॥
तैः स[3]मं **वरदत्तादी**नेकादश गणाधिपान् । स्थापयामास विधिव**न्नेमिनाथो** जगद्गुरुः ॥३७६॥
स्वाम्याख्यत्रिपदीं तेभ्यो ध्रौव्योत्पाद-व्ययात्मिकाम् । तत्रिपद्यनुसारात् ते द्वादशाङ्गीमसूत्रयन् ॥३७७॥
**यक्षिणी** राजपुत्री च भूरिकन्यासमावृता । प्राव्रजत् तां तदा स्वामी प्रत्यष्ठाच्च प्रव[4]र्तिनीम् ॥३७८॥
**दशार्हा उग्रसेनश्च वासुदेवश्च लाङ्गली** । **प्रद्युम्नाद्याः** कुमाराश्च श्रावकत्वं प्रपेदिरे ॥३७९॥
**शिवा-रोहिणी-देवक्यो रुक्मिण्याद्याश्च** योषितः । जगृहुः श्रावकधर्ममन्याश्च स्वामिसन्निधौ ॥३८०॥
एवं समवसरणे **तस्मिन्** सङ्घः प्रभोरभूत् । चतु[5]र्विधो धर्म इव पृथिवीतलपावनः ॥३८१॥
यातप्रथमपौरुष्यां व्यस्राक्षीद् देशनां प्रभुः । द्वितीयपौरुषीं चक्रे **वरदत्त**स्तु देशनाम् ॥३८२॥
भगवन्तं ततो नत्वा वासवाद्या दिवौकसः । **कृष्णाद्या** भूभुजोऽन्येऽपि स्थानं निजनिजं ययुः ॥३८३॥
¶तत्तीर्थजन्मा **गोमेध**स्त्र्य[6]ास्यः श्यामो नृवाहनः । मातुलिङ्ग-पर्शु-चक्रधारिदक्षिणदोस्त्रयः ॥३८४॥
सनकुल-शू[7]ल-शक्ति-दक्षिणेतरदोस्त्रयः । स्वामिनो **नेमिनो** जज्ञे तदा शासनदेवता ॥३८५॥
तत्तीर्थजन्मा **कूष्माण्डी** स्व[8]र्णाभा सिंहवाहना । आम्रलुम्बी-पाशध[9]र-वामेतरभुजद्वया ॥३८६॥
पुत्रा-ऽङ्कुशधरवामकरयुग्माऽभवत् प्रभोः । **अम्बिके**त्यभिधानेन भर्तुः शासनदेवता ॥३८७॥

ताभ्यां सदाऽधिष्ठितसन्निधानो, व्यतीत्य वर्षाः[10] शरदं च **नेमिः** ।
भद्रेभगामी जनभद्रकामी, विहर्तुमन्यत्र ततश्चचाल ॥३८८॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये अष्टमे[11] पर्वणि **अरिष्टनेमिकुमार**क्रीडा-
दीक्षा-केवल[12]ज्ञानोत्पत्तिवर्णनो नाम
नवमः सर्गः ॥

—x—

१. ३५० तः ३६३ पर्यन्ताः श्लोकाः 'योगशास्त्रे' तृ.प्र.दृश्यन्ते । २. जलम् । ३. **सह** मु० र० । ४. **प्रवर्तनीम्** खं० २ । ५. दान-शील-तप-भावरूप चतुर्विधो धर्मः । ६. त्रिमुखः । ७. **०शूलि०** खं० १, सू० । ८. **स्वर्णभा** खं० २ । ९. **पाशधरा** ला०सू० । १०. **वर्षाशरदां** मु० । **वर्षाशरदौ** (?) । वर्षाशरदं र०स्वी०पाठः । वर्षाऋतुं शरदृतुम् च । ११. **०ऽष्टमपर्वणि** मु० । १२. **०केवलोत्पत्ति०** खं० १-२, ला०सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ दशमः सर्गः ॥

इतश्च **पाण्डवाः कृष्ण**प्रसादात् स्वपुरे स्थिताः । वारकेण प्रमुदिता **द्रौपद्या** सह रेमिरे ॥१॥
**द्रौपद्याश्चा**ऽन्यदा वेश्मन्याययौ **नारदो** भ्रमन् । तया त्वविरतोऽसावित्यवज्ञाय न सत्कृतः ॥२॥
भाविनी दुःखभागेषा कथं न्विति विचिन्तयन् । निर्ययौ तद्गृहात् क्रुद्धो विरुद्धो **नारदो** मुनिः ॥३॥
अत्र **कृष्ण**भयात् तस्या अपश्यन्न[1]प्रियावहम् । जगाम **धातकीखण्डभरते नारद**स्ततः ॥४॥
तत्र **चम्पा**जुषो वि[2]ष्णोः **कपिला**ख्यस्य सेवकम् । पुर्यां सोऽ**मरकङ्का**यां स्त्रीलोलं **पद्म**मभ्यगात् ॥५॥
स राजोत्थाय नीत्वाऽन्तःपुरे स्वाः स्त्रीः प्रदर्शयन् । ऊचे **नारद**मीदृश्यो दृष्टाः किं क्वाऽपि योषितः ? ॥६॥
सेत्स्यत्यर्थो ममाऽनेनेत्यामृशन्**नारदो**ऽवदत् । कूपमण्डूकवद् राजन् ! किमेताभिः प्रमोदसे ? ॥७॥
**जम्बूद्वीप**स्य **भरते** नगरे **हस्तिनापुरे** । **पाण्डवा**नां महिष्यस्ति **द्रौपदी**ति पदं श्रियम्[3] ॥८॥
तस्याः पुरस्तादेता हि चेट्य एवाऽखिला अपि । इत्युदित्वा **नारदर्षि**रुत्पत्याऽगमदन्यतः ॥९॥
¶अथेप्सुर्**द्रौपदीं पद्मनाभः** पातालवासिनम् । तपसा[4]ऽऽराधयामास पूर्वसङ्ग[5]तिकं सुरम् ॥१०॥
प्रत्यक्षीभूतममरं किं करोमीति वादिनम् । **पद्म**स्तमूचेऽत्राऽऽनीय **द्रौपदीं** मे समर्पय ॥११॥
सोऽप्याख्यत् **पाण्डवान्** मुक्त्वा **द्रौपदी** नान्यमिच्छति । त्वन्निर्बन्धादानयामीत्युक्त्वा **गज[6]पुरे** ययौ ॥१२॥
ततोऽव[7]स्वापनीं दत्त्वा प्रसुप्तां **द्रौपदीं** निशि । अपहृत्य समानीयाऽऽर्पयत् **पद्माय** सोऽमरः ॥१३॥
¶प्रबुद्धा **द्रौपदी** तत्राऽप्रेक्षमाणा निजां स्थि[8]तिम् । किं [9]स्वप्नो वेन्द्रजालं वेत्यामृशद् विधुरा हृदि[10] ॥१४॥
बभाषे **पद्मनाभ**स्तां मा भैषीर्मृगलोचने ! । आनायिता मयाऽसि त्वं भुङ्क्ष्व भोगान् मया सह ॥१५॥
द्वीपोऽयं **धातकीखण्डो**ऽ**मरकङ्का** पुरी त्वसौ । राजाऽहं **पद्मनाभो**ऽत्र बुभू[11]षुस्तेऽधुना पतिः ॥१६॥
प्रत्युत्पन्नमति**द्रौपद्यू**चे मासान्तरे यदि । कोऽपि नैष्यति मदीयः करिष्ये त्वद्वचस्तदा ॥१७॥
अशक्याऽत्राऽऽगतिर्नृणां **जम्बूद्वीप**जुषामिति । विमृशंस्तद्वचो मेने **पद्म**श्छद्मपरोऽपि हि ॥१८॥
न भोक्ष्ये मासपर्यन्तेऽप्यहं [12]पतिविनाकृता । **द्रौपदी**त्यभिजग्राह सतीव्रतमहाधना ॥१९॥
¶**पाण्डवा** अप्यपश्यन्तः प्रभाते **द्रौपदीं** गृहे । भृशमन्वेषयामासुर्जल-स्थल-वनादिषु ॥२०॥
तद्वार्तामपि ते नाऽऽपुस्तन्मा[13]ताऽऽख्यच्च **शार्ङ्गिणे** । स एव शरणं तेषां बन्धुश्च [14]विधुरेषु सः ॥२१॥
**कृष्णो**ऽपि कृत्यमूढोऽस्थाद् यावत् तावत् समाययौ । स **नारद**मुनिर्द्रष्टुं तमनर्थं स्वयं कृतम् ॥२२॥
किं दृष्टा **द्रौपदी** क्वाऽपीत्यनुयुक्तः स विष्णुना । ऊचेऽगां **धातकीखण्डे**ऽ**मरक[15]ङ्कां** पुरीमहम् ॥२३॥
तत्र भूपस्य **पद्म**स्य सद्मनि **द्रुपदा**त्मजाम् । अद्राक्षमहमित्युक्त्वा जगामोत्पत्य सोऽन्यतः ॥२४॥
¶बभाषे **पाण्डवान् कृष्णः पद्मे**न द्रौपदी हृता । एष तामाहरिष्यामि मा खिद्यध्वं मनागपि ॥२५॥
ततः **सपाण्डवो विष्णु**र्महानीकसमावृतः । जगाम **मागधा**भिख्यप्राचीना[16]म्भोधिरोधसि ॥२६॥
ऊचुश्च **पाण्डवाः कृष्णं** स्वामिन्नत्यन्तभीषणः । संसार इव चाऽपारः पारा[17]वारोऽयमुद्धतः ॥२७॥
मग्नास्तिष्ठन्ति कुत्रापि लोष्ट[18]वत् पर्वता इह । तिष्ठन्ति पर्वतप्रायाण्यत्र [19]यादांसि कुत्रचित् ॥२८॥
कृत[20]शोषप्रतिज्ञश्च वा[21]डवोऽत्रास्ति कुत्रचित् । **वेलन्धर**सुराश्चात्र कैव[22]र्ता इव कुत्रचित् ॥२९॥
उद्वर्त्यन्तेऽत्रोर्मिभिश्च कमण्डलुनिभा घनाः । अलङ्घ्यो मनसाऽप्येष लङ्घनीयः कथं ततः ? ॥३०॥

---

१. अप्रियं अपश्यन् । २. वासुदेवस्य । ३. **श्रियाः** मु० । ४. **तपसा साधया०** मु० । ५. पूर्वमित्रम् । ६. हस्तिनापुरम् । ७. निद्राम्, **अपस्वापनीम्** ता० सं० छा० की० ला० आ० । ८. स्थानम् । ९. **स्वप्नमिन्द्र०** मु० । १०. **सती** मु० । ११. भवितुं इच्छुः । १२. **पतिं विना कृता** ला०सू० विना । १३. पाण्डवमाता । १४. **विधुरेष्वपि** खं.१, ला०सू० की० ला० पु० छा० ला२० । १५. **कङ्कापुरी०** मु० । १६. पूर्वसमुद्रतटे । १७. समुद्रः । १८. **लोष्टवत्** पा० की० ला १. । १९. जलजन्तवः । २०. कृता शोषे-शोषणे प्रतिज्ञा येन सः । २१. वडवानलः । २२. धीवराः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

का वधिन्तेति तानुक्त्वा **कृष्णः** कृ[1]ष्णेतराशयः । तीरे निषद्य तपसाऽऽराधयामास **सुस्थितम्** ॥३१॥
आविर्भूय सुरः सोऽपि किं करोमीत्यभाषत । **कृष्णो**ऽप्यूचे पार्थिवेन **पद्मेन द्रौपदी** हृता ॥३२॥
सा यथा **धातकीखण्ड**द्वीपादानीयते द्रुतम् । तथा कुरु सुरश्रेष्ठ ! **लवणोदधि**दैवत ! ॥३३॥
देवोऽप्युवाच **पद्मस्य** पूर्वसङ्गतनाकिना । हृत्वा समर्पिता **कृष्ण** ! तद्वत् तामर्पयामि वः ॥३४॥
यद्वा नेदं रोचते वस्ततः सबलवाहनम् । क्षिपाम्यम्भोनिधौ **पद्मं द्रौपदी**मर्पयामि वः ॥३५॥
**कृष्णो**ऽप्यूचे मेति कार्षीः **पाण्डवानां** ममापि च । षण्णां रथानां तोयान्[3]तर्देहि मार्गमना[4]हतम् ॥३६॥
यथा तत्र स्वयं गत्वा तं वराकं विजित्य च । आनयामो वयं **कृ[5]ष्णां** पन्था ह्येष यशस्करः ॥३७॥
¶**सुस्थितो**ऽपि तथा चक्रे **कृष्णो**ऽपि हि **सपाण्डवः** । अब्धिं स्थलमिवोल्लङ्घ्याऽ**मरकङ्कां** ययौ पुरीम् ॥३८॥
स्थित्वा तद्बहिरुद्यानेऽनुशिष्य **हरिणा[6]** स्वयम् । **दारुकः** प्रेषितो दौ[7]त्ये ययौ **पद्म**नृपान्तिके ॥३९॥
तत्पादपीठं पादेनाऽऽक्रामन् भृकुटिभीषणः । कुन्ताग्रेणाऽर्पयन् लेखं **दारुकः पद्म**मब्रवीत् ॥४०॥
**पाण्डवानां वासुदेव**सहायानां प्रिया त्वया । **जम्बूद्वीपस्य भरता**दानीता **द्रुपदा**त्मजा ॥४१॥
दत्तमार्गो[8]ऽम्भोधिनाऽपि **कृष्णः पाण्डुसुतैः** सह । आगतोऽस्त्यर्प्यतां **कृष्णा** जिजीविषसि यद्यरे ! ॥४२॥
**पद्मो**ऽप्यूचे स तत्रैव **वासुदेव** इह त्व[9]हो ! । [10]आत्मषष्ठो मम कियान् गच्छ सज्जय तं युधि[11] ॥४३॥
अभ्येत्य तद्वचः **कृष्णा**याऽऽचख्यौ **दारुको**ऽपि हि । आगाद् युयुत्सुः **पद्मो**ऽपि सन्नह्य सह सेनया ॥४४॥
¶तस्याऽऽपतत्सु सैन्येषु वारिधेरिव वीचिषु । स्मेराक्षः [12]**पुण्डरीकाक्षः पाण्डवा**नित्यभाषत ॥४५॥
योत्स्यन्ते किं भवन्तोऽत्र सह **पद्मेन** भूभुजा ? । अथवा युध्यमानं मां प्रेक्षिष्यन्ते रथस्थिताः ॥४६॥
तेऽप्यूचुः सह **पद्मेन** वयं योत्स्यामहे प्रभो ! । राजाऽद्य **पद्मनाभो** वा वयं वेति कृतौ[13]श्रवाः ॥४७॥
ततश्च ते युयुधिरे **पद्मेन** पृथिवीभुजा । जिताश्च पुनरभ्येत्य **वासुदेव**मदोऽवदन् ॥४८॥
स्वामिन् ! बलीयान् **पद्मो**ऽयं बलवत्सैनिकावृतः । त्वयैव जय्यो नाऽस्माभिः कुरुष्वेह यथोचितम् ॥४९॥
**कृष्णो**ऽप्यूचे जिता यूयं तदैव ननु **पाण्डवाः** !। राजा **पद्मो** वयं वेति गदितं वचनं यदा ॥५०॥
राजाऽहमेव नो **पद्म** इत्युदित्वा **जनार्दनः** । यु[14]धे चचाल दध्मौ च **पाञ्चजन्यं** महास्वनम् ॥५१॥
बलत्रिभागः **पद्मस्य** तच्छङ्खध्वनिनाऽत्रुटत् । गतिर्मृगकुलस्येव सिंहनादेन सर्पता ॥५२॥
**शार्ङ्गं** चाऽस्फालयच्**छार्ङ्गी** तस्यापि ध्वनिना पुनः । बलत्रिभागः **पद्म**स्याऽत्रुटद् दुर्बलरज्जुवत् ॥५३॥
अवशिष्टतृतीयांशबलः **पद्मो** रणाङ्गणात् । प्रणश्याऽ**मरकङ्का**यां प्रविवेश झगित्यपि ॥५४॥
लोहार्गलासनाथानि पिदधे गोपुराणि सः । **कृष्णो**ऽपि प्रज्वलन् क्रोधादुत्ततार रथादथ ॥५५॥
समुद्धातेनै[15] जज्ञे च **नरसिंहवपुर्हरिः** । क्रुद्धोऽन्तक इव व्यात्ताननदंष्ट्राभयङ्करः ॥५६॥
नर्दन्नत्यूर्जितं सोऽथ विदधे पा[16]ददर्दरम् । चकम्पे वसुधा तेन हृदयेन सह द्विषाम् ॥५७॥
प्राकाराग्राणि बभ्रंशुः पेतुर्देवकुलान्यपि । कुट्टिमानि व्यशीर्यन्त **शार्ङ्गिणः** पाददर्दरैः ॥५८॥
गर्तेषु लिल्यिरे केऽपि केऽपि तोयेषु चाऽविशन् । निपेतुर्मूर्च्छिताः केऽपि तत्पुर्यां **नृ[17]हरे**र्भयात् ॥५९॥
क्षम्यतां देवि ! रक्षाऽस्मादन्तका[18]दिव **शार्ङ्गिणः** । इति जल्पन् ययौ **पद्मः** शरणं **द्रुपदा**त्मजाम् ॥६०॥
साऽप्यूचे मां पुरस्कृत्य स्त्रीवेषं विरचय्य च । प्रयाहि शरणं **कृष्णं** तथा जीवसि नान्यथा ॥६१॥
इत्युक्तः स तथा चक्रे नमश्चक्रे च **शार्ङ्गिणम्** । शरण्यो **वासुदेवो**ऽपि मा भैषीरित्युवाच तम् ॥६२॥
**द्रौपदीं** चाऽर्पयामास **पाण्डवानां जनार्दनः** । ववले च रथारूढः सह तैस्तेन वर्त्मना ॥६३॥
¶तदा च तत्र **चम्पाया**मुद्याने **पूर्णभद्रके** । भगवान् समवासार्षीन्**मुनिसुव्रत**तीर्थकृत् ॥६४॥
**कपिल**स्तत्सभासीनो विष्णुं प्रपच्छ तं प्रभुम् । स्वामिन् ! ममेव कस्यायं शङ्खनादः श्रै[19]वोऽतिथिः ? ॥६५॥

१. शुद्धाशयः । २. **नैवं** खं. २ । ३. जलमध्ये । ४. अक्षुण्णम्, अनभ्यस्तम् । ५. द्रौपदीम् । ६. कृष्णेन । ७. दूतकर्मणि । ८. **०म्बुधिनापि** मु० । ९. **त्वसौ** ता०स०की०पा०पु० । १०. आत्मना **षष्ठः** कृष्णः । ११. **युधे** खं. १ । १२. कृष्णः । १३. कृतप्रतिज्ञाः । १४. **युधि** मु० र० । १५. वैक्रियसमुद्घातेन । १६. पादघातम् । १७. नरसिंहस्य-कृष्णस्य । १८. यमादिव । १९. श्रवणस्य कर्णस्य अतिथिः, श्रूयते इत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शङ्खध्वनिः **कृष्ण**विष्णोरेष इत्यर्हतोदिते । एकत्र किं हरी[1] स्यातामित्यपृच्छत् स **केशवः** ॥६६॥
**द्रौपदी-कृष्ण-पद्मानां** वृत्तान्तं भगवानपि । समाचख्यौ **कपिलाय कपिलो**ऽप्येवमब्रवीत् ॥६७॥
**जम्बूद्वीपार्धभरतेशस्य कृष्णस्य** नाथ ! किम् ? । भवाम्यहं स्वागतिकोऽभ्यागतस्याऽतिथेरिह ? ॥६८॥
स्वाम्यूचे न यथैकत्र द्वितीयोऽर्हन्न चक्रभृत् । न च विष्णुस्तथाऽन्येन न मिलेत् कारणागतः ॥६९॥
श्रुत्वाऽपीत्यर्हतो वाचं **कपिलः कृष्ण**मीक्षितुम् । ययावब्धेस्तटे **कृष्ण**रथसीमन्तिताध्वनि ॥७०॥
ईक्षाञ्चक्रे च **कृष्णस्य** मध्येऽम्भोनिधि गच्छतः । रजत-स्वर्णपत्राभान् श्वेत-[3]पीतान् रथध्वजान् ॥७१॥
'**कपिलो** विष्णुरेषोऽहमुत्[4]कस्त्वां द्रष्टुमागतः । तद्वलस्वे'त्यक्षराढ्यं शङ्खं दध्मौ स **शार्ङ्गभृत्** ॥७२॥
'आग[5]मामः वयं दूरे त्वया वाच्यं न किञ्चन' । इति व्यक्ताक्षरध्वानं शङ्खं **कृष्णो**ऽप्यपूरयत् ॥७३॥
¶तच्छङ्खध्वनिमाकर्ण्य ववले **कपिलो** हरिः । गत्वा **कङ्कापुरीं पद्मं** किमेतदिति चाऽवदत् ॥७४॥
**पद्मो**ऽप्यकथयत् स्वागो[6]ऽवोचद् यत् स्वामिनि त्वयि । **कृष्णेना**ऽहं पराभूतो **जम्बूभरत**विष्णुना ॥७५॥
रे ! दुरात्मन्नसमानविग्रहेति वदन् हरिः । **पद्मं** निर्वासयामास तद्राज्ये तत्सुतं न्यधात् ॥७६॥
¶**कृष्णो**ऽप्यम्भोधिमुत्तीर्य **पाण्डवाने**वमब्रवीत् । आपृ[7]च्छे **सुस्थितं** यावत् तावद् **गङ्गा**मतीत भोः ! ॥७७॥
ततस्ते नावमारुह्य **गङ्गा**स्रोतोऽतिभीषणम् । द्वाषष्टियोजनपृथूत्तीर्याऽन्योऽन्यमदोऽवदन् ॥७८॥
द्रक्ष्यामोऽद्य बलं **विष्णोर्नौ**रत्रैव विधार्यताम् । विना नावं कथं **गङ्गा**स्रोतोऽसावुत्तरिष्यति ? ॥७९॥
¶एवं ते कृतसङ्केता निलीयाऽस्थुर्नदीतटे । इतश्च कृतकृत्यः सन् **कृष्णो**ऽप्यागात् सरिद्वराम् ॥८०॥
तत्राऽपश्यन् **हरि**र्नावं दोष्ण्येकस्मिन् सवाजिनम् । रथं न्यस्याऽन्यदोष्णाऽम्भस्तरीतुमुपचक्रमे ॥८१॥
**गङ्गा**मध्ये गतः श्रान्तः **कृष्ण**श्चैवमचिन्तयत् । अहो ! **पाण्डुसुताः** शक्ता **गङ्गां** तेरुस्तरीं विना ॥८२॥
**गङ्गा** तच्चिन्तितं ज्ञात्वा ददौ [8]स्ताघं क्षणादपि । उत्ततार ततस्तां च सुखेनैव **जनार्दनः** ॥८३॥
युष्माभिः कथमुत्तीर्णा **गङ्गे**त्यूचे स **पाण्डवान्** । नावोत्तीर्णाऽस्माभिरिति प्रत्यूचुस्तेऽपि **शार्ङ्गिणम्** ॥८४॥
वालयित्वा न किं प्रैषि नौरित्युक्तास्तु **शार्ङ्गिणा** । तेऽवोचन् प्रेषिता नौर्न युष्मदोजः परीक्षितुम् ॥८५॥
**कृष्णो**ऽप्युवाच कुपितो मदोजो ज्ञास्यथाऽधुना । न ज्ञातमब्धितरणे**ऽमरकङ्का**जयेऽपि च ॥८६॥
इत्युक्त्वा लोहदण्डेन रथांस्तेषां ममर्द सः । अभूच्च पत्तनं तत्र नामतो **रथमर्दन**म् ॥८७॥
ततो [9]निर्विषयांश्चक्रे **पाण्डवान् कंस**सूदनः । सम्भूय शिबिरेणाऽथ **द्वारकां** नगरीं ययौ ॥८८॥
¶**पाण्डवाः** स्वपुरं गत्वा तत् **कुन्त्या** आचचक्षिरे । **कुन्त्य**पि **द्वारकां** गत्वा **वासुदेव**मभाषत ॥८९॥
त्वया निर्वासिताः कुत्र तिष्ठन्तु मम सूनवः ? । अस्मिन् **भरत**वर्षार्द्धे न सा भूर्भवतो न या ॥९०॥
**कृष्णो**ऽप्यूचे दक्षिणाब्धे रोधस्यभिनवां पुरीम् । निवेश्य **पाण्डुमथुरां** वसन्तु तव सूनवः ॥९१॥
**कुन्ती** गत्वा तदाचख्यौ सुतेभ्यः **कृष्ण**शासनम् । तेऽपीयुः **पाँ**[10]**ण्डु**विषयं वार्धिवेलापवित्रितम् ॥९२॥
**कृष्णो**ऽपि **हास्तिनपुरे**ऽभिषिषेच **परीक्षितम्** । पौत्रं जामेः[11] **सुभद्राया अभिमन्यु**तनूद्भवम् ॥९३॥
¶इतश्च भगवान्**नेमिः** पावयन् पृथिवीतलम् । क्रमेण [12]**भद्दिलपुरं** पुरप्रवरमीयिवान् ॥९४॥
आसंश्च तस्मिन्नगरे **सुलसा-नागयोः** सुताः । **देवक्यु**[14]दरजाः षट् ते ये दत्ता **नैगमेषिणा** ॥९५॥
तेऽथ द्वात्रिंशतं कन्याः प्रत्येकं परिणिन्यिरे । श्री**नेमि**ना बोधितास्तु तत्पार्श्वे जगृहुर्व्रतम् ॥९६॥
सर्वे चरमदेहास्ते द्वादशाङ्गधराः क्रमात् । विजह्रुः स्वामिना सार्धं तपस्यन्तस्तपो महत् ॥९७॥
¶इतश्च भगवान्**नेमि**र्विहरन् **द्वारकां** ययौ । **सहस्राम्रवणे** तत्रोपवने समवासरत् ॥९८॥
षट् च ते **देवकी**पुत्राः षष्ठान्ते पारणार्थिनः । त्रिधा यु[15]गलिनो भूत्वा प्राविशन् **द्वारिकां** पुरीम् ॥९९॥
तेभ्यो**ऽनीकयशोऽनन्तसेनौ** द्वौ **देवकी**[16]गृहम् । गतौ तौ वीक्ष्य [17]**कृष्णा**भावि(व?)त्यमोदत **देवकी** ॥१००॥

---

१. द्वौ वासुदेवौ । २. **द्रौपदीपद्मकृष्णानां** मु० । ३. **श्वेतपीतरथध्वजान्** र. विना सर्वत्र । ४. उत्सुकः । ५. **अगमाम** ता० सं० की० ला० २ ला०सू० । ६. स्वापराधम् । ७. **आपृच्छं** ला० । ८. तलम् । ९. देशबाह्यान् । १०. पाण्डुदेशम् । ११. भगिन्याः । १२. **भद्रिल०** खं.१-२, सू० । १४. देवकीपुत्राः । १५. **युगलिनौ** मु०र० । १६. ०गृहे ला० । १७. कृष्णसदृशौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा प्रत्यलाभयत् सिंहकेसरैर्मोदकोत्तमैः । तौ जग्मतुस्ततश्चाऽन्यौ तत्सोदर्यावुपेयतुः ॥१०१॥
**अजितसेन-निहतशत्रू** नाम्ना महामुनी । सा प्रत्यलाभयत् तावप्यथाऽन्यौ समुपेयतुः ॥१०२॥
नाम्ना **देवयशः-शत्रुसेनौ** श्रमणपुङ्गवौ । तौ च नत्वा **देवकी**त्थमपृच्छद् रचिताञ्जलिः ॥१०३॥
भूयो भूयोऽपि दिङ्मोहात् किं नु यूयमिहाऽऽगताः ? । किं वा मे मतिमोहोऽयं यूयं न हि त एव हि ? ॥१०४॥
अथवा स्वर्गकल्पायामप्यस्यां पुरि सम्पदा । नोचितं भक्तपानादि प्राप्नुवन्ति महर्षयः ? ॥१०५॥
तावूचतुर्न दिग्मोहोऽस्माकं षट् सोदरा वयम् । [1]**भद्दिलपुर**वास्तव्यं[2]**सुलसा-नागयोः** सुताः ॥१०६॥
धर्मं श्रुत्वा **नेमि**पार्श्वे प्राव्रजाम **वयं** हि षट् । भूत्वा च त्रीणि युग्मानि क्रमात् ते गृहमागताः ॥१०७॥
¶ततश्च **देवकी** दध्यौ कथं नाम षडप्यमी । **कृष्ण**स्य सदृशाः, एवं तिलौ[3] अपि तिलस्य न ? ॥१०८॥
जीवे[4]दष्टसुता चाऽहम**तिमुक्तक**साधुना । पुराऽऽख्याताऽस्मि तेनैते किं स्युर्मम तनू[5]रुहाः ? ॥१०९॥
विमृश्यैवं द्वितीयेऽह्नि तत्प्रष्टुं **नेमिनो**ऽन्तिके । ययौ समवसरणे **देवकी** देवनिर्मिते ॥११०॥
ज्ञात्वा स्वाम्यपि तद्भावमूचे तेऽमी सुताः खलु । समर्पिताः **सुलसाया** जीवन्तो **नैगमेषिणा** ॥१११॥
सो[6]ऽथ तांस्तत्र षट् साधून् पश्यन्त्युत्प्रस्न[7]वस्तनी । ववन्दे च बभाषे च साधु दृष्टाः स्थ[8] हे सुताः ! ॥११२॥
राज्यं प्रकृष्टमथवा दीक्षा मत्कुक्षिजन्मनाम् । किन्त्वेतन्मम खेदाय स्वयं नैकोऽपि लालितः ॥११३॥
¶भगवानप्यथोवाच मुधा मा ताम्य **देवकि** ! । पूर्वकर्मफलं ह्येतदिह जन्मन्युपस्थितम् ॥११४॥
सपत्न्याः सप्त रत्नानि त्वमाहार्षीः पुरा भवे । रुदत्याश्चार्पितं तस्या रत्नमेकं पुनस्त्वया ॥११५॥[9]
तच्छ्रुत्वा **देवकी** निन्दन्त्यात्मप्राग्जन्मदुष्कृतम् । ययौ स्वगृहमस्थाच्च पुत्रजन्माभिकाङ्क्षिणी ॥११६॥
किमेवं विमना मातरित्युक्ता **शाङ्गर्पाणि**ना । सा बभाषे निष्फलेन जीवितव्येन किं मम ? ॥११७॥
त्वं वर्धितो **नन्द**गृहे **नाग**धाम्नि च तेऽग्रजाः[10] । [11]कैलकण्ठ्येव नाऽपत्यं मया किमपि लालितम् ॥११८॥
इच्छामि तत्सुतं वत्स ! बाललालनकौतुकात् । पशवोऽपि हि धन्यास्ते स्वयं स्वापत्यलालकाः ॥११९॥
एष ते पूरयाम्यर्थमित्युक्त्वा प्रययौ **हरिः** । आराधयामास **शक्र**सेनान्यं **नैगमेषिणम्** ॥१२०॥
देवोऽप्युवाच ते मातुर्भविष्यत्यष्टमः सुतः । उद्भिन्नयौवनो धीमान् स परं प्रव्रजिष्यति ॥१२१॥
अनु [12]तद्वचनं स्वर्गाच्च्युत्वा देवो महर्द्धिकः । **देवक्याः** कुक्षिमायासीज्जज्ञे च समये सुतः ॥१२२॥
नाम्ना **गजसुकुमालं** रूपात् **कृष्ण**मिवाऽपरम् । तं स्वयं लालयामास **देवकी** देवसन्निभम् ॥१२३॥
सोऽत्यन्तवल्लभो मातुर्भ्रातुश्च प्राणसन्निभः । द्वयोर्नेत्रेन्दीवरेन्दुः क्रमेण प्राप यौवनम् ॥१२४॥
**प्रभावती**मभिधया **द्रुमस्य** पृथिवीपतेः । कन्यां **गजसुकुमालः** पित्रादेशादुपायत ॥१२५॥
**सोमशर्म**द्विजसुतां **सोमा**ख्यां क्षत्रियाभवाम् । सोऽनिच्छन्नप्युपयेमे मातृ-भ्रात्रोर्निदे[13]शतः ॥१२६॥
¶तदैव तत्र समवासार्षी**न्नेमि**स्तदन्तिके । धर्मं **गजसुकुमालः** सभार्योऽवहितोऽशृणोत् ॥१२७॥
ततश्चोत्पन्नवैराग्यः पत्नीभ्यां सहितो **गजः** । पितरौ समनुज्ञाप्य स्वामिपार्श्वेऽग्रहीद् व्रतम् ॥१२८॥
**गजे** प्रव्रजिते चाथ तद्वियोगासहिष्णवः । पितरौ **कृष्ण**मुख्याश्च भ्रातरो रुरुदुस्तराम् ॥१२९॥
सायं स स्वामिनं[14] पृष्ट्वा श्मशाने प्रतिमां व्यधात् । बहिर्गतेन दृष्टश्च ब्रह्मणा **सोमशर्मणा** ॥१३०॥
**सोमशर्मा**ऽचिन्तयच्च यत्पाखण्डचिकीरयम् । विडम्बनाय मत्पुत्रीमुपयेमे दुराशयः ॥१३१॥
इति क्रुधस्तच्छिरसि **सोमशर्मा** विरुद्धधीः । ज्वलच्चिताङ्गारपूर्णं घटीकण्ठमतिष्ठिपत्[15] ॥१३२॥
ते[16]नौऽतिदह्यमानोऽपि सोऽधिसेहे समाहितः । दग्धकर्मेन्धनो जातकेवलश्च ययौ शिवम् ॥१३३॥

१. **भद्रिल०** खं. १-२, ला०सू० । २. **०वास्तव्याः सु०** मु० र० । ३. **तिलाऽपि हि** ला० । ते कथं कृष्णस्य सदृशाः ? एवं तु तिलाः अपि तिलस्य सदृशाः न भवन्ति । ४. जीवन्तोऽष्टौ सुता यस्याःसाऽहम् । ५. सुताः । ६. **सा तथा तत्र** मु०, खं. १-२, ला० । ७. **०त्प्रस्तव०** मु० र० । ८. **दृष्टाश्च** मु० र० । ९. ११५ श्लोकः खं० २ प्रतौ न । १०. ज्येष्ठभ्रातरः । ११. **कलविंक्येव** सू० । कोकिला, तदपत्यानि काक्या लाल्यन्त इति लोकोक्तिः । १२. नैगमेषिणः वचनात् पश्चात् । १३. आज्ञायाः । १४. **स्वामिनं दृष्ट्वा** खं. १ । **स्वामिनिर्दिष्टः** खं. २ । १५. स्फुटितघटकण्ठम्, **०मतिष्ठपत्** मु० । १६. **तेनाथ दह्य०** ता०सं०विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶प्रातश्चचाल **कृष्णो**ऽपि रथस्थः सपरिच्छदः। द्रष्टुं **गजसुकुमाल**मुत्कण्ठापूर्णमानसः ॥१३४॥
निर्गच्छन् **द्वारकायाश्च** बहिरैक्षिष्ट स द्विजम्। वहन्तमिष्टकां मूर्ध्ना वृद्धं देवालयं प्रति ॥१३५॥
तस्याऽनुकम्पया **कृष्ण** [1]आपाकात् स्वयमिष्टकाम्। निन्ये देवकुले तस्मिन् लोकोऽनैषीच्च कोटिशः ॥१३६॥
कृतार्थं तं द्विजं कृत्वा ययौ **नेमिं जनार्दनः**। न चाऽपश्यद् **गजं** तत्र मुक्तं निधिमिवाऽऽत्मना ॥१३७॥
क्व मे भ्राता **गज** इति पप्रच्छ स्वामिनं **हरिः**?। **सोमद्विजाद्** **गज**मोक्षमाचख्यौ भगवानपि ॥१३८॥
ततो मुमूर्छ **गोविन्दो** लब्धसंज्ञः पुनः प्रभुम्। पप्रच्छ भ्रातृवधको ज्ञातव्यः स कथं मया ? ॥१३९॥
भगवानप्यभाषिष्ट मा कुपः **सोमशर्मणे**। त्वद्भ्रातुः स हि सहायः[2] सद्यो मोक्षस्य साधने ॥१४०॥
सिद्धिः स्याच्चिरसाध्यापि सहायवशतः क्षणात्। यथा त्वयाऽद्य वृद्धस्य ब्राह्मणस्येष्टकार्पणात् ॥१४१॥
**सोमशर्मा** न कुर्याच्चेत् कर्म त्वद्भ्रातुरीदृशम्। तत्कथं तस्य सिद्धिः स्यात् कालक्षेपं विनैव हि ? ॥१४२॥
स्वैमुद्वन्द्वं[3] व्रजंस्त्वां च विशन्तं पुरि वीक्ष्य यः। भिन्नमूर्धा म्रियते तं जानीथा भ्रातृघातकम् ॥१४३॥
ततः **कृष्णो** रुदन् भ्रातुः संस्काराद्यकरोत् स्वयम्। प्राविशच्च पुरीं **सोम**मैक्षिष्ट च तथा मृतम् ॥१४४॥
बन्धयित्वा पादयोस्तं पुर्यामभ्रमयन्नरैः। बहिश्च क्षेपयामास गृध्रादीनां नवं बलिम् ॥१४५॥
¶तेन शोकेन **यदवो** बहवो **नेमि**सन्निधौ। प्रवव्रजुर्दशार्हाश्च **वसुदेवं** विना नव ॥१४६॥
**शिवा** च स्वामिनो माता सप्त चापि सहोदराः। अन्येऽपि **हरि**कुमाराः प्राव्रजन्नन्तिके प्रभोः ॥१४७॥
**राजीम**त्यपि संविग्ना प्राव्राजीत् स्वामिनोऽन्तिके। **नन्दकन्यैकनाशा** च बह्व्यश्चाऽन्या यदुस्त्रियः ॥१४८॥
कन्योद्वाहप्रत्याख्यानाभिग्रहं **हरि**राददे। सर्वा दुहितरस्तस्य प्राव्रजन् स्वामिनोऽन्तिके ॥१४९॥
विना च **कनकवतीं रोहिणीं देवकीं** तथा। **वसुदेवस्य** पत्न्योऽपि प्राव्रजन्**नेमि**सन्निधौ ॥१५०॥
¶गृहेऽपि **कनकवत्याश्चि**न्तयन्त्या भवस्थितिम्। उत्पेदे केवलज्ञानं सद्यस्त्रुटितकर्मणः ॥१५१॥
**नेमि**ना ज्ञापितैर्देवैः सा क्लृप्तमहिमा ततः। प्रव्रज्यां स्वयमादत्त ययौ च स्वामिनोऽन्तिके ॥१५२॥
दृष्ट्वा **नेमिं** वनेऽगच्छद् दिनानि त्रिंशतं ततः। विहितानशना मृत्वा मोक्षं **कनकव**त्यगात् ॥१५३॥
¶**नैषधिः**[4] **सागरचन्द्रो रामपौत्रो** विरक्तधीः। अणुव्रतधरोऽग्रेऽपि तदाऽभूत् प्रतिमाधरः ॥१५४॥
बहिर्गत्वोपशमशानं कायोत्सर्गं ददौ च सः। **नभःसेनेन** दृष्टश्च तच्छिद्रान्वेषिणा सदा ॥१५५॥
तमूचे च **नभःसेनः** पाखण्डिन्! किं करोष्यदः ?। लभस्व **कमलामेला**हरणच्छेद्मनः[5] फलम् ॥१५६॥
इत्युक्त्वा तस्य शिरसि निधाय घटकण्ठकम्। अपूरयच्चिताङ्गारै**र्नभःसेनो** दुराशयः ॥१५७॥
तत्सम्यगधिसह्याऽऽशु विपन्नः **सागरः** सुधीः। स्मृतपञ्चपरमेष्ठिनमस्कारो[6] दिवं ययौ ॥१५८॥
¶सदस्यूचेऽन्यदा **शक्रो** यत् **कृष्णो** गुणकीर्तनम्। दोषान् विहाय कुरुते नीचयुद्धैर्न युध्यते ॥१५९॥
तद्वचोऽश्रद्दधत् कश्चिदागाद् **द्वारवतीं** सुरः। तदा च स्वेच्छया रन्तुं रथस्थः प्राचल**द्धरिः** ॥१६०॥
विचक्रे तेन देवेन कृष्णाङ्गः श्वा मृतः पथि। दुर्गन्धेनाऽखिलं लोकं बाधमानोऽतिदूरतः ॥१६१॥
तं प्रेक्ष्य **केशवो**ऽवोचदहो! कृष्णतनोः शुनः। अस्याऽऽस्ये पाण्डुरा दन्ताः शोभन्ते सुतराममी ॥१६२॥
देवोऽथाऽश्वहरीभूयाऽश्वरत्नं[7] **शार्ङ्गिणो**ऽहरत्। प्रधावितानन्पदं **कृष्ण**सैन्यान् जिगाय च ॥१६३॥
ततोऽधावत् स्वयं **कृष्णो** नेदीयान[8]ब्रवीच्च तम्। किं हरस्यश्वरत्नं मे ? मुञ्चेदानीं क्व यासि भोः !? ॥१६४॥
देवोऽप्युवाच मां युद्धे विजित्याऽश्वं गृहाण भोः !। **कृष्णो**ऽप्यूचे रथं तर्हि त्वमादत्स्व रथी ह्यहम् ॥१६५॥
देवोऽप्युवाच पर्याप्तं रथेनेभादिना च मे। युद्धैश्च बाहुयुद्धाद्यैः कुरु किन्तु पुताहवम्[9] ॥१६६॥
प्रत्यभाषत **गोविन्दो** जितोऽस्मि नय वाजिनम्। न जातु नीचयुद्धेन युध्ये [10]सर्वात्ययेऽपि हि ॥१६७॥

१. यत्र इष्टकाः पच्यन्ते तत् स्थानं आपाकमिति कथ्यते तस्माद् (नींभाडो); **आदाय** ला२० खं० १, सू० । २. **सहायी** खं० १। ३. **समु०** खं. १। ४. निषधपुत्रः। ५. कपटस्य। ६. **स्मृत्वा पञ्च०** खं० २। ७. अश्वापहारकः। ८. समीपम्। ९. **युतावहम्** ला.१, खं.१, ला०सू० विना, कटिप्रोथौ, "पुतौ स्फिजौ कटिप्रोथौ" [अभिचि० कां० ३ श्लो० ६०९]भाषायां 'धगडा कुला' इति ख्यातम्। १०. सर्वनाशेऽपि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुष्टोऽथ सोऽमरः **शक्र**वृत्तान्ताख्यानपूर्वकम् । वरं वृणु महाभागेत्यवोचत **जनार्दनम्** ॥१६८॥
¶देवं **कृष्णो**ऽप्यभाषिष्ट सम्प्रति **द्वारिका** पुरी । रोगोपसर्गैर्बहुला तच्छान्त्यै किञ्चिदर्पय ॥१६९॥
**कृष्णा**याऽदात् सुरो भेरीमाख्यच्च यदियं त्वया । षण्मास्यन्ते षण्मास्यन्ते[1] वादनीयाऽऽत्मनः पुरि ॥१७०॥
अस्याः श्रुतेन शब्देनोपसर्गाः प्राक्तना **हरे** ! । क्षयं यास्यन्त्यथ नवा[2] षण्मासीं नैव भाविनः ॥१७१॥
इत्युक्त्वा स ययौ देवस्तां भेरीं **केशवो**ऽपि हि । तथैव वादयामास [3]रुक्शान्तिश्चाऽभवत् पुरि ॥१७२॥
भेरीख्यातिमथ श्रुत्वा कोऽपि दाहज्वरार्दितः । आगाद् देशान्तरादाढ्यो भेरीपालमुवाच च ॥१७३॥
द्रव्यलक्षं गृहाणेदमुपकाराय मेऽनघ ! । भेरीखण्डं पलमात्रं विश्राणय कृपां कुरु ॥१७४॥
भेरीपालोऽप्यर्थलुब्धस्तत्खण्डं तस्य दत्तवान् । भेरीं[4] चन्दनखण्डेनाऽपूरिष्ट[5] श्लिष्टसन्धिना ॥१७५॥
सोऽन्येभ्योऽपि ददावेवमर्थलुब्धस्तथा यथा । चन्दनच्छेदकन्थाऽभूत् सा भेरी मूलतोऽपि हि ॥१७६॥
¶अन्यदा त्वशिवे जाते **शाङ्र्गभृत्** तामवादयत् । सभामपि न तन्नादो[6]ऽभ्यगान्मशकनादवत् ॥१७७॥
किमेतदिति **कृष्णेन** पृष्टाः प्रत्ययिता नराः । कन्थीकृतां रक्षकेण तां भेरीमाचचक्षिरे ॥१७८॥
तमारक्षमहन् **कृष्णो** भेरीमन्यां ततोऽमरात् । लेभे चाष्टमभक्तेन महद्भिः किं दुरासदम् ? ॥१७९॥
¶तां भेरीं वादयामास रोगशान्त्यै **जनार्दनः** । वैद्यावप्यादिशद् **धन्वन्तरिं वैतरणिं**[7] तथा ॥१८०॥
तत्र **वैतरणि**र्भव्यश्चिकित्सा यस्य योचिता । तामाख्यायाऽकरोत् तस्य ददौ स्वमपि भेषजम्[8] ॥१८१॥
**धन्वन्तरि**स्तु विदधे चिकित्सां पापसंयुताम् । अस्माकं विहितं नेदमिति तं साधवोऽभ्यधुः ॥१८२॥
सोऽपि प्रतिबभाषे तान् साधुयोग्यो मया न हि । आयुर्वेदः कोऽप्यपाठि मा स्म कृध्वं वचो मम ॥१८३॥
एवं द्वावपि तौ वैद्यौ पुर्यां तत्राऽचिकित्सताम् । श्री**नेमिं** चान्यदाऽपृच्छत् **कृष्णः** क्व गतिरेतयोः ? ॥१८४॥
अथाऽऽचचक्षे भगवान् सप्तम्यां नरकावनौ । **अप्रतिष्ठान**मावासं वैद्यो **धन्वन्तरि**र्गमी ॥१८५॥
वैद्यो **वैतरणि**[9]**र्विन्ध्य**वने भावी प्लवङ्गमः[10] । उद्यौवनो यूथपतिस्तत्रैव च भविष्यति ॥१८६॥
वने तत्रैकदा सार्थेनाऽऽगमिष्यन्ति साधवः । तेष्वेकः श्रमणः पादे [11]भग्नशल्यो भविष्यति ॥१८७॥
प्रतीक्ष[12]माणान् सोऽन्यर्षीन् वक्ष्यत्येवं यदत्र माम् । मुक्त्वा याताऽन्यथा सर्वे सार्थभ्रष्टा मरिष्यथ ॥१८८॥
तं छायास्थण्डिले मुक्त्वा ते प्रयास्यन्ति साधवः । तत्पादशल्यमाक्रष्टुमक्षमा दीनचेतसः ॥१८९॥
¶कपियूथपतिः सोऽपि तत्रै[13]ष्यत्यथ तं मुनिम् । दृष्ट्वा किलि[14]किलारावं करिष्यन्त्यग्रवानराः ॥१९०॥
तत्रादरुष्टो यूथेशः सोऽग्रे स्थास्यति तमृषिम् । प्रेक्ष्य ध्यास्यति कुत्रेदृग्जनं वीक्षितपूर्व्यहम् ॥१९१॥
स्मरिष्यति ततः पूर्वजातिं स्वां तच्च वैद्यकम् । **गिरेर्विशल्या-रोहिण्या**वानेष्यत्यौषधी ततः ॥१९२॥
**विशल्यां** दशनैः पिष्ट्वा पादे तस्य निधास्यति । सद्यो विशल्यं तत्पादं **रोहिण्या** रोहयिष्यति ॥१९३॥
**द्वारवत्यां वैतरणि**र्वैद्योऽभूवं पुरा ह्यहम् । लिखि[15]ष्यत्यक्षराण्येवं मुनेस्तस्य पुरश्च सः ॥१९४॥
तच्चरित्रं श्रुतपूर्वी मुनिर्धर्मं गदिष्यति । त्र्यहं कृत्वा कपिः प्रायं[16] **सहस्रारे** गमि[17]ष्यति ॥१९५॥
स द्रक्ष्यत्यवधिज्ञानात् प्रायस्थस्याऽऽत्मनः शवम् । नमस्कारान् प्रयच्छन्तमभ्यर्णस्थं मुनिं च तम् ॥१९६॥
भक्तिमानमरस्तं च मुनिं नत्वा वदिष्यति । त्वत्प्रसादेन देवर्द्धिर्महतीयं[18] ममाऽभवत् ॥१९७॥
स्वसाधुभिस्तं च साधुं स नीत्वा योजयिष्यति । स साधुस्तां कपिकथां साधूनां कथयिष्यति ॥१९८॥
तच्छ्रुत्वा श्रद्दधद्धर्मं **नेमिं** नत्वा ययौ **हरिः** । विहर्तुमन्यतोऽगच्छत् ततश्च भगवानपि ॥१९९॥

१. **वादनीया, रोगहार्यात्मनः पुरि** खं. २ । २. नवीनोपसर्गाः । ३. **रोगशान्त्यै जनार्दनः** ला० । ४. **भेरी** खं० १, ला.सू. विना । ५. **०पूरिष्टाऽश्लिष्ट०** खं० २ । ६. **०त्यगा०** खं० २ विना । ७. **धन्वन्तरिवैतरणी** मु० । **०वैतरणीं** खं० १, ला०सू० । **०वैतरिणीं** खं० २ । ८. **भैषजम्** ला० । ९. **वैतरणी विन्ध्य०** खं० २ । १०. वानरः ॥ ११. भग्नकण्टकः । १२. **प्रतीक्ष्यमाणान्** खं०१-२, ला०सू०मु० । १३. **तत्रैष्यति परिभ्रमन् । करिष्यति किलकिलां मुनिं दृष्ट्वाग्रवानराः** ला० १ । १४. **कलकला०** ला० । १५. **लेखि०** खं० १, ला०सू० । १६. अनशनम् । १७. **भविष्यति** ला० । १८. **०र्महती मम चाऽभवत्** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶अन्यदा प्रावृडारम्भे जगदाप्यायको[1]ऽब्दवत्[2] । **द्वारिकायां नेमिनाथ** उपेत्य समवासरत् ॥२००॥
शुश्रूषमाणस्तं **कृष्णो** बभाषे भगवन् ! कथम् । विहरध्वे[3] न वर्षासु यूयमन्येऽपि साधवः ? ॥२०१॥
स्वामी बभाषे वर्षासु नानाजीवाकुला मही । जीवाभयप्रदास्तत्र सञ्चरन्ति न साधवः ॥२०२॥
**कृष्णो**ऽप्युवाच यद्येवं गच्छदागच्छता मया । भूयान् जीवक्षयो भूयः[4]परिवारेण जायते ॥२०३॥
तद्वर्षासु बहिर्गेहान्निःसरिष्यामि न ह्यहम् । अभिगृह्येति गत्वा च **कृष्णो** वेश्माऽविशन्निजम् ॥२०४॥
कस्यापि प्रावृषं यावत् प्रवेशो मम वेश्मनि । न प्रदेय इति द्वाःस्थानादिदेश च **शाङ्र्गभृत्** ॥२०५॥
¶**वीरो** नाम कुविन्दोऽभूत् पुर्यां तत्राऽति[5]वैष्णवः । **कृष्णं** विलोक्याऽर्चित्वा च बुभुजे नान्यथा तु सः ॥२०६॥
प्रवेशं सोऽलभमानस्तदा च **हरि**सद्मनि । द्वारस्थो **हरि**मुद्दिश्य पूजां चक्रे दिने दिने ॥२०७॥
कदापि न च सोऽभुक्त **विष्णो**रनवलोकनात् । व्यतीतासु च वर्षासु निर्ययौ वेश्मतो **हरिः** ॥२०८॥
उपातिष्ठन्त सर्वे तं राजानो **वीरक**श्च सः । किं कृशोऽसीति पप्रच्छ **वासुदेवो**ऽपि **वीरकम्** ? ॥२०९॥
द्वाःस्थास्तस्य यथावस्थां शशंसुः कार्श्यकारणम् । **कृष्णो**ऽप्यस्खलितं चक्रे सकृपस्तं स्ववेश्मनि ॥२१०॥
¶ततश्च वन्दितुं **नेमिं कृष्णो**ऽगात् सपरिच्छदः । यतिधर्मं च शुश्राव स्वामिनं चेत्यभाषत ॥२११॥
न श्रामण्यक्षमोऽस्मीश ! तथापि नियमोऽस्तु मे । अन्यैर्ग्राहयितुं दीक्षां तथाताननुमोदितुम् ॥२१२॥
प्रव्रजिष्यति यः कश्चिद्वारयिष्याम्यहं न तम् । पुत्रस्येव करिष्ये च तस्य निष्क्रमणोत्सवम्[6] ॥२१३॥
अभिगृह्येत्यगाद् विष्णुर्विवाह्या[7] नन्तुमागताः । ऊचे स्वकन्याः स्वामिन्यो दास्यः किं वा भविष्यथ ? ॥२१४॥
ता अप्यूचुर्भविष्यामः स्वामिन्य इति **शार्ङ्गिणम्** । **शार्ङ्ग्यप्यूचे नेमि**पार्श्वे तर्हि प्रव्रजताऽनघाः ! ॥२१५॥
इति प्राव्राजयत् कन्या विवाहार्हाः क्रमेण सः । राज्ञ्येका चान्यदा प्रोचे स्वां सुतां **केतुमञ्जरीम्** ॥२१६॥
पृष्टा तातेन वत्से ! त्वं भाषेथा अविशङ्कितम् । अहं दासीभविष्यामि न पुनः स्वामिनी प्रभो ! ॥२१७॥
विवाहयोग्या सा मात्रा प्रेषिता पितुरन्तिके । ययौ तथोचे पित्रा च साऽप्यूचे मातृशिक्षितम् ॥२१८॥
**कृष्णो**ऽपि दध्यौ मत्पुत्र्योऽप्यटिष्यन्ति भवाटवीम् । विमाननां[8] च प्राप्स्यन्ति सर्वथा तन्न साम्प्रतम्[9] ॥२१९॥
यथा नैवं वदन्त्यन्यास्तथाऽस्त्विति धिया **हरिः** । **वीरं** कुविन्दमवदत् प्रकृष्टं किं कृतं त्वया ? ॥२२०॥
प्रकृष्टं न मया[10] चक्रे किञ्चित् तमिति वादिनम् । ऊचे **हरि**स्तथापि त्वं विचिन्त्याऽऽख्याहि किञ्चन ॥२२१॥
बभाषे **वीरको**ऽप्येवं बदरीस्थो मया पुरा । कृकलासो[11]ऽश्मना[12] हत्वा पतितश्च मृतश्च सः ॥२२२॥
रथाङ्ग[13]कृतरेखायां मार्गे तोयं वहन्मया । धृतं वामांह्रिणाऽऽक्रम्य तच्च दूरमपासरत् ॥२२३॥
वस्त्रपानघटस्याऽन्तः प्रविष्टा मक्षिका मया । द्वारे वामकरं दत्त्वा रणन्त्यो विधृताश्चिरम् ॥२२४॥
¶आस्थानस्थो द्वितीयेऽह्नि **कृष्णो** राज्ञां पुरोऽवदत् । स्वकुलस्याऽननुरूपं चरितं **वीरक**स्य भोः ! ॥२२५॥
सावधानास्ततस्तेऽपि **कृष्णं** जीवेति भाषिणः । श्रोतुमारेभिरे भूयः **कृष्णो**ऽप्येवमभाषत ॥२२६॥
येन रक्तस्फटो[14] नागो[15] निवसन् बदरीवणे[16] । निजघ्ने भूमिशस्त्रेण[17] वेमतिः[18] क्षत्रियो ह्ययम् ॥२२७॥
चक्रोत्खाता येन गङ्गा वहन्ती कलुषोदकम् । धारिता वामपादेन वेमतिः क्षत्रियो ह्ययम् ॥२२८॥
येन घोषवती सेना वसन्ती कालसीपुरे । निरुद्धा वामहस्तेन वेमतिः क्षत्रियो ह्ययम् ॥२२९॥
योग्यो ममाऽयं जामाता सुव्यक्तपुरुषव्रतः । इत्युक्त्वा **वीरकं** स्माऽऽह गृह्यतां **केतुमञ्जरी** ॥२३०॥
¶सोऽनिच्छन् भ्रुकुटिं कृत्वा **कृष्णे**नोक्तस्तु तत्सुताम् । परिणीय गृहे निन्ये **वीरकः केतुमञ्जरीम्** ॥२३१॥
शय्याधिरूढा तस्थौ च तद्गृहे **केतुमञ्जरी** । तदादेशकरश्चाऽऽसीद्**वीरको**ऽपि दिवानिशम् ॥२३२॥
किं **केतुमञ्जर्या**ज्ञां ते करोतीति च **शार्ङ्गिणा** । पृष्टोऽन्यदाऽवदद् **वीर**स्तदाज्ञाकारको ह्यहम् ॥२३३॥

१. जगत्तृप्तिकरः । २. मेघवत् । ३. **विहरध्वं** ला० । ४. **भूरिपरिवारेण** ला० । ५. कृष्णभक्तः । ६. दीक्षामहोत्सवम् । ७. परिणयाय योग्याः । ८. अपमानम् । ९. युक्तम् । १०. **मयाऽकारि** खं.२, ला० । ११. सरटः 'भाषायां 'काचंडो' इति ख्यातम् । १२. पाषाणेन । १३. रथचक्रेण कृतायां रेखायाम् । १४. रक्ता स्फटा फणा यस्य सः । १५. सरटः भाषायां 'सरडो' । १६. **बदरीवने** ला० पा० मु० । १७. पाषाणेन । १८. तन्तुवायः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कृष्णो**ऽपि हि बभाषे तं कर्म सर्वं न चेन्निजम् । प्रसह्य[1] तां कारयसि तत्त्वं [2]गुप्तौ प्रवेक्ष्यसि ॥२३४॥
**कृष्णा**शयज्ञो **वीरो**ऽपि गत्वोचे **केतुमञ्जरीम्** । पानं कुरुष्व वस्त्रार्थे किमासीनैव तिष्ठसि? ॥२३५॥
कोलि[3]कस्त्वं न वेत्सीति विब्रुवाणां च तां क्रुधा । **वीरक**स्ताडयामास निःशङ्कं तुरिरज्जुभिः ॥२३६॥
रुदती सा पितुर्गत्वा तमा[4]ख्यत् स्वं पराभवम् । **कृष्णो**ऽप्यूचे त्वया स्वाम्यं त्यक्त्वा दास्यं हि याचितम् ॥२३७॥
साऽवदत् तर्हि मे स्वाम्यमधुनाऽपि प्रयच्छत । **कृष्णो**ऽवदद् **वीरक**स्य वशेऽसि न ममाऽधुना ॥२३८॥
सनिर्बन्धं तयो[5]ऽथोक्तः **कृष्णो** वारित**वीरकः** । नीत्वा प्रव्राजयामास तां **नेमि**स्वामिसन्निधौ ॥२३९॥
¶अन्यदा सर्वसाधूनां द्वादशावर्तवन्दनम् । **कृष्णो** ददौ नृपास्त्वन्ये नि[6]र्विण्णास्त्ववतस्थिरे ॥२४०॥
सर्वेषामपि साधूनां **वासुदेवा**नुवर्तनात् । तत्पृष्ठतो **वीरको**ऽदाद् द्वादशावर्तवन्दनम् ॥२४१॥
बभाषे स्वामिनं **कृष्णः** ष[7]ष्ट्यग्रत्रिशताहवैः । न तथाऽहं परिश्रान्तो वन्दनेनाऽमुना यथा ॥२४२॥
सर्वज्ञोऽप्यवदत् **कृष्ण** ! बह्वद्य भवताऽर्जितम् । पुण्यं क्षायिकसम्यक्त्वं तीर्थकृन्नामकर्म च ॥२४३॥
उद्धृत्य सप्तमावन्यास्तृतीयनरकोचितम् । आयुर्बद्धं त्वया प्रान्ते करिष्यसि नि[8]काचितम् ॥२४४॥
**कृष्णो**ऽप्युवाच भगवन् ! पुनर्यच्छामि वन्दनम् । नरकायुर्यथा प्राग्वन्मम त्रुटति मूलतः ॥२४५॥
स्वाम्यूचे धर्मशीलो[9]ऽतो भवेत् ते द्रव्यवन्दनम् । फलं तु प्राप्यते भाववन्दनादन्यथा न तु ॥२४६॥
**वीरक**स्य फलं **कृष्णे**नाऽनु[10]र्युक्तोऽवदत् प्रभुः । फलमस्य वपुःक्लेशस्त्वच्छ[11]न्दाद् वन्दते ह्यसौ ॥२४७॥
भगवन्तं नमस्कृत्य भावयन् भगवद्वचः । जगाम **द्वारकापुर्यां कृष्णो**ऽथ सपरिच्छदः ॥२४८॥
¶**कृष्ण**स्य **ढण्ढणा**पत्न्यां कुमारो **ढण्ढणा**भिधः । उद्यौवनः पर्यणैषीद् बह्वीर्नृपकुमारिकाः ॥२४९॥
सोऽन्यदा **स्वामिनः** पार्श्वे श्रुत्वा धर्मं विरक्तधीः । दीक्षामुपाददे पित्रा कृतनिष्क्रमणोत्सवः ॥२५०॥
विजह्रे स्वामिना सार्धं [12]साधूनां च मतो[13]ऽभवत् । एवं च तिष्ठतस्तस्योदगात् कर्माऽन्तरायकम् ॥२५१॥
यत्र यत्र ययौ तत्र तत्राऽऽप न स किञ्चन । समं तेन ययुर्ये च मुनयोऽपि तथैव ते ॥२५२॥
ततस्ते साधवो **नेमिनाथा**येदं व्यजिज्ञपन् । शिष्यस्त्रैलोक्यनाथस्य पुत्रः **कृष्ण**स्य **ढण्ढणः** ॥२५३॥
महेभ्यधार्मिकोदारजनायामपि पुर्यसौ । भिक्षामपि न लभते स्वामिन् ! किं तत्र कारणम् ? ॥२५४॥
¶स्वाम्याख्यन् **मगधे**ष्वासीद् **धान्यपूरक**नामनि । ग्रामे पुरा नृपायुक्तो नाम्ना विप्रः **पराशरः** ॥२५५॥
राजक्षेत्राणि स ग्रा[14]म्यैरवापयदथाऽन्यदा । प्राप्तेऽपि भोजने ग्राम्यान् भोजनायाऽमुचन्नहि ॥२५६॥
क्षुधितैस्तृषितैः श्रान्तैर्वृषभै[15]र्हालिकैश्च सः । अकर्षयद् [16]हलान् क्षेत्रे [17]सीतामेकां पृथक् पृथक् ॥२५७॥
कर्माऽन्तरायमर्जित्वा मृत्वा भ्रान्त्वा भवं च सः । **ढण्ढणो**ऽयमभूत् तच्च कर्मैतस्याऽधुनोदितम् ॥२५८॥
तच्छ्रुत्वा जातसंवेगो **ढण्ढणः** स्वामिनोऽन्तिके । परलब्ध्या न भोक्ष्येऽहमित्यभिग्रहमग्रहीत् ॥२५९॥
सहमानो **ढण्ढण**र्षिस्तमलाभपरीषहम् । अभुञ्जानः परलब्ध्या कालं कमपि सोऽनयत् ॥२६०॥
¶**वासुदेवो**ऽन्यदाऽपृच्छन्**नेमिनाथं** सभास्थितम् । मध्येऽमीषां महर्षीणां को हि दुष्करकारकः ? ॥२६१॥
स्वाम्याख्यद् दुष्करकराः सर्वेऽमी **ढण्ढण**स्त्वति । इयन्तं योऽत्यगात् कालं सोढाऽलाभपरीषहम् ॥२६२॥
ततो नत्वा प्रभुं **कृष्णः** प्रविशन् **द्वारका**[18]**पुरीम्** । अपश्यड्**ढण्ढणं** साधुं यान्तं गोचरचर्यया ॥२६३॥
गजादुत्तीर्य **कृष्ण**स्तं नमश्चक्रेऽतिभक्तितः । दृष्ट्वैकश्रेष्ठिनाऽचिन्ति धन्यः **कृष्णेन** यो नतः ॥२६४॥
विहरन् **ढण्ढणो**ऽप्यागात् तस्यैव श्रेष्ठिनो गृहे । मोदकैर्बहुमानेन स तु[19] तं प्रत्यलाभयत् ॥२६५॥
**ढण्ढणो**ऽप्येत्य सर्वज्ञं नत्वा चैवं व्यजिज्ञपत् । कर्माऽन्तरायकं किं मे क्षीणं भिक्षां यदा[20]ऽप्नवम् ? ॥२६६॥

---

१. हठात् । २. कारागारे । ३. तन्तुवायः । ४. **तमाख्यच्च** खं० १, सू० । **तमाख्यात् स्वं परा०** ला० । ५. **तया प्रोक्तः** मु० र० । ६. **निर्वीर्यास्त्वव०** खं० २, की० मु० । ७. ३६० युद्धैः । ८. **निकाचनम्** खं० २ । ९. हे धर्मशील ! अतः परम् । १०. पृष्टः । ११. त्वदनुसरणात् । १२. **बहूनां** मु० । १३. मान्यः । १४. ग्रामे भवा ग्राम्याः तैः । १५. कृषीवलैः । १६. **बलात्** खं० १-२ विना । १७. क्षेत्रे हलकृता रेखा सीता कथ्यते भाषायां 'चास' इति । १८. **द्वारकां** खं० १, ला.सू० । १९. **स च** खं० १, सू० । २०. **यदाप्नुवम्** खं० १-२, ला० सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वाम्यूचे नाऽन्तरायं ते क्षीणं लब्धिस्त्वियं **हरेः** । **हरिणा** वन्दितोऽसीति श्रेष्ठी त्वां प्रत्यलाभयत् ॥२६७॥
रागादिरहितः सोऽथ परलब्धिरसाविति । परिष्ठापयितुं भिक्षां प्रारेभे स्थण्डिलावनौ ॥२६८॥
पूर्वार्जितानि कर्माणि जीवानां दुःक्षयाण्यहो ! । इति स्थिरध्यानजुष उत्पेदे तस्य **केवलम्** ॥२६९॥
**नेमिं** प्रदक्षिणीकृत्य ततः केवलिपर्षदि । **ढण्ढणर्षि**रुपाविक्षत् पूजितस्त्रिदशैरपि ॥२७०॥
¶विजह्रे भगवा**न्नेमि**ग्रामा-ऽऽकर-पुरादिषु । भूयो भूयो **द्वारकायां** पुर्यां च समवासरत् ॥२७१॥
तत्रैकदा स्थिते नाथेऽकस्माद् वृष्टिरजायत । भिक्षां भ्रान्त्वा **रथनेमिः** प्रतिस्वामि[1] चचाल च ॥२७२॥
प्रविवेश गुहां चैकां तया वृष्ट्या स विद्रुतः । वन्दित्वा स्वामिनं **राजीमती** चापि न्यवर्तत ॥२७३॥
साध्व्यस्तत्सहचर्योऽथ वृष्टिभीताः प्र[2]दुद्रुवुः । **राजीमती** गुहां तां तु विवेशाऽजानती सती ॥२७४॥
प्राक्प्रविष्टमपश्यन्ती **रथनेमिं** तमोवशात् । उद्वापयितुममुचद् वस्त्राण्यूर्ध्वस्थिता तु सा ॥२७५॥
**रथनेमि**र्विवस्त्रां तां प्रेक्ष्य कामार्दितोऽवदन् । पुराऽपि प्रार्थिताऽभूस्त्वं [3]सम्भोगावसरोऽधुना ॥२७६॥
**रथनेमिं** स्वराज्ज्ञात्वा गोपिताङ्गा झगित्यपि । बभाषे "युज्यते नेदृक् कदाचित् कुलजन्मनाम् ॥२७७॥
सर्वज्ञस्याऽनुजोऽसि त्वं शिष्यस्तस्यैव तत् तव । अद्यापि केयं बुद्धिर्भो ! लोकद्वयविरोधिनी ? ॥२७८॥
सर्वज्ञशिष्या भूत्वा ते पूरयिष्ये न वाञ्छितम् । वाञ्छयाऽप्यनया तु त्वं पतिष्यसि भवार्णवे ॥२७९॥
'चैत्यद्रव्यद्रुतिः साध्वीशीलभङ्गर्षिघातने । तथा प्रवचनोड्डाहे मूलाग्निर्बोधिशाखिनः' ॥२८०॥
प्र[4]विशन्ति वरं घोरे ज्वलितेऽपि हुताशने । वान्तं भोक्तुं न इच्छन्ति कुले जाता अगन्धने ॥२८१॥
धिगस्तु ते यशस्कामिन् ! यस्त्वं जीवितकारणात् । पातुं समीह[5]से वान्तं श्रेयस्ते मरणं खलु ॥२८२॥
सुताऽहं **भोजराजस्याऽन्धकवृष्णे**र्भवान् सुत[6]ः । मा कुले गन्ध[7]नौ भू[8]व संयमं निभृतश्चर ॥२८३॥
नारीदर्शं स्पृहयसि यदि त्वं मदनातुरः । वाताहतो [9]हड इवाऽस्थि[10]तात्मा तद्भविष्यसि" ॥२८४॥
तयैवं बोधितः सोऽपि पश्चात्तापपरो मुहुः । सर्वां विमुच्य भोगेच्छां तीव्रं व्रतमपालयत् ॥२८५॥
प्रभोरग्रे दुश्चरितं तदालोच्य स शुद्धधीः । छद्मस्थो वत्सरं स्थित्वा **केवलज्ञान**मासदत् ॥२८६॥
¶विहत्याऽन्यत्र चान्येद्युर्भूयो **रैवतकाचले** । **श्रीनेमिः** समवासार्षीद् भव्याम्भोरुहभास्करः ॥२८७॥
**कृष्णः पालक-शाम्बादि** पुत्रानूचे यथा प्रगे । यः पूर्वं वन्दिता नाथं तस्मै दास्येऽश्वमीप्सितम् ॥२८८॥
तच्छ्रुत्वा **शाम्बकुमारः** प्रातरुत्थाय तल्पतः । गृहेऽपि तिष्ठन् भावेन **नेमिनाथ**मवन्दत ॥२८९॥
महत्यां **पालको** रात्रावुत्थाय वरवाजिना । गत्वा प्रभुमभव्यत्वाद् [11]हृद्याक्रोशन्नवन्दत ॥२९०॥
[12]**दर्पकाश्वं पालकेन** याचितो **हरि**रब्रवीत् । दास्ये तस्याऽश्वमाख्याता यं स्वामी पूर्ववन्दकम् ॥२९१॥
गत्वा च **विष्णुना** पृष्टः स्वाम्यादौ केन वन्दित[13]ः? । स्वाम्याख्यत् **पालके**नाऽऽदौ द्रव्याद् **शाम्बे**न भावतः ॥२९२॥
किमेतदिति **कृष्णेन** पृष्टे भूयोऽभ्यधात् प्रभुः । अभव्यः **पालको** ह्येष भव्यो **जाम्बवती**सुतः ॥२९३॥

[14]रथाङ्गपाणिः कुपितोऽथ **पालकं**,
तं भावहीनं निरवासयद् द्रुतम् ।
दत्त्वा यथायाचितमश्वपुङ्गवं,
**शाम्बं** महामण्डलिकं व्यधात् पुनः ॥२९४॥

॥ इत्याचार्य **श्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये [15]अष्टमे पर्वणि **द्रौपदी**प्रत्याहरण-**गजसुकुमा[16]ला**दिचरित-
वर्णनो नाम दशमः सर्गः ॥

१. **प्रतिनाथं** ला० । २. **विदुद्रुवुः** खं० १ । ३. **स भोगा०** खं० २ । ४. २८१-२८४ श्लोकानां तुलना दशवैकालिकसूत्रे द्वितीयाध्ययने ६-९ गाथाभिः करणार्हा । ५. **समीहते** खं० २ । ६. **पुनः** खं० २ । ७. **गन्धिनौ** मु० । **गन्धने** खं० १, सू० । ८. **०भूवं** खं० २ । ९. **हठ** मु० । हडः वनस्पतिविशेषः । १०. **०स्थिरात्मा** खं० २ । ११. हृदि आक्रोशं कुर्वन् । १२. **अर्पकाश्वं** ला० । १३. **वन्दिताः** खं० १, ला०सू० । १४. कृष्णः । १५. **०ऽष्टमपर्वणि** खं- १-२, ला० सू० । १६. **०सुकुमारादि०** खं० १-२, सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ एकादशः सर्गः ॥

श्रीनेमिनाथमन्येद्युर्देशनान्ते **जनार्दनः** । नमस्कृत्य विनीतात्मा पप्रच्छेति कृताञ्जलिः ॥१॥
**द्वारकाया यदूनां** च मम च स्यात् क्षयः कथम् ? । हेतोः कुतोऽप्यन्यकृतः ? स्वयं कालवशेन वा ? ॥२॥
अथाऽऽख्यद् भगवान् **शौर्यपुरस्य** बहिराश्रमे । **पराशर** इति नाम्ना प्रथितस्तापसाग्रणीः ॥३॥
कन्यां नीचकुलां काञ्चिद् **यमुनाद्वीपके** गतः । स सिषेवे सुतश्चाऽभूत् तयो**र्द्वैपायना**ह्वयः ॥४॥
परिव्राट् ब्रह्मचारी च दान्तश्च **यदुसौहृदात्** । निवसंस्तत्र **शाम्बाद्यै**र्मद्यान्धैर्निहनिष्यते ॥५॥
स क्रुद्धो धक्ष्यति पुरीं **द्वारकां यदुभिः** सह । **जरत्कुमारात्** स्वभ्रातुस्तव चाऽन्तो भविष्यति ॥६॥
अरे ! कुलाङ्गारकोऽयमित्यन्तःकलुषाशयैः । **जराकुमारो** ददृशे **यदुभिः** सकलैरपि ॥७॥
भूत्वाऽपि **वसुदेवस्य** सूनुः किं भ्रातृघात्यहम् ? । तत्सर्वथाऽन्यथा कर्तुं यतेऽहमिति चिन्तयन् ॥८॥
उत्थाय **नेमिं** नत्वा च **जारेय**[1]स्तूणयुग्मभृत् । [2]कोदण्डी **कृष्ण**रक्षार्थं वनवासमशिश्रियत् ॥९॥
**द्वैपायनो**ऽपि तच्छ्रुत्वा लोकश्रुत्या **प्रभोर्वचः** । **द्वारकाया यदूनां** च रक्षार्थं वनवास्यभूत् ॥१०॥
**कृष्णो**ऽपि स्वामिनं नत्वा विवेश **द्वारकां** पुरीम् । मद्यमूलो ह्यनर्थः स्यादिति मद्यं न्यवारयत् ॥११॥
**कृष्णा**ज्ञया समीपाद्रौ **कदम्बवन**मध्यतः । **कादम्बर्याः**[3] कन्दरायां शिलाकुण्डेषु भूरिशः ॥१२॥
पुराकृतानि मद्यानि सर्वे **द्वारवती**जनाः । गृहस्रोतोजलमिव नीत्वा नीत्वा प्रत[4]त्यजुः ॥१३॥
¶**सिद्धार्थः** सारथिर्भ्राता **बलदेव**मथाऽवदत् । पुर्याः कुलस्य चेदृक्षां कथं द्रक्ष्यामि दुर्दशाम् ? ॥१४॥
तस्मान्मां विसृज स्वामिपादान्तेऽहं यथा व्रतम् । अधुनैव हि गृह्णामि कालक्षेपं सहे न हि ॥१५॥
उदश्रुस्तं **बलो**ऽप्यूचे भ्रातर्युक्तं वदस्यदः । विस्रष्टुमक्षमेणापि विसृष्टोऽसि मयाऽनघ ! ॥१६॥
तपस्तप्त्वा विपन्नस्त्वं देवीभूतो विपद्गतम् । सम्बोधयेः समये मां भ्रातृस्नेहमिमं स्मरन् ॥१७॥
आमेत्युदीर्य **सिद्धार्थः** प्राव्राजीत् स्वामिनोऽन्तिके । षण्मासीं च तपस्तीव्रं तप्त्वा मृत्वा दिवं ययौ ॥१८॥
¶इतश्च या शिलाकुण्डेष्वासीत् क्षिप्ता सुरा जनैः । नानाद्रुपुष्पसम्पातात् तदा स्वाद्वी बभूव सा ॥१९॥
तदा च मासे वैशाखे कोऽपि **शाम्बस्य** पूरुषः । अटन् ययौ तत्र तृषा तां च दृष्ट्वा सुरां पपौ ॥२०॥
ततः स[5] मुदितस्तेन दृतिं[6]मापूर्य सीधुना[7] । ययौ वेश्मनि **शाम्बस्य** तच्चोपायनमार्पयत् ॥२१॥
तत्सीधु दृष्ट्वा सामोदं सप्रमोदो **हरेः** सुतः । पायं पायं जगादैवं कुत्र लब्धमिदं त्वया ? ॥२२॥
सोऽप्याख्यत् सीधु तत्रस्थं **शाम्बो**ऽप्यह्नि द्वितीयके । समं कुमारैर्दुर्दान्तैर्ययौ **कादम्बरीं** गुहाम् ॥२३॥
**कादम्बरी**गुहायोगात्नाम्ना 'कादम्बरीं[8]' सुराम् । तां प्रेक्ष्य **शाम्बो** मुमुदे तृषितो निम्नगामिव ॥२४॥
भृत्यैरानाय्य तां **शाम्बः** पुष्पितद्रुवनान्तरे । बद्धापानः[9] पपौ मित्र-भ्रातृ-भ्रातृव्यसंयुतः ॥२५॥
चिरात् प्राप्तेति जीर्णेति सद्द्रव्यैः संस्कृतेति च । पिबन्तस्तां सुरां ते तु न तृप्तिमुपलेभिरे ॥२६॥
¶**द्वैपायनर्षिं** ध्यानस्थमग्रे तं गिरिमाश्रितम् । ददृशुर्मद्यपानान्धाः क्रीडन्तस्ते कुमारकाः ॥२७॥
**शाम्बो** बभाषे स्वान्[10]नित्थमयं मे नगरीं कुलम् । हन्ता तद्धन्यतामेष हनिष्यति हतः कथम् ? ॥२८॥
ततस्ते कुपिताः सर्वे लेष्टुभिः पादताडनैः । चपेटाभिर्मुष्टिभिश्च तमाजघ्नुर्मुहुर्मुहुः ॥२९॥
पातितं तं महीपृष्ठे मृतप्रायं विधाय ते । ययुः पुरीं **द्वारवतीं** विविशुः स्वस्ववेश्मसु ॥३०॥

---

१. जराकुमारः । २. धनुर्धरः । ३. **कादम्बर्यां** मु० र० । ४. **नीत्वाऽथ तत्यजुः** खं० २ । ५. **प्रमुदित०** मु० २ । ६. जलपात्रम् 'मसक' इति भाषायाम् । ७. मदिरया । ८. **कादम्बरीसुराम्** खं० २ । ९. बद्धं आपानं मद्यपानगृहं येन सः । १०. स्वकीयान् यदून् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶तच्चाऽज्ञासीच्चरैः **कृष्णो** दध्यौ चैवं विषादभाक् । अहो ! दुर्दान्तताऽमीषां कुमाराणां कुलान्तकृत् ॥३१॥
ततः **कृष्णः सरामो**ऽगात् तत्र **द्वैपायनं** मुनिम् । अपश्यत् कोपरक्ताक्षं महाहिमिव दृग्विषम् ॥३२॥
महो[१]मात्र इव व्यो[२]लमतिमात्रभयङ्करम् । त्रिदण्डिनं सान्त्वयितुं तमारेभे **जनार्दनः** ॥३३॥
'क्रोध एव महाशत्रुर्यो दुःखं नेह केवलम् । प्रदत्ते किन्तु सततं जन्मलक्षेषु जन्मिनः ॥३४॥
अज्ञानैर्मद्यपानान्धैरपराद्धं ममाऽऽत्मजैः । तत्सहस्व महर्षे ! त्वममर्षो युज्यते न ते' ॥३५॥
**कृष्णे**नेत्युच्यमानोऽपि नाऽशाम्यत् स त्रिदण्डिकः । इत्यूचे च कृतं **कृष्ण** ! भवतः सौ[३]न्त्वभाषितैः ॥३६॥
त्वत्पुत्रैस्ताड्यमानेन निदानं विहितं मया । सलोकां **द्वारकां** दग्धुं न मोक्षोऽत्र [४]युवां विना ॥३७॥
**कृष्णं** न्यषेधद् **रामो**ऽपि मा बान्धव ! मुधैवं[५] हि । परिव्राजमनुनयाऽमुकं वारितं[६]वामकम् ॥३८॥
वक्रांऽह्रि-नासिका-हस्ताः स्थूलोष्ठ-रद-नासिकाः । विं[७]लक्षणाक्षा हीनाङ्गाः शान्तिं यान्ति न जातुचित् ॥३९॥
अस्मिन् खलू[८]क्त्वा तद् भ्रातर्न नाशो भाविवस्तुनः । सर्वज्ञभाषितं चापि सर्वथा नाऽन्यथा भवेत् ॥४०॥
¶ततश्च शोकसन्तप्तः **कृष्णः** स्वसदनं ययौ । **द्वैपायन**निदानं च **द्वारिका**यां प्रकट्यभूत् ॥४१॥
अघोषयद् द्वितीयेऽह्नि नगर्यामिति **शाङ्र्गभृत्** । विशेषाद् धर्मनिरतास्तिष्ठताऽतः परं जनाः ॥४२॥
तथाऽऽरेभे जनः सर्वोऽप्युपेत्य भगवानपि । **श्रीनेमिः** समवासार्षीत् तत्र **रैवतका**चले ॥४३॥
तत्र गत्वा च नन्त्वा च **कृष्णः** शुश्राव देशनाम् । जगन्मोहमहानिद्राविद्रावणरविप्रभाम् ॥४४॥
**प्र[९]द्युम्न-शाम्बौ निषध उल्मुकः सारणा**दयः । कुमाराः प्राव्रजन् केऽपि श्रुत्वा तां धर्मदेशनाम् ॥४५॥
**रुक्मिणी-जाम्बवत्याद्या** बह्व्यश्च **यदु**योषितः । स्वामिनः पादपद्मान्ते भवोद्विग्नाः प्रवव्रजुः ॥४६॥
आचख्यौ **कृष्ण**पृष्टश्च सर्वज्ञो भगवानिदम् । **द्वैपायनो** द्वादशेऽब्दे धक्ष्यति **द्वारिकां**[१०]मिमाम् ॥४७॥
¶दध्यौ च **कृष्णो** धन्यास्ते **समुद्रविजया**दयः । येऽग्रेऽपि प्राव्रजन् धिग् मां राज्यलुब्धमदीक्षितम् ॥४८॥
ज्ञात्वा तदाशयं स्वामी प्रोचे **कृष्ण** ! कदापि हि । न **शार्ङ्गिणः** प्रव्रजन्ति निदानेन कृतार्गलाः[११] ॥४९॥
गच्छन्त्यवश्यं तेऽधस्तात् त्वं गामी **वालुकाप्रभाम्** । श्रुत्वेति **कृष्णः** सद्योऽपि नितान्तं[१२]विधुरोऽभवत् ॥५०॥
भूयोऽभ्यधत्त सर्वज्ञो मा विषीद **जनार्दन** ! । तत उद्वृत्य [१३]मर्त्यस्त्वं भावी वैमा[१४]निकस्ततः ॥५१॥
च्युत्वा भाव्यत्र **भरते** [१५]**शैतद्वारपुरेशितुः** । **जितशत्रोः** सुतोऽर्हंस्त्वं द्वादशो नामतो**ऽममः** ॥५२॥[१६]
**ब्रह्मलोकं बलो** गामी मर्त्यो भावी ततश्च्युतः । ततोऽपि देवश्च्युत्वा स भाव्यत्र **भरते** पुमान् ॥५३॥
उत्सर्पिण्यां [१७]प्रसर्पन्त्यां पृथिवीश ! **जनार्दन** ! । तीर्थनाथस्य ते[१८] तीर्थे स मोक्षमुपयास्यति ॥५४॥
इत्युदित्वा जगन्नाथो विहरन्नन्यतो ययौ । तं नत्वा **वासुदेवो**ऽपि जगाम **द्वारिकां** पुरीम् ॥५५॥
¶तथैव घोषणां **कृष्णः** पुनः पुर्यामकारयत् । विशेषतो धर्मनिष्ठो लोकः सर्वो बभूव च ॥५६॥
मृत्वा **द्वैपायनो**ऽप्य**ग्निकुमारे**षूदपद्यत । सस्मार पूर्ववैरं च **द्वारका**माजगाम च ॥५७॥
चतुर्थ-षष्ठा-ऽष्टमादिरतं तत्राऽखिलं जनम् । देवपूजाप्रसक्तं चाऽपश्यद् **द्वैपायनासुरः**[१९] ॥५८॥
धर्मप्रभावतस्तत्रोपसर्गं कर्तुमक्षमः । छिद्राण्यन्वेषयन् सोऽस्थाद् वर्षाण्येकादशोग्रधीः ॥५९॥
¶[२०]प्राप्तेऽब्दे द्वादशे लोको दध्यौ यत् तपसा[२१]ऽमुना । भ्रष्टो **द्वैपायनो** नष्टो जितश्चेति रमामहे ॥६०॥
रन्तुं प्रवृत्तास्ते स्वैरं मद्यपा मांसखादिनः । लेभेऽवकाशं छिद्रज्ञस्तदा **द्वैपायनो**ऽपि हि ॥६१॥

१. गजारोहकः । २. दुष्टगजम् । ३. **शान्तभाषितैः** ला० । ४. राम-कृष्णौ । ५. **वृथैव** ला० । ६. **०मनुनयामुत्कण्ठारितवामकम्** खं० २ । वारितः निवारितः सन् वाम एव वामकः कुटिलः इति यावत्, प्रतिकूलम् । ७. विलक्षणानि अक्षाणि इन्द्रियाणि येषां ते । ८. खलुशब्दो निषेधार्थे । ९. **प्रद्युम्नः शाम्बो** खं. -२, सू० । १०. द्वारकां पुरीम् ला० । ११. कृता अर्गला यैस्ते । १२. अत्यन्तदुःखी । १३. **भावी त्वमर्हन्नत्रैव भारते** खं० २, ला० ता० सं० की० । १४. **वैमानिकः सुरः** ला० १ । १५. **गङ्गाद्वारपुरेशितुः** मु० । १६. खं०२, ला० प्रत्योर्नाऽयं श्लोकः । १७. **प्रसर्पन्त्याममममाख्यस्य केशवः** खं० १, सू० पा० ला०१ छा० पु० । **०प्रसर्पिण्यां** ला० । १८. तव कृष्णजीव-अममतीर्थङ्करस्य तीर्थे सः बलदेवजीवः मोक्षं गमिष्यति । १९. **द्वैपायनोऽसुरः** मु० र० । २०. **गतेऽब्दे** खं० २ । **प्राप्ते च** खं० १ । २१. **तपसाऽधुना** ला० पु० ला० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्पाता विविधाश्चैवं कल्पान्तोत्पातसन्निभाः । प्रादुरासन् **द्वारकाया**मन्तकद्वारदर्शिनः ॥६२॥
निपेतुरुल्का निर्घाताश्चाऽभवन् भूरकम्पत । [1]गृहाश्च मुमुचुर्धूमं धूमकेतुविडम्बकम् ॥६३॥
अङ्गारवृष्टिं विदधे सच्छिद्रं रविमण्डलम् । अकस्मादुप[2]रागश्च चन्द्र-मार्तण्डयोरभूत् ॥६४॥
अट्टहासं लेप्यमयाश्चक्रुर्वेश्मसु पुत्रिकाः । [3]उद्भ्रूका जहसुश्चापि चित्रालिखितदेवताः ॥६५॥
पुर्यन्तः श्वापदाश्चेरुः स च **द्वैपायनासुरः** । शाकिनी-भूत-वेतालादिभिः परिवृतोऽभ्रमत् ॥६६॥
स्वप्नेष्वपश्यन् पौराः स्वं [4]रक्ताम्बरविलेपनम् । पङ्कमग्नं कृष्यमाणं दक्षिणाभिमुखं तथा ॥६७॥
प्रणेशुः सीर-चक्रादिरत्नानि **बल-कृष्णयोः** । ततो विचक्रे **संवर्तं** वातं **द्वैपायनासुरः** ॥६८॥
स सर्वतोऽप्याजहार पुर्यां काष्ठ-तृणादिकम् । जनान् प्रणश्यतो दिग्भ्योऽप्यानीय न्यक्षिपत् पुरि ॥६९॥
दिग्भ्योऽष्टाभ्योऽपि वातेन तेनोन्मूलितशाखिना । अपूर्यत समग्राऽपि दारुभि**र्द्वारका** पुरी ॥७०॥
षष्टिं बाह्याः कुलकोटीर्द्वासप्ततिं तु मध्यगाः । सम्पिण्ड्य **द्वारकापुर्यां** सोऽसुरोऽग्निमदीपयत् ॥७१॥
धगद्धगिति जज्वाल क्षयानल इवाऽनलः । नीरन्ध्रैर्धूमसन्तानैर्विश्वमप्यन्धकारयन् ॥७२॥
पदमप्यक्षमा गन्तुं मिथो निगडिता इव । सबाल-वृद्धास्ते पौराः पिण्डीभूयाऽवतस्थिरे ॥७३॥
¶**वसुदेवं देवकीं** च **रोहिणीं** च रथे **हरिः** । आरोपयत् **सरामो**ऽथ तानाक्रष्टुं [5]प्रदीपनात् ॥७४॥
न चेलुस्तुरगास्तत्र न चेलुर्वृषभा अपि । सुरेण स्तम्भितास्तेन [6]वार्तिकेणेव पन्नगाः ॥७५॥
ततः स्वयं **बलोपेन्द्रौ** तमाचकृषतू रथम् । भग्नमक्षयुगं सद्यस्तडत्तडिति काण्ड[7]वत् ॥७६॥
तथापि तौ स्वसामर्थ्यात् तं द्वारे निन्यतू रथम् । पाहि हा **राम** ! हा **कृष्णे**त्याक्रन्दैर्दीनमानसौ ॥७७॥
अथ द्वारं कपाटाभ्यां झटित्येवाऽसुरः प्यधात् । **रामः** पार्ष्णिप्रहारेणाऽभाङ्क्षीत् तौ मृत्कपालवत् ॥७८॥
[8]भुवा ग्रस्त इव रथस्तथापि निरगान्न हि । सो[9]ऽपि देवोऽवदद् **राम-कृष्णौ** ! किंमोह एष वाम् ? ॥७९॥
अहो ! पुराऽपि युवयोराख्यातं यद् युवां विना । न मोक्षः कस्यचिदिह विक्रीतं हि तपो मया ॥८०॥
[10]ततस्तौ पितरोऽवोचन् हे वत्सौ ! गच्छतं युवाम् । युवाभ्यां ननु जीवद्भ्यां जीवन्ति **यदवो**ऽखिलाः ॥८१॥
कृते [11]नः पौरुषायत्तं युवाभ्यां कृतमेव हि । बलीयसी पुनरियं दुर्लङ्घ्या[12] भवितव्यता ॥८२॥
दीक्षा श्री**नेमि**पादान्तेऽस्मकाभिर्भाग्यवर्जितैः । नोपात्ताऽनुभविष्यामः फलमद्य स्वकर्मणाम् ॥८३॥
इत्युक्तेऽपि यदा **राम-कृष्णौ** नाऽगच्छतां तदा । **वसुदेवो देवकी** च **रोहिणी** चैवमूचिरे ॥८४॥
अतः परं नः शरणं श्री**नेमि**स्त्रिजगद्गुरुः । वयं चतुर्विधाहारप्रत्याख्यानमकृष्महि ॥८५॥
अर्हतः सिद्ध-साधूंश्च धर्मं चाऽर्हदुदीरितम् । अतः परं प्रपन्नाः स्मः शरणं [13]शरणेच्छवः ॥८६॥
न वयं कस्यचित् कोऽपि नाऽस्मदीय इति स्वयम् । विहिताराधनास्तस्थुर्नमस्कारपरायणाः ॥८७॥
तेषु **द्वैपायनो**ऽथाऽग्निं ववर्षाऽनलमेघवत् । विपद्य च ययुः स्वर्गं **वसुदेवादयस्त्रयः** ॥८८॥
¶**राम-कृष्णौ** बहिः पुर्या जीर्णोद्यानेऽथ जग्मतुः । दह्यमानां पुरीं तत्र स्थितौ द्वावप्यपश्यताम् ॥८९॥
माणिक्यभित्तयोऽभूवं[14]श्चूर्णसादश्मखण्डवत् । गोशीर्षचन्दनस्तम्भा भस्मसाच्च पला[15]लवत् ॥९०॥
प्राकारकपिशीर्षाणि तडत्तडिति तुत्रुटुः । तलान्यपि निकेतानां फडप्फडिति पुस्फुटुः ॥९१॥
ज्वालानां नान्तरं तत्राऽभूद् जलानामिवाऽर्णवे । एकानलमभूत् सर्वमेकार्णवमिव क्षये ॥९२॥
ज्वालाहस्तैर्ननर्तेव जगर्जेवाऽनलः स्वनैः । धूमव्याजात् पौरमत्स्येष्वा[16]नाययमिव चानयत् ॥९३॥
¶अथोचे **सीरिणं कृष्णो** धिग् धिग् क्लीब इवाऽधुना । अहं तटस्थः पश्यामि दह्यमानां निजां पुरीम् ॥९४॥
यथा नाऽलं पुरीं त्रातुं तथा न द्रष्टुमुत्सहे । आर्य ! ब्रूहि क्व गच्छावो ? विरुद्धं सर्वमावयोः ॥९५॥

१. **ग्रहाश्च** खं० १-२, सू० विना । २. ग्रहणम् । ३. उद्गता भ्रूः भ्रूकुटिर्येषां ताः । ४. रक्तवस्त्रविलेपनम् । ५. पावकात् । ६. गारुडिकेन । ७. धनुर्वत्; **भाण्डवत्** खं० २ । ८. **रुजा** खं० २ । ९. **सोऽमरोऽबोधयद्** ला०२ । **स देवोऽथाऽवदद्** ला० । १०. **ततस्ते** मु० । ११. **कृतेन** मु० र० । नः अस्माकं कृते । १२. **दुर्लङ्घ्या** खं०२ ला० पा० ता० सं० ला०२ । १३. **मरणे०** खं० २ । १४. चूर्णाधीनाश्चूर्णसात् । १५. तृणवत् । १६. जालम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बभाषे **बलभद्रो**ऽपि सुहृत्-सम्बन्धि-बान्धवाः । अस्माकं **पाण्डु**तनयास्तद्यावस्तन्निकेतनम् ॥९६॥
**कृष्णो**ऽप्यूचे तदानीं ते मया [1]निर्विषयाः कृताः । कथं तद्धाम्नि यास्यावः स्वापकारेण लज्जितौ ? ॥९७॥
ऊचे **रामो**ऽप्युपकारं सन्तो दधति चेतसि । कदापि कु[2]स्वप्नमिव नाऽपकारं स्मरन्ति तु ॥९८॥
अनेकधा सत्कृतास्ते कृतज्ञाः **पाण्डु**सूनवः । पूजामेव करिष्यन्ति भ्रातः ! विमृश नौ[3]ऽन्यथा ॥९९॥
इत्युक्तः **सीरिणा शार्ङ्गी** प्राचलत् पूर्वदक्षिणाम् । उद्दिश्य **पाण्डव**पुरीं तां **पाण्डुमथुरा**भिधाम् ॥१००॥
¶इतश्च पुर्यां ज्वलन्त्यां **रामसूः कुब्जवारकः** । च[4]रमाङ्गोऽधिसौधाग्रमूर्ध्वबाहुरदोऽवदत् ॥१०१॥
शिष्यः श्री**नेमिनाथ**स्याऽधुना व्रतधरोऽस्म्यहम् । आख्यातः स्वामिना चाऽहं चरमाङ्गः शिवं गमी ॥१०२॥
प्रमाणमर्हदाज्ञा चेत् तद् दह्येऽहं किमग्निना ? । इत्युक्ते जृम्भका देवास्तं निन्युः स्वामिनोऽन्तिके ॥१०३॥
श्री**नेमिः पल्हवे**[5] देशे तदा हि समवासरत् । तत्र च प्राव्रजत् **कुब्जवारकः** स महामनाः ॥१०४॥
प्रागप्रव्रजिता यास्तु **राम-कृष्णादि**योषितः । **नेमिं** स्मरन्त्यो विहितानशनास्ता विपेदिरे ॥१०५॥
षष्टिर्द्वासप्ततिश्चापि निर्दग्धाः कुलकोटयः । षण्मास्यैवं पुरी दग्धा प्लाविता चाऽब्धिना ततः ॥१०६॥
¶इतश्च गच्छन् **कृष्णो**ऽपि **हस्ति[6]कल्पं** पुरं पथि । प्राप्तः सन् क्षुद्भवां पीडां शशंस **हलधारिणे** ॥१०७॥
बभाषे **बलभद्र**स्तं त्वत्कृते भक्तहेतवे । यास्याम्यत्र पुरे तिष्ठेरप्रमत्तोऽत्र बान्धव ! ॥१०८॥
विधुरं यदि मे किञ्चित् कुतोऽप्यत्र भविष्यति । करिष्यामि तदा क्ष्वे[7]डां तामाकर्ण्य त्वमापतेः ॥१०९॥
इत्युक्त्वा प्राविशद् **राम**स्तत्पुरं पुरवासिभिः । देवताकारभृत् कोऽयमित्याश्चर्यान्निरीक्षितः ॥११०॥
अग्निना **द्वारका** दग्धा तस्या निर्गत्य **सीर्य**यम् । आयात इति लोकेऽभूत् किंवदन्ती [8]विमर्शजा ॥१११॥
अङ्गुलीयेन **रामो**ऽपि कान्दु[9]काद्विविधं स्वयम् । जग्राह भोज्यं मदिरां कटकेन च शौण्डि[10]कात् ॥११२॥
तदादाय **बलो**ऽगच्छद् यावद् गोपुरसन्निधौ । तं दृष्ट्वा तावदारक्षा विस्मिता नृपतिं ययुः ॥११३॥
**धृतराष्ट्र**सुतस्तस्मिन्न**च्छदन्तो**ऽभवन्नृपः । **कृष्ण**गृह्यैः **पाण्डु**पुत्रैर्हतशेषीकृतः पुरा ॥११४॥
आरक्षास्तं तदेत्यूचुर्महार्घ्ये[11] कटकोर्मिके । दत्त्वा दस्युवदादत्त त्वत्पुरे मद्य-भोजने ॥११५॥
मूर्त्या च **सीरिण**स्तुल्यो गच्छन्नस्त्यधुना बहिः । स दस्युर्वा **बलो** वाऽस्तु नास्त्यागोऽस्मास्वतः परम् ॥११६॥
**अच्छदन्तो बलं** हन्तुं सबलस्तत्र चाऽऽययौ । गोपुरस्य कपाटौ चाऽकारयत् पातितार्गलौ ॥११७॥
[12]भक्ष्य-पाने **बलो** मुक्त्वा स्तम्भमुन्मूल्य दन्तिनः । कृतक्ष्वेडोऽथाऽरिबलं निहन्तुमुपचक्रमे ॥११८॥
क्ष्वेडामाकर्ण्य **कृष्णो**ऽपि धावितः पार्ष्णिघाततः । भङ्क्त्वा कपाटौ प्राविक्षत् पुरमौ[13]र्वे इवाऽर्णवम् ॥११९॥
**कृष्ण**स्तत्परिघं गृह्णन् परसैन्यान् जघान तान् । इत्युवाच च राजानम**च्छदन्तं** वशंवदम् ॥१२०॥
नाऽगाद् दोःस्थाम नौ क्वापि किमरे! भवता कृतम्? । स्व[14]राज्यं निभृतो भुङ्क्ष्व मुक्तोऽस्मादागसो ह्यसि ॥१२१॥
इत्युक्त्वा बुभुजाते तौ गत्वोद्याने पुराद् बहिः । प्रत्य[15]पाचि प्रस्थितौ च **कौशाम्बवन**मीयतुः ॥१२२॥
मद्यपानात् सलवणाशनाद् ग्रीष्मवशात् श्रमात् । शोकात् पुण्यक्षयाच्चाऽऽप तत्र **कृष्णो** भृशं [16]तृषम् ॥१२३॥
अथाऽवदद् **बलं कृष्ण**[17]स्तृष्णया तालु शुष्यति । वृक्षच्छायाकुलेऽप्यस्मिन्न वने गन्तुमीश्वरः ॥१२४॥
बभाषे **बलभद्रो**ऽपि यास्यामि भ्रातरम्भसे । विश्राम्यन्नत्र तिष्ठ त्वमप्रमत्तस्तरोस्तले ॥१२५॥
पादं जानूपरि न्यस्य स्वं च पीतेन वाससा । प्रच्छाद्याऽध्वतरोर्मूले सुप्तो निद्रां ययौ **हरिः** ॥१२६॥
पुनरप्यवदद् **रामो** हे भ्रातः ! प्राणवल्लभ ! । यावदायाम्यहं तावदप्रमत्तो भवेः क्षणम् ॥१२७॥
उन्मुखीभूय चाऽवोचद् वनदेव्यो ममाऽनुजः । युष्माकं शरणेऽस्त्येष त्रातव्यो विश्ववल्लभः ॥१२८॥
¶इत्युक्त्वा सोऽम्भसेऽगच्छत् तत्राऽऽगच्छच्च धन्वभृत् । व्याघ्रत्वग्वसनो लम्ब[18]कूर्चो व्याधो **जरासुतः** ॥१२९॥

---

१. **निर्विषयीकृताः** मु० । २. **दुःस्वप्नमिव** ता० सं० । ३. **माऽन्यथा** मु० र० । ४. चरमशरीरी । ५. **पल्लवे** मु० । ६. **हस्तकल्पं** खं० १-२, ला० । ७. सिंहनादम् । ८. विचाराज्जनिता । ९. कान्दुकात् कान्दविकात् । १०. सुराजीविनः 'कलाल' इति भाषायाम् । ११. **महार्घे** आ० मु० । १२. **भक्तपाने** मु० । १३. वडवानलः । १४. **सुराज्यम्** ला० । १५. दक्षिणदिशं प्रति । १६. **तृषाम्** मु० । १७. **कृष्णस्तृषया** मु० । १८. दीर्घश्मश्रुः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मृगव्ये[1]न भ्रमंस्तत्राऽपश्यत् **कृष्णं** तथास्थितम् । मृगबुद्ध्या तले चाऽहन् [2]**जारेय**स्तीक्ष्णपत्रिणा ॥१३०॥
वेगादुत्थाय **गोविन्दो** जगादाऽहं विनाऽऽगसा । छलात् पादतले विद्धः केनाऽनाभाष्य पत्रिणा ? ॥१३१॥
हतपूर्वो क्वचिन्नाऽहमज्ञातज्ञातिनामकम् । भवानपि तदाख्यातु निजं गोत्रं च नाम च ॥१३२॥
द्रुमान्तरस्थः सोऽप्यूचे **हरिवंशाब्धिशीतगोः** । **वसुदेवदशार्हस्य जराकुक्षिभवः** सुतः ॥१३३॥
**जराकुमारो** नाम्नाऽहमग्रजो **राम-कृष्णयोः** । **कृष्णरक्षार्थमत्राऽऽगां** श्रुत्वा **श्रीनेमिनो** वचः ॥१३४॥
अब्दानि द्वादशाऽभूवन्नद्येह वसतो मम । मानुषं चेह नाऽद्राक्षं कस्त्वमेवं ब्रवीषि भोः !? ॥१३५॥
**कृष्णो**ऽथाऽवोचदेह्येहि पुंव्याघ्र ! **हरिरस्म्यहम्** । तव भ्राता स एवैष यस्याऽर्थे वनवास्यभूः ॥१३६॥
वृथा प्रयासस्ते जज्ञे द्वादशाब्दानि बान्धव ! । दिग्मोहेनेव पान्थस्य सुदूरोल्लङ्घिताध्वनः ॥१३७॥
श्रुत्वेति किमयं **कृष्ण** इति तत्रैव सत्वरम् । **जर[4]त्कुमार** आयासीद् दृष्ट्वा **कृष्णं** मुमूर्छ च ॥१३८॥
कथमप्याप्तसंज्ञः सन् **जारेयः** करुणं रुदन् । पप्रच्छ **कृष्णं** हा भ्रातः ! किमेतत् ? किमिहाऽऽगमः ? ॥१३९॥
किं **द्वारका** पुरी दग्धा ? किं **यदूनां** क्षयोऽभवत् ? । सा नूनं **नेमि**वाक् सर्वा सत्या तेऽवस्थयाऽनया ॥१४०॥
**कृष्णो**ऽपि सर्वमाचख्यौ **जारेयो**ऽपि रुदन् पुनः । इत्यूचे हा ! मया भ्रातुरागतस्योचितं कृतम् ॥१४१॥
कनिष्ठं दुर्दशाम[5]ग्नं भ्रातरं भ्रातृवत्सलम् । त्वां निहन्तुर्मम स्थानं क्व नाम नरकावनौ ? ॥१४२॥
वनवासं तव त्राणबुद्ध्याऽकार्षमहं किल । न जाने विधिना यत्ते स्थापितः पुरतोऽन्तकः ॥१४३॥
हे पृथ्वि ! देहि विवरं वरमद्यैव येन ताम् । अनेनैव शरीरेण प्रयामि नरकावनिम् ॥१४४॥
अतः परमिह स्थानमधिकं नरकादपि । सर्वदुःखाधिके भ्रातृहत्यादुःख उपस्थिते ॥१४५॥
**वसुदेवस्य** पुत्रोऽहं किं भ्राता तव चाऽभवम् ? । किं वाऽभूवं मनुष्योऽपि ? यः कर्माऽकार्षमीदृशम् ॥१४६॥
सर्वज्ञवचनं श्रुत्वा तदैव न मृतोऽस्मि किम् ? । जनमात्रे मयि मृते किं न्यूनं स्यात् सति त्वयि ? ॥१४७॥
ततो बभाषे **कृष्णस्तं** कृतं भ्रातः ! शुचा[6] तव । न त्वया न मया वापि लङ्घ्यते भवितव्यता ॥१४८॥
अवशिष्टस्त्वमेवैको **यदुभ्यो** जीव तच्चिरम् । याहि याह्यन्यथा **रामस्त्वां** हन्यान्मद्वधकुधा ॥१४९॥
अभिज्ञानं **कौस्तुभं** मे गृहाण व्रज **पाण्डवान्** । वृत्तान्तं कथयेः सर्वं सहायाः सन्तु ते तव ॥१५०॥
अप[7]सार्यं त्वया किञ्चिद् विपरीतैः पदैरितः । पदानुसारी **रामस्त्वां** यथा प्राप्नोति न द्रुतम् ॥१५१॥
मद्वाचा क्षमयेः **सर्वान् पाण्डवानपरानपि** । मयैश्वर्यजुषा पूर्वं क्लेशितान् प्रेषणादिभिः ॥१५२॥
एवं पुनः पुनः **कृष्णोनोक्तः** सोऽपि तथैव हि । **कृष्णपादाच्छरं** कृष्ट्वा जगामोपात्त**कौस्तुभः** ॥१५३॥
**जारेये** च गते पादवेदनार्त्तो **जनार्दनः** । उदङ्मुखः प्राञ्जलिश्च वक्तुमेवं प्रचक्रमे ॥१५४॥
'नमोऽर्हद्भ्यो भगवद्भ्यः सिद्धेभ्यश्च नमो नमः । आचार्येभ्य उपाध्याय-साधुभ्यश्च न[8]मस्त्रिधा ॥१५५॥
नमो भगवते विश्वस्वामिनेऽ**रिष्टनेमिने** । त्यक्त्वाऽस्मदादीन् यः पापांस्तीर्थं प्रावर्तयद् भुवि ॥१५६॥
इत्युक्त्वा संस्तरे तो[9]र्णे स्थित्वा जानूपरि क्रमम् । न्यस्य प्रावृत्य वस्त्रेण **कृष्णः** पुनरचिन्तयत् ॥१५७॥
धन्यः स भगवा**न्नेमिर्वरदत्ता**दयश्च ते । **प्रद्युम्नाद्याः** कुमाराश्च **रुक्मिण्याद्याश्च** मत्स्त्रियः[10] ॥१५८॥
गृहवासं परित्यज्य भववासनिबन्धनम् । ये प्र[11]वव्रजुरेतं तु धिग् मां प्राप्तविडम्बनम् ॥१५९॥
एवं भावयतस्तस्याऽभञ्जन्नङ्गानि सर्वतः । चुकोप प्रबलो वायुः कृतान्तस्येव सोदरः ॥१६०॥
तृष्णा-शुग्-घात-वातैस्तैरर्दितोऽथ **जनार्दनः** । भ्रश्यद्विवेकः सद्योऽपि पुनरेवमचिन्तयत् ॥१६१॥
पराभूतो न केनापि जन्मतो नृ-सुरैरपि । **द्वैपायनेन** प्रथमं नीतोऽहं कीदृशीं दशाम् ॥१६२॥
इयत्यपि गते तं चेत् पश्याम्युत्थाय तत्स्वयम् । अन्तं नयामि स कियान् ? कः स्यात् तं रक्षितुं क्षमः ? ॥१६३॥

१. आखेटेन । २. जराया अपत्यं जारेयः-जराकुमारः । ३. **कृष्णोऽपि** मु० । ४. **जराकुमार०** खं० २ । ५. **दुर्दशाप्राप्तं** खं० २ । ६. शोकेन । ७. **अभिसार्यं** ला० । ८. **त्रिधा नमः** मु० । **नमोऽस्तु मे** ला० । ९. तृणनिर्मिते । १०. **योषितः** ला० । ११. **प्रवव्रजिरे तं** मु० र० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति क्षणं ध्यानमवाप्य रौद्रं, समासहस्रं[1] परिपूरितायुः । निकाचितैः कर्मभिरर्जितां प्राक्, **कृष्ण**स्तृतीयाम[2]वनीमवाप ॥१६४॥

कौमारान्तः[3] षोडशाब्दानि **विष्णोः**,
षट्पञ्चाशन्मण्डलित्वे[4] जये[5] तु ।
वर्षाण्यष्टाऽथो नवाऽगुः शतानि,
विंशान्युच्चैरर्धचक्रित्व[6]काले ॥१६५॥

॥इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये अष्टमे[7] पर्वणि **द्वारकार्क्षय-कृष्णावसान**कीर्तनो
नाम एकादशः[8] सर्गः ।

१. वर्षसहस्रम् । २. वालुकाप्रभाम् । ३. कौमारे १६ वर्षाणि । ४. मण्डलिके ५६ वर्षाणि । ५. जये ८ वर्षाणि । ६. वासुदेवत्वे ९२० वर्षाणि, आयुः वर्षसहस्रम् । ७. **अष्टमपर्वणि** खं. १-२, ला० सू० मु० । ८. **०दाह०** खं. १, सू० । ९. **नामैकादशमः** ला० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ द्वादशः सर्गः ॥

पद्मपत्रपुटेनाऽम्भो **रामो**ऽथाऽऽदाय सत्वरः । स्खल्यमानोऽपशकुनैः **कृष्णा**भ्यर्णमुपाययौ ॥१॥
सुप्तोऽसौ सुखमस्तीति बुद्ध्या तस्थौ क्षणं **बलः** । दृष्ट्वा च मक्षिकाः कृष्णाः **कृष्णा**स्याद् वस्त्रमाक्षिपत् ॥२॥
ततोऽज्ञासीन् मृतं बन्धुं **बलः** सद्योऽथ मूर्च्छया । पपात जगतीपृष्ठे [1]कृत्तबुध्न इव द्रुमः ॥३॥
कथञ्चिल्लब्धसंज्ञः सन् सिंहनादं **बलो**ऽकरोत् । वित्रेसुः श्वापदास्तेन चकम्पे चाऽखिलं वनम् ॥४॥
इत्युवाच च येनेह सुखसुप्तो ममाऽनुजः । विश्वैकवीरः पापेन निजघ्ने स्वं स शंसतु ॥५॥
स मे समक्षीभवतु सत्यं हि सुभटो यदि । सुप्त-प्रमत्त-भ्रूणर्षि-स्त्रीषु हि प्रहरेत कः ? ॥६॥
इत्युच्चैः शब्दमाक्रोशन् **रामो** बभ्राम तद्वनम् । भूयः **कृष्ण**मुपेयाय तमालिङ्ग्य रुरोद च ॥७॥
हा भ्रातः ! अवनीवीर ! हा मदुत्सङ्गलालित ! । हा कनिष्ठ ! गुणज्येष्ठ ! विश्वश्रेष्ठ ! क्व तिष्ठसि ? ॥८॥
विना भवन्तं न स्थातुमीशोऽस्मीति पुराऽवदः । वचोऽपि नाऽधुना दत्से क्व सा प्रीतिर्**जनार्दन** ! ? ॥९॥
नाऽपराधं स्मरामि स्वं रुषितश्च निरीक्ष्यसे । किं वा यो मे विलम्बोऽभूत् स ते रोषस्य कारणम् ? ॥१०॥
स्थानेऽसि रुषितो भ्रातः ! तथाप्युत्तिष्ठ सम्प्रति । गच्छत्यस्तं रविः स्वप्नकालो नैष महात्मनाम् ॥११॥
एवं च प्रलपन् **राम**स्तामतीयाय यामिनीम् । उत्तिष्ठोत्तिष्ठ हे भ्रातः ! प्रातरप्येवमब्रवीत् ॥१२॥
अनुत्तिष्ठन्तमुत्थाय तमथ स्नेहमोहितः । **रामः** स्कन्धे समारोप्याऽभ्राम्यद् गिरि-वनादिषु ॥१३॥
**कृष्ण**कायं वहन्नर्चन् पुष्पाद्यैरन्वहं **बलः** । षण्मासानतिचक्राम भ्रातृस्नेहविमोहितः ॥१४॥
तत्रैव पर्यटत्येवं वर्षाकालः समाययौ । **सिद्धार्थः** सोऽमरीभूतो ददर्शाऽवधिना च तम् ॥१५॥
सोऽचिन्तयच्च यदहो ! भ्राता मे भ्रातृवत्सलः । मृतं **कृष्णं** वहन्नस्ति तदेनं बोधयाम्यहम् ॥१६॥
मामेषोऽर्थितपूर्वी च यन्मां विपदि बोधयेः । ध्यात्वेत्यद्रेरुत्तरन्तं चक्रे सोऽश्ममयं रथम् ॥१७॥
उत्तीर्य विषमाच्छैलात् सोऽभज्यत रथः समे[2] । कुटुम्बिरूपस्तं देवः सन्धातुमुपचक्रमे ॥१८॥
**बल**स्तमूचे किं मुग्ध ! रथं सन्धातुमिच्छसि ? । उत्तीर्य विषमादद्रेर्यः समे खण्डशोऽभवत् ॥१९॥
देवोऽप्यूचे युत्[3]सहस्त्रेष्वहतो यो युधं विना । मृतो जीवेद् यदा ह्येष स्यात् सज्जो मे रथस्तदा ॥२०॥
आरोपयितुमारेभे देवोऽथाऽश्मनि पद्मिनीः । **बलो**ऽप्युवाच किं ग्राव्णि[4] प्ररोहत्यब्जिनीवनम् ? ॥२१॥
प्रत्युवाचाऽमरोऽप्येवमयं तव यदाऽनुजः । जीविष्यति सरोजिन्यस्तदाऽऽरोक्ष्यन्त्यमूरपि ॥२२॥
किञ्चिदग्रे पुनर्भूत्वाऽसिञ्चद् दग्धद्रुमं सुरः । **बलो**ऽप्यूचे दग्धतरुः किं सिक्तोऽपि प्ररोहति ? ॥२३॥
तं प्रत्युवाच देवोऽपि यदा स्कन्धस्थितं तव । जीविष्यति शवं वृक्षः प्ररोक्ष्यति तदा ह्ययम् ॥२४॥
गोपीभूयाऽमरः सोऽग्रे गो[5]शबास्येषु नूतनाः । दूर्वाः प्रक्षेप्तुमारेभे जीवद्गव्याननेष्विव ॥२५॥
**बलभद्रो** बभाषे तमस्थिभूता इमाः कदा । गावो [6]दूर्वाश्चरिष्यन्ति त्वद्दत्तां[7] मूढमानस !? ॥२६॥
देवोऽभ्यधाद् यदा ह्येष जीविष्यति तवाऽनुजः । इमा अपि तदा गावश्चरिष्यन्ति तृणान्यहो ! ॥२७॥
**रामो**ऽपि विममर्शैवं किं सत्यं मे मृतोऽनुजः ? । एकवाक्यतयाऽमी यद् वदन्त्येवं पृथक् पृथक् ॥२८॥
देवस्तच्चिन्तितं ज्ञात्वा सद्यः **सिद्धार्थ**रूपभृत् । पुरो भूत्वाऽब्रवीदेष **सिद्धार्थः** सारथिस्तव ॥२९॥
तदा प्रव्रजितो मृत्वा देवभूयमगामहम् । त्वां बोधयितुमत्राऽऽगामर्थितोऽस्मि पुरा त्वया ॥३०॥
**जरा[8]कुमारात् कृष्णा**स्य वधः प्रोक्तो हि **नेमिना** । जज्ञे च स तथा नैवाऽन्यथा सर्वज्ञभाषितम् ॥३१॥

---

१. **कृन्तमूल** मु० । २. समाने भूभागे । ३. युद्धसहस्त्रेषु । ४. पाषाणे । ५. गवां मृतकानि, तद्वदनेषु । ६. **दूर्वा चरि०** खं० १, ला० सू० । ७. **त्वद्दत्तां** खं. १, ला० सू० । ८. **जरत्कुमारात्** खं० १, सू० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**जराकुमारः कृष्णे**नाऽभिज्ञाने निज**कौस्तुभम्** । अर्पयित्वा प्रेषितोऽगात् **पाण्डवानां** निकेतने ॥३२॥
**बलो**ऽप्युवाच **सिद्धार्थ** ! साध्वहं बोधितस्त्वया । किं करोम्यधुना भ्रातृव्ययव्यसनपीडितः ? ॥३३॥
**सिद्धार्थो**ऽप्यभ्यधाद् श्रीम**न्नेमि**भ्रातुर्विवेकिनः । परिव्रज्यां विना नाऽन्यद् युज्यतेऽतः परं तव ॥३४॥
आमेत्युक्त्वा **बलस्तेन** देवेन सहितस्ततः । **कृष्ण**कायस्य संस्कारमकरोत् **सिन्धुसङ्ग**मे ॥३५॥
¶दीक्षां जिघृक्षुं **रामं** च ज्ञात्वा श्री**नेम्य**पि द्रुतम् । विद्याधरमृषिं प्रैषीदेकमेकः[1] कृपालुषु[2] ॥३६॥
तत्पार्श्वे प्राव्रजद् **राम**स्तपस्तीव्रं चचार च । **तुङ्गिका**शिखरे गत्वा **सिद्धार्थो**ऽस्थाच्च रक्षकः ॥३७॥
मासपारणकेऽन्येद्यु**र्बलः** क्वापि पुरेऽविशन् । कयाऽपि सार्भया[3] पौर्या[4] कूपकण्ठस्थयैक्ष्यत ॥३८॥
**राम**स्य रूपातिशयालोकनव्यग्रचित्तया । कुम्भस्थाने पुत्रकण्ठे तया रज्जुरबध्यत ॥३९॥
कूपे तं क्षेप्तुमारेभे सा यावत्तावदैक्ष्यत । **बलेन** चिन्तितं चेदं धिग् मे रूपमनर्थकृत् ॥४०॥
नातः परं पुर-ग्रामादिषु वेक्ष्यामि किन्त्वहम् । वने काष्ठादिहारिभ्यः पारयिष्यामि भिक्षया ॥४१॥
तां नारीं बोधयित्वाऽथ तदैव हि वनं **बलः**[5] । जगाम तेपे च तपो दुस्तपं मासिकादिकम् ॥४२॥
आनीतं भक्त-पानादि तृण-काष्ठादिहारिभिः । दत्तं च तैः प्रासुकं च गृहीत्वाऽपारयन्मुनिः ॥४३॥
¶काष्ठादिहारकास्ते च गत्वाऽऽचख्युः स्वभूभुजाम् । देवरूपः पुमान् कोऽपि चरन्नस्ति वने तपः ॥४४॥
इत्याशशङ्किरे ते च किमस्मद्राज्यकाङ्क्षया । करोति तप ईदृक्षं **मन्त्रं** वा **साधयत्यसौ** ॥४५॥
इमं हन्मस्ततो गत्वेत्यालोच्य युगपच्च ते । ईयुः सर्वाभिसारेण मुने **रामस्य** सन्निधौ ॥४६॥
ततश्च देवः **सिद्धार्थ**स्तस्य सन्निहितः सदा । विचक्रेऽनेकशः सिंहान् जगतोऽपि भयङ्करान् ॥४७॥
राजानश्चकितास्ते च नमस्कृत्य **बलं** ययुः । नरसिंह इति ख्यातो **बलभद्र**स्तदाद्यभूत्[6] ॥४८॥
¶वने तपस्यतस्तस्य धर्मदेशनयाऽग्रया[7] । वासिता व्याघ्र-सिंहाद्या बहवः प्रशमं ययुः ॥४९॥
केऽपि श्रावकतां भेजुः केऽपि भद्रकतां पुनः । कायोत्सर्गं व्यधुः केऽपि केऽपि चाऽनशनं तदा ॥५०॥
मांसाहारान्निवृत्तास्ते बभूवुः [8]पारिपार्श्विकाः । तिर्यग्रूपधराः शिष्याः इव **रामम**हामुनेः ॥५१॥
**राम**प्राग्भवसम्बद्धः[9] कोऽपि जातिस्मरो मृगः । अतिसंवेगमापन्नः[10] सदा सहचरोऽभवत् ॥५२॥
उपास्योपास्य **रामर्षिं** स मृगो वनमभ्रमत् । अगवेषयदायातान् सौन्नान्[11] काष्ठादिहारिणः ॥५३॥
यदाऽपश्यत् तदैवैत्य **रामर्षिं** ध्यानमास्थितम् । पर्यस्यन् शिरसा पादे भिक्षादातृनजिज्ञपत्[12] ॥५४॥
**राम**स्तदुपरोधेन ध्यानं मुक्त्वा क्षणादपि । भिक्षायै निरगात् तेन हरिणेनाऽग्रगामिना ॥५५॥
तत्राऽन्येद्युर्वने भव्यदारुभ्यो रथकारकाः[13] । आययुश्छिच्छिदुश्चापि वृक्षान् सारानृजून् बहून् ॥५६॥
तान् प्रेक्ष्य स भ्रमन्नेणः सद्यो **राम**मजिज्ञपत् । ध्यानं चाऽपारयत् तस्योपरोधात् स महामुनिः ॥५७॥
तेषु भोक्तुं निषण्णेषु भिक्षार्थं मांसपारणे । **रामर्षि**रायर्यौ तत्र हरिणेनाऽग्रगामिनौ[14] ॥५८॥
रथकाराग्रणी **रामं** प्रेक्ष्य प्रीतो व्यचिन्तयत् । अहो ! अत्राप्यरण्येऽसौ कल्पद्रुरिव कोऽप्यृषिः[15] ॥५९॥
अहो ! रूपमहो ! तेजः प्रशमः कोऽप्यहो ! महान् । कृतार्थः सर्वथाऽप्यस्मि मुनिनाऽतिथिनाऽमुना ॥६०॥
रथकारो विचिन्त्यैवं पञ्चाङ्गस्पृष्टभूतलः । **बलर्ष**ये नमस्कृत्य भोज्यपानान्युपानयत् ॥६१॥
¶अथ दध्यौ **बल**मुनिः श्राद्धः कोऽप्येष शुद्धधीः । कर्माऽर्जितुं[16] स्वर्गफलं[17] भिक्षां मे दातुमुद्यतः ॥६२॥
न चेद् गृह्णाम्यमूं भिक्षां तदेतस्य हि सद्गतेः । कृतो मयाऽन्तरायः स्याद् गृह्णाम्येतेन हेतुना ॥६३॥
एवं विचिन्त्य भगवान् कारुण्यक्षीरसागरः । स्वकायनिरपेक्षोऽपि भिक्षां तस्मादुपाददे ॥६४॥
¶ऊर्ध्वाननो मृगः सोऽपि बाष्पाम्भःप्लावितेक्षणः । मुनिं वनच्छिदं चापि पश्यन्निदमचिन्तयत् ॥६५॥

---

१. कृपालुषु एकः अद्वितीयः । २. **कृपापरः** ला० । ३. अर्भेण बालकेन सहितया । ४. **नार्या** ला० । ५. **गतः** ला० । ६. **बलभद्रस्तदाऽभवत्** ला० । ७. **धर्मदेशनयाऽग्रया** ला २. पु० आ० मु०, **०देशनया तया** ला० । अग्र्यया श्रेष्ठया । ८. सेवकाः । ९. **०सम्बन्धः** मु० र० । १०. **अतिसंवेगसम्पन्नः** ला० । ११. अन्नसहितान् । १२. **भिक्षादातृन् व्यजिज्ञपत्** ला० मु० । १३. **रथकारुकाः** मु० । १४. **०गामिणा** खं० २, सू० । १५. **सन्मुनिः** ला० । १६. **कर्मार्जितं** खं० । १७. **शुद्धफलम्** ला० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहो ! कृपानिधिः स्वामी निरपेक्षो वपुष्यपि । अन्वग्रहीद् रथकारं तपसामेक आश्रयः ॥६६॥
अहो ! वनच्छिद्[1] धन्योऽयं जन्म चाऽस्य महाफलम् । येनाऽयं भगवानेवं पानान्नैः प्रतिलम्भितः ॥६७॥
अहं पुनर्मन्दभाग्यो न तपः कर्तुमीश्वरः । प्रतिलम्भयितुं नापि धिग् मां तिर्यक्त्वदूषितम् ॥६८॥
एवं त्रयोऽपि ते यावद् धर्म[2]ध्यानपराः स्थिताः । महावाताहतस्तावदर्धच्छिन्नोऽपतत् तरुः ॥६९॥
ते त्रयस्तरुणा तेन पतितेन हता मृताः । **पद्मोत्तर**विमानान्त**र्ब्रह्मलोके**ऽभवन् सुराः ॥७०॥
¶व्रतमब्दशतं **रामः** पालयित्वा गतो दिवम् । ददर्शाऽवधिना **कृष्णं** तृतीयनरके गतम् ॥७१॥
शरीरं वैक्रियं कृत्वा भ्रातृस्नेहेन मोहितः । उप**कृष्णं** ययौ **रामः** **कृष्ण**मालिङ्ग्य चाऽवदत् ॥७२॥
**रामो**ऽहं भवतो भ्राता त्वां त्रातुं **ब्रह्म**लोकतः । अत्राऽऽयातोऽस्मि किं तुभ्यं करोमि प्रीतये वद ? ॥७३॥
स इत्युक्त्वोद्दध्रे **कृष्णं** पाणिना सोऽपि पाणितः । शीर्त्वा पारदवद् भूमौ पपात च मिमेल च ॥७४॥
आदावालिङ्गनाज्ज्ञात आख्यायोद्धरणात् ततः । **रामः** **कृष्णे**नाऽभ्युत्थाय नमश्चक्रेऽतिसम्भ्रमात् ॥७५॥
तं जगाद **बलो** भ्रातरुक्तं श्री**नेमि**ना तदा । दुःखान्तं विषयसुखं प्रत्यक्षं तत् तवाऽधुना ॥७६॥
त्वां कर्मयन्त्रितं स्वर्गे न नेतुमहमीश्वरः । तिष्ठामि सन्निधौ तत्ते मनःप्रीतिकृते **हरे** ! ॥७७॥
**कृष्णो**ऽप्युवाच हे भ्रातस्तिष्ठताऽपि त्वयाऽत्र किम् ? । त्वयि सत्यपि भोक्तव्यं नरकायुरुपार्जितम् ॥७८॥
नरकादपि दुःखाय यन्ममा[3]ऽवस्थया तया[4] । बभूवा[5]ऽसुहृदां हर्षो म्लानिश्च सुहृदां तदा ॥७९॥
तद्गच्छ **भरते** चक्र-शार्ङ्ग-शङ्ख-गदाधरम् । पीतवस्त्रं तार्क्ष्य[6]केतुं दर्शयेर्मां[7] विमानगम् ॥८०॥
नीलाम्बरं ताल[8]केतुं लाङ्गला-ऽयोग्रधारकम् । दर्शयेः स्वं[9] च सर्वत्र विमानस्थं पदे पदे ॥८१॥
यथा ह्यनश्वरौ **राम-कृष्णौ** स्वेच्छाविहारिणौ । इति लोके प्रघोषः स्यात् पूर्वन्यत्कार[10]बाधकः ॥८२॥
प्रतिपद्य तथा **रामो** जगाम **भरता**वनौ । तथैव कृत्वा ते रूपे दर्शयामास सर्वतः ॥८३॥
एवमूचे च भो लोकाः ! कृत्वा नौ[11] प्रतिमाः शुभाः । प्रकृष्टदेवताबुद्ध्या यूयं पूजयताऽऽदरात् ॥८४॥
वयमेव यतः सृष्टि-स्थिति-संहारकारिणः । वयं दिव इहाऽऽयामो यामश्च स्वेच्छया दिवम् ॥८५॥
निर्मिता **द्वारका**ऽस्माभिः संहृता च यियासुभिः । कर्ता हर्ता च नान्योऽस्ति स्वर्गदा वयमेव च ॥८६॥
एवं तस्य गिरा लोकः सर्वो ग्राम-पुरादिषु । प्रतिमाः **कृष्ण-हलिनोः** [12]कारं कारमपूजयत् ॥८७॥
प्रतिमार्चक-कर्तॄणां महान्तमुदयं ददौ । स सुरस्तेन सर्वत्र तद्भक्तोऽभूज्जनोऽखिलः ॥८८॥
इति भ्रातृवचो **रामसुरो**ऽनुष्ठा[13]य **भारते** । **ब्रह्मलोकं** पुनरगाद् दुर्मना भ्रातृदुःखतः ॥८९॥
¶इतश्च स **जरासूनुः** **पाण्डवान्** समुपास्थितः । आख्यच्च **द्वारका**दाहादिकं **कौस्तुभ**मर्[14]पयन् ॥९०॥
सद्योऽपि शोकमग्नास्ते रुदन्तो वत्सरावधि । प्रेतकार्याणि **कृष्णस्य** विदधुः सोदरा इव ॥९१॥
तान् प्रविव्रजिषून् ज्ञात्वा **श्रीनेमिः** प्राहिणोन्मुनिम् । **धर्मघोषं** चतुर्ज्ञानं मुनिपञ्चशतीयुतम् ॥९२॥
**जारेयं** न्यस्य ते राज्ये **द्रौपद्या**दिसमन्विताः । तस्यर्षेः प्राव्रजन् पार्श्वे चक्रुः साभिग्रहं तपः ॥९३॥
कुन्ताग्रेण प्रदत्तो[15]ञ्छं ग्रहीष्यामीत्यभिग्रहम् । जग्राह **भीमः** सं[16] त्वस्य षड्भिर्मासैरपूर्यत ॥९४॥
द्वादशाङ्गधरास्ते तु विहरन्तो महीं क्रमात् । प्रचेलु**र्नेमिनं** नन्तुमुत्काः पञ्चापि **पाण्डवाः** ॥९५॥
¶इतश्च **मध्यदेशा**दौ विहृत्य परमेश्वरः । उदीच्यां[17] **राजपुरा**दिपुरेषु व्यहरत् प्रभुः ॥९६॥
शैले **ह्रीमति** गत्वा च **म्लेच्छ**देशेष्वनकशः । विहरन् पार्थिवा-ऽमात्यप्रभृतीन् प्रत्यबोधयत् ॥९७॥
आर्या-ऽनार्येषु विहृत्य भूयो **ह्रीमत्य**गाद् विभुः । ततः **किरात**देशेषु व्यहार्षीद् विश्वमोहहृत् ॥९८॥
उत्तीर्य **ह्रीमतः** शैलाद् विजह्रे **दक्षिणापथे** । भव्यारविन्दखण्डानि बोधयन्नंशुमानिव ॥९९॥
¶आरभ्य केवलादेवं भर्तुर्विहरतोऽभवन् । अष्टादश सहस्राणि श्रमणा[18]नां महात्मनाम् ॥१००॥

१. रथकारः । २. **शुभध्यानपराः** ला० र० । ३. **यन्ममावस्थयाऽनया** पा० मु० । ४. द्वारिकादाहसमये जातया । ५. शत्रूणाम् । ६. गरुडध्वजम् । ७. कृष्णम् । ८. तालध्वजम् । ९. बलदेवम् । १०. पराभवः । ११. आवयोः राम-कृष्णयोः । १२. कृत्वा कृत्वा । १३. पालयित्वा । १४. **०मार्पयत्** खं० २, ला० । १५. भक्तम् । १६. अभिग्रहः । १७. उत्तरदिशि । १८. श्रमणाः १८००० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चत्वारिंशत् सहस्राणि [1]व्रतिनीनां सुमेधसाम् । च[2]तुर्दशपूर्वभृतां तथा शतचतुष्टयी ॥१०१॥
[3]अवधिज्ञानभाजां च शतानि दश पञ्च च । तानि वै[4]क्रियलब्धीनां तानि के[5]वलिनामपि ॥१०२॥
सहस्रमेकं साधूनां मनः[6]पर्यायशालिनाम् । श्रमणानां शतान्यष्टौ वा[7]दलब्धिमतां पुनः ॥१०३॥
श्रा[8]वकाणां लक्षमेकं नवषष्टिसहस्रयुक् । श्रा[9]विकास्त्रिलक्ष्येकोनचत्वारिंशत्सहस्रयुक् ॥१०४॥
एवं परीवारवृतः सुरा-ऽसुर-नृपा[10]न्वितः । निर्वाणसमयं ज्ञात्वा ययौ **रैवतके** प्रभुः ॥१०५॥
¶सुरेन्द्रैस्तत्र समवसरणे रचिते व्यधात् । पर्यन्तदेशनां स्वामी विश्वानुग्रहकाम्यया ॥१०६॥
तया देशनया बुद्धास्तत्र केऽपि प्रवव्रजुः । केचिद् भेजुः श्रावकत्वं भद्रकत्वमथाऽपरे ॥१०७॥
ततः प्रपेदेऽनशनं **पादपोपगमं** प्रभुः । मासिकं सह साधूनां षट्त्रिंशैः पञ्चभिः शतैः ॥१०८॥
त्वाष्ट्रे [11]शुचिसिताष्टम्यां शैलेशीध्यानमास्थितः । सायं तैर्मुनिभिः सार्धं **नेमि**र्निर्वाणमासदत् ॥१०९॥
¶अथ **प्रद्युम्न-शाम्बाद्याः** कुमाराः प्रययुः शिवम् । महिष्योऽष्टौ च **कृष्णस्य** भगवद्बन्धवोऽपि च ॥११०॥
भूयांसो व्रतिनोऽन्येऽपि व्रतिन्यश्चाऽपरा अपि । **राजीमती**प्रभृतयः प्रययुः पदमव्ययम् ॥१११॥
चतुरब्दशतीं गेहे छद्मस्थो वत्सरं पुनः । केवली पञ्चाब्दशतीमित्यायू **रथनेमिनः** ॥११२॥
ईदृगायुःस्थिती **राजीमत्या**सीच्च तपोधनौ[12] । कौमार-च्छद्मवासित्व-केवलित्वविभागतः ॥११३॥
**शिवा-समुद्रविजयौ माहेन्द्रं** कल्पमीयतुः । **दशार्हा** अपरेऽपीयुर्देवभूयं महर्द्धिकम् ॥११४॥
कौमारे त्रिवर्षशती छद्म-केवलयोः पुनः । सप्तवर्षशतीत्यब्दसहस्रायुः **शिवासुतः** ॥११५॥
श्री**नमिस्वा**[13]मिनिर्वाणाच्छ्री**नेमिस्वामि**निर्वृतिः । अतिक्रान्तेषु वर्षाणामभूल्लक्षेषु पञ्चसु ॥११६॥
**शक्रा**ज्ञया **वैश्रवणो** विचक्रे शिबिकां प्र[14]भोः । अङ्गं विधिवदर्चित्वा **शक्र**स्तत्र स्वयं न्यधात् ॥११७॥
चक्रुश्चितां च नैर्ऋत्यामधिरत्नशिलातलम् । गोशीर्षचन्दनप्रायैरिन्धनैरथ नाकिनः ॥११८॥
उत्पाट्य स्वामिशिबिकां तत्राऽऽनिन्ये पुरन्दरः । चितायामथ चिक्षेप श्री**नेमिस्वामि**नो वपुः ॥११९॥
**शक्राज्ञयाऽग्निकुमारा**श्चितायामग्निमादधुः । तमथ ज्वालयामासुर्द्रुतं **वायुकुमारकाः** ॥१२०॥
**क्षीरोदाम्भो**भिरब्दांश्च कालेऽग्निं निरवापयत् । जगृहुश्च प्रभोर्दंष्ट्रां **शक्रेशाना**दिवासवाः ॥१२१॥
शेषाण्यस्थीन्यन्यदेवास्तद्देव्यः कुसुमानि च । भूपा वस्त्राणि लोकाश्च जगृहुर्भस्म **नेमिनः** ॥१२२॥
स्वामिसंस्कारवैडूर्यशिलायां तत्र वज्रभृत् । वज्रेण स्वामिनोऽलेखील्लक्षणानि च नाम च ॥१२३॥
तस्यां शिलायां म[15]घवा रचयामास पावनम् । श्री**नेमिनाथ**प्रतिमासनाथं चैत्यमुच्चकैः ॥१२४॥
एवं कृत्वा च शक्राद्याः स्वं[16] स्वं स्थानं ययुः सुराः । इतश्च **पाण्डवाः** प्रापु**र्हस्तकल्पे** पुरे तदा ॥१२५॥

॥ शार्दूलविक्रीडितम् ॥

अस्माद् द्वादश योजनानि स गिरि**र्नेमिं** प्रगे वीक्ष्य तत्,
कुर्मो मासिकपारणं वयमिति प्रीत्या वदन्तो मिथः ।
तस्मिन् **हस्तिपुरे** जनादिति तदा ते शुश्रुवुर्यत् प्रभुः,
**नेमि**र्निर्वृतिमाससाद भगवांस्तैस्तैर्वृतः साधुभिः ॥१२६॥

१. श्रमण्यः ४०००० । २. चदुर्दशपूर्विणः ४०० । ३. अवधिज्ञानिनः १५०० । ४. वैक्रियलब्धयः १५०० । ५. केवलिनः १५०० । ६. मनःपर्यायज्ञानिनः १००० । ७. वादलब्धिमन्तः ८०० । ८. श्रावकाः १६९००० । ९. श्राविकाः ३३९००० । १०. **०नृपार्चितः** खं० २ । ११. आषाढशुक्लाष्टम्याम् । १२. **तपोधनी** खं० २ । १३. **श्रीनमिजिन०** मु० र० । १४. **विभोः** खं० २ । १५. इन्द्रः ॥ १६. **स्वस्वस्थानं** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ वसन्ततिलका ॥

आकर्ण्य तद्गुरुशुचो **विमला[1]द्रिमीयुः**, **पाण्डोः** सुता विदधिरेऽनशनं च तत्र ।
उत्केवलाः शिवमगुर्द्रुपदात्मजा तु, सा **ब्रह्मलोक**मगमत् परमर्द्धिधाम ॥१२७॥

॥ मन्दाक्रान्ता ॥

द्वा[2]विंशोऽर्हन्नथ च नवमः **शौ[3]र्ङ्गभृत् सीर[4]पाणिः**,
तद्वै[5]री चेत्य[6]तुलमहसः कीर्तिताः पर्वणीह ।
चत्वारोऽपि प्रव[7]चनदिशं सम्यगुद्वीक्ष्य येषा-
मेकैकोऽपि श्रुतिपथगतो विस्मयाय त्रिलोक्याम् ॥१२८॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते
**त्रिषष्टिशलाकापुरुष**चरिते महाकाव्ये
अष्टमे[8] पर्वणि **बलदेवस्वर्गगमन-**
**नेमि[9]निर्वाण-पाँ[10]ण्डवनिर्वाण**वर्णनो नाम
**द्वा[11]दशः सर्गः**

**समाप्त[12]मिदमष्टमं पर्व ॥**

१. सिद्धाचलतीर्थम् । २. नेमिनाथः । ३. कृष्णः । ४. बलभद्रः । ५. तद्वैरी कृष्णवैरी जरासन्धः । ६. अत्यन्ततेजस्विनः । ७. सिद्धान्तदिशम्, **प्रवचनमिदम्** ता० सं० । ८. **०ऽष्टमपर्वणि** मु० । ९. **नेमिनाथनिर्वाण०** खं० २ । १०. **पाण्डवनिर्वाण०** इति न खं० २, ला० । ११. **द्वादशमः** खं० २, ला० । १२. **समाप्तं चेद०** खं० २ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्हम् ॥

श्रीशङ्खेश्वरपार्श्वनाथाय नमः ॥

नमो नमः श्रीगुरुनेमिसूरये ॥

**कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यभगवद्भिरचितं**

**श्रीत्रिषष्टिशलाकापुरुषचरित-महाकाव्यम् ॥**

# ॥ अथ नवमं पर्व ॥

## ॥ प्रथमः सर्गः ॥

### ॥ ब्रह्मदत्तचक्रिचरितम् ॥

श्री**नेमिनाथ**[2]मानम्य तत्तीर्थे लब्धजन्मनः । प्रवक्ष्ये **ब्रह्मदत्त**स्य चरितं चक्रवर्तिनः ॥१॥

**साकेतनगरे चन्द्रावतंस**स्य सुतः पुरा । नामतो **मुनिचन्द्रो**ऽभूद्[3] **जम्बूद्वीपे**ऽत्र **भारते** ॥२॥

निर्विण्णः कामभोगेभ्यो भारेभ्य इव भारिकः । मुनेः **सागरचन्द्र**स्य पार्श्वे जग्राह स व्रतम् ॥३॥

प्रव्रज्यां जगतः पूज्यां पालयं[4]श्चयमन्यदा । देशान्तरे विहाराय चचा[5]ल गुरुणा सह ॥४॥

स तु भिक्षानिमित्तेन पथि ग्रामं प्रविष्टवान् । सार्थाद् भ्रष्टोऽटवीमाट यूथच्युत इवैणकः[6] ॥५॥

स तत्र क्षुत्पिपासाभ्यामाक्रान्तो ग्लानिमागतः । चतुर्भिः प्रतिचरितो [7]वल्लवैर्बान्धवैरिव ॥६॥

स तेषामुपकाराय निर्ममे धर्मदेशनाम् । अपकारिष्वपि कृपा सतां किं नोपकारिषु ? ॥७॥

प्रवव्रजुस्ते तत्पार्श्वे चत्वारः शमशालिनः । चतुर्विधस्य धर्मस्य चतस्त्र इव मूर्तयः ॥८॥

व्रतं तेऽपालयन् सम्यक् किं तु द्वौ तत्र चक्रतुः । [8]धर्मे जुगुप्सां चित्रा हि चित्तवृत्तिः शरीरिणाम् ॥९॥

जग्मतुस्तपसा तौ द्यां जुगुप्साकारिणावपि । स्वर्गाय जायतेऽवश्यमप्येकाहकृतं तपः ॥१०॥

च्युत्वा ततो **दशपुरे स**[9]**ण्डिलि**ब्राह्मणाद्[10]उभौ । युग्मरूपौ सुतौ दास्यां **जयवत्यां** बभूवतुः ॥११॥

तौ क्रमाद्यौवनं [11]प्राप्तौ पित्रादिष्टौ च जग्मतुः । रक्षितुं क्षेत्रमीदृग् हि दासेरा[12]णां नियोजनम् ॥१२॥

तयोः शयितयोर्नक्तं निःसृत्य वटकोटरात् । एकः कृष्णाहिना दष्टः कृतान्तस्येव बन्धुना ॥१३॥

ततः सर्पोपलम्भाय द्वितीयोऽपि परिभ्रमन् । वैरादिवाऽऽशु तेनैव दष्टो दुष्टेन भोगिना ॥१४॥

तावनाप्तप्रतीकारौ वराकौ मृत्युमापतुः । यथा[13] जातौ तथा यातौ निष्फलं जन्म धिक् तयोः ॥१५॥

**कालिञ्जर**गिरिप्रस्थे[14] मृग्या यमलरूपिणौ । मृगावजनिषातां तौ ववृधाते सहैव च ॥१६॥

प्रीत्या सह चरन्तौ तौ मृगौ [15]मृगयुणा हतौ । बाणेनैकेनैककालं कालधर्ममुपेयतुः ॥१७॥

ततोऽपि [16]**मृतगङ्गा**यां राजहंस्या उभावपि । अजायेतां सुतौ युग्मरूपिणौ पूर्वजन्मवत् ॥१८॥

क्रीडन्तावेकदैकस्तौ[17] धृत्वा जालेन जालिकः । ग्रीवां भङ्क्त्वाऽवधीद्धर्महीनानां हीदृशी गतिः ॥१९॥

**वाराणस्यां** ततोऽभूतां **भूतदत्ता**भिधस्य तौ । महाधनसमृद्धस्य मातङ्गाधिपतेः सुतौ ॥२०॥

**चित्र-सम्भूत**नामानौ तौ मिथः स्नेहशालिनौ । न कदापि [18]व्ययुज्येतां सम्बद्धौ नख-मांसवत् ॥२१॥

**वाराणस्यां** तदा चाऽभूच्**छङ्ख** इत्यवनीपतिः । आसीच्च सचिवस्तस्य **नमुचि**र्नाम विश्रुतः ॥२२॥

अपरेद्युः सोऽपराधे महीयसि महीभुजा । अर्पितो **भूतदत्त**स्य [19]प्रच्छन्नवधहेतवे ॥२३॥

तेनोचे **नमुचि**श्छन्नं त्वां रक्षामि निजात्मवत् । पाठयस्यात्मजौ मे त्वं यदि भूमिगृहस्थितः ॥२४॥

---

१. **नमः श्रीसर्वज्ञाय** सं० । २. **०जिनमानम्य** सं० । ३. **०भूच्चन्द्रवन्मधुराकृतिः** सं० । ४. **पालयन्नन्यदा तु सः** मु० । **०न्नन्यदाऽथ सः** हे० । ५. **चचार** मु० । ६. हरिणः । ७. गोपैः । ८. **धर्मजुगुप्सां** हे० मु० । ९. **शाण्डिल्य०** मु० । १०. **०वुभौ** सं० । ११. **प्राप** सं०हे० । १२. दासीपुत्राणाम् । १३. **यथाऽऽयातौ** हे० मु० । १४. शिखरे । १५. व्याधेन । १६. **मृत्वा** मु० । १७. **०दैकस्थौ** हे० मु० । १८. **वियुज्येतां** सं० ।१९। **प्रच्छन्नं** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपन्नं **नमुचिना** तन्मातङ्गपतेर्वचः । जनो हि जीवितव्यार्थी तन्नास्ति न करोति यत् ॥२५॥
विचित्रा**श्चित्र-सम्भूतौ** स तथाऽध्यापयन्[1] कलाः । रेमेऽनुरक्तया सार्धं मातङ्गपतिभार्यया ॥२६॥
ज्ञात्वा त**द्भूतदत्ते**नाऽऽरेभे मारयितुं तु सः । सहेत[2] कः स्वदारेषु पारदारिकविप्लवम् ? ॥२७॥
ज्ञात्वा मातङ्गपुत्राभ्यां स दूरेणाऽपसारितः । सैवाऽस्मै दक्षिणा दत्ता प्राणरक्षणलक्षणा ॥२८॥
ततो निःसृत्य **नमुचि**र्गतवान् **हस्तिनापुरे** । चक्रे **सनत्कुमारेण** सचिवश्चक्रिणा निजः ॥२९॥
¶इ[3]तश्च **चित्र-सम्भूतौ** बभतुर्नवयौवनौ । कुतोऽपि हेतोरायातौ पृथिव्या**माश्विना**विव ॥३०॥
तौ स्वादु जगतुर्गीतं **हाहा-हूहू**पहासिनौ वादयामासतुर्वीणामति[4]**तुम्बुरु-नारदौ** ॥३१॥
गीतप्रबन्धानुगतैः सुव्यक्तैः सप्तभिः स्वरैः । तयोर्वादयतोर्वीणां[5] किङ्करन्ति[6] स्म किन्नराः ॥३२॥
मुरजं धीरघोषं तौ वादयन्तौ च चक्रतुः । गृहीत[7]**मुर**कङ्कालातोद्य**कृष्ण**विडम्बनाम् ॥३३॥
**शिवः शिवोर्वशी-रम्भा-ऽञ्जनकेशी[8]-तिलोत्तमाः** । यन्नाट्यं न विदाञ्चक्रुस्तौ तदप्यभिनिन्यतुः ॥३४॥
सर्वगान्धर्वसर्वस्वमपूर्वं विश्वकार्मणम् । प्रकाशयद्भ्या[9]मेताभ्यां न जह्रे कस्य मानसम् ? ॥३५॥
¶तस्यां पुरि प्रववृते कदाचिन्मदनोत्सवः । निरीयुः पौरचच्चर्य[10]स्तत्र सङ्गीतपेशलाः ॥३६॥
च[11]च्चरी निर्ययौ तत्र **चित्र-सम्भूत**योरपि । जग्मुस्तत्रैव सङ्गीताकृष्टाः पौरा मृगा इव ॥३७॥
राज्ञो व्यज्ञपि[12] केनापि मातङ्गाभ्यां पुरीजनः । गीतेनाऽऽकृष्य सर्वोऽयमात्मवन्मलिनः कृतः ॥३८॥
क्ष्मापेनाऽपि पुराध्यक्षः साक्षेपमिदमाज्ञपि । न प्रवेशः प्रदातव्यो नगर्यामनयोः क्वचित् ॥३९॥
¶ततः प्रभृति तौ **वाराणस्या** दूरेण तस्थतुः । प्रवृत्तश्चैकदा तत्र कौमुदीपरमोत्सवः ॥४०॥
राजशासनमुल्लङ्घ्य लोलेन्द्रियतया च तौ । प्रविष्टौ नगरीं भृङ्गौ गजगण्डतटीमिव ॥४१॥
उत्सवं प्रेक्षमाणौ तौ सर्वाङ्गीणाव[14]गुण्ठनौ । दस्युवन्नगरीमध्ये छन्नच्छन्नं[15] विचेरतुः ॥४२॥
क्रोष्टु[16]वत् क्रोष्टुशब्देन पौरगीतेन तौ ततः । अगायतां तारतारमलङ्घ्या भवितव्यता ॥४३॥
आकर्ण्य कर्णमधुरं सङ्गीतं युवनागरैः । मधुवन्मक्षिकाभिस्तौ मातङ्गौ परिवारितौ ॥४४॥
कावेता[17]विति विज्ञातुं लोकैः कृष्टावगुण्ठनौ । अरे ! तावेव मातङ्गावित्याक्षेपेण भाषितौ ॥४५॥
नागरैः कुट्यमानौ तौ यष्टिभिर्लोष्टुभिस्ततः । श्वानाविव गृहात् पुर्या नतग्रीवौ निरीयतुः ॥४६॥
तौ सैन्य[18]र्शशवल्लोकैर्हन्यमानौ पदे पदे । स्खलत्पादौ कथमपि **गभीरो**द्यानमीयतुः ॥४७॥
तावचिन्तयतामेवं धिङ् नौ[19] दुर्ज्ञातिदूषितम् । कलाकौशलरूपादि पयो घ्रातमिवाऽहिना ॥४८॥
उपकारो गुणैरास्तामपकारोऽयमावयोः । तदिदं क्रियमाणायाः शान्तेर्वेताल उत्थितः ॥४९॥
कलालावण्यरूपाणि स्यूतानि वपुषा सह । तदेवाऽनर्थसदनं तृणवत् त्यजतां क्वचित् ॥५०॥
इति निश्चित्य तौ प्राणपरि[20]हाणपरायणौ । मृत्युं साक्षादिव द्रष्टुं चेलतुर्दक्षिणामभि ॥५१॥
ततो दूरं प्रयातौ तौ गिरिमेकमपश्यताम् । यत्राऽऽरूढैर्भुवीक्ष्यन्ते करिणः किरिपोत[21]वत् ॥५१॥
भृगुपातेच्छया ताभ्यामारोहद्भ्यां महामुनिः । ददृशे पर्वते तस्मिञ्जङ्गमो गुणपर्वतः ॥५३॥
प्रावृषेण्यमिवाऽम्भोदं मुनिं गिरिशिरःस्थितम् । दृष्ट्वा प्रणष्ट[22]सन्तापप्रसरौ तौ बभूवतुः ॥५४॥
तौ प्रागुदुःखमिवोज्झन्तावानन्दाश्रुजलच्छलात् । तत्पादपद्मयोर्भृङ्गाविव सद्यो निपेततुः ॥५५॥
समाप्य मुनिना ध्यानं कौ युवां किमिहाऽऽगतौ ?। इति पृष्टौ स्ववृत्तान्तं तावशेषमशंसताम् ॥५६॥

१. **०ध्यापयत्** मु० । २. **सहते** सं०हे० । ३. **ततश्च** सं० । ४. **०मतितुम्बर०** सं० । **०मतितुम्बरु०** रे० । ५. **वेणुं** सं० । ६. किङ्करा इवाऽऽचरन्ति । ७. गृहीतं 'मुर'दैत्यस्य कङ्कालं-अस्थिपिञ्जरं तदेवाऽऽतोद्यं येन, तस्य कृष्णस्य विडम्बनां-शोभाम् । ८. **०युंजकेशी** मु० । ९. **०यद्भ्यां च ता०** मु० । **०यद्भ्यां तु ता०** । १०. **पौरचर्चर्य०** मु० । चच्चरी-चाचर-गरबा इति लोकव्यवहारे । ११. **चर्चरी** मु० । १२. **विज्ञपि** सं० । १३. **भृङ्गैर्गज०** सं० । १४. सर्वाङ्गीणं अवगुण्ठनं आच्छादनं ययोस्तौ । १५. **छन्नं छन्नं** मु० । १६. शृगालवत् । १७. **तावेता०** सं० ।१८. सैन्यमध्ये प्रविष्टशशकवत् । १९. आवयोः । २०. **०परिहार०** सं० । २१. सूकरशिशुवत् । २२. **प्रनष्ट०** सं. हे० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स ऊचे भृगुपातेन वपुरेव हि शीर्यते । शीर्यते नाऽशुभं कर्म जन्मान्तरशतार्जितम् ॥५७॥
त्याज्यं वपुरिदं वां चेद्गृह्लीतं[1] वपुषः फलम् । तच्चाऽपवर्गस्वर्गादिकारणं परमं तपः ॥५८॥
इत्यादिदेशनावाक्यसुधानिर्धौतमानसौ । तस्य पार्श्वे जगृहतुर्यतिधर्ममुभावपि ॥५९॥
¶अधीयानौ क्रमेणाऽथ तौ गीतार्थौ बभूवतुः । आदरेण गृहीतं हि किं वा न स्यान्मनस्विनाम् ? ॥६०॥
षष्ठाष्टमप्रभृतिभिस्तौ तपोभिः सुसत्तपैः । कृशयामासतुर्देहं प्राक्तनैः कर्मभिः सह ॥६१॥
ततो विहरमाणौ तौ ग्रामाद् ग्रामं पुरात् पुरम् । कदाचित् प्रतिपेदाते नगरं **हस्तिनापुरम्** ॥६२॥
तौ तत्र बहिरुद्याने चेरतुर्दुश्चरं तपः । सम्भोगभूमयोऽपि स्युस्तपसे शान्तचेतसाम् ॥६३॥
¶**सम्भूत**मुनिरन्येद्युर्मासक्षपणपारणे । पुरे प्रविष्टो भिक्षार्थं यतिधर्मोऽङ्गवानिव ॥६४॥
गेहाद्गेहं परिभ्राम्यन्नीर्यासमितिपूर्वकम् । स राजमार्गापतितो दृष्टो **नमुचि**मन्त्रिणा ॥६५॥
मातङ्गदारकः सोऽयं मद्वृत्तं ख्यापयिष्यति । मन्त्रीति चिन्तयामास पापाः सर्वत्र शङ्किताः ॥६६॥
यावन्मन्मर्म कस्यापि प्रकाशयति न ह्यसौ । तावन्निर्वासयाम्येनमिति पत्तीन् न्ययुङ्क्त सः ॥६७॥
स ताडयितुमारेभे तेन पूर्वोपकार्यपि । क्षीरपाणमिवाऽहीनामुपकारो[2]ऽसतां यतः ॥६८॥
लकुटैः कुट्यमानः स सस्यबीजमिवोत्कटैः । स्थानात्ततोऽपचक्राम त्वरितत्वरितं मुनिः ॥६९॥
अमुच्यमानः कुट्टाकैर्निर्यन्नपि मुनिस्तदा । शान्तोऽप्यकुप्यदापोऽपि तप्यन्ते वह्नितापतः ॥७०॥
निर्जगाम मुखात् तस्य बोष्पोत्पीलः[3] समन्ततः । अकालोपस्थिताम्भोदविभ्रमं बिभ्रदम्बरे ॥७१॥
तेजोलेश्योल्लसाऽथ ज्वालापटलमालिनी । तडिन्मण्डल[4]सङ्कीर्णामिव द्यामभितन्वती ॥७२॥
अतिविष्णुकुमारंतं[5] तेजोलेश्याधरं ततः । प्रसादयितुमाजग्मुः पौराः सभय-कौतुकाः ॥७३॥
राजा **सनत्कुमारो**ऽपि ज्ञात्वा तत्र समाययौ । उत्तिष्ठति यतो वह्निस्तद्धि[6] विध्यापयेत् सुधीः ॥७४॥
नत्वोचे तं नृपः किं वो युज्यते भगवन्निदम् ? । चन्द्राश्माऽर्कांशुतप्तो[7]ऽपि नाऽर्चिर्मुञ्चति जातुचित् ॥७५॥
एभिरत्यपराद्धं यत्कोपोऽयं भवतामतः । क्षीराब्धेर्मथ्यमानस्य कालकूटमभून्न किम् ? ॥७६॥
[8]न स्यात् स्याच्चेच्चिरं न स्याच्चिरं चेत् तत्फलेऽन्यथा । खलस्नेह इव क्रोधः सतां तद् ब्रूमहेऽत्र किम्? ॥७७॥
तथापि नाथ ! नाथामि कोपं मुञ्चेतरोचितम्[9] । भवादृशाः समदृशो ह्यपकार्युपकारिषु ॥७८॥
**चित्रो**ऽप्यत्राऽन्तरे ज्ञात्वा **सम्भूत**[10]मुनिमभ्यगात् । मधुरैर्वचनैः[11] सान्त्वयितुं भद्रमिव द्विपम् ॥७९॥
तस्य कोप उपाशाम्यच्चित्र[12]वाक्यैः श्रुतानुगैः । पयोवाहपयःपूरैर्गिरेरिव दवानलः ॥८०॥
तीव्रकोप[13]तमोमुक्तः शशाङ्क इव पार्वणः । क्षणादासादयामास प्रसादं स महामुनिः ॥८१॥
वन्दित्वा क्षमयित्वा च लोकस्तस्मान्न्यवर्तत । **सम्भूतश्चित्र**मुनिना तदुद्यानमनीयत ॥८२॥
पश्चात्तापं चक्रतुस्तौ पर्यटद्भिर्गृहे गृहे । आहारमात्रककृते प्राप्यते व्यसनं महत् ॥८३॥
शरीरं गत्वरमिदं[14] ह्याहारेणापि पोषितम् । किमनेन शरीरेण किं वाऽऽहारेण योगिनाम् ? ॥८४॥
चेतसेति विनिश्चित्य कृतसंलेखनौ पुरा । उभौ चतुर्विधाहारप्रत्याख्यानं प्रचक्रतुः ॥८५॥
¶कः पराभूतवान् साधुं वसुधां पाति मय्यपि । इति जिज्ञासतो राज्ञो मन्त्री व्यज्ञपि केनचित् ॥८६॥
अर्च्यान्नाऽर्चति यः सोऽपि पापः किमुत हन्ति यः । इत्यानाययदुर्वीशो दस्युवत् संयमय्य[15] तम् ॥८७॥
अन्योऽपि साधुविध्वंसं मा विधादिति[16] शुद्धधीः । तं बद्धं पुरमध्येन सोऽनैषीत् साधुसन्निधौ ॥८८॥
[17]नमन्नृपशिरोरत्नभाभिर[18]म्भोमयीमिव । कुर्वन्नुर्वीं स उर्वीशपुङ्गवस्तावन्दत ॥८९॥

---

१. **गृह्लीत** सं० । २. ०**मपकारो**० मु० । ३. **बाष्पोत्पीडं** मु० ऊष्मसमूहः । ४. **तडित्पटल**० सं० । ५. **अतिप्रकुपितं तं च** हे० मु० । ६. **वह्निस्तत्र** मु० । ७. चन्द्राश्मा-चन्द्रकान्तमणिः, सूर्यकिरणैस्तप्तोऽपि । ८. सतां क्रोधो न स्यात्, कदापि स्याच्चेतर्हि स चिरं न स्यात् न तिष्ठेत्, यदि चिरं स्यात्तथापि तत्फलेऽन्यथा स्यादित्यर्थः । ९. इतरोचितं-सामान्यजनोचितम् । १०. **सम्भूति**० सं०हे० । ११. **सान्त्वयितुं भद्रमिव द्विपं मधुरभाषितैः** हे० मु० । १२. **उपशा**० सं० । १३. **महाकोप**० सं० । १४. नश्वरम् । १५. चौरवद् बद्ध्वा । १६. न व्यधात् । १७. **नमन्नृप**० हे० मु० । १८. ०**भानिरम्भो**० मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्य[1]पाणिगृहीतास्यवस्त्रिकापिहिताननौ । उद्दक्षिणकरौ तौ तमाशशंसतुराशिषा ॥९०॥
यो वोऽपराद्धवान् सोऽस्तु स्वकर्मफलभो[2]जनम् । राज्ञा **सनत्कुमारे**णेत्यदर्शि **नमुचि**स्तयोः ॥९१॥
अमोचि **नमुचिः** प्राप्तः पञ्चत्वोचितभूमिकाम् । **सनत्कुमार**तस्ताभ्यामुरगो गरुडादिव ॥९२॥
निर्वास्य कर्मचण्डालश्चण्डाल इव पत्तनात् । वध्योऽप्यमोचि राज्ञा स मान्यं हि गुरुशासनम् ॥९३॥
॥सपत्नीभिश्चतुःषष्टिसहस्रैः परिवारिता । वन्दितुं तौ **सुनन्दा**ऽऽगात् स्त्रीरत्नमथ चक्रिणः ॥९४॥
सा **सम्भूतमुनेः** पादपद्मयोर्लुलितालका । पपाताऽऽस्येन कुर्वाणा भुवमिन्दुमतीमिव ॥९५॥
तस्याश्चाऽलकसंस्पर्शं **सम्भूतं**[3]मुनिरन्वभूत् । रोमाञ्चितश्च सद्योऽभूच्छलान्वेषी हि मन्मथः ॥९६॥
अथ सान्तःपुरे राज्ञि तावनुज्ञाप्य जग्मुषि । रागाभिभूतः **सम्भूतो** निदानमिति निर्ममे ॥९७॥
दुष्करस्य मदीयस्य यद्यस्ति तपसः फलम् । तत्[4] स्त्रीरत्नपतिर्भूयामहमेष्यति जन्मनि ॥९८॥
**चित्रो**ऽप्यूचे कांक्षसीदं मोक्षदात् तपसः फलम् । मौलियोग्येन रत्नेन पादपीठं करोषि किम् ? ॥९९॥
मोहात् कृतं तन्निदानमिदानीमपि मुच्यताम् । मिथ्यादुष्कृतमस्याऽस्तु मुह्यन्ति न भवादृशाः ॥१००॥
एवं निवार्यमाणोऽपि **सम्भूतश्चित्र**साधुना । निदानं नाऽमुचदहो ! विषयेच्छा बलीयसी ॥१०१॥
निर्व्यूढानशनौ तौ तु प्राप्तायुःकर्मसंक्षयौ । **सौधर्मे** समजायेतां विमाने सुन्दरे सुरौ ॥१०२॥
॥च्युत्वा जीवोऽथ **चित्रस्य** प्रथमस्वर्गलोकतः । पुरे **पुरिमताला**ख्ये महेभ्यतनयोऽभवत् ॥१०३॥
च्युत्वा **सम्भूत**जीवोऽपि [5]**काम्पिल्ये ब्रह्म**भूपतेः । भार्यायाश्चु**लनी**देव्याः कुक्षौ समवतीर्णवान् ॥१०४॥
चतुर्दशमहास्वप्नसूचितागामिवैभवः । [6]स्वर्णवर्णोऽभवत् सूनुस्तस्याः सप्तधनूच्छ्रितः ॥१०५॥
ब्रह्ममग्न इवानन्दाद् **ब्रह्म**भूपतिरस्य च । ब्रह्माण्डविश्रुतां **ब्रह्मदत्त** इत्यभिधां व्यधात् ॥१०६॥
ववृधे स जगन्नेत्रकुमुदानां मुदं दिशन् । पुष्यन्[7] कलाकलापेन कला[8]निधिरिवाऽमलः ॥१०७॥
॥वक्त्राणि ब्रह्मण इव चत्वारि **ब्रह्मणो**ऽभवन् । प्रियमित्राणि तत्रैकः **कटकः** [9]**काशि**भूपतिः ॥१०८॥
**कणेरुदत्त**संज्ञोऽन्यो **हस्तिनापुर**नायकः । **दीर्घश्च कोशला**धीशश्चम्पेशः **पुष्पचूलकः** ॥१०९॥
ते स्नेहाद्वर्षमेकैकमेकैकस्य पुरं युताः । पञ्चाऽप्यधिवसन्ति स्म स्वर्द्रुमा इव **नन्दनम्** ॥११०॥
**ब्रह्मणो** नगरेऽन्येद्युस्ते यथायोगमाययुः । तत्र च क्रीडतां तेषां ययौ कालः कियानपि ॥१११॥
**ब्रह्मदत्त**स्य पूर्णेषु वर्षेषु द्वादशस्वथ । परलोकगतिं भेजे **ब्रह्मराजः** शिरोरुजा ॥११२॥
कृत्वौर्ध्वदेहिकं **ब्रह्मभूपतेः** **कटका**दयः । उपाया इव मूर्त्तास्ते चत्वारोऽमन्त्रयन्निति ॥११३॥
**ब्रह्मदत्तः** शिशुर्यावदेकैकस्तावदत्र नः । तस्य प्राहरिक इव वर्षे वर्षेऽस्तु रक्षकः ॥११४॥
**दीर्घ**स्त्रातुं सुहृद्राज्यं तैः संयुज्य न्ययुज्यत । ततः स्थानाद् यथास्थानमथ जग्मुस्त्रयोऽपि ते ॥११५॥
॥अदीर्घबुद्धि**र्दीर्घो**ऽपि **ब्रह्मणो** राज्यसम्पदम् । [10]उक्षेवाऽरक्षकं क्षेत्रं स्वच्छन्दं बुभुजे ततः ॥११६॥
निरङ्कुशतया कोशे चिर[11]गूढं स मूढधीः । सर्वमन्वेषयामास परमर्मेव दुर्जनः ॥११७॥
स प्राक्परिचयादन्तरन्तःपुरमनर्गलः । सञ्चचाराऽऽधिपत्यं हि प्रायोऽन्धङ्करणं नृणाम् ॥११८॥
एकान्ते **चुलनी**देव्यां[12] सोऽतिमात्रममन्त्रयत् । वचोभिर्नर्मनिपुणैर्नुदन्[13] स्मरशरैरिव ॥११९॥
आचारं **ब्रह्म**सुकृतं लोकं चाऽवगणय्य सः । सम्प्रसक्त[14]**श्चुलन्या**ऽभूद्दुर्वाराणीन्द्रियाणि हि ॥१२०॥
[15]**ब्रह्मराजे** पतिप्रेम मित्रस्नेहं च तावुभौ । जहतु**श्चुलनी-दीर्घा**वहो ! सर्वङ्कषः स्मरः ॥१२१॥

१. वामहस्तगृहीतमुखवस्त्रिकया पिहितमुखौ । २. **०फलभागसौ** सं० । ३. **सम्भूति०** सं० । ४. **ततः स्त्रीरत्नपतिरहं भूयासं भाविजन्मनि** हे० मु० । ५. **काम्पील्ये** हे० । ६. **अथ जज्ञे सुतस्तस्याः प्राच्या इव दिवाकरः** सं० । ७. **पुष्यन्** सं० । **पुष्यत्** हे० । ८. चन्द्रः । ९. **कासि०** सं० । १०. वृषभ इव । ११. चिरकालाद् गोपितम् । १२. **०देवीं** सं० । १३. **०स्तुन्दन्** मु० । १४. **स प्रसक्त०** सं० । १५. **०राजपति०** सं० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखं विलसतोरेवं यथा[1]कामीनयोस्तयोः । बहवो व्यतियान्ति स्म मुहूर्तमिव वासराः ॥१२२॥

¶**ब्रह्म**राजस्य हृदयं द्वै[2]तीयीकमिव स्थितम् । मन्त्र्यज्ञासीद्**धनु**रिदं स्पष्टं दुश्चेष्टितं तयोः ॥१२३॥

सचिवोऽचिन्तयच्चेदं **चुलनी** स्त्रीस्वभावतः । अकार्यमाचरत्वेषा सत्यो हि विरलाः स्त्रियः ॥१२४॥

सकोशान्तःपुरं राज्यं न्यासे विश्वासतोऽर्पितम् । यद्विद्रवति **दीर्घ**स्तदकार्यं नास्य किञ्चन ॥१२५॥

तदसावाचरेत् किञ्चित् कुमारस्यापि विप्रियम् । पोषकस्यापि नाऽऽत्मीयो मार्जार इव दुर्जनः ॥१२६॥

विमृश्येति **वर[3]धनुः**संज्ञं स्वसुतमादिशत् । तत्तज्ज्ञापयितुं नित्यं **ब्रह्मदत्तं** च सेवितुम् ॥१२७॥

विज्ञप्ते मन्त्रिपुत्रेण वृत्तान्ते **ब्रह्म**नन्दनः । शनैः प्राकाशयत् कोपं नवोद्भि[4]न्न इव द्विपः ॥१२८॥

¶**ब्रह्मदत्तो**ऽसहिष्णुस्तन्मातृदुश्चरितं ततः । मध्येशु[5]द्धान्तमगमद् गृहीत्वा काक-कोकिले ॥१२९॥

वर्णसङ्करतो वध्यावेतावन्य[6]मपीदृशम् । निश्चितं निग्र[7]हीष्यामि तत्रेत्युच्चैरुवाच सः ॥१३०॥

काकोऽहं त्वं पिकीत्यावां निजिघृक्षत्यसाविति । **दीर्घे**णोक्तेऽवदद् देवी मा भैषीर्बालभाषितात् ॥१३१॥

एकदा भद्र[8]वशया सह नीत्वा मृगद्वि[9]षम् । साक्षेपं तद्वदेवोचे कुमारो मोर[10]सूचकम् ॥१३२॥

इति श्रुत्वाऽवदद्**दीर्घः** साकूतं बालभाषितम् । ततश्**चुलन्यु**वाचेति यद्यस्त्येवं ततोऽपि किम् ? ॥१३३॥

हंस्याऽन्येद्युर्बकं बद्ध्वाऽभ्यधत्त **ब्रह्म**सूरिति । अनया रमते ह्येष सहे कस्यापि नेदृशम् ॥१३४॥

**दीर्घो**ऽवादीदिदं देवि ! स्वपुत्रस्य शिशोः शृणु । अन्तरुद्भिन्नरोषाग्निधूमोद्गारोपमा गिरः ॥१३५॥

वर्धमानः कुमारोऽयं तदवश्यं भविष्यति । आवयोरतिविघ्नाय करे[11]ण्वोरिव केस[12]री ॥१३६॥

न यावत् कवचहरः कुमारो हन्त जायते । तावद्विषद्रुम इव बालोऽप्युन्मूल्यतामसौ ॥१३७॥

**चुलन्यूचे** कथं राज्यधरः पुत्रो विहन्यते । तिर[13]श्च्योऽपि हि रक्षन्ति पुत्रान् प्राणानिवाऽऽत्मनः ॥१३८॥

**दीर्घो**ऽब्रवीत् पुत्रमूर्त्या तव कालोऽयमागतः । मा मुहस्त्वं मयि सति सुतास्तव न दुर्लभाः ॥१३९॥

विमुच्याऽपत्यवात्सल्यं शाकिनीव **चुलन्यथ** । [14]रतस्नेहपर[15]वशा प्रतिशु[16]श्राव तत्तथा ॥१४०॥

साऽमन्त्रयद्विनाश्योऽयं [17]रक्ष्या च वचनीयता । यद्वदाम्रवणं सेक्यं कार्यं च पितृतर्पणम् ॥१४१॥

क उपायोऽथवाऽस्त्येष विवाह्यो **ब्रह्म**सूरसौ । वासागारमिषात् तस्य कार्यं जतु[18]गृहं ततः ॥१४२॥

गूढप्रवेश-निःसारे तत्रोद्वाहादनन्तरम् । सुषुप्ते सस्नुषेऽप्यस्मिन् ज्वाल्यो निशि हुताशनः ॥१४३॥

उभाभ्यां मन्त्रयित्वैवं **पुष्पचूलस्य** कन्यका । वृता वैवाहिकी सर्वसामग्री चोपचक्रमे ॥१४४॥

¶तयोश्च क्रूर[19]माकूतं विज्ञाय सचिवो **धनुः** । इति विज्ञापयामास **दीर्घ**राजं कृताञ्जलिः ॥१४५॥

कलाविन्नीतिकुशलः सूनु**र्वरधनु**र्मम । वहंलि[20]हयुवेवाऽस्तु त्वदाज्ञारथधूर्वहः ॥१४६॥

जरद्गव इवाऽहं तु यातायातेषु निःस्पृहः । गत्वा क्वचिदनुष्ठानं करोमि त्वदनुज्ञया ॥१४७॥

कमप्यनर्थं कुर्वीत मायाव्येष गतोऽन्यतः । आशङ्कतेति तं **दीर्घो** धीमद्भ्यः को न शङ्कते ? ॥१४८॥

मायाकृता[21]वहित्थोऽथ **दीर्घः** सचिवमूचिवान् । राज्येन त्वां विना नः किं यामिन्येव विना विधुम् ॥१४९॥

धर्मं सत्रा[22]दिनाऽत्रैव कुरु मा गास्त्वमन्यतः । राज्यं भवादृशैर्भाति सद्वृक्षैरिव काननम् ॥१५०॥

ततो **भागीरथी**तीरे सद्बुद्धिर्विदधे **धनुः** । धर्मस्येव महाच्छत्रं पवित्रं सत्रमण्डपम् ॥१५१॥

सत्रं च पान्थसार्थानामन्नपानादिना ततः । प्रवाहमिव गाङ्गं सोऽनवच्छिन्नमवाहयत् ॥१५२॥

दान-मानोपकारात्तैः स प्रत्य[23]यितपूरुषैः । चक्रे सुरङ्गां द्विक्रोशां ततो जतुगृहावधि ॥१५३॥

---

१. स्वच्छन्दयोः । २. **द्वितीयीक०** सं० । ३. **वरधनुसंज्ञं** हे० मु० । ४. नवीनमदयुक्तः । ५. अन्तःपुरमध्ये । ६. **०वन्यदपी०** सं० । ७. **निगृही०** सं० । ८. भद्रजातीया वशा-हस्तिनी, तया । ९. सिंहम् । १०. वधसूचकम् । ११. करि-करिण्योः । १२. **केशरी** सं० । १३. **तिरश्चो०** मु० । १४. **रति०** मु० । १५. **०प्रतिवशा** मु० । १६. अङ्गीचकार । १७. **रक्षा** मु० सं० हे० । १८.लाक्षागृहम् । १९. **०माक्रूरं** मु० । २०. वहंलिहो वृषभः । २१. मायया आकारं गोपयित्वा । २२. दानशालादिना । २३. विश्वस्तजनैः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

¶इतः प्रच्छन्नलेखेन सौहार्दद्रुमवारिणा । इमं व्यतिकरं **पुष्पचूलम**ज्ञापयद्**धनुः** ॥१५४॥
ज्ञात्वा तत् **पुष्पचूलो**ऽपि सुधीः स्वदुहितुः पदे । प्रेषयामास दासेरीं[1] हंसीस्थाने बकीमिव ॥१५५॥
पित्तलेव स्वर्णमिति[2] **पौष्पचूली**[3]ति सा जनैः । लक्षिता भूषणमणिद्योतिताशाऽविशत् पुरीम् ॥१५६॥
मूर्च्छद्गीति-ध्वनत्तूर्यपूर्यमाणे नभस्तले । मुदा तां **चुलनी ब्रह्म**सूनुना पर्यणाययत् ॥१५७॥
¶**चुलन्य**प्यखिलं लोकं विसृज्य रजनीमुखे । कुमारं सस्नुषं प्रैषीज्जातुषे[4] वासवेश्मनि ॥१५८॥
सह वध्वा कुमारोऽपि विसृष्टान्यपरिच्छदः । तत्राऽगाद्**वरधनु**ना छाययेव स्वया सह ॥१५९॥
वार्ताभिर्मन्त्रिपुत्रेण **ब्रह्मदत्त**स्य जाग्रतः । निशार्धं व्यतिचक्राम कुतो निद्रा महात्मनाम् ? ॥१६०॥
**चुलन्या**दिष्टपुरुषैः फूत्कर्तुं[5] नमिताननैः । ज्वलेति[6] प्रेरित इव वासगेहेऽज्वलच्छिखी ॥१६१॥
धूमस्तोमस्ततो विष्वक् पूरयामास रोदसी[7] । **चुलनी-दीर्घ**दुःकृत्यदुःकीर्तिप्रसरोपमः ॥१६२॥
सप्तजिह्वोऽप्यभूत् कोटिजिह्वो ज्वालाकदम्बकैः । तत् सर्वं कवलीकर्तुं बुभुक्षित इवाऽनलः ॥१६३॥
किमेतदिति संपृष्टो **ब्रह्मदत्तेन** मन्त्रिसूः । संक्षेपादाचचक्षेऽदश्**चुलनी**दुष्टचेष्टितम् ॥१६४॥
आक्रष्टुं त्वामितः स्थानाद्[8] रूपं करिकरादिव । तातेन दापिताऽस्तीह सुरङ्गा[9] सत्रगामिनी ॥१६५॥
अत्र पार्ष्णिप्रहारेण प्रकाशीकृत्य तत्क्षणात् । योगीव विवरद्वारं तद्द्वारं प्रविशाऽधुना ॥१६६॥
आतोद्यपुटवत् सोऽथ पार्ष्णिनाऽऽस्फोट्य भूपुटम् । सुरङ्गया समित्रोऽगाद्रत्नरन्ध्रेण सूत्रवत् ॥१६७॥
¶सुरङ्गान्ते **धनु**धृतौ तुरङ्गावध्यरोहताम् । राज-मन्त्रिकुमारौ तौ **रेवन्त**श्रीविडम्बकौ ॥१६८॥
पञ्चाशद्योजनीं क्रोशमिव पञ्चमधारया[10] । अश्वौ जग्मतुरुच्छ्वासौ ततः पञ्चत्वमापतुः ॥१६९॥
ततस्तौ पादचारेण प्राणत्राणपरायणौ । जग्मतुर्निकषा[11] ग्रामं कृच्छ्रात् **कोष्ठक**नामकम् ॥१७०॥
**प्रोवाच ब्रह्मदत्तो**ऽथ सखे ! **वरधनो**ऽधुना । स्पर्धमाने इवाऽन्योऽन्यं बाधते क्षुत् तृषा च माम् ॥१७१॥
क्षणमत्र प्रतीक्षस्वेत्युक्त्वा तं मन्त्रिनन्दनः । ग्रामादाकारयामास नापितं वपनेच्छया ॥१७२॥
मन्त्रिपुत्रस्य मन्त्रेण तत्रैव **ब्रह्म**नन्दनः । वपनं कारयामास चूलामात्रमधारयत्[12] ॥१७३॥
ततः काषायवस्त्राणि पवित्राणि स धारयन् । सन्ध्याभ्रच्छन्नबालांशुमालिलीलामधारयत् ॥१७४॥
कण्ठे **वरं**[13]**धनु**र्न्यस्तं ब्रह्मसूत्रमधत्त च । **ब्रह्म**पुत्रो ब्रह्मपुत्र[14]सादृश्यमुद्[15]वाह च ॥१७५॥
मन्त्रिसूर्**ब्रह्मदत्त**स्य वक्षः श्रीवत्सलाञ्छनम् । पट्टेन पिदधे प्रावृट्पयोदेनेव भास्करम् ॥१७६॥
एवं वेषपरावर्त्तं **ब्रह्मसूः** सूत्रधारवत् । पारिपार्श्विकवन्मन्त्रिपुत्रोऽपि विदधे तथा ॥१७७॥
¶ततः प्रविष्टौ ग्रामे तौ पार्वणाविन्दु-भास्करौ । केनापि द्विजवर्येण भोजनाय निमन्त्रितौ ॥१७८॥
सोऽथ तौ भोजयामास भक्त्या राजानुरूपया । प्रायस्तेजोऽनुमानेन जायन्ते प्रतिपत्तयः ॥१७९॥
कुमारस्याऽक्षतान् मूर्ध्नि क्षिपन्ती विप्रगेहिनी । श्वेतवस्त्रयुगं कन्यां चोपनिन्येऽप्सरःसमाम् ॥१८०॥
ऊचे ततो **वरधनु**र्बटोरस्याऽकलापटोः । कण्ठे बध्नासि किमिमां मूढे ! शण्ढस्य[16] गामिव ? ॥१८१॥
ततो द्विजवरेणोचे ममेयं गुणबन्धुरा । कन्या **बन्धुमती** नाऽस्या विनाऽमुमपरो वरः ॥१८२॥
षट्खण्डपृथिवीपाता पतिरस्या भविष्यति । इत्याख्यायि निमित्तज्ञैर्निश्चितं चाऽयमेव सः ॥१८३॥
तैरेवाख्यायि मे पट्टच्छन्नश्रीवत्सलाञ्छनः । भोक्ष्यते यस्तव गृहे तस्मै देया स्वकन्यका ॥१८४॥
¶जज्ञे च **ब्रह्मदत्त**स्योद्वाहः सह तया तदा । भोगिनामुपतिष्ठन्ते भोगाः काममचिन्तिताः ॥१८५॥

१. दासीपुत्रीम् । २. स्वर्णतुल्या । ३. **पुष्पचूली०** सं० । ४. जतुविकारे जतुनिर्मित इति यावत् । ५. **पूत्कर्तुं** सं० । ६. **ज्वालेति** मु० । ७. **रोदसीम्** मु० । ८. **स्थानाद्रूपं** मु० सं० हे० । ९. **सुरुङ्गा** सं० । १०. अश्वानां पञ्च गतयः धारा उच्यन्ते, तत्र पञ्चम्या 'प्लुत' धारया । ११. समीपे । १२. शिखामात्रम् । १३. **०धनुर्न्यस्तं** सं० । १४. ब्राह्मणपुत्र । १५. **०मुदवाह** मु० सं० । १६. **शण्डस्य** मु० हे० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तामुषित्वा निशां **बन्धुमती**माश्वास्य चान्यतः । ययौ कुमार एकत्राऽवस्थानं सद्विषां कुतः ॥१८६॥
प्रान्तग्रामं प्रापतुस्तौ तत्र चाऽशृणुतामिदम् । पन्थानोऽधि**ब्रह्मदत्तं** सर्वे **दीर्घेण** रोधिताः ॥१८७॥
प्रस्थितावुत्पथेनाऽथ पेततुस्तौ महाटवीम् । निरुद्धां श्वापदै**र्दीर्घ**पुरुषैरिव दारुणैः ॥१८८॥
ततः कुमारं तृषितं मुक्त्वा वटतरोरधः । वारिणेऽगा**द्वरधनु**र्मनस्तुल्येन रंहसा ॥१८९॥
ततो **वरधनुः** सोऽयमुपलक्ष्य न्यरुध्यत । रुषितै**र्दीर्घ**पुरुषैः पोत्रि[1]पोत इव श्वभिः ॥१९०॥
गृह्यतां गृह्यतामेष बध्यतां बध्यतामिति । भीषणं भाषमाणैस्तैर्जगृहे बबधे च सः ॥१९१॥
संज्ञामधि**ब्रह्मदत्तं** पलायस्वेति सोऽकृत । पलायिष्ट कुमारोऽपि समये खलु पौरुषम् ॥१९२॥
¶ततस्तस्या महाटव्या महाटव्य[2]न्तरं जवात् । **ब्रह्मसू**राश्रमीवाऽगादाश्रमादाश्रमान्तरम् ॥१९३॥
स तु तत्र कृताहारो विरसैररसैः फलैः । तृतीये दिवसेऽपश्यदेकं तापसमग्रतः ॥१९४॥
कुत्राऽऽश्रमो वो भगवन्निति पृच्छंस्तपस्विना । स स्वाश्रमपदं निन्ये तापसा ह्यतिथिप्रियाः ॥१९५॥
सोऽथाऽपश्यत् कुलपतिं ववन्दे पितृवन्मुदा । प्रमाणमन्तःकरणमविज्ञातेऽपि वस्तुनि ॥१९६॥
ऊचे कुलपतिर्वत्स ! तवाऽतिमधुराकृतेः । को हेतुरत्राऽऽगमने मरौ[3] सुरतरोरिव ॥१९७॥
ततो महात्मनस्तस्य विश्वस्तो **ब्रह्मसू**र्निजम् । वृत्तान्तमाख्यत् प्रायेण गोप्यं न खलु तादृशाम् ॥१९८॥
हृष्टस्ततः कुलपतिर्व्याहरद्गद्गदाक्षरम् । द्विधास्थित इवात्मैको भ्राताऽहं त्वत्पितुर्लघुः ॥१९९॥
ततो निजगृहं प्राप्तस्तिष्ठ वत्स ! यथासुखम् । अस्मत्तपोभिर्वर्धस्व सहैवाऽस्मन्मनोरथैः ॥२००॥
कुर्वन् जनदृगानन्दममन्दं विश्ववल्लभः । स तस्मिन्नाश्रमे तस्थौ प्रावृट्कालोऽप्युपस्थितः ॥२०१॥
स तत्र निवसंस्तेन बलेनेव जनार्दनः । शास्त्राणि शस्त्राण्यस्त्राणि सर्वाण्यध्याप्यते स्म च ॥२०२॥
¶वर्षात्यये समायाते सारसालापबन्धुरे । बन्धाविव फलाद्यर्थं प्रचेलुस्तापसा वनम् ॥२०३॥
सादरं कुलपतिना वार्यमाणोऽप्यगाद्वनम् । तैः सह **ब्रह्मदत्तो**ऽपि कलभः कलभैरिव ॥२०४॥
भ्रमन्नितस्ततोऽपश्यद् विण्मूत्रं तत्र दन्तिनः । प्र[4]त्यग्रमिति सोऽमंस्त हस्ती कोऽप्यस्त्यदूरतः ॥२०५॥
तापसैर्वार्यमाणोऽपि ततः सोऽनुपदं व्रजन् । योजनपञ्चकस्याऽन्ते नागं नगमिवैक्षत ॥२०६॥
निःशङ्कं बद्धपर्यङ्कः कुर्वन् गर्जितमूर्जितम् । मल्लो मल्लमिवाऽऽह्वास्त नृहस्ती मत्तहस्तिनम् ॥२०७॥
क्रुधोद्धूषित[5]सर्वाङ्गो व्याकुञ्चितकरः करी । निष्कम्पकर्णस्ताम्रास्यः कुमारं प्रत्यधावत ॥२०८॥
इभोऽभ्यर्णेऽभ्यगाद् यावत् कुमारस्तावदन्तरे । उत्तरीयं प्रचिक्षेप तं वञ्चयितुमर्भवत् ॥२०९॥
अभ्रखण्डमिव भ्रश्यदन्तरिक्षात् तदंशुकम् । दशनाभ्यां प्रतीयेष क्षणात् सोऽप्यत्य[6]मर्षणः ॥२१०॥
एवंविधाभिश्चेष्टाभिः कुमारस्तं मतङ्गजम् । लीलया खेलयामासाऽहितुण्डिक[7] इवोरगम् ॥२११॥
सखेव **ब्रह्मदत्त**स्याऽत्राऽन्तरे कृतडम्बरः । धाराधरोऽम्बुधाराभिरुपदुद्राव तं गजम् ॥२१२॥
ततो रसित्वा विरसं मृग[8]नाशं ननाश सः । कुमारोऽपि भ्रमन्नद्रिर्दिङ्मूढः[9] प्राप निम्नगाम् ॥२१३॥
¶उत्ततार कुमारस्तां नदीं मूर्तामिवाऽऽपदम् । ददर्श च तटे तस्याः पुराणं पुरं[10]मुद्वसम् ॥२१४॥
कुमारः प्रविशंस्तस्मिन्नपश्यद्वंशजालिकाम् । तत्राऽ**सिं[11]-वसुनन्दौ** चोत्पातकेतु-विधू[12] इव ॥२१५॥
तौ गृहीत्वा कृपाणेन कुमारः शस्त्रकौतुकी । चिच्छेद कदलीच्छेदं तां महावंशजालिकाम् ॥२१६॥
वंशजालान्तरे सोऽथ स्फुरदोष्ठदलं शिरः । ददर्श पतितं पृथ्व्यां स्थलपद्ममिवाऽग्रतः ॥२१७॥

१. वराहपोतः । **पोतृ०** सं० । २. **महाटव्यान्तरां** मु० । ३. **मेरौ** मु० । ४. **प्रत्यग्रमतिः सो०** मु० । प्रत्यग्रं अभिनवम् । ५. **क्रुधोद्धुषित०** सं० । ६. **सोऽप्यतिमर्षणः** सं० । ७. सर्पग्राहकः । ८. मृगवत् नंष्ट्वा । ९. दिग्भ्रान्तः । १०. निर्जनम्, 'उज्जड' इति भाषायाम् । ११. असिः खड्गः, वसुनन्दः कृपाणी । १२. उत्पातसूचकौ केतु-चन्द्रग्रहौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्यक् पश्यन्नपश्यच्च **ब्रह्मसू**स्तत्र कस्यचित् । [1]वल्गुलीकरणस्थस्य कबन्धं धूमपायिनः[2] ॥२१८॥

हा विद्यासाधनधनो निधनं प्रापितो मया । कोऽप्येषोऽनपराधो धिङ् मामिति स्वं निनिन्द सः ॥२१९॥

अग्रतः स ययौ यावत् तावदुद्यानमैक्षत । सुरलोकादवतीर्णमवन्यामिव **नन्दनम्** ॥ २२०॥

स तत्र प्रविशन्नग्रे प्रासादं सप्तभूमिकम् । अपश्यत् सप्तलोकश्रीरहस्यमिव मूर्च्छितम् ॥२२१॥

आरूढोऽभ्रंलिहे तस्मिन्निषण्णां खेचरीमिव । हस्तविन्यस्तवदनां नारीमेकां स ऐक्षत ॥२२२॥

उपसृत्य कुमारस्तां पप्रच्छ स्वच्छया गिरा । का त्वमेकाकिनी किं वा ? किं वा शोकस्य कारणम्? ॥२२३॥

¶अथ सा सौ[3]ध्वसाक्रान्ता जगादेति सगद्गदम् । महान् व्यतिकरो मेऽस्ति ब्रूहि कस्त्वं? किमागतः? ॥२२४॥

**ब्रह्मदत्तो**ऽस्मि **पञ्चाल**भूपतेर्**ब्रह्मणः** सुतः । इति सोऽचीकथद्यावन्मुदा सा तावदुत्थिता ॥ २२५॥

आनन्दबाष्पसलिलैर्लोचनाञ्जलिविच्युतैः । सा कुर्वती पाद्यमिव न्यपतत्तस्य पादयोः ॥२२६॥

कुमाराऽशरणाया मे शरणं त्वमुपागतः । मज्जतो नौरिवाऽम्भोधौ वदन्तीति रुरोद सा ॥२२७॥

तेन पृष्टा च साऽप्यूचे त्वन्मातृभ्रातुरस्म्यहम् । नाम्ना **पुष्प[4]वती पुष्पचूल**स्याऽङ्गपतेः सुता ॥२२८॥

कन्याऽस्मि भवते दत्ता विवाहदिवसोन्मुखी । हंसीव रन्तुमुद्याने दीर्घिकापुलिनेऽगमम् ॥२२९॥

दुष्टविद्याधरेणाऽहं **नाट्योन्मत्ता**भिधेन तु । अत्राऽपहृत्याऽऽनीताऽस्मि **रावणेनेव जानकी** ॥२३०॥

दृष्टिं सोऽसहमानो मे विद्यासाधनहेतवे । **शूर्[5]पणखासू**नुरिव प्राविशद्वंशजालिकाम् ॥२३१॥

धूमपस्योर्ध्वपादस्य तस्य विद्याऽद्य सेत्स्यति । शक्तिमान् सिद्धविद्यः स किल मां परिणेष्यति ॥२३२॥

तस्यास्तद्वधवृत्तान्तं कुमारोऽपि न्यवेदयत् । हर्षस्योपरि हर्षोऽभूत् प्रियाप्त्या विप्रियच्छिदा ॥२३३॥

तयोरथ विवाहोऽभूद्गान्धर्वोऽन्योऽन्यरक्तयोः । श्रेष्ठो हि क्षत्रियेष्वेष निर्मन्त्रो[6]ऽपि सकामयोः ॥२३४॥

रममाणस्तया सार्धं विचित्रालापपेशलम् । स एकयामामिव तां त्रियामामत्यवाहयत् ॥२३५॥

¶ततः प्रभातसमये **ब्रह्मदत्तेन** शुश्रुवे । आकाशे खेचरस्त्रीणां कु[7]रीणामिव ध्वनिः ॥२३६॥

अकस्माज्जायते कोऽयं खे शब्दोऽन[8]ब्दवृष्टिवत् । तेनेति पृष्टा संभ्रान्ता **पु[9]ष्पवत्ये**वमब्रवीत् ॥२३७॥

भगिन्यौ त्वद्द्विषो **नाट्योन्मत्त**स्येमे समागते । नाम्ना **खण्डा विशाखा** च विद्याधरकुमारिके ॥२३८॥

तन्निमित्तं विवाहोपस्करपाणी इमे मुधा । अन्यथा चिन्तितं कार्यं दैवं घटयतेऽन्यथा ॥२३९॥

अपसर्प क्षणं तावद् यावत्त्वद्गुणकीर्तनैः । लभेऽहमनयोर्भावं त्वयि राग-विरागयोः ॥२४०॥

रागे रक्तां प्रेरयिष्ये पताकां तत् त्वमापतेः । विरागे चलयिष्यामि श्वेतां गच्छेस्तदाऽन्यतः ॥२४१॥

**ब्रह्मदत्त**स्ततोऽवादीन्मा भैषीर्भीरु ! नन्वहम् । **ब्रह्मसूनुः** किमेते मे तुष्टे रुष्टे करिष्यतः ? ॥२४२॥

उवाच **पु[10]ष्पवत्ये**वं नैताभ्यां वच्मि ते भयम् । एतत्सम्बन्धिनः किं तु मा विरौत्सुर्नभश्चराः ॥२४३॥

तस्याश्चित्तानुवृत्त्या तु तत्रैवाऽस्थात् स एकतः । अथ **पु[11]ष्पवती** श्वेतां पताकां पर्यचीचलत् ॥२४४॥

¶ततः कुमारस्तां दृष्ट्वा तत्प्रदेशाच्छनैः शनैः । प्रियानुरोधादगमन्न हि भीस्तादृशां नृणाम् ॥२४५॥

आकाशमिव दुर्गाहमरण्यमवगाह्य सः । दिनान्तेऽर्क इवाऽम्भोधिं प्रापदेकं महासरः ॥२४६॥

स तु प्रविश्य तत्राऽऽशु सुरेभ[12] इव मानसे । स्नात्वा स्वच्छन्द[13]मत्यच्छाः सुधा इव पपावपः ॥२४७॥

निःसृत्य **ब्रह्मसू**र्नीरात् तीरमुत्तरपश्चिमम् । [14]लताक्वणदलिस्वानैः सौस्नाति[15]कमिवाऽभ्यगात् ॥२४८॥

¶तत्र तेन द्रुमलताकुञ्जे पुष्पाणि चिन्वती । वनाधिदेवता साक्षादिव काऽप्यैक्षि सुन्दरी ॥२४९॥

---

१. 'वडवागोळ' इति भाषायां, तन्मुद्रायां स्थितस्य, ऊर्ध्वपादाऽधोमुखमुद्रास्थितस्येत्यर्थः । २. धूम्र एव तदा तस्याऽऽहार आसीत् । ३. भयाक्रान्ता । ४. **पुष्पवती पुष्प०** सं० । ५. **सूर्पनखा०** सं० । ६. गान्धर्वविवाहे मन्त्रोच्चारादिविधिर्न । ७. टिट्टिभी (टींटोडी) । ८. अभ्राणि विनैव वृष्टिवत् । ९.१०.११. **पुष्पवत्ये०** सं० । १२. ऐरावण इव । १३. **स्वच्छन्दमन्तःस्थाः** मु० । १४. लतासु क्वणन्तो येऽलयो भ्रमरास्तेषां स्वनैः । १५. सुस्नातं पृच्छतीति सौस्नातिकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दध्याविति कुमारोऽपि जन्मप्रभृति वेधसः । रूपाण्यभ्यस्यतोऽमुष्यां सञ्जातं रूपकौशलम् ॥२५०॥
सा दास्या सह जल्पन्ती कटाक्षैः कुन्दसोदरैः । कण्ठे मालामिवाऽस्यन्ती[1] तं पश्यन्त्यन्यतो ययौ ॥२५१॥
पश्यन् कुमारस्तामेव प्रस्थितो यावदन्यतः । वस्त्र-भूषण-ताम्बूलभृद् दासी तावदाययौ ॥२५२॥
सा वस्त्राद्यर्पयित्वोचे या त्वया वीक्षिताऽत्र सा । सत्यङ्कारमिव स्वार्थसिद्धेः प्रैषीदिदं त्वयि ॥२५३॥
आदिष्टा चाऽस्मि यदमुं मन्दिरे तातमन्त्रिणः । [3]नयाऽऽतिथ्याय तथ्याय स हि वेत्ति यथोचितम् ॥२५४॥
सोऽगात् तया सह वेश्म **नागदेवस्य** मन्त्रिणः । अमात्योऽप्यभ्युदस्थात् तमाकृष्ट इव तद्गुणैः ॥२५५॥
**श्रीकान्त**या राजपुत्र्या वासाय तव वेश्मनि । प्रेषितोऽसौ महाभागः सन्दिश्येति जगाम सा ॥२५६॥
उपास्यमानः स्वामीव विविधं तेन मन्त्रिणा । [4]क्षणदां क्षपयामास क्षणमेकमिवाऽथ सः ॥२५७॥
मन्त्री राजकुलेऽनैषीत् कुमारं क्षणदात्यये । अर्घ्यादिनोपतस्थे तं बालार्कमिव भूपतिः ॥२५८॥
वंशाद्यपृष्ट्वाऽपि नृपः कुमाराय सुतां ददौ । आकृत्यैव हि तत्सर्वं विदन्ति ननु तद्विदः ॥२५९॥
उपायंस्त कुमारस्तां हस्तं हस्तेन पीडयन् । अन्योऽन्यं संक्रमयितुमनुरागमिवाऽभितः ॥२६०॥
¶**ब्रह्मदत्तो**ऽन्यदा क्रीडन् रहः पप्रच्छ तामिति । एकस्याऽज्ञातवंशादेः पित्रा दत्ताऽसि मे कथम् ? ॥२६१॥
**श्रीकान्ता** कान्तदन्तांशुधौताधरदलाऽब्रवीत् । राजा **शबरसेनो**ऽभूद् **वसन्तपुर**पत्तने ॥२६२॥
तत्सूनुर्मे पिता राज्ये निषण्णः क्रूरगोत्रिभिः । पर्यस्तोऽशिश्रियदिमां पल्लीं सबल-वाहनः ॥२६३॥
भिल्लानुपनमय्याऽत्र [6]वार्वेग इव वेतसान् । ग्रामघातादिना तातः पुष्णाति स्वं [7]परिग्रहम् ॥२६४॥
जाताऽस्मि चाऽहं तनया तातस्याऽत्यन्तवल्लभा । श्रीवत्पश्चादुपायानां चतुर्णां तनुजन्मनाम् ॥२६५॥
स मामुद्यौवनां स्माऽऽह सर्वे मे[8]ऽपेक्षिणो नृपाः । त्वयेह स्थितया वीक्ष्य शंस्यो यस्ते मतो वरः ॥२६६॥
तस्थुषी चक्रवाकीव सरस्तीरे निरन्तरम् । ततः प्रभृति पश्यामि सर्वानेकैकशोऽध्वगान् ॥२६७॥
मनोरथानामगतिः स्वप्नेऽप्यत्यन्तदुर्लभः । आर्यपुत्राऽऽगतोऽसि त्वं मद्भाग्योपचयादिह ॥२६८॥
¶स पल्लीपतिरन्येद्युर्ग्रामघातकृते ययौ । कुमारोऽपि समं तेन क्षत्रियाणां क्रमो ह्यसौ ॥२६९॥
लुण्ट्यमाने ततो ग्रामे कुमारस्य सरस्तटे । पादाब्जयो**र्वरधनु**रेत्य हंस इवाऽपतत् ॥२७०॥
कुमारकण्ठमालम्ब्य मुक्तकण्ठं रुरोद सः । नवीभवन्ति दुःखानि सञ्जाते हीष्टदर्शने ॥२७१॥
ततः पीयूषगण्डूषैरिवाऽऽलापैः सुपेशलैः । आश्वास्य पृष्टस्तेनोचे स्ववृत्तमिति मन्त्रिसूः ॥२७२॥
वटेऽधस्त्वां तदा मुक्त्वा गतोऽहं नाथ ! पार्थसे । सुधाकुण्डमिवाऽपश्यं किञ्चिदग्रे महासरः ॥२७३॥
तुभ्यमम्भोजिनीपत्रपुटेनाऽऽदाय वार्यहम् । यमदूतैरिवाऽऽगच्छन् रुद्धः संवर्मितैर्भटैः ॥२७४॥
अरे **वरधनो** ! ब्रूहि **ब्रह्मदत्तः** क्व विद्यते ? । इति तैः पृच्छ्यमानः सन् न वेद्मीत्यहमब्रवम् ॥२७५॥
तस्करैरिव निःशङ्कं ताड्यमानोऽथ तैरहम् । इत्यवोचं यथा **ब्रह्मदत्तो** व्याघ्रेण भक्षितः ॥२७६॥
तं देशं दर्शयेत्युक्तो माययेतस्ततो भ्रमन् । त्वद्दर्शनपथेऽभ्येत्याऽकार्षं संज्ञां पलायने ॥२७७॥
[10]परिव्राड्दत्तगुटिकां मुखेऽहं क्षिप्तवांस्तथा । तत्प्रभावेण निःसंज्ञो मृत इत्युज्झितोऽस्मि तैः ॥२७८॥
चिरं गतेषु तेष्वास्यादाकृष्य गुटि[11]कामहम् । त्वां नष्टार्थमिवाऽन्वेष्टुं भ्रमन् ग्रामं क्रमप्यगाम् ॥२७९॥
¶तत्रैकः कश्चिदप्यैक्षि परिव्राजकपुङ्गवः । साक्षादिव तपोराशिरनम्यत मया ततः ॥२८०॥
सोऽवदन्मां **वरधनो** ! मित्रमस्मि **धनो**रहम् । **वसुभागो** महाभाग ! **ब्रह्मदत्तः** क्व वर्तते ? ॥२८१॥
अथाऽऽख्यायि मयाप्यस्य वि[12]श्रंभं विश्वस्य सूनृतम् । स च मे [13]दुष्कथाधूमैर्म्लानास्यः पुनरभ्यधात् ॥२८२॥

१. क्षिपन्ती । २. **नव्याति०** सं० मु० विना । ३. **सन्दे०** मु० । ४. रात्रिम् । ५. **सवर०** सं० । ६. वारां-जलानां वेगः । ७. परिवारम् । ८. **मे द्वेषिणो** मु० । ९. जलाय । १०. **परिप्रावृत्तगुटिकां** मु० । ११. **कुटिका०** मु० । १२. सर्वं, विश्वासं कृत्वा, सत्यम् । १३. **दुःकथा०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदा जतुगृहे दग्धे **दीर्घः** प्रातरुदैक्षत । करङ्क[1]मेकं निर्दग्धं करङ्कत्रितयं न हि ॥२८३॥
सुरङ्गां तत्र चाऽपश्यत् तदन्तेऽश्वपदानि च । **धनो**र्बुद्ध्या प्र[2]नष्टौ वां ज्ञात्वा तस्मै चुकोप सः ॥२८४॥
बद्ध्वा युवां समानेतुं प्रत्या[3]शं सा[4]धनानि सः । अस्खलद्गमनान्यर्कमहांसीवाऽऽदिदेश च ॥२८५॥
पलायितो **धनु**र्मन्त्री जनयित्री तु सा तव । **दीर्घे**ण नरक इव क्षिप्ता मातङ्गपाटके ॥२८६॥
गण्डो[5]परिष्टात् पिटकेनेवाऽऽर्त्तो वार्तयाऽनया । दुःखोपर्युद्भवद्दुःखः **काम्पील्यं**[6] गतवानहम् ॥२८७॥
छद्मकापालिकीभूय तत्र मातङ्गपाटके । वेश्म वेश्माऽनुप्रवेशमस्थां स्पश[7] इवाऽनिशम् ॥२८८॥
पृच्छ्[8]यमानश्च लोकेन तत्र भ्रमणकारणम् । अवोचमिति **मातङ्ग्या** विद्यायाः कल्प एष मे ॥२८९॥
तत्रैवं भ्राम्यता मैत्री मया विश्वासभाजनम् । अजायताऽऽरक्षकस्य मायया किं न साध्यते ? ॥२९०॥
¶अन्येद्युस्तन्मुखेनाऽम्बामवोचं यत्करोत्यसौ । त्वत्पुत्रमित्रं **कौण्डिन्यो**[9] महाव्रत्यभिवादनम् ॥२९१॥
द्वितीयेऽह्नि स्वयं गत्वा जनन्या बीजपूरकम् । अदां सगुटिकां [10]जग्धेनाऽसंज्ञा तेन साऽभवत् ॥२९२॥
मृतेति तां पुराध्यक्षो गत्वा राज्ञे व्यजिज्ञपत् । राज्ञाऽऽदिष्टाः स्वपुरुषास्तस्याः संस्कारहेतवे ॥२९३॥
तत्राऽऽयाता मयोक्तास्ते संस्कारोऽस्याः क्षणेऽत्र चेत् । महाननर्थो वो राज्ञश्चेति याताः स्वधाम ते ॥२९४॥
आरक्षं चाऽवदं त्वं चेत् सहायः साधयाम्यहम् । सर्वलक्षणभाजोऽस्या मन्त्रमेकं [11]शवेन तत् ॥२९५॥
आरक्षेण प्रपन्नं तत् तेनैव सहितस्ततः । सायमादाय जननीं स्मशानेऽगां दवीयसि[12] ॥२९६॥
स्थण्डिले मण्डलादीनि मया निर्माय मायया । पूर्देवीनां बलिं दातुमारक्षः प्रेषितस्ततः ॥२९७॥
गते तस्मिन्नहं मातुरपरां गुटिकामदाम् । निद्राच्छेद इवोज्जृम्भ्यो[13] सोदस्थाज्जातचेतना ॥२९८॥
स्वं ज्ञापयित्वा रुदतीं निवार्य स्म नयामि ताम् । **कच्छग्रामे** गृहे तातसुहृदो **देवशर्मणः** ॥२९९ ॥
इतस्ततो भ्रमन्नेषो[14]ऽन्वेषयंस्त्वामिहाऽऽगमम् । दिष्ट्या दृष्टोऽधुना साक्षात् पुण्यराशिरिवाऽसि मे ॥३००॥
ततः परं कथं नाथ ! प्रस्थितोऽसि स्थितोऽसि च ? । तेनेति पृष्टः स्वं वृत्तं कुमारोऽपि न्यवेदयत् ॥३०१॥
¶अथ कोऽप्येत्य तावूचे ग्रामे **दीर्घ**भटाः [15]पैटम् । [16]युष्मत्तुल्यद्विरूपाङ्कं दर्शयन्तो वदन्त्यदः ॥३०२॥
ईदृग्नरौ किमायातावत्रेत्याकर्ण्य गां मया । दृष्टाविह युवां यद्वा रुचितं कुरुतं हि तत् ॥३०३॥
ततस्तस्मिन् गतेऽरण्यमध्येन कलभाविव । पलायमानौ **कोशाम्बीं** प्रापतुस्तौ पुरीं क्रमात् ॥३०४॥
तत्र **सागरदत्त**स्य श्रेष्ठिनो **बुद्धिल**स्य च । उद्यानेऽपश्यतां लक्षपणं तौ कुक्कु[17]टाहवम् ॥३०५॥
उत्पत्योत्पत्य [18]नखरैः प्राणाकर्षाङ्कु[19]टैरिव । युयुधाते ताम्रचूडौ चञ्चा[20]चञ्चवि चोच्चकैः ॥३०६॥
तत्र **सागरदत्त**स्य जात्यं शक्तं च कुक्कु[21]टम् । भद्रेभमिव मिश्रेभोऽभाङ्क्षी**द्बुद्धिल**कुक्कु[22]टः ॥३०७॥
ततो **वरधनुः** स्माऽऽह कथं जात्योऽपि कुक्कु[23]टः । भग्नस्ते **सागरा**[24]ऽनेन पश्याम्येनं यदीच्छसि ॥३०८॥
**सागरा**नुज्ञया सोऽथ पश्यन् **बुद्धिल**कु[25]क्कुटम् । तत्पादयोरयःसूचीर्यमदूतीरिवैक्षत ॥३०९॥
लक्षयन् **बुद्धिल**स्तस्य लक्षार्धं छन्नमिष्टवान् । [26]सोऽप्याख्यत्तं व्यतिकरं कुमारस्य जना[27]न्तिके ॥३१०॥
**ब्रह्मदत्तो**ऽप्ययःसूचीः कृष्ट्वा **बुद्धिल**कुक्कुटम् । भूयोऽपि **सागर**श्रेष्ठिकुक्कुटेनाऽभ्ययोधयत् ॥३११॥
असूचिकः कुक्कुटेन तेन **बुद्धिल**कुक्कुटः । क्षणादभञ्जि निर्म्नी[28]नां छद्मबाह्यं कुतो जयः ? ॥३१२॥

---

१. शीर्षकपालम् (खोपरी) । २. **प्रणष्टौ** मु० । ३. प्रतिदिशम् । ४. रथादिवाहनानि । ५. कपोलोपरि स्फोटकेनेव । ६. **काम्पिल्यं** मु० । ७. गुप्तचरः । ८. **पृच्छ्यमानः** स० सं.हे. । ९. संन्यासी । १०. भुक्तेन तेन सा निश्चेष्टाऽभवत् । ११. **शवेन** मु० । १२. अतिदूरे । १३. जृम्भणपूर्वकं 'बगासुं खाईने' इति भाषायाम् । १४. **०ऽन्विष्यंश्च त्वा०** मु० । १५. **पदम्** मु० । १६. युष्मत्तुल्यं रूपद्वयं अङ्के यत्र, अर्थात् यत्र चित्रपटे ब्रह्मदत्त-वरधनू आलिखितौ स्तः । १७. **कुर्कुटा०** हे० । कुक्कुटयुद्धम् । १८. तीक्ष्णैः । १९. अङ्कुटः कुञ्चिका । २०. चञ्चुभिश्चञ्चुभिरिदं युद्धं प्रवर्तत इति चञ्चाचञ्चवि । २१-२२-२३. **कुर्कुट** हे० । २४. **सागर ! तेन** मु० । २५. **०कुर्कुटम्** हे० । २६. **सोऽथा०** मु० । २७. विजने-एकान्ते । २८. नीचानाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हृष्टः **सागरदत्त**स्तावारोप्य स्यन्दनं स्वकम् । जयदानैकसुहृदौ निनाय निलये निजे ॥३१३॥

¶स्वधामनीव तद्धाम्नि तयोर्निवसतोरथ । किमप्याख्यद्**वरधनो**रेत्य **बुद्धिल**किङ्करः ॥३१४॥

तस्मिन् गते **वरधनुः** कुमारमिदमभ्यधात् । यद्**बुद्धिलेन** लक्षार्धं दित्सितं मेऽद्य पश्य तत् ॥३१५॥

सोऽदर्शयत्ततो हारं निर्मलस्थूलवर्तुलैः । कुर्वाणं मौक्तिकैः शुक्रमण्डलस्य विडम्बनाम् ॥३१६॥

हारे बद्धं स्वनामाङ्कं **ब्रह्मसू**र्लेखमैक्षत । आगाच्च [1]वाचिकमिव मूर्तं **वत्सा**ख्यतापसी ॥३१७॥

अक्षतानि तयोर्मूर्ध्नि क्षिप्त्वाऽऽशीर्वादपूर्वकम् । नीत्वाऽन्यतो **वरधनुं** किञ्चिदाख्याय सा ययौ ॥३१८॥

तच्चाऽऽख्यातुं समारेभे मन्त्रिसूर्**ब्रह्मसू**नवे । प्रतिलेखं हारबद्धलेखस्येयमयाचत ॥३१९॥

**श्रीब्रह्मदत्त**नामाङ्को लेखोऽयं प्रथयस्व तत् । को **ब्रह्मदत्त** इति सा मया पृष्टेदमब्रवीत् ॥३२०॥

¶अस्ति श्रेष्ठिसुता **रत्नवती** नामेह पत्तने । रूपान्तरेण कन्यात्वं प्रपन्नेव रतिर्भुवि ॥३२१॥

भ्रातुः **सागरदत्तस्य बुद्धिलस्य** च तद्दिने । कुक्कुटायोधनेऽपश्यद् **ब्रह्मदत्त**मिमं हि सा ॥३२२॥

ततः प्रभृति ताम्यन्ती कामार्त्ता सा न शाम्यति । शरणं **ब्रह्मदत्तो** मे स एवेत्याह चाऽनिशम् ॥३२३॥

स्वयं लिखित्वा चाऽन्येद्युर्लेखं हारेण संयुतम् । अर्प्यतां **ब्रह्मदत्त**स्येत्युदित्वा सा ममाऽर्पयत् ॥३२४॥

दासहस्ते मया लेखः प्रैषीत्युक्त्वा स्थिता सती । मयाऽपि प्रतिलेखं तेऽर्पयित्वा सा व्यसृज्यत ॥३२५॥

दुर्वारमारसन्तापः कुमारोऽपि ततो दिनात् । मध्याह्नार्ककरोत्तप्तः करीव न सुखं स्थितः ॥३२६॥

¶**कौशाम्बी**स्वामिनोऽन्येद्युर्**दीर्घेण** प्रहिता नराः । नष्ट[2]शल्यवदङ्गे तौ तत्राऽन्वेष्टुं समाययुः ॥३२७॥

राजादेशेन **कौशाम्ब्यां** प्रवृत्तेऽन्वेषणे तयोः । **सागरो** भूगृहे क्षिप्त्वा तौ जुगोप निधानवत् ॥३२८॥

निशि तौ निर्ययियासन्तौ रथमारोप्य **सागरः** । कियन्तमपि पन्थानं निनाय ववले ततः ॥३२९॥

तौ गच्छन्तौ पुरो नारीमुद्याने समपश्यताम् । अस्त्रपूर्णरथारूढाममरीमिव **नन्दने** ॥३३०॥

लग्ना किमियती वेला युवयोरिति सादरम् । तयोक्तौ तौ बभाषाते कावावां ? वेत्सि वां कथम् ? ॥३३१॥

अथाऽभाषत सा पुर्यामस्यां श्रेष्ठी महाधनः । **धन[3]प्रभव** इत्यासीद्धनदस्येव सोदरः ॥३३२॥

श्रेष्ठिश्रेष्ठस्य तस्याऽहमष्टानां तनुजन्मनाम् । उपरिष्टाद् विवेकश्रीर्धीगुणानामिवाऽभवम् ॥३३३॥

उद्यौवनाऽस्मिन्नुद्याने यक्षमाराधयं बहु । अत्युत्तमवरप्राप्त्यै[4] स्त्रीणां नाऽन्यो मनोरथः ॥३३४॥

तुष्टो भक्त्यैव मे यक्षवरो वरमिमं ददौ । **ब्रह्मदत्त**श्चक्रवर्ती तव भर्ता भविष्यति ॥३३५॥

**सागर-बुद्धिल**श्रेष्ठिकुक्कुटौ[5]जौ य एष्यति । श्रीवत्सी ससखाऽतुल्यरूपो ज्ञेयः स तु त्वया ॥३३६॥

महायतनवर्तिन्यां प्रथमस्ते भविष्यति । मेलको **ब्रह्मदत्ते**न तज्जाने सोऽसि सुन्दर ! ॥३३७॥

एह्येहि तन्मां विरहदहनार्त्तां चिरादिह । विध्यापय पयःपूरेणेव सङ्गेन सम्प्रति ॥३३८॥

तथेति प्रतिपद्याऽस्या अनुरागमिवाऽलघुम् । सोऽधित[6]स्थौ रथं तां च गन्तव्यं क्वेति पृष्टवान् ॥३३९॥

सेत्यूचे **मगधपुरे** मत्पितृव्यो **धनावहः** । अस्ति श्रेष्ठ्यावयोर्बह्वीं प्रतिपत्तिं स दास्यति ॥३४०॥

तदितस्तत्र गन्तव्यमिति **रत्नवती**गिरा । **ब्रह्मसू**र्मन्त्रिपुत्रेण सूतेनाऽश्वान[7]तोदयत् ॥३४१॥

¶**कौशाम्बी**देशमुल्लङ्घ्य क्षणेन **ब्रह्मनन्दनः** । क्रीडास्थानं यमस्येव प्राप भीमां महाटवीम् ॥३४२॥

**सुकण्टकः कण्टकश्च** तत्र चौरचमूपती । **ब्रह्मदत्तं** रुरुधतुः श्वानाविव महाकिरि[8]म् ॥३४३॥

ससैन्यौ युगपत्कालरात्रिपुत्राविवोत्कटौ । शरैर्नभोमण्डप इव च्छादयामासतुश्च तौ ॥३४४॥

आत्तधन्वा कुमारोऽपि गर्जंश्चौरवरूथिनीम् । निषिषेधेषुभिर्धारासारैर्दवमिवाऽम्बुदः ॥३४५॥

कुमारे वर्षति शरान् ससैन्यौ तौ प्रणेशतुः । हन्त प्रहारिणि हरौ हरिणानां कुतः स्थितिः ? ॥३४६॥

१. सन्देशमिव । २. अङ्गे गाढनिमग्नकण्टकवत् । ३. **धनप्रवर०** पासं० । ४. **०प्राप्तौ** हे० । ५. **०कुक्कुटौ योजयिष्यति** हे० । **०कुक्कुटाजौ यं पश्यसि** मु० । ०जौ य एष्यसि मु० । ६. **०तष्ठौ** सं० विना । ७. **०ननोदयत्** मु० । ८. महान्तं सूकरम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुमारं मन्त्रिसूरेवमूचे श्रान्तोऽसि सङ्गरात् । मुहूर्तं स्वपिहि स्वामिंस्तदिहैव रथे स्थितः ॥३४७॥
स्यन्दने **ब्रह्मदत्तो**ऽपि **रत्नवत्या** समन्वितः । सुष्वाप गिरिनितम्बे करिण्येव करी युवा ॥३४८॥
¶विभातायां विभावर्यां प्राप्यैकामथ निम्नगाम् । तस्थुः श्रान्तास्तुरङ्गाश्च कुमारश्च व्यबुध्यत ॥३४९॥
विबुद्धस्तु स नाऽपश्यत् स्यन्दने मन्त्रिनन्दनम् । पयसे किं गतः स्यादित्यसकृद् व्याजहार तम् ॥३५०॥
सोऽलब्धप्रतिवाग् दृष्ट्वा रथाग्रं रक्तपङ्किलम् । विलपन् हा हतोऽस्मीति मूर्च्छितो न्यपतद् रथे ॥३५१॥
उत्थितो लब्धसंज्ञः सन् हा हा **वरधनो** ! सखे ! क्वासीति लोकवत् क्रन्दन् **रत्नवत्ये**त्यबोधि सः ॥३५२॥
विपन्नो ज्ञायते नैव स तावद्भवतः सखा । तस्य वाचाऽप्यमङ्गल्यं नाथ ! कर्तुं न युज्यते ॥३५३॥
त्वत्कार्याय गतः क्वापि स भविष्यत्यसंशयम् । यान्ति नाथमपृष्ट्वापि नाथकार्याय मन्त्रिणः ॥३५४॥
स तवोपरि भक्त्यैव रक्षितो नूनमेष्यति । स्वामिभक्तिप्रभावो हि भृत्यानां कवचायते ॥३५५॥
स्थाने प्राप्ताः करिष्यामो नरैस्तस्य गवेषणम् । युज्यते नेह तु स्थातुमन्तकोपवने वने ॥३५६॥
तद्वाचा सोऽनुदद् रथ्यान् प्रपेदे **मगधक्षितेः** । सीमग्रामं दविष्ठं हि वाजिनां मरुतां च[१] किम् ? ॥३५७॥
ग्रामेशेन सदःस्थेन दृष्ट्वा निन्ये स्ववेश्म सः । अज्ञाता अपि पूज्यन्ते महान्तो मूर्त्ति[२]दर्शनात् ॥३५८॥
शोकाक्रान्त इवाऽसीति पृष्टो ग्रामाधिपेन सः । इत्यूचे मत्सखश्चौरैर्युध्यमानो गतः क्वचित् ॥३५९॥
तस्य प्रवृत्तिमानेष्ये **सीता**या इव **मारुतिः** । इत्युक्त्वा ग्रामणीः सर्वां तां जगाहे महाटवीम् ॥३६०॥
अथैत्य ग्रामणीरूचे दृष्टः कोऽपि वने न हि । प्रहारपतितः किं तु प्राप्त एष शरो मया ॥३६१॥
हतो **वरधनुर्नू**नमिति चिन्तयतस्ततः । **ब्रह्मसूनोः** शोक इव तमोभूरभवन्निशा[४] ॥३६२॥
यामे तुरीये यामिन्यास्तत्र चौराः समापतन् । ते तु भग्नाः कुमारेण मारेणेव प्रवासिनः[५] ॥३६३॥
ततोऽनुयातो ग्रामण्या ययौ **राजगृहं** क्रमात् । स चाऽमुचद् **रत्नवतीं** तद्बहिस्तापसाश्रमे ॥३६४॥
¶विशन् पुरे स ऐक्षिष्ट हर्म्यवातायने स्थिते । साक्षादिव रति-प्रीती कामिन्यौ नवयौवने ॥३६५॥
ताभ्यां सोऽभिदधे प्रेमभाजं त्यक्त्वा जनं ननु । यत्तदा गतवान् युक्तं तत् किं ते प्रत्यभासत ? ॥३६६॥
व्याजहार कुमारोऽपि प्रेमभाग् बत को जनः? । स कदा च मया त्यक्तः? कोऽहं? के वा युवामिति ? ॥३६७॥
प्रसीदाऽऽगच्छ विश्राम्य नाथेत्यालापनिष्ठयोः । प्राविशद् **ब्रह्मदत्तो**ऽपि मनसीव तयोर्गृहे ॥३६८॥
तिष्ठमाने कृतस्नानाशनाय **ब्रह्मसूनवे** । कथयामासतुस्ते स्वां कथामवितथामिति ॥३६९॥
¶अस्ति विद्याधरावासः कलधौत[६]शिलामयः । मेदिन्यास्तिलक इव **वैताढ्यो** नाम पर्वतः ॥३७०॥
अमुष्य दक्षिणश्रेण्यां नगरे **शिवमन्दिरे** । राजाऽस्ति **ज्वलनशिखो**ऽलकायामिव गुह्यकः[७] ॥३७१॥
विद्याधरपतेस्तस्य द्युतिद्योतितदिङ्मुखा । प्रिया **विद्युच्छिखे**त्यस्ति विद्युदम्भोमुचो[८] यथा ॥३७२॥
तयोः प्राणप्रिये **नाट्योन्मत्ता**भिधसुतानुजे । नाम्ना **खण्डा विशाखा** च पुत्र्यावावां बभूविव ॥३७३॥
तातः सौधेऽन्यदा सख्या**ऽग्निशिखे**न सहाऽऽलपन् । गच्छतो**ऽष्टापदगिरिं** गीर्वाणान् खे निरैक्षत ॥३७४॥
ततः स तीर्थयात्रार्थं चलितोऽचालयच्च नौ । सुहृदं चा**ऽग्निशिखं** तं धर्मेणेष्टं हि योजयेत् ॥३७५॥
प्राप्ता**श्चाष्टापदं** तत्राऽपश्याम मणिनिर्मिताः । प्रतिमास्तीर्थनाथानां मान-वर्णसमन्विताः ॥३७६॥
स्नानं विलेपनं पूजां विरचय्य यथाविधि । तास्त्रिः प्रदक्षिणीकृत्याऽवन्दामहि समाहिताः ॥३७७॥
प्रासादान्निःसृतैर्दृष्टौ रक्ताशोकतरोरधः । चारणश्रमणौ मूर्तिमन्ताविव तपः-शमौ ॥३७८॥
तौ प्रणम्योपविश्याऽग्रे शुश्रुम श्रद्धया वयम् । अज्ञानतिमिरच्छेदकौमुदीं[९] धर्मदेशनाम् ॥३७९॥

१. पूच्चकार । २. **न** सं. । ३. **मूर्ध्नि द०** हे. । ४. तमसां स्थानं निशा (तदा) अभवदित्यर्थः । ५. प्रवासिनो वियोगिनो मारेण कामेन भग्ना भवन्ति तद्वत् । ६. सुवर्णशिलामयः । ७. कुबेरः । ८. मेघस्य । ९. कौमुदी चन्द्रज्योत्स्ना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ब्रूते स्माऽग्निशिखः कः स्यात् कन्ययोरनयोः पतिः ? । तावाख्यातं यो ह्यनयोर्भ्रातरं मारयिष्यति ॥३८०॥
हिमेनेव शशी म्लानो जातस्तातस्तया गिरा । आवामपीत्यवोचाव वाचा वैराग्यगर्भया ॥३८१॥
संसारासारतासारा देशनाऽद्यैव शुश्रुवे । तद्विषादनिषादेन[1] किं तात ! परिभूयसे ? ॥३८२॥
अलमस्माकमप्येवंविधैर्विषयजैः सुखैः । प्रवृत्ते तत्प्रभृत्यावां त्रातुं निजसहोदरम् ॥३८३॥
¶भ्राम्यन्नपश्यन्मे भ्राताऽन्यदा **पुष्पवती**मसौ । मातुलस्य त्वदीयस्य **पुष्पचूलस्य** कन्यकाम् ॥३८४॥
रूपेणाऽद्भुतलावण्यपुण्येन हृतमानसः । तां जहार स दुर्बुद्धिर्बुद्धिः कर्मानुसारिणी ॥३८५॥
सोऽसहिष्णुर्दृशं तस्या विद्यां साधयितुं ययौ । स्वयं संविद्रते[2] सम्यग्भवन्तस्तु ततः परम् ॥३८६॥
तदा च **पुष्पवत्या**ख्यदावयोर्भ्रातृसंक्षयम् । शोकं धर्माक्षरैः शोकापनोद इव चाऽनुदत् ॥३८७॥
अन्यच्च **पुष्पवत्या**ख्यदभिगम्योऽयमागतः । **ब्रह्मदत्तो**ऽस्तु वां भर्ता नान्यथा हि मुनेर्गिरः ॥३८८॥
स्वीकृतं च तदाऽऽवाभ्यां तया च रभसावशात् । पताकाऽचालि धवला त्यक्त्वाऽऽवां त्वं गतस्ततः ॥३८९॥
यदाऽस्मद्भाग्यवैगुण्यान्नाऽऽगतोऽसि न वेक्षितः । भ्रान्त्वा सर्वत्र निर्विण्णे आवामिह तदागते ॥३९०॥
पुण्यैरसि समायातः पुरा **पुष्पवती**गिरा । वृतोऽसि वरयाऽऽवां तदतिरेकस्त्वमावयोः ॥३९१॥
¶गान्धर्वेण विवाहेन स उपायंस्त ते अपि । भोगी हि भाजनं स्त्रीणां सरितामिव सागरः ॥३९२॥
रममाणः समं ताभ्यां गङ्गोमाभ्यामिवेश्वरः । तत्राऽतिवाहयामास तां निशां **ब्रह्म**नन्दनः ॥३९३॥
यावन्मे राज्यलाभः स्यात् **पुष्पवत्याः** समीपतः । तावद् युवाभ्यां स्थातव्यमित्युक्त्वा व्यसृजच्च ते ॥३९४॥
तथेत्यादृतवत्यौ ते स लोकस्तच्च मन्दिरम् । गन्धर्वनगरमिव ततः सर्वं तिरोदधे ॥३९५॥
¶अथाऽऽश्रमे **रत्नवती**मन्वेष्टुं **ब्रह्म**सूरगात् । अपश्यंस्तत्र प्रपच्छ नरमेकं शुभाकृतिम् ॥३९६॥
दिव्याम्बरधरा नारी रत्नाभरणभूषिता । काऽपि दृष्टा महाभाग ! त्वयाऽतीते[4] दिनेऽथ(द्य?)वा ? ॥३९७॥
स ऊचे नाथ नाथेति रुदती ह्यो मयेक्षिता । प्रत्यभिज्ञाय [5]नैष्त्रीति तत्पितृव्याय चाऽऽर्पिता ॥३९८॥
तद्वरोऽसीति तेनोक्तस्तथेति **ब्रह्म**सूर्वदन् । निन्ये तेन प्रहृष्टेन तत्पितृव्यनिकेतनम् ॥३९९॥
**रत्नवत्याः** पितृव्योऽपि **ब्रह्मदत्तं** व्यवाहयत् । ऋद्ध्या महत्या धनिनां सर्वमीषत्करं यतः ॥४००॥
¶तया विषयसौख्यानि समं सोऽनुभवन्नथ । मृतकार्यं **वरधनो**रपरेद्युः प्रचक्रमे ॥४०१॥
साक्षादिव [6]परेतेषु भुञ्जानेषु द्विजन्मसु । विप्रवेषो **वरधनु**स्तत्राऽऽगत्याऽब्रवीदिति ॥४०२॥
मम चेद्भोजनं दत्थ साक्षा**द्वरधनोर्हि** तत् । इति श्रुतिसुधेवाऽस्य श्रुत्वा वाग् **ब्रह्म**सूनुना ॥४०३॥
स तं दृष्ट्वा परिष्वङ्गादेकीकुर्वन्निवाऽऽत्मना । स्नपयन्निव हर्षास्रै[7]र्निनायाऽन्तर्गृहं ततः ॥४०४॥
ऊचे पृष्टः कुमारेण स्ववृत्तं सोऽकर्थ[8]त्तदा । सुप्ते त्वयि निरुद्धोऽहं **चौरैर्दीर्घ**भटैर्यथा ॥४०५॥
वृक्षान्तरस्थितेनैकदस्युनैकेन पत्त्रिणा[9] । हतोऽहं पतितः पृथ्व्यां तिरोऽधां च लतान्तरे ॥४०६॥
गतेषु तेषु चौरेषु मध्येवृक्षं तिरोभवन् । आँडि[10]रन्तर्जलमिव क्रमेण ग्राममाप्नवम् ॥४०७॥
भवत्प्रवृत्तिं ग्रामेशाद्विज्ञायाऽहमिहाऽऽगमम् । दिष्ट्याऽपश्यं भवन्तं च कलापीव पयोमुचम् ॥४०८॥
अथोचे **ब्रह्मदत्त**स्तमस्माभिः स्थास्यते ननु । विना पुरुषकारेण क्लीबैरिव कियच्चिरम् ? ॥४०९॥
¶अत्रान्तरे च सम्प्राप्तः[11] साम्राज्यमकरध्वजः । मधु[12]वन्मादको[13] यूनां प्रादुरासीन्मधूत्सवः ॥४१०॥
तदा च राज्ञो मत्तेभः स्तम्भं भङ्क्त्वाऽपशृङ्खलः । निर्ययौ त्रासिताशेषमर्त्यो मृत्योरिवाऽनुजः ॥४११॥
ततो नितम्बभारार्त्तां काञ्चित्कन्यां स्खलद्गतिम् । करी करेण जग्राहाऽऽकृष्य पुष्करिणीमिव ॥४१२॥

---

१. विषाद एव निषादः किरातः तेन । २. **संविदते** मु० । ३. स्वागतयोग्यः । ४. **०तीतदिने०** मु० । ५. **नः स्त्रीभिस्तत्पि०** मु० । ६. परेताः - प्रेतभूताः पितरः । ७. हर्षाश्रुभिः । ८. **सोऽथ यत्तदा** मु० । '**वृत्तं सोऽकथयत् तदा**' इति पाठः सम्भाव्यते । 'अनित्यो णिच् चुरादीनां' इतिन्यायेन णिजभावः समर्थनीयः । ९. बाणेन । १०. आडिः-बलाका-जलचरपक्षिविशेषः । **आति०** सं०हे० । ११. **संप्राप** हे. । १२. मधु-मद्यम् । १३. **मदको** सं०हे० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यां च शरणार्थिन्यां क्रन्दन्त्यां दीनचक्षुषि । जज्ञे हाहारवो विश्वदुःखबीजाक्षरोपमः ॥४१३॥
रे मातङ्गाऽसि मातङ्गः[1] स्त्रियं गृह्णन्न लज्जसे ! । इत्युक्तः स कुमारेण तां विमुच्य तमभ्यगात् ॥४१४॥
उत्प्लुत्य दन्त[2]सोपाने पादं विन्यस्य हेलया । आरुरोह कुमारस्तमशिश्रियदथाऽऽसनम् ॥४१५॥
वाक्-पादा-ङ्कुशयोगेन स्वं [3]योगेनेव योगिवत् । वशीचकार तं नागं कुमारस्तरसा[4] ततः ॥४१६॥
साधु साध्वित्युच्यमानो जनैर्जय जयेति च । कुमारः करिणं स्तम्भे नीत्वाऽबध्ना[5]द्वशामिव ॥४१७॥
¶ततो नरेन्द्रस्तत्राऽऽगात्तं च दृष्ट्वा विसिष्मिये । आकृतिर्विक्रमश्चास्य कस्य[6] चित्रीयते न च ? ॥४१८॥
कोऽयं ? कुतो वा छन्नात्मा ? किं सूर्यो वासवोऽथवा ? । राज्ञेत्युक्ते **रत्नवत्याः** पितृव्यस्तमचीकथत् ॥४१९॥
[7]ततो विंशांपतिः[8] कन्याः पुण्यमानी कृतोत्सवः । दक्षः क्षपाकरायेव **ब्रह्मदत्ताय** दत्तवान् ॥४२०॥
परिणीय स तास्तत्र सुखं तिष्ठन्नथाऽन्यदा । जरत्यैत्यैकयेत्यूचे भ्रमयित्वांऽशुकाञ्चलम् ॥४२१॥
इह **वैश्रवणो**ऽस्त्याढ्यः श्रिया वैश्रवणोऽपरः । तस्य च **श्रीमति**र्नाम सुता श्रीरिव वारिधेः ॥४२२॥
मोचिता भवता व्यालाद् राहोरिन्दुकलेव या । सा त्वामेवाऽभिलष्यन्ती ततः प्रभृति ताम्यति ॥४२३॥
यथा गजात् त्वया त्राता तथा त्रायस्व तां स्मरात् । गृहाण पाणिं त्वं तस्या यथा हृदयमग्रहीः ॥४२४॥
उपमेये कुमारस्तां विविधोद्वाहमङ्गलैः । **सुबुद्धिमन्त्रिणः** कन्यां **नन्दां वरधनुः** पुनः ॥४२५॥
पप्रथाते पृथिव्यां तौ तिष्ठन्तौ तत्र शक्तितः । साभि[9]योगौ प्रतस्थाते ततो **वाराणसीं** प्रति ॥४२६॥
¶श्रु[10]त्वाऽऽयान्तं **ब्रह्मदत्तं** ब्रह्माणमिव गौरवात् । अभ्येत्य सन्मुखं **वाराणसीशः** स्वगृहेऽनयत् ॥४२७॥
**कटकः कटकवतीं** नाम पुत्रीं निजां ददौ । चतुरङ्गचमूं चाऽस्मै मूर्तामिव जयश्रियम् ॥४२८॥
**करेणुदत्तश्चम्पेशो धनुर्मन्त्री** तथाऽपरे । **भगदत्तादयो**ऽप्येयुर्नृपाः श्रुत्वा तदागमम् ॥४२९॥
कृत्वा **वरधनुं** सेनान्यं **सुषेण**मिवाऽऽर्षभिः[11] । **दीर्घं** दीर्घप[12]थे नेतुं प्रतस्थे **ब्रह्मनन्दनः** ॥४३०॥
**दीर्घ**स्य दूतः **कटक**राजमेत्यैवमूचिवान् । **दीर्घेण** सममाबाल्यमैत्री त्यक्तुं न युज्यते ॥४३१॥
ततः **कटक** इत्यूचे **ब्रह्मणा** सहिताः पुरा । सोदर्या इव पञ्चाऽपि सञ्जाताः सुहृदो वयम् ॥४३२॥
स्वर्जुषो **ब्रह्मणः** पु[13]त्रे राज्ये च भ्रातुमर्पिते । **दीर्घेण** धि[14]क्कृतं, नाऽस्ति शाकिन्यपि समर्पितम् ॥४३३॥
**ब्रह्मणः** [15]पुत्रभाण्डे **यद्दी[16]र्घो** दीर्घमचिन्त[17]यन् । आचचाराऽतिपापं तच्छ्[18]वपचोऽपि किमाचरेत् ? ॥४३४॥
तद् गच्छ शंस **दीर्घाय ब्रह्मदत्तो**ऽभ्युपैत्यसौ । युध्यस्व यदि वा नश्येत्युक्त्वा दूतं व्यसर्जयत् ॥४३५॥
ततः प्रयाणैरच्छिन्नैः **काम्पील्यं ब्रह्मसूर्ययौ** । **सदीर्घ**मप्यरौत्सीत्तन्नभः सार्कमिवाऽम्बुदः ॥४३६॥
¶**दीर्घः** सर्वाभिसारेण रणसारेण पत्तनात् । दण्डाक्रान्तो निरसरद्बिलादिव महोरगः ॥४३७॥
**चुलन्य**पि तदाऽत्यन्तवैराग्यादाददे व्रतम् । पार्श्वे **पूर्णाप्र**[19]**वर्तिन्याः** क्रमान्निर्वृतिमाप च ॥४३८॥
पुरोगाः[20] **दीर्घ**राजस्य पुरोगै**र्ब्रह्म**जन्मनः । नदीया[21]दांस्यकूपारयादोभिरिव जघ्निरे ॥४३९॥
**दीर्घो**ऽप्यमर्षादुन्नामिदंष्ट्रि[22]कोविकटाननः । वराह इव धावित्वा हन्तुं प्रववृते परान् ॥४४०॥
**ब्रह्मदत्त**स्य पादात-रथ-साद्यादिकं बलम् । पर्यस्यत नदीपूरेणेव **दीर्घेण** वेगिना ॥४४१॥
**ब्रह्मदत्त**स्ततः क्रोधारुणाक्षो युयुधे स्वयम् । गर्जता **दीर्घ**राजेन गर्जन् दन्तीव दन्तिना ॥४४२॥
उभावपि बलिष्ठौ तावस्त्राण्यस्त्रैर्निरासतुः । कल्लोलैरिव कल्लोलान् युगान्तोद्भ्रान्तवा[23]रिधी ॥४४३॥

---

१. चाण्डालः । २. हस्तिदन्तावेव सोपानम् । ३. **सुयोगेन** मु० । योगी योगेन यथा स्वं-आत्मानं वशीचकार तथेत्यर्थः । ४. बलेन-वेगेन । ५. करिणीम् । ६. **कस्याचित्री०** मु० । ७. **ततोऽष्टौ नृपतिः कन्याः पुण्य०** सं० । ८. नृपतिः । ९. युद्धोद्यमसहितौ । १०. **श्रुत्वाऽऽयातं** सं० विना । ११. ऋषभापत्यं भरतः । १२. मृत्युपथे । १३. **पुत्रो राज्यं** मु० । १४. **दीर्घेणाधिकृते** मु० । १५. पुत्र एव भाण्डं, तद्विषये । १६. **दीर्घोऽदीर्घ०** सं० । १७. **०मचिन्तयत्** सं० हे० । १८. श्वपचः चाण्डालः । १९. प्रवर्तिनी जैनसाध्वी, महत्तरा । २०. अग्रेसराः सुभटाः । २१. नदीस्थितान् जलचरान् समुद्रस्थितजलचराः हन्युस्तद्वत् । २२. **०दंष्ट्रिको०** मु० । २३. **०वारिधिः** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ज्ञात्वाऽथ सेवक इवाऽवसरं प्रसरद्द्युति । डुढौके **ब्रह्मदत्तस्य** चक्रं दिक्चक्रजित्वरम् ॥४४४॥
ततो जहार **दीर्घस्य** तेनाऽशु **ब्रह्मसूरसूंन्**[1] । विमर्दो विद्युतः को वा [2]गोधानिधनसाधने ? ॥४४५॥
जयतादेष चक्रीति भाषिणो मागधा इव । **ब्रह्मदत्तो**परि सुराः पुष्पवृष्टिं वितेनिरे ॥४४६॥
पौरैः पितेव मातेव देवतेव स वीक्षितः । पुरं विवेश **काम्पील्यं** सुत्रा[3]मेवाऽमरावतीम् ॥४४७॥
पूर्वोदूढाः[4] सर्वतोऽपि पत्नीरानाययन्नृपः । **कुरुमत्यभिधानां** च स्त्रीरत्नं प्रत्यै[5]तिष्ठपत् ॥४४८॥
¶अन्येद्यु**र्भरतक्षेत्र**साधनाय समुद्यतः । अनुचक्रं चक्रवर्ती प्रचचालाऽमितैर्बलैः ॥४४९॥
आसीत् पूर्वं नृपश्रेष्ठः श्रीमान् **वृषभलाञ्छनः** । सुतज्येष्ठाय **भरत**नाम्ने राज्यमदत्त सः ॥४५०॥
विभज्याऽपरपुत्राणां नवाग्रनवतेः पुनः । ददौ देशान् स्वयं स्वामी तपस्तप्त्वा शिवं ययौ ॥४५१॥
देशास्तन्नामभिस्तेऽमी प्राच्यां **प्रगम-मस्तकौ** । **पुत्राङ्गारक-मल्लाङ्गार्मलै[6]यो भार्गवो**ऽपि च ॥४५२॥
**प्राग्ज्यो[7]तितिषवंशौ च मगधो मां[8]सवर्तिकः । दक्षिणायां बाणमुक्त-वैदर्भवनवासिकौ[9]ः**॥४५३॥
**[10]मंहीषको वनराष्ट्रस्तायिका-ऽश्मक-दण्डकाः । कलिङ्गेषि[11]र्क-पुरुषा मूलको भोगवर्धकः** ॥४५४॥
**कुन्तलश्च** प्रतीच्यां तु **दुर्ग-सूर्पारि[12]का-ऽर्बुदाः । आर्य-कल्लीवना-ऽयस्ताः काक्षिकौ[13]-ऽनर्त-सारिकाः** ॥४५५॥
**मौ[14]हेक-रुरु-कच्छाश्च [15]सुराष्ट्रो नर्म**दस्तथा । **सारस्वतस्तापसश्चो**त्तरस्यां तु ककुभ्यथ ॥४५६॥
**कुरु-जाङ्गल-पञ्चाल-सूरसेन-पटच्चराः । कलिङ्ग-काशि-कौशल्ये[16]-भद्रकार-वृकार्थकाः** ॥४५७॥
**त्रिगर्त-कौशला-ऽम्बै[17]ष्ठाः साल्व-मत्स्य-कुनीयकाः । मौक-बाल्हीक-काम्बोजा मधुदेशश्च मद्रकः** ॥४५८॥
**आत्रेय-यवना-भीर-वान-वानस-कैकयाः । सिन्धु-सौवीर-गान्धार-काथतोष-दसेरकाः** ॥४५९॥
**भारद्वाज-श्रमूरै[18]श्च प्रस्थालस्तार्णकर्णकः** । अथैते **त्रिपुरा-वन्ति-चेदि-किष्किन्ध-नैषधाः** ॥४६०॥
**दशार्ण-कुसुमर्णौ** च **नौप-लान्तप-कौसलाः । पदाम-विनिहोत्रौ** च **वैदिशो विन्ध्यपृष्ठगाः** ॥४६१॥
**विदेह-वत्स-भद्रास्तु वज्र-सिण्डिम्भ-सैतवाः । कुत्स-भङ्गावमी मध्यदेश**मध्यनिवासिनः ॥४६२॥
साधयन्**मागधाधीशं वरदामाधिपा**मरम् । **प्रभासं कृतमालं** चाऽपरानपि यथाक्रमम् ॥४६३॥
नृपचक्रशिरश्चुम्बिशासनो **ब्रह्म**नन्दनः । शतमेकोनमेतांश्च स्वयं देशानसाधयत्[19] ॥४६४॥ युग्मम् ॥
विभिन्नस्वामितो[20]द्धूतसीमनिर्मूलनादिति । षट्खण्डां नृपतिः पृथ्वीमेकखण्डां विनिर्ममे ॥४६५॥
¶ततश्चचाल भूपालमौलिलालितशासनः । नृपतिः प्रति **काम्पील्यं**[21] निपील्य प्रतिपन्थिनः[22] ॥४६६॥
छादयन्मेदिनीं सैन्यैः खं तदुत्खातपांशु[23]भिः । प्रदर्शिताध्वा चक्रेण वेत्रिणेवाऽग्रयायिना ॥४६७॥
चतुर्दशानां रत्नानामीशो नवनिधीश्वरः । गच्छन् प्रयाणैरच्छिन्नैस्तत्पुरं प्राप भूपतिः ॥४६८॥ युग्मम् ॥
मुदा प्रकान्तसंगीतमिव तूर्यध्वनिच्छलात् । पुरं विवेश **काम्पील्यं ब्रह्मदत्त**नृपस्ततः ॥४६९॥
¶सर्वतोऽपि तदोपेत्योपेत्य द्वादशवार्षिकः । तस्याऽभिषेकः प्रारेभे **भरतस्येव** राजभिः ॥४७०॥
¶पूर्वमेकाकिनस्तस्य भ्राम्यतो **ब्रह्मजन्मनः** । द्विजः कोऽपि सहायोऽभूद्विभागी सुख-दुःखयोः ॥४७१॥
प्राप्तराज्यं च मां श्रुत्वा भट्ट ! शीघ्रं त्वमापतेः । इति सङ्केतितः सोऽपि तदभ्यर्णे तदाऽऽययौ ॥४७२॥
राज्याभिषेकव्याक्षेपात् स प्रवेशमनाप्नुवन् । प्रारेभे सेवितुं द्वारस्थित एव महीपतिम्[24] ॥४७३॥

---

१. प्राणान् । २. गोधायाः घातकरणे विद्युतः को विमर्दः स्यात् ? इत्यर्थः । ३. इन्द्रः । ४. **पूर्वादूढाः** मु० । ५. **प्रत्यतिष्ठिपत्** मु० । ६. **०र्मलया** मु० । ७. **प्राग्ज्योतिष०** हे० विना । ८. **मान०** सं० । ९. **०वासकाः** सं० । १०. **महीयको** सं० । ११. **कलिङ्गेपिक०** हे० । १२. **दुर्गसूपरिका०** मु० । १३. **काक्षिका०** मु० । १४. **माहेष०** सं० । १५. **सुराष्ट्रा** मु० । १६. **०कौशिल्य०** मु० । १७. **विगर्तकौसला०** मु० । १८. **०श्चमुरश्च०** मु० । १९. ४५४ तः ४६४ पर्यन्ताः श्लोकाः सं० प्रतौ न दृश्यन्ते । २०. **०स्वामिनो०** मु० । २१. **काम्पिल्यं** मु० । २२. शत्रून् । २३. **०पांसु०** मु० । २४. **महीपतेः** हे० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राज्याभिषेकपर्यन्ते बहिर्निरगमन्नृपः । जीर्णोपानद्ध्वजं चक्रे स स्वं ज्ञापयितुं द्विजः ॥४७४॥
नृपस्तं च ध्वजं पश्यन्नन्यध्वजविलक्षणम् । अपृच्छद्वेत्रिणं कोऽयमपूर्वध्वजधारकः ? ॥४७५॥
सोऽवोचद् द्वादशाब्दानि सेवां देवाऽस्य कुर्वतः । आहूयाऽथ क्षमानाथः किमेतदिति तं जगौ ॥४७६॥
सोऽप्यूचे भवता सार्धं भ्राम्यतो मे उपानहः । घृष्टा इयत्यस्तदपि प्रसादं नाथ ! नाऽकृथाः ॥४७७॥
ततस्तं प्रत्यभिज्ञाय हसित्वा च समादिशत् । सेवायै द्वारपालैश्चाऽप्रतिषिद्धं चकार च ॥४७८॥
आस्थानमास्थितो राजा तमाहूयाऽब्रवीदिदम् । भट्ट ! किं दीयतां तुभ्यं ? सोऽप्यूचे देहि भोजनम् ॥४७९॥
राजाऽप्यूचे स्वल्पमेतद् याचस्व मण्डलादिकम् । स जिह्वालम्पटः प्राह फलं राज्येऽपि भोजनम् ॥४८०॥
तन्मे सर्वत्र **भरतक्षेत्रे** दापय भोजनम् । दक्षिणायां च दीनारमारभ्य स्वनिकेतनात् ॥४८१॥
ततो ध्यात्वा नृपोऽप्येतदियत्येवास्य योग्यता । तस्मै स वसुदीनारं भोजनं स्वगृहे ददौ ॥४८२॥
**भरते**ऽथ नृपादेशाद्भोक्तुमारभत द्विजः । इति दध्यौ च सर्वत्र भुक्त्वा भोक्ष्ये नृपौकसि ॥४८३॥
परं भट्टश्चिरेणापि नाऽवाप नृपभोजनम् । मुधैव गमयन् कालं कदाचित् प्राप पञ्चताम् ॥४८४॥
¶अन्येद्युर्नाट्यसङ्गीते तस्य दास्या समर्पितः । स्वर्वधूगुम्फित इव विचित्रः पुष्पगेन्दुकः ॥४८५॥
**ब्रह्मदत्त**स्तु तं दृष्ट्वा दृष्टपूर्वो मयेदृशः । कुत्रापीति व्यधादन्तरूहापोहं मुहुर्मुहुः ॥४८६॥
प्राक्पञ्चजन्मस्मरणोत्पत्तेस्तत्कालमेव च । मूर्च्छित्वाऽबुधदीदृक्षं **सौधर्मे** दृष्टवानिति ॥४८७॥
संसिक्तश्चन्दनाम्भोभिः स्वस्थीभूयेत्यचिन्तयत् । कथं मिलिष्यति स मे पूर्वजन्मसहोदरः ? ॥४८८॥
तं ज्ञातुकामः श्लोकार्धसमस्यामेवमार्पयत् । "आस्व दासौ मृगौ हंसौ मातङ्गावमरौ तथा" ॥४८९॥
अधर्श्लोकसमस्यां मे य इमां पूरयिष्यति । राज्यार्धं तस्य दास्यामीत्यसावाघोषयत् पुरे ॥४९०॥
श्लोकार्धं तत्तु सर्वोऽपि कण्ठस्थं निजनामवत् । पठन्नकार्षीत् पश्चार्धं न चाऽपूरिष्ट कश्चन ॥४९१॥
¶तदा च **पुरिमतालाच्चित्र**जीवो महेभ्यसूः । जातिस्मृतेः प्रव्रजितो विहरन्नेक आययौ ॥४९२॥
ततो **मनोरमो**द्याने प्रासुकस्थण्डिले[2]स्थितः । श्लोकार्धं तत्तु पठतः सोऽश्रौषीदार[3]घट्टिकात् ॥४९३॥
"एषा नौ षष्ठिका जातिरन्योऽन्याभ्यां वियुक्तयोः" । श्लोकापरार्धमेवं स सम्पूर्य तमपाठयत् ॥४९४॥
श्लोकापरार्धं तद्राज्ञः पुरस्तादारघट्टिकः । पपाठ कः कविरिति तत्पृष्टस्तं मुनिं जगौ ॥४९५॥
स पारितोषिकं तस्मै वितीर्योत्कण्ठया ययौ । तत्रोद्याने मुनिं द्रष्टुं धर्मद्रुममिवोद्गतम् ॥४९६॥
वन्दित्वा तं मुनिं तत्र बाष्पपूर्णविलोचनः । निषसादाऽन्तिके राजा सस्नेहः पूर्वजन्मवत् ॥४९७॥
आशीर्वादं मुनिर्दत्त्वा कृपारसमहोदधिः । अनुग्रहार्थं भूपस्य प्रारेभे धर्मदेशनाम् ॥४९८॥
"राजन्नसारे संसारे सारमन्यन्न किञ्चन । सारोऽस्ति धर्म एवैकः सरोजमिव कर्दमे ॥४९९॥
शरीरं यौवनं लक्ष्मीः स्वाम्यं मित्राणि बान्[4]धवाः । सर्वमप्यनिलोद्धूतपताकाञ्चलचञ्चलम् ॥५००॥
बहिरङ्गान् द्विषोऽजैषीर्यथा साधयितुं महीम् । अन्तरङ्गान् जय तथा मोक्षसाधनहेतवे ॥५०१॥
गृहाण यतिधर्मं तत् पृथक्कृत्य त्यजाऽपरम् । राजहंसो हि गृह्णाति विभज्य क्षीरमम्भसः" ॥५०२॥
**ब्रह्मदत्त**स्ततोऽवादीद् दिष्ट्या दृष्टोऽसि बान्धव ! । इयं तवैव राज्यश्रीर्भुङ्क्ष्व भोगान् यथारुचि ॥५०३॥
तपसो हि फलं भोगाः, सन्ति ते, किं तपस्यसि? । उपक्रमेत को नाम स्वतः सिद्धे प्रयोजने ? ॥५०४॥
मुनिरूचे ममाऽप्यासन् धनदस्येव सम्पदः । मया तास्तृणवत्त्यक्ता भवभ्रमणभीरुणा ॥५०५॥
**सौधर्मात्** क्षीणपुण्योऽस्मिन्नागतोऽसि महीतले । इतोऽपि क्षीणपुण्यः सन् राजन्मा गा अधोगतिम् ॥५०६॥
आर्ये देशे कुले श्रेष्ठे मानुष्यं प्राप्य मोक्षदम् । साधयस्यमुना भोगान् सुधया पा[5]युशौचवत् ॥५०७॥

१. **०कारकः** हे० । २. **०स्थण्डिले स्थितः** सं० । ३. अरघट्टं (रेंट, कोश इति भाषायाम्) वहतीत्यारघट्टिकः । ४. **बन्धवः** सं० ।
५. **पाद०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वर्गाच्च्युत्वा क्षीणपुण्यौ भ्रान्तावावां कुयोनिषु । यथा तथा स्मरन् राजन् ! किं बाल इव मुह्यसि ? ॥५०८॥
तेनैवं बोध्यमानोऽपि नाऽबुद्ध वसुधाधवः । कुतः कृतनिदानानां बोधिबीजसमागमः ? ॥५०९॥
तमबोध्य[1]तमं बुद्ध्वा जगाम मुनिरन्यतः । काल[2]दिष्टाहिना दष्टे कियत्तिष्ठन्ति मान्त्रिकाः ? ॥५१०॥
घातिकर्मक्षयात् प्राप्य मुनिः **केवल**मुज्ज्वलम् । भवोपग्राहिकर्माणि हत्वा प्राप परं पदम् ॥५११॥
**ब्रह्मदत्तो**ऽपि चक्रित्वश्रिया **शक्र** इवाऽवनौ । सेव्यमानो नृपैरस्थाद्वासरानतिवाहयन् ॥५१२॥
¶एकदा **यवनेशेन** प्रैष्येकोऽश्व उपायने । एकतमः सप्तस[3]प्तिसप्तीनामिव लक्षणैः ॥५१३॥
यथाऽस्य रूपमद्वैतं तथा वेगोऽस्ति वा न वा । परीक्षितुमिति **ब्रह्मदत्तो**ऽध्यारोहदाशु तम् ॥५१४॥
तेन विक्रममाणेन वाजिना राजकुञ्जरः । नगरान्निरगात् सादि-निषादि-रथि-पत्तियुक् ॥५१५॥
पार्श्वयोरश्वमाक्रामन्नुरुभ्यामु[4]रुपौरुषः । जघान कशया चक्री तद्वेगेक्षणकौतुकी ॥५१६॥
पोतः पृष्ठानिलेनेव प्रेरितः कशया तया । अतीव वेगेन ययावदृश्यश्च क्षणादभूत् ॥५१७॥
व[5]ल्गयाऽऽकृष्यमाणोऽपि राज्ञा तस्थौ हयो न सः । असंयतस्येव मनोऽनर्गलोऽगान्महाटवीम् ॥५१८॥
क्रूरश्वापदभीमायामटव्यां तत्र च श्रमात् । स्वयं तस्थौ स तुरगोऽब्ध्यन्तरुड्डीनपक्षिवत् ॥५१९॥
चक्री तृषार्त्तः पर्याटाऽन्वेष्टुं जलमितस्ततः । निरैक्षिष्ट सरश्चैकं नृत्यत् कल्लोलमालया ॥५२०॥
उत्पर्याणीकृत्य चाऽश्वं तं राजाऽपाययत् पयः । तटे नीत्वा वृक्षमूले मुखरज्ज्वा बबन्ध च ॥५२१॥
ततः स्वयं **ब्रह्मदत्तः** सस्नौ वन्य इव द्विपः । पङ्कजामोदसुरभि स्वच्छन्दं च पयः पपौ ॥५२२॥
उत्तीर्य सरसस्तीरे गच्छन्नैक्षिष्ट चक्रभृत् । अद्वैतरूपलावण्यसम्पदं नागकन्यकाम् ॥५२३॥
तद्रूपविस्मितः सोऽस्थाद् यावत्तावद्वटद्रुमात् । उत्तीर्णो गोनसो[6] नागस्तत्पा[7]द इव जङ्गमः ॥५२४॥
विकृत्य नागिनीरूपं नागकन्याऽपि तत्क्षणम् । गोनसेन समं तेन संवा[8]सं प्रत्यपद्यत ॥५२५॥
राजाऽप्यचिन्तयदहो ! अमुना हीनभोगिना । इयं प्रसक्ता नितरामापो नार्यश्च नीचगाः ॥५२६॥
तद्वर्णसङ्करो नाऽयं ममोपेक्षितुमर्हति । पृथ्व्यां पृथ्वीभुजा सर्वः स्थापनीयो यतः पथि ॥५२७॥
विमृश्येति विधृत्योभौ कशयाऽताडयन्नृपः । मुमोच शान्तरोषश्च तौ च क्वापि प्रजग्मतुः ॥५२८॥
भूयोऽपि भूपतिर्दध्यौ कोऽपि गोनसवेषभृत् । व्यन्तरो रन्तुमनया नाग्या त्रसति निश्चितम् ॥५२९॥
राज्येवं विमृशत्यश्वपदपङ्क्त्यनुसारतः । आययौ सकलं सैन्यं मुदितं स्वामिदर्शनात् ॥५३०॥
सैन्येन च वृतश्चक्री ययौ निजपुरं ततः । नागकन्या च गत्वाऽऽख्यद्रुदती पत्युरीदृशम् ॥५३१॥
स्त्रीलोलो **ब्रह्मदत्तो**ऽस्ति मर्त्यलोके महेश्वरः । पर्यटन् **भूतरमणा**मटवीं सोऽधुनाऽऽययौ ॥५३२॥
अहं च **यक्षिणी**पार्श्वे यान्ती प्रियसखीवृता । तत्राऽब्जसरसि स्नातो[9]त्तीर्णा तेनाऽस्मि वीक्षिता ॥५३३॥
मद्दर्शनादनङ्गार्त्तो रिरंसुर्मामयाचत । अनिच्छन्तीं रुदतीं च कशाभिः पर्यताडयत् ॥५३४॥
आख्यान्त्यपि भवन्नाम तेनैश्वर्योन्मदिष्णुना । इयच्चिरं ताडिताऽस्मि मृतेति प्रोज्झिताऽस्मि च ॥५३५॥
तच्छ्रुत्वा कुपितो नागकुमारो **ब्रह्म**नन्दनम् । उपतस्थे मारयितुं निशायां वासवेश्मगम् ॥५३६॥
¶**ब्रह्मदत्तं** तदानीं च महिष्येवमवोचत । अश्वेनाऽपहृतैर्नाथ ! युष्माभिः किञ्चिदैक्षि किम् ? ॥५३७॥
राजाऽप्याख्यत्तयोः पापां नागी-गोन[10]सयोः कथाम् । स्वयं कृतं शासनं च तद्दुराचारवारणम् ॥५३८॥
नागस्तिरोहितस्तच्च सर्वं शुश्राव चात्मना । विज्ञाय स्वप्रियादोषं शान्तकोपोऽभवत् क्षणात् ॥५३९॥
तदा शरीरचिन्तायै ययौ वासगृहान्नृपः । ईक्षाञ्चक्रे च तं नागं स्वप्रभाद्योतिताम्बरम् ॥५४०॥
नागोऽप्युवाच जयतु **ब्रह्मदत्तो** नरेश्वरः । शासिता दुर्विनीतानां य एवमवनीतले ॥५४१॥

१. सर्वथाऽप्रतिबोध्यम् । २. **कालदष्टा०** मु० । ३. सप्तसप्तिः सूर्यः, तस्य सप्तयोऽश्वाः, तेषामेकतमः । ४. **०मुरुपूरुषः** सं० । ५. **वलाय** मु० । ६. **गोनशो** सं० । सर्पविशेषः । ७. वटपादः 'वडवाई' इत्यर्थः । ८. सम्भोगम् । ९. **स्नानो० सं०** । १०. **गोनश०** सं० ।

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

या त्वया ताडिता नागी सा मे पत्नी तया तु मे । मल्लुब्धो मां जघानेति कथितः शासिताऽप्यसि ॥५४२॥
तद्वाचा दग्धुकामस्त्वामिहाऽऽयातोऽस्मि पार्थिव ! । श्रुतं च तद्विलितमधुना त्वन्मुखाद् रहः ॥५४३॥
सा त्वया शिक्षिता साधु न्यायनिष्ठेन पुंश्चली । सहस्व तद्गिरा यत् त्वय्यचिन्तयममङ्गलम् ॥५४४॥
राजाऽप्यूचे न ते दोषो योषितः खलु मायया । अपरं दूषयित्वाऽपि स्वदोषं छादयन्ति हि ॥५४५॥
नागोऽप्यूचे सत्यमेवं मायिन्यः खलु योषितः । न्यायेन तव तुष्टोऽस्मि ब्रूहि किं करवाणि भोः !? ॥५४६॥
राजापि व्याजहारैवं राज्ये मे मा स्म भूत् क्वचित् । पारदारिकता चौर्यमपमृत्युश्च जातुचित् ॥५४७॥
नागोऽप्यूचे भवत्वेवं भूयस्तुष्टोऽस्मि तेऽनया । परार्थया याच्ञयापि स्वार्थं याचस्व सम्प्रति ॥५४८॥
विचिन्त्य राजाऽयाचिष्ट सर्वेषां प्राणिनां गिरम् । यथा जानाम्यहं सम्यङ् नागराज ! तथा कुरु ॥५४९॥
नागोऽप्युवाच दुर्देयमेतद् दत्तं तु ते मया । परं ते शंसतोऽन्यस्मै सप्तधा भेत्स्यते शिरः ॥५५०॥
इत्युक्त्वा स ययौ नागराजो राजाऽपि चाऽन्यदा । ययौ प्रसाधनगृहं समं वल्लभया स्वया ॥५५१॥
¶गृहगोलं[1] गृहगोला तत्रोवाचाऽऽनय प्रिय ! । राज्ञोऽङ्गरागमेतं मे पूर्यते येन दोहदः ॥५५२॥
प्रत्यूचे गृहगोलोऽपि कार्यं किं मम नाऽऽत्मनो[2] ? । भाषां ज्ञात्वा तयोरेवं जहास वसुधाधवः ॥५५३॥
देवी पप्रच्छ राजानमकस्मादहसः कथम्? । एवमेवेति राज्ञोचे तदाख्याने विपद्धिया ॥५५४॥
साऽप्यूचेऽवश्यमाख्येयं त्वया मे हासकारणम् । अन्यथाऽहं मरिष्यामि गोपनीयं ममापि किम् ? ॥५५५॥
राजाऽप्युवाचाऽकथिते त्वं मरिष्यसि वा न वा । अहं तु कथिते सद्यो मरिष्यामि न संशयः ॥५५६॥
तदश्रद्दधती साऽपि भूयोऽभाषत शंस मे । उभावपि मरिष्यावः समाऽस्तु गतिरावयोः ॥५५७॥
स्त्रीग्रहे पतितो राजा स्मशानेऽकारयच्चिताम् । ऊचे च गत्वा [3]चित्या ते मृत्युसज्जो ब्रवीमि तत् ॥५५८॥
ततः स्नात्वा गजारूढस्तया सह महीपतिः । चितोपान्ते ययौ पौरैर्वीक्षितः साश्रुलोचनैः ॥५५९॥
चक्रिणोऽथ प्रबोधाय काचित् तत्कुलदेवता । छाग[4]स्य रूपं गुर्विण्याश्छा[5]ग्याश्च व्यकरोत्तदा ॥५६०॥
राजैष सर्वभाषाविदिति छागगिरैव हि । गुर्विणी छागिका सा तु तं छागमिदमब्रवीत् ॥५६१॥
यवराशेरमुष्मात् त्वं यवपूलमिहाऽऽनय । दोहदो येन जग्धेन[6] पूर्यते मम वल्लभ ! ॥५६२॥
छागोऽवदद् यवा ह्येते ब्रह्मदत्तस्य चक्रिणः । अश्वार्थं परिरक्ष्यन्ते मृत्युस्तद्ग्रहणे मम ॥५६३॥
छाग्यब्रवीन्मरिष्यामि नाऽऽनेष्यसि यवान् यदि । छागोऽवदन्मृता चेत्त्वं भार्या मेऽ[7]न्या भविष्यति ॥५६४॥
पुनः सोचे पश्य चक्री भार्याच्छन्देन[8] जीवितम् । जहात्येष स्नेहसारो निःस्नेहस्त्वं तु मय्यहो ! ॥५६५॥
छागोऽवो[9]चदनेकस्त्रीपतिरेकस्त्रिया गिरा । मुमूर्षत्येष तन्मौर्ख्यं मूर्खोऽसाविव न ह्यहम् ॥५६६॥
म्रियते सह चेद् राज्ञी न हि योगो भवान्तरे । गतयो भिन्नमार्गा हि कर्माधीनाः शरीरिणाम् ॥५६७॥
श्रुत्वा चक्र्यपि तद्वाचं विममर्शेत्यहो छगः । [10]साधूचे तद्विपद्येऽहं किं स्त्रीमात्रेण मोहितः ? ॥५६८॥
तुष्टोऽथ भूपः कनकमाला-कुसुममालिके । छागस्य कण्ठे निदधे जगाम च निकेतनम् ॥५६९॥
विपत्स्ये त्वद्गिरा नाऽहमिति राज्ञीं निवार्य सः । अखण्डचक्रवर्तिश्रीः पुना राज्यमपालयत् ॥५७०॥
¶एवं च जन्मतो ब्रह्मदत्तः क्रीडन्ननेकधा । षोडशोनां सप्तशतीं शरदामत्यवाहयत् ॥५७१॥
कदाचित् प्राक् परिचितो द्विजः कश्चिज्जगाद तम् । चक्रवर्तिन् ! स्वयं भुङ्क्षे यत् तन्मे देहि भोजनम् ॥५७२॥
ब्रह्मदत्तोऽप्यवोचत् तं मदन्नं द्विज ! दुर्जरम् । चिरेण जीर्यमाणं तु महोन्मादाय जायते ॥५७३॥
कदर्योऽस्यन्नदानेऽपि धिक् त्वामिति वदन् द्विजः । अभोजि सकुटुम्बोऽपि भूभुजा भोजनं निजम् ॥५७४॥
निशायामथ विप्रस्य बीजादिव तदोदनात् । शतशाखः स्मरोन्मादतरुः प्रादुरभूद् भृशम् ॥५७५॥
अज्ञातजननी-जामि-स्नुषाव्यतिकरं मिथः । पशुवत् सहपुत्रोऽपि विप्रः प्रववृते [11]रते ॥५७६॥

१. भाषायां "घरोली" । २. मम आत्मना-जीवितेन कार्यं-प्रयोजनं न-नास्ति किम् ? इत्यर्थः । ३. चितायाम् । ४. **छगस्य** सं०हे० । ५. **०श्छग्याश्च** सं०हे० । ६. भक्षितेन । ७. **०ऽन्या मे** सं० । ८. भार्यानुसरणेन । ९. **०ऽवदद०** सं० । १०. **साध्वाख्यत्** सं० । ११. मैथुने ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो विरामे यामिन्या द्विजो गृहजनश्च सः । ह्रिया दर्शयितुं स्वास्यमन्योऽन्यमपि नाऽशकत् ॥५७७॥
क्रूरेणाऽनेन राज्ञाऽस्मि सकुटुम्बो विडम्बितः । चिन्तयन्नित्यमर्षेण नगरान्निरगाद् द्विजः ॥५७८॥
दूरादश्वत्थपत्राणि काणयन्[1] शर्कराकणैः । तेन कश्चिदजापालो ददृशे भ्रमता बहिः ॥५७९॥
मद्वैरसाधनायाऽलमसाविति विमृश्य सः । तं मूल्येनेव सत्कारेणाऽऽदायैवमवोचत ॥५८०॥
राजमार्गे गजारूढो यः श्वेतच्छत्र-चामरः । याति कृष्ये दृशौ तस्य त्वया प्रक्षिप्य गोलिके[2] ॥५८१॥
विप्रवाचमजापालः प्रतिपेदे तथैव ताम् । पशुवत् पशुपाला हि नविमृश्यविधायिनः ॥५८२॥
सोऽथ कुड्यान्तरे स्थित्वा समं प्रक्षिप्य [3]गोलिके । अस्फोटयद् दृशौ राज्ञो नाऽऽज्ञा लङ्घ्या विधेः खलु ॥५८३॥
सोऽङ्गरक्षैरजापालः प्राप्तः श्येनैरिव द्विकः[4] । हन्यमानस्तमेवाऽऽख्यद्विप्रं विप्रियकारकम् ॥५८४॥
तच्छ्रुत्वा पार्थिवोऽवोचद्धिग्धिग्जातिर्द्विजन्मनाम् । यत्रैते भुञ्जते पापास्तत्र भञ्जन्ति भाजनम् ॥५८५॥
यः स्वामीयति[5] दातारं दत्तं तस्मै वरं शुने । न जातु दातुमुचितं कृतघ्नानां द्विजन्मनाम् ॥५८६॥
वञ्चकानां नृशंसानां श्वापदानां प[6]लादिनाम् । सृष्टिं द्विजानां योऽकार्षीन्नि[7]ग्राह्यः प्रथमं हि सः ॥५८७॥
इति जल्पन्ननल्पकृत् पृथ्वीपतिरघातयत् । सपुत्र-बन्धु-मित्रं तं विप्रं मशकमुष्टिवत् ॥५८८॥
दृशोरन्धीकृतस्तेन हृदयेऽ[8]न्धीकृतः क्रुधा । विप्रान् सोऽघातयत् सर्वान् पुरोधःप्रभृतीनपि ॥५८९॥
सोऽमात्यमादिदेशैवं नेत्रैरेषां द्विजन्मनाम् । विशालं स्थालमापूर्य निधेहि पुरतो मम ॥५९०॥
रौद्रमध्यवसायं तं राज्ञो विज्ञाय मन्त्र्यपि । श्लेष्मातकफलैः स्थालं पूरयित्वा पुरो न्यधात् ॥५९१॥
मुमुदे ब्रह्मदत्तोऽपि पाणिना संस्पृशन् मुहुः । विप्राणां लोचनैः स्थालं साधु पूर्णमिति ब्रुवन् ॥५९२॥
स्पर्शे स्त्रीरत्नरूपायाः पुष्पवत्यास्तथा न हि । यथाऽऽसीद् ब्रह्मदत्तस्य तत्स्थालस्पर्शने रतिः ॥५९३॥
न कदाचन स स्थालमपासारयदग्रतः । दुर्मदी मदिरापात्रमिव दुर्गतिकारणम् ॥५९४॥
विप्रनेत्रधियाऽमृ[9]द्नात् श्लेष्मातकफलानि सः । फलाभिमुखपापद्रोः सज्जयन्निव दोहदम् ॥५९५॥
तस्याऽनिवर्तको रौद्राध्यवसायोऽत्य[10]वर्धत । अशुभं वा शुभं वापि सर्वं हि महतां महत् ॥५९६॥
तस्यैवं वसुधेशस्य रौद्रध्यानानुबन्धिनः । पापपङ्कवराहस्य ययुर्वर्षाणि षोडश ॥५९७॥
ब्रह्मदत्तस्य कौमारेऽगुरष्टाविंशतिः समाः । मण्डलित्वे तु वर्षाणां पञ्चाशत् षट्समन्विता ॥५९८॥
वर्षाणि षोडश पुनर्भरतक्षेत्रसाधने । षट् शतानि तु वर्षाणां चक्रवर्तित्वपालने ॥५९९॥
यातेषु जन्मदिनतोऽथ समाशतेषु सप्तस्वसौ कुरुमतीत्यसकृद् ब्रुवाणः ।
हिंसानुबन्धिपरिणामफलानुरूपां तां सप्तमीं नरकलोकभुवं जगाम ॥६००॥

इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्ये
[11]नवमे पर्वणि ब्रह्मदत्त[12]चक्रवर्तिचरितवर्णनो
नाम प्रथमः सर्गः ॥[13]

---

१. काणीकुर्वन्-विध्यन् । २-३. गोलके सं० । ४. काकः । ५. स्वामिनमिवाऽऽचरति । ६. मांसभक्षकाणाम् । ७. ०न्निर्ग्राह्यः सं० । ८. ०ऽङ्गीकृतः मु० । ९. ०धिया मृद्नन् मु० । १०. ०यो न्यवर्धत मु० । ११. नवमपर्वणि सं० । १२.०दत्तचरित० हे० । ०दत्तचक्रवर्तिवर्णनो सं० । १३. इति ब्रह्मदत्तचक्रवर्तिचरितं समाप्तम् हे० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ अथ द्वितीयः सर्गः ॥

### । श्रीपार्श्वनाथचरितम् ।

[१]नमः **श्रीपार्श्वनाथाय** जगन्नाथाय[२] तायिने । अशेषकल्याणलतासमालम्बनशाखिने ॥१॥
विश्वविश्वोपकाराय स्वोपकाराय चाधुना । कीर्त्यते **पार्श्वनाथस्य** चरित्रमतिपावनम् ॥२॥
¶अस्यैव **जम्बूद्वीपस्य** क्षेत्रेऽस्ति **भरता**भिधे । नगरं **पोतनपुरं** स्वः[३]खण्डमिव नूतनम् ॥३॥
निषेवितं राजहंसैः श्रीसङ्केतनिकेतनम् । आपगायाः पद्म[४]खण्डमिव तन्मण्डनं भुवः ॥४॥
इभ्या बभासिरे तत्र श्रिया श्री[५]दानुजा इव । कल्पद्रुमस्य सोदर्या इवौदार्येण भूयसा ॥५॥
तदभूदमरावत्यास्तस्यै[६] वाऽप्यमरावती । प्रतिच्छ[७]न्दतया वाचामगोचरमहर्द्धिकम् ॥६॥
¶अर्हत्पादारविन्दालिर**रविन्दो**ऽभिधानतः । तत्राऽभूद्भूपतिः स्थानं श्रियः पतिरिवाऽर्णसाम्[८] ॥७॥
स दोष्मसु यथैवैकस्तथैवाऽभूद्विवेकिषु । यथा लक्ष्मीवतां धुर्यस्तथैव हि यशस्विनाम् ॥८॥
यथा हि द्रविणं दीनाऽनाथ-दुःस्थितजन्तुषु । अहोरात्रं संविभेजे पुमर्[९]र्थेषु तथैव सः ॥९॥
राज्ञस्तस्यानुरूपोऽभूज्जीवाजीवादितत्त्ववित् । परमश्रावको **विश्वमूर्ति**र्विप्रः पुरोहितः ॥१०॥
**कमठो मरुभूति**श्चाऽ**नुद्धरा**कुक्षिसम्भवौ । उभौ ज्यायः-कनीयांसावभूतां तस्य चाऽऽत्मजौ ॥११॥
बभूव **वरुणा** नाम **कमठ**स्य सधर्मिणी । **वसुन्धरा मरुभूते** रूपलावण्यशालिनी ॥१२॥
द्वावधीतकलौ तौ च द्वावप्यर्थार्जने[१०]क्षमौ । बभूवतुर्मिथः स्निग्धौ पित्रोरानन्दकारणम् ॥१३॥
[११]गृहभारं तयोर्न्यस्य रथभारं गवोरिव । **विश्वभूति**रनशनं जग्राह गुरुसन्निधौ ॥१४॥
स्मरन् पञ्चपरमेष्ठिनमस्कारं समाहितः । **विश्वभूति**र्विपद्याऽभूत् **सौधर्मे** प्रवरः सुरः ॥१५॥
तद्वियोगज्वराक्रान्ता तस्य पत्न्यप्य**नुद्धरा** । [१२]शुक्-तपोभ्यां शोषिताङ्गी नमस्कारपरा मृता ॥१६॥
पित्रोः परेतकार्याणि चक्राते भ्रातरौ च तौ । क्रमादभूतां चाऽशोकौ [१३]**हरिश्चन्द्रर्षि**बोधितौ ॥१७॥
¶गृहकार्येषु तत्राऽस्थात्कर्[१४]मठः **कमठः** सदा । विपन्ने पितरि प्रायो ज्यायान् पुत्रो धुरन्धरः ॥१८॥
**मरुभूति**स्तु संसारासारत्वविदुरः सदा । विमुखो विषयेभ्योऽभूत् संन्य[१५]स्त इव भोजनात् ॥१९॥
स्वाध्याय-पो[१६]षधादानविधिनिष्ठः समाहितः । तस्थिवान् पौ[१७]षधागारेऽहोरात्रानतिवाहयन् ॥२०॥ युग्मम् ॥
प्रपद्य सर्वसावद्यविरतिं गुरुसन्निधौ । विहरिष्यामीति मति**र्मरुभूतेः** सदाऽभवत् ॥२१॥
प्रमादमदिरोन्मादी सदा मिथ्यात्वमोहितः । परस्त्री-द्यूतसंसक्तः स्वच्छन्दः **कमठ**स्त्वभूत् ॥२२॥
**वसुन्धरा मरुभूते**र्भार्या सा नवयौवना । अभूज्जगन्मोहकरी विषवल्लीव जङ्गमा ॥२३॥
सा पुनर्भावयतिना स्वप्नेऽपि **मरुभूतिना** । पयसा मरुवल्लीव नाऽस्पृश्यत कदाचन ॥२४॥
विषयेच्छुस्ततः सा चाऽसम्प्राप्तपतिसङ्गमा । अरण्यमालतीप्रायं मन्यते स्म स्वयौवनम् ॥२५॥
स्त्रीलम्पटः प्रकृत्याऽपि **कमठो** वीक्ष्य वीक्ष्य ताम् । आललापाऽनुरागेण निर्विवेकः स्नुषा[१८]मपि ॥२६॥
तां रहःस्थां च **कमठो** दृष्ट्वाऽन्येद्युरदोऽवदत् । कृष्णपक्षेन्दुलेखेव किं सुभ्रु ! क्षीय[१९]तेऽन्वहम् ? ॥२७॥

---

१. **अर्हं** हे० । २. **तायिने परमात्मने** मु० । ३. स्वर्गखण्डमिव । ४. **पद्मखण्ड०** मु० । ५. श्रीदः-कुबेरः, तस्य अनुजाः । ६. **०स्तस्या** सं० । ७. प्रतिकृतितया । ८. जलानाम् । ९. पुरुषार्थेषु-धर्मार्थकाममोक्षेषु । १०. **०र्जनाक्षमौ** ता० । ११. पद्यमिदं मुद्रिते न। १२. शोकेन तपसा च । १३. **हरिचन्द्र०** हे० । १४. **०कमठः कर्मठः** ता० विना । १५. संन्यासी । १६-१७. **पौषधा०** मु० । १८. भ्रातृपत्नीमपि। १९. **क्षीयसे** मु० विना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ह्रिया न चेत् कथयसि ज्ञातं दुःखं तथापि ते । मुग्धो मदनुजो मन्ये क्लीबर्मानोऽत्र कारणम् ॥२७॥
श्रुत्वेति वचनं तस्याऽमर्यादं जातवेपथुः[2] । पलायितुं प्रववृते भ्रश्यत्संव्यान-कुन्तला[3] ॥२८॥
**कमठो**ऽपि हि धावित्वा पाणिना तामधारयत् । ऊचे च मुग्धे ! किमियमस्थाने तव भीरुता ? ॥२९॥
श्लथं बधान धम्मिल्लं स्रस्तं संस्थापयांऽशुकम् । इत्युक्त्वा स तथा चक्रेऽनिच्छन्त्या अपि हि स्वयम् ॥३०॥
साऽप्यूचे ज्येष्ठ ! किमिदं पूज्यस्त्वं **विश्वभूति**वत् । कुलद्वयकलङ्काय न ते न मम साध्विदम् ॥३१॥
स्मित्वा च **कमठः** स्माऽऽह मौग्ध्यान्मा स्म ब्रवीरिदम् । मा निजं यौवनं मोघीकुरु[4] भोगविवर्जितम् ॥३२॥
मयाऽपि सह मुग्धाक्षि ! भुङ्क्ष्व वैषयिकं सुखम् । क्लीबेन किं तेन **मरुभूति**नाऽद्यापि यत् **स्मृतिः**[5] ॥३३॥
"गते[6] मृते प्रव्रजिते क्लीबे च पतिते पतौ । पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" ॥३४॥
भृशं भोगेच्छुरग्रेऽपि[7] तेनेत्युक्ता तु **सा**ऽग्रतः । स्वाङ्के निवेशिताऽत्याक्षील्लज्जां मर्यादया सह ॥३५॥
¶अथ तां रमयामास **कमठो** मन्मथातुरः । नित्यमेवं तयोरासीद्दुसगुप्तो रहःक्षणः ॥३६॥
तं ज्ञात्वा **वरुणा** त्यक्तकरुणाऽरुणलोचना । ईर्ष्यापरवशाऽऽचख्यावशेषं **मरुभूत**ये ॥३७॥
उवाच **मरुभूति**स्तामार्ये[8] ! नाऽऽर्ये भवत्यदः । अनार्यचरितं जातु सन्ताप इव शीतगौ[9] ॥३८॥
एवं तेन निषिद्धापि साऽऽख्यत् तच्च दिने दिने । कः परप्रत्ययात् प्रत्येत्विति सोऽपि व्यचिन्तयत् ॥३९॥
साक्षात्कर्तुं स्वयमथ सम्भोगविमुखोऽपि सन् । गत्वोचे **कमठं** यास्याम्यहं ग्रामाय सम्प्रति ॥४०॥
इत्युक्त्वाऽगान्**मरुभूति**र्नक्तं च पुनराययौ । श्रान्त[10]क(का)र्पटिकीभूय वेष-भाषाविपर्ययात् ॥४१॥
ययाचे **कमठं** दूराध्वगस्य मम देहि भोः ! । आश्रयं स्वाश्रय इति ददौ सोऽप्यविशङ्कितः ॥४२॥
तद्दर्शितगवाक्षेऽस्थाद् व्या[11]जनिद्रामुपेत्य सः । दुश्चेष्टितं तयोर्द्रष्टुकामः कामान्धयोः[12] सतोः ॥४३॥
**मरुभूति**र्गतो ग्राममिति तावप्यशङ्कितौ । **वसुन्धरा कमठ**श्च रेमाते दुर्मती चिरम् ॥४४॥
ददर्शाऽदर्शनीयं तन्**मरुभूति**स्तथास्थितः । लोकापवादभीरुस्तु विरुद्धं न समाचरत् ॥४५॥
गत्वा तदाख्यदखिलं **सोऽरविन्दाय** भूभुजे । दुर्नयानसहिष्णुः सोऽप्यारक्षानेवमादिशत् ॥४६॥
पुरोहितसुतत्वेनाऽवध्योऽयं दुश्चरित्रकृत् । निर्वास्यः[13] खरमारोप्य **कमठः** सविडम्बनम् ॥४७॥
तेऽपि रासभमारोप्य रसद्विरसडिण्डिमम् । चित्रिताङ्गं धातुरसैः **कमठं** निरवासयन् ॥४८॥
पौरलोकैर्वीक्ष्यमाणोऽधोमुखः **कमठो**ऽपि हि । अशक्नुवन् प्रतिकर्तुं ससंवेगो वनं ययौ ॥४९॥
¶अथाऽभवत्तपस्वी स **शिव**तापससन्निधौ । आरेभे च तपो बालं **कमठ**स्तत्र कानने ॥५०॥
**मरुभूति**श्चाऽनुशिश्ये[14] धिङ् मया किमिदं कृतम् । नरेन्द्राय यदाख्यायि भ्रातुः स्खलितचेष्टितम् ? ॥५१॥
इदं मदीयं स्खलितं महत् तत्स्खलितादपि । तद्गत्वा क्षमयाम्यद्य ज्यायांसं भ्रातरं निजम् ॥५२॥
ध्यात्वेति भूभुजं पृष्ट्वा वार्यमाणोऽपि तेन सः । जगाम **कमठं** तस्य पादयोर्निपपात च ॥५३॥
स्मरन् विडम्बनां पूर्वां तत्कालं **कमठः** क्रुधा । शिलामुत्क्षिप्य चिक्षेप नमतस्तस्य मूर्धनि ॥५४॥
प्रहारार्त्तस्य तस्योपर्यादाय पुनरेव ताम् । शिलां चिक्षेप **कमठो** नरके स्वमिवाऽभितः[15] ॥५५॥
तत्प्रहाररुजा सार्त्तध्यानो मृत्वाऽभवत् करी । स **विन्ध्य**पर्वते यूथनाथो विन्ध्य इवोच्चकैः ॥५६॥
कोपान्धा **वरुणा** साऽपि कालधर्ममुपेयुषी । [16]तस्यैव यूथनाथस्य वल्लभाऽभूत् करेणुका ॥५७॥
गिरि[17]नद्यादिषु स्वैरं तया सह विशेषतः । अखण्डसम्भोगसुखः क्रीडति स्म स यूथराट् ॥५८॥

---

१. नपुंसकवदाचरन् । २. कम्पमाना । ३. उत्तरीयवस्त्रं केशपाशश्च एतदुभयमपि भ्रश्यत् यस्याः सा । ४. व्यर्थीकुरु । ५. स्मृतिः – मनुस्मृतिः । ६. **नष्टे** मु० । ७. **भोगेप्सु०** मु० । ८. हे आर्ये ! आर्ये (कमठे) अदः अनार्यचरितं न भवति-इत्यर्थः । ९. चन्द्रे । १०. कार्पटिकः – 'कापडियो' भाषायाम् । ११. कपटनिद्रां । १२. **०योस्तयोः** मु० । १३. निष्कासनीयः । १४. परितापं कृतवान् । १५. **०मिवाभिनत्** मु० । १६. **अस्यैव** सं० । १७. **गिरिणद्या०** सं० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतश्च पोतनपतिः सोऽरविन्दः शरत्क्षणे । सममन्तःपुरस्त्रीभी रेमे हर्म्योपरि स्थितः ॥५९॥
रममाणश्च सोऽपश्यद् गगनव्यापिनं क्षणात् । नवोदयं वारिधरं शक्रचापतडिद्धरम्[1] ॥६०॥
अहो रम्यत्वमस्येति तस्मिन् वदति राजनि । महावाताहतः सोऽब्दो विदद्रे तूलपूलवत् ॥६१॥
तं दृष्ट्वाऽचिन्तयद्भूपः संसारेऽन्यदपीदृशम् । दृष्टनष्टं शरीरादि तत्राऽऽस्था का विवेकिनः ? ॥६२॥
इत्यादि ध्यायतो बाढं क्षयोपशममीयतुः । ज्ञानावरण-चारित्रमोहनीये महीपतेः ॥६३॥
सद्यो जातावधिर्न्यस्य **महेन्द्रं** स्वपदे सुतम् । **समन्तभद्राचार्य**स्य पादान्ते प्राव्रजन्नृपः ॥६४॥
गुरोरनुज्ञयैकाकिविहारप्रतिमाधरः । छेत्तुं भवाध्वानमिवाऽ**रविन्दो** व्यहरन्मुनिः ॥६५॥
उद्वसे वसतौ ग्रामे पुरे वाऽऽस्था[2] न जातुचित् । अभूद्विहरतस्तस्य निर्ममस्य वपुष्यपि ॥६६॥
तपःकृशाङ्गो विविधाभिग्रही सोऽन्यदाऽचलत् । **सागरदत्त**सार्थेशसार्थेनाऽ**ष्टापदं** प्रति ॥६७॥
मुनिं **सागरदत्त**स्तं पप्रच्छ क्व नु यास्यथ ? । सोऽप्याख्यद्वन्दितुं देवान् यास्यामोऽ**ष्टापदाचले** ॥६८॥
भूयोऽपृच्छत् सार्थवाहः के देवास्तत्र पर्वते ? । कारिताः केन ? कति ते ? फलं तद्वन्दने च किम् ? ॥६९॥
आसन्नभव्यं तं ज्ञात्वाऽ**रविन्दर्षि**रभाषत । नाऽन्ये भवितुमर्हन्ति भद्र ! देवा विनाऽर्हतः ॥७०॥
केऽर्हन्तस्ते ? वीतरागाः सर्वज्ञाः शक्रपूजिताः । धर्मदेशनया विश्वविश्वस्योत्तारकाश्च ये ॥७१॥
आर्षभि**र्भरत**श्चक्री तत्र रत्नैरकारयत् । प्रतिमा **ऋषभा**दीनां चतुर्विंशतिमर्हताम् ॥७२॥
तद्वन्दनफलं मुख्यं मोक्षोऽन्यत्त्वानुषङ्गिकम् । नरेन्द्रेन्द्राहमिन्द्रादिपदप्राप्त्यादि यत्किल ॥७३॥
स्वयं हिंसापरास्त्वन्ये दुर्गत्यभिमुखाः कथम् । देवीभवन्ति भद्रात्मन्[3] ! विश्वव्यामोहकारिणः ॥७४॥
इत्यादि बोधितस्तेन मुक्त्वा मिथ्यात्वमाशु सः । तदन्तिके श्रावकत्वं सार्थेशः प्रत्यपद्यत ॥७५॥
तस्य धर्मकथामाख्यान**रविन्दर्षि**रन्वहम् । तां क्रमादटवीमाप **मरुभूती**भसेविताम् ॥७६॥
तत्रैकसरसस्तीरे नीरक्षीरोदनीरधेः । सार्थवाहः ससार्थोऽपि सोऽवात्सीद्भोजनक्षणे ॥७७॥
केऽप्येधसे[4]ऽम्भसे केऽपि तृणेभ्यः केऽपि चाऽभ्ययुः । केऽप्यन्नपाकादिव्यग्राः सार्थ एवाऽवतस्थिरे ॥७८॥
तदा च **मरुभूती**भः करिणीभिः समावृतः । एत्य तत्र सरस्यम्भ पपावब्द इवा[5]ऽर्णवे ॥७९॥
पयःपूर्णकरोत्क्षेपं करिणीभिः समं चिरम् । तत्र रन्त्वा[6] स निरगात् पालि[7]मध्यारुरोह च ॥८०॥
दिशोऽवलोकयंस्तत्राऽपश्यत्तं सार्थमोषितम् । कृतान्त इव चाऽधावत् क्रोधात् ताम्रमुखेक्षणः ॥८१॥
कुण्डलीकृतशुण्डाको निष्कम्पश्रवणद्वयः । पूरिताशः[8] स गर्जाभिर्नाशयामास सार्थिकान् ॥८२॥
नरा नार्यो वाहनानि करभादीनि चाऽभितः । पलायाञ्चक्रिरे जीवग्राहे सर्वो जिजीविषुः ॥८३॥
ज्ञात्वाऽवधेर्बोधकालं करिणस्तस्य सम्मुखम् । भगवान**रविन्दो**ऽपि कायोत्सर्गं ददौ स्थिरः ॥८४॥
दूरतो धावितः क्रोधात् पश्यन् पार्श्वे[9] गतश्च तम् । प्रशान्तमत्सरः सोऽभूत् तत्तपःश्रीप्रभावतः ॥८५॥
सद्यश्च जातसंवेगानुकम्पाकम्पवर्ष्मकः[10] । तस्थौ मुनेः पुरस्तस्य स शैक्ष[11] इव नूतनः ॥८६॥
मुनिस्तस्योपकाराय कायोत्सर्गमपारयत् । शान्तगम्भीरया वाचा तं बोधयितुमब्रवीत् ॥८७॥
भो भो ! न संस्मरसि[12] किं **मरुभूति**भवं निजम्? । किं न प्रत्यभिजानासि माम**रविन्द**भूपतिम्? ॥८८॥
तद्भवे प्रतिपन्नं किं व्यस्मार्षीर्धर्ममार्हतम्? । स्मर सर्वं विसृज च मोहं श्वापदजातिजम् ॥८९॥
तया मुनिगिरा जातिस्मरणं प्राप तत्क्षणात् । शिरसा च नमश्चक्रे मुनिं स च महागजः ॥९०॥
भूयोऽपि तं मुनिः स्माऽऽह भवेऽस्मिन्नाटकोपमे । प्राणी नट इवाऽऽप्नोति रूपान्यत्वं क्षणे क्षणे ॥९१॥

---

१. ०**तडिद्धनम्** मु० । २. **चास्था** सं०ता० । ३. **भो भद्र** ! ता० । ४. इन्धनार्थम् । ५. मेघो यथा समुद्रेऽम्भः पिबति तथेत्यर्थः । ६. **कृत्वा** मु० । ७. पालिः तटः, 'पाळ, किनारो' । ८. पूरितदिक् । ९. **पार्श्वगत०** ता० । १०. उत्पन्नाभ्यां संवेगाऽनुकम्पाभ्यां अकम्प (निश्चल) शरीरः । ११. शिष्यः । १२. **त्वं स्मरसि** सं० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा हि क्व तदा धीमांस्तत्त्वज्ञः श्रावको द्विजः? । जातिस्वभावमूढात्मा क्वेदानीं त्वमसि द्विपः ? ।।९२।।
भूयः श्रावकधर्मस्ते प्राग्जन्माङ्गीकृतोऽस्त्विति । उदितं मुनिना सोऽनुमेने हस्तादिसंज्ञया ।।९३।।
**वरुणा** करिणीभूता साऽपि तत्रैव तस्थुषी । तदैव जातिस्मरणमुपलेभे गजेन्द्रवत् ।।९४।।
भूयोऽप्याख्यद् गृहिधर्मं तस्यर्षिः स्थैर्यहेतवे । ययौ च श्रावकीभूय मुनिं नत्वा स कुञ्जरः ।।९५।।
गजबोधेन साश्चर्यस्तत्र भूयान् जनस्तदा । परिव्रज्यामुपादत्त भूयांश्च श्रावकोऽभवत् ।।९६।।
तदा **सागरदत्तो**ऽपि जिनधर्मे दृढाशयः । विशिष्टश्रावको जज्ञे सुरैरप्यविकम्पितः ।।९७।।
**अष्टापदाद्रौ** गत्वा च सो**ऽरविन्द**महामुनिः । अवन्दताऽर्हतः सर्वान् विहरंश्चाऽन्यतो ययौ ।।९८।।
¶कुञ्जरः श्रावकः सोऽपि भूत्वा भावयतिः स्वयम् । ईर्यादिनिरतोऽचारीत् कुर्वन् षष्ठादिकं तपः ।।९९।।
सूर्यतप्ताम्भसः पाता शुष्कपत्रादिपारणः । स करी करिणीकेलिविमुखोऽस्थाद्विरक्तधीः ।।१००।।
स दध्यौ चेति धन्यास्ते मर्त्यत्वे प्रव्रजन्ति ये । पात्रे दानमिवाऽर्थस्य मर्त्यत्वस्य फलं व्रतम् ।।१०१।।
द्रविणं धनिकेनेव मर्त्यत्वं धिङ् मया तदा । अहार्यनात्तदीक्षेण किं करोम्यधुना पशुः ? ।।१०२।।
भावयन् भावनामेवं गुर्वाज्ञास्थिरमानसः । स कालं गमयन्नस्थात् सुस्थितः सुख-दुःखयोः ।।१०३।।
¶[1]इतश्च **कमठो**ऽशान्तो **मरुभूति**वधादपि । अभाष्यमाणो गुरुणा गर्ह्यमाणोऽन्यतापसैः ।।१०४।।
विशेषेणाऽऽर्त्तध्यानस्थो मृत्वाऽभूत् कुक्कु[2]टोरगः । जातपक्षो यम इव संहरन् प्राणिनोऽचरन् ।।१०५।।
सरस्युष्णांशुसन्तप्तं स पिबन् प्रासु[3]कं पयः । ददृशे **मरुभूती**भस्तेन च भ्रमताऽन्यदा ।।१०६।।
पङ्के मग्नस्तदा दैवात्तपःक्षमव[4]पुष्टया । निर्गन्तुमक्षमः कुम्भे स दष्टः कुक्कुटाहिना ।।१०७।।
तद्विषप्रसरैर्ज्ञात्वाऽवसानं स्वं मतङ्गजः । चक्रे चतुर्विधाहारप्रत्याख्यानं समाहितः ।।१०८।।
स्मृतपञ्चनमस्कारो धर्मध्यानी विपद्य सः । **सहस्त्रा[5]रे** सप्तदशसागरायुः सुरोऽभवत् ।।१०९।।
¶**वरुणा** करिणी साऽपि तपस्तेपे सुदुस्तपम् । तथा यथा विपद्याऽभूद्देवी कल्पे द्वितीयके ।।११०।।
स कोऽपि देवो नैवाऽभूदैशानो यन्मनस्तया । न ह्यहारि मनोहारिरूप-लावण्यसम्पदा ।।१११।।
देवे क्वापि मनश्चक्रे न मनागपि सा पुनः । गजेन्द्रजीवदेवस्य सङ्गमध्यानतत्परा ।।११२।।
गजेन्द्रजीवदेवोऽपि तस्यामत्यनुरागवान् । रक्तां तां चाऽवधेर्ज्ञात्वा **सहस्त्रा[6]र**मुपानयत् ।।११३।।
चक्रे स देवो देवीं तामन्तःपुरशिरोमणिम् । पूर्वजन्माभिसम्ब[7]द्धः स्नेहो हि बलवत्तरः ।।११४।।
**सहस्त्रा[8]र**सुरलोकोचितं वैषयिकं सुखम् । भुञ्जानोऽगमयत् कालमदृष्टविरहस्तया ।।११५।।
कालेन कियता सोऽपि कुक्कुटाहिर्विपन्नवान् । नारकोऽभूत् सप्तदशार्णवायुः पञ्चमावनौ ।।११६।।
पञ्चमावनियोग्याश्च वेदना विविधाः सदा । सोऽन्वभूत् **कमठ**जीवो विश्रान्तिं नाऽऽप जातुचित् ।।११७।।
¶इतश्च प्राग्विदेहेषु **सु[9]कच्छे** विजये गिरौ । **वैताढ्ये**ऽस्ति धनैराढ्या **तिलका** नामतः पुरी ।।११८।।
तत्र **विद्युद्गति**र्नाम नामिताशेषखेचरः । बभूव खेचरपतिर्दिव[10]स्पतिरिवाऽपरः ।।११९।।
महिषी तस्य **कनकतिलका** नामतोऽभवत् । अन्तःपुरस्य तिलकायमाना रूपसम्पदा ।।१२०।।
भुञ्जानस्य तया सार्धं तस्य वैषयिकं सुखम् । कियानपि ययौ कालो **विद्युद्गति**महीपतेः ।।१२१।।
¶[11]इतश्च सोऽष्टमात् कल्पाद् गजजीवः परिच्युतः । **कनकतिलका**देव्या उदरे समवातरत् ।।१२२।।
सा काले सुषुवे सूनुमनूननरलक्षणम् । पित्रा च **किरणवेग** इत्याख्या तस्य निर्ममे ।।१२३।।
धात्रीभिर्लाल्यमानः स व्य[12]वर्धिष्ट क्रमेण च[13] । विद्याकलानिधिश्चाऽभूत् क्रमेणाऽऽप च यौवनम् ।।१२४।।

---

१. **ततश्च** सं० । २. पक्षिसर्पः । ३. **प्राशुकं** सं० ता० । ४. वपुषो भावः वपुष्टा (वपुष्-तल्), तया । ५.६.८. **सहश्रारे** सं० । ७. **०सम्बद्धस्नेहो** मु० । ९. **सुकच्छविजये** मु० । १०. इन्द्रः । ११. **ततश्च** सं० । १२. **न्यव०** मु० । १३. **सः** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विद्युद्गति**स्तमभ्यर्थ्याऽग्राहयद्राज्यमात्मनः । **श्रुतसागरगुर्वन्ते** स्वयं तु व्रतमाददे ॥१२५॥
अगृध्नुः[1] पालयामास पैतृकीं राज्यसम्पदम् । सोऽनासक्तः सिषेवे च सुखं वैषयिकं सुधीः ॥१२६॥
नामतः **किरणतेजा**स्तेजसामेकमास्पदम् । **पद्मावती**कुक्षिभवस्तस्यापि तनयोऽभवत् ॥१२७॥
क्रमाच्च कवचहरः सिद्धविद्यश्च सोऽभवत् । मूर्तिः **किरणवेगस्य** द्वितीयेव महामनाः ॥१२८॥
मुनिः **सुरगुरु**र्नाम तत्रैत्य समवासरत् । गत्वा **किरणवेग**स्तं नमश्चक्रेऽतिभक्तितः ॥१२९॥
ततः **किरणवेगस्य** पादोपान्ते निषेदुषः । अनुग्रहाय विदधे स साधुर्धर्मदेशनाम् ॥१३०॥
¶दुर्लभं खलु मानुष्यममुष्मिन् भवकानने । चतुर्थपुरुषार्थस्य यदलम्भूष्णु[2] साधने ॥१३१॥
तत्प्राप्याऽप्यै[3]वविविक्तात्मा मूढो विषयसेवया । गमयत्यल्पमूल्येन सुरत्नमिव पामरः ॥१३२॥
नरके पातनायैव विषयाः सेविताश्चिरम् । सेव्यो मोक्षफलस्तस्माद्धर्मः सर्वज्ञभाषितः ॥१३३॥
आकर्ण्य कर्[4]णपीयूषदेशीयामिति देशनाम् । स विरक्तो न्यधाद्राज्ये सुतं **किरणतेजसम्** ॥१३४॥
स्वयं **सुरगुरोः** पार्श्वे परिव्रज्यामुपाददे । गीतार्थश्च क्रमाज्जज्ञे श्रुतस्कन्ध इवाऽङ्गवान् ॥१३५॥
¶गुरोरनुज्ञयैकाकिविहारं प्रतिपद्य सः । आकाशगमनेनाऽगात् **पुष्करद्वीप**मन्यदा ॥१३६॥
शाश्वतानर्हतस्तत्र नत्वा **वैताढ्यसन्निधौ** । प्रदेशे **हैम[5]शैलस्य** स तस्थौ प्रतिमाधरः ॥१३७॥
तप्यमानस्तपस्तीव्रं सहमानः परीषहान् । अवतस्थे साम्यमग्नः स कालं गमयन् मुनिः ॥१३८॥
¶सोऽपि जीवः कुक्कुटाहेरु[6]द्धृत्य नरकात्ततः । **हेमाद्रे**र्गह्वरे तस्य महाहिरुदपद्यत ॥१३९॥
दोर्दण्ड इव कालस्य जन्तून् कवलयन् बहून् । आहारार्थं स बभ्राम वने तस्मिन्नहर्निशम् ॥१४०॥
अन्यदा पर्यटन् सोऽहिर्निकुञ्जस्थमुदैक्षत । ध्यानैकतानं **किरणवेगर्षिं** स्थाणुवत् स्थिरम् ॥१४१॥
सद्यः प्राग्जन्मवैरेण सोऽहिः कोपारुणेक्षणः । [7]भोगेनाऽवेष्टयत् साधुं चन्दनद्रुमिवाऽथ तम् ॥१४२॥
दंष्ट्राभिर्विषभीष्माभिर्दन्दशूको ददंश सः । मुनिं स्थानेषु भूयस्सु दंशेषु प्रक्षरन् विषम् ॥१४३॥
दध्यौ च स मुनिर्बाढमयं कर्मक्षयाय मे । सुष्ठूपकारी तेनाऽहिर्नाऽपकारी मनागपि ॥१४४॥
जीवित्वाऽपि चिरं कर्मक्षयः कार्यो मया खलु । सोऽद्यैव विहितोऽनेन कृतकृत्योऽस्मि सर्वथा ॥१४५॥
ध्यात्वेत्यालोचनां कृत्वा क्षमयित्वाऽखिलं जगत् । **नमस्कारं** स्मरन् धर्मध्यानस्थोऽनशनं व्यधात् ॥१४६॥
मृत्वा स द्वादशे कल्पे द्वाविंशत्यर्णवस्थितिः । अभूज्**जम्बूद्रुमावर्त्ते** विमाने प्रवरः सुरः ॥१४७॥
सुखमग्नः सदा तत्र विलसन् विविधर्द्धिभिः । सेव्यमानः सुरैरस्थात् स कालमतिवाहयन् ॥१४८॥
¶**हेमाद्रि**कटके भ्राम्यन् सोऽप्यहिर्दववह्निना । [8]दग्ध**स्तमःप्रभां** प्राप द्वाविंशत्यर्णवस्थितिः ॥१४९॥
सार्धद्विशतं[9]धन्वाङ्गस्तीव्रा नरकवेदनाः । स तत्राऽनुभवंस्तस्थौ सुखांशेनाऽप्यचुं[10]म्बितः ॥१५०॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् **प्रत्यग्विदेह**भूषणे । [11]**सुगन्धि**विजयेऽस्त्युच्चैः पुरी नाम्ना **शुभङ्करा** ॥१५१॥
राजा तत्राऽवार्यवीर्यो **वज्रवीर्यो**ऽभिधानतः । वज्रीव साक्षा[12]द्भूमिष्ठः प्रष्ठो[13]ऽभूद्भूमिशासिनाम् ॥१५२॥
तस्य **लक्ष्मीवती** नाम मूर्त्या लक्ष्मीरिवाऽपरा । समभूदग्रमहिषी महीमण्डनतां गता ॥१५३॥
जीवः **किरणवेगस्य** च्युत्वा पूर्णायुर**च्युतात्** । कुक्षाववातरल्**लक्ष्मीवत्याः** सरसि हंसवत् ॥१५४॥
साऽसूत समये पुत्रं पवित्राकारधारिणम् । धरणीभूषणं **वज्रनाभ** इत्यभिधानतः ॥१५५॥
आनन्देन समं पित्रोर्जगत्कुमुदचन्द्रमाः । धात्रीजनैर्लाल्यमानः स क्रमेण व्यवर्धत ॥१५६॥
यौवनं स क्रमात् प्राप शस्त्र-शास्त्रविचक्षणः । राज्येऽभ्यषेचि पित्रा च पवित्रे दिवसे स्वयम् ॥१५७॥

---

१. अलुब्धः । २. समर्थम् । ३. अविवेकात्मा । ४. कर्णयोः पीयूषतुल्याम् । ५. **हेम०** सं० हे० । ६. **०रुद्धृत्य** मु० । ७. अहेः शरीरं भोगः । ८. **दग्धः सप्तदशाब्ध्यायुरभूद् धूमप्रभाभुवि** मु० । ९. **सपादशत०** मु० । १०. **०शेनाप्यनुज्झितः** मु० । ११. **सुगन्धे** मु० । **सुगन्ध०** हे० । १२. **साक्षाद्धर्मिष्ठः** मु० । १३. अग्रगामी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**वज्रवीर्य**स्तया पत्न्या समं व्रतमुपाददे । तद्दत्तं **वज्रनाभ**स्तु सम्यग् राज्यमपालयत् ॥१५८॥
¶कालेन **वज्रनाभ**स्य मूर्त्यन्तरमिवाऽऽत्मजः । अभूच्च**क्रायुधो** नाम चक्रायुध इवौजसा ॥१५९॥
पितुः संसारभीतस्य परिव्रज्येच्छया समम् । **चक्रायुधो** व्यवर्धिष्ट धात्रीहस्ताब्जषट्पदः ॥१६०॥
स शशीव कलापूर्णः कुमारः प्राप यौवनम् । पित्रा च प्रार्थयाञ्चक्रे राज्यमादीयतामिदम् ॥१६१॥
अहं तु भवनिर्विण्ण आत्तभारस्त्वयाऽधुना । उपादास्ये परिव्रज्यामेकं निर्वाणसाधनम् ॥१६२॥
ऊचे **चक्रायुधो**ऽप्येवमप्रसादो मयीदृशः । किं बा[1]लचापलकृतेनाऽपराधेन केनचित् ? ॥१६३॥
तत्सहस्व प्रभो ! राज्यं चिरं मामिव पालय । इयच्चिरं पालयित्वा मा तात ! विजहीहि माम् ॥१६४॥
बभाषे **वज्रनाभ**स्तं नाऽपराद्धं त्वयाऽनघ ! । भारोद्धा[2]राय पाल्यन्ते [3]रथ्या इव सुताः परम् ॥१६५॥
जातस्त्वं कवचहरस्तत् पूरय मनोरथम् । प्रव्रज्याविषयं मेऽद्य ज्ञातं त्वज्जन्मतोऽपि हि ॥१६६॥
यद्यहं त्वयि जातेऽपि भाराक्रान्तो भवाम्बुधौ । पतिष्यामि सुपुत्रेभ्यस्तदा कः स्पृहयिष्यति ? ॥१६७॥
इत्युक्तेऽपि ह्यनिच्छन्तं तं राज्ये स्वाज्ञया नृपः । न्यवेशयत् कुलीनानां गुर्वाज्ञा हि बलीयसी ॥१६८॥
¶तदा च[4] भगवान् **क्षेमङ्करो** नाम जिनेश्वरः । उपेत्य बहिरुद्याने तत्पुर्याः समवासरत् ॥१६९॥
तं च श्रुत्वा **वज्रनाभो** व्यचिन्तयदहो ! मम । मनोरथस्याऽनुकूलः पुण्यैरर्हत्समागमः ॥१७०॥
ऋद्ध्या महत्या सद्योऽपि स प्रवव्रजिषुर्जिनम् । गत्वा ववन्देऽश्रौषीच्च तत्कृतां धर्मदेशनाम् ॥१७१॥
देशनान्ते भगवन्तं स इत्यूचे कृताञ्जलिः । चिरेष्टव्रतदानेन स्वामिन्ननुगृहाण माम् ॥१७२॥
गुरुः सुसाधुरन्योऽपि पुण्यैस्तावदवाप्यते । विशिष्टपुण्योऽस्मि यूयं गुरवो यदिहाऽऽगताः ॥१७३॥
¶मया दीक्षेच्छुना राज्येऽभिषिक्तस्तनयोऽधुना । सज्जोऽस्मि त्वत्प्रसादेऽस्मिन् प्रव्रज्यादानलक्षणे ॥१७४॥
इत्युक्तवन्तं तं स्वामी सद्यः प्राव्राजयत् स्वयम् । सोऽध्यैष्ट च श्रुतस्कन्धं तप्यमानस्तपः परम् ॥१७५॥
¶गुरोरनुज्ञयैकाकिविहारप्रतिमाधरः । तपःकृशाङ्गो महर्षिर्व्यहार्षीत् स पुरादिषु ॥१७६॥
जा[5]तपक्ष इवाऽखण्डैर्मूलोत्तरगुणैर्दृढैः । आकाशगमनलब्धिं स क्रमादासदन्मुनिः ॥१७७॥
उत्पत्य सोऽन्यदाऽगच्छत्**सुकच्छे** विजये यतिः । तपस्तेजोभिरधिकैः खे भास्कर इवाऽपरः ॥१७८॥
सोऽप्यहिर्नर[6]कोद्वृत्तस्तत्रैव विजयेऽभवत् । **ज्वलनाद्रौ** महाटव्यां भिल्लो नाम्ना **कुरङ्गकः** ॥१७९॥
उद्यौवनः प्रतिदिनमधिज्यीकृतकार्मुकः । स जीवनकृते जीवान्निघ्नन् बभ्राम गह्वरे ॥१८०॥
विहरन् **वज्रनाभो**ऽपि तामेवाऽऽप महाटवीम् । सैनिकैरन्तकस्येव श्वापदैरास्पदीकृताम् ॥१८१॥
सत्त्वैः क्रूरैश्च[7]मूर्वाद्यैः स महर्षिरभापितः । जगाम **ज्वलनगिरिं** तदा चाऽस्तगिरिं रविः ॥१८२॥
यत्राऽस्तमितवासित्वा**ज्ज्वलनाद्रेः** स कन्दरे । कायोत्सर्गेणाऽवतस्थे तच्छृङ्गमिव नूतनम् ॥१८३॥
अन्धकारो दिशोऽरौत्सीत् क्रव्या[8]त् कुलमिवोद्धतम् । घूत्कारैर्जुघुषुर्घूका मृत्योः क्रीडाखगा इव ॥१८४॥
वृकाश्चक्रन्दुरत्युग्रं रक्षसामिव गायनाः । भ्रेमुर्व्याघ्रा भुवं घ्नन्तः पुच्छैः कोणैरि[9]वाऽऽनकम् ॥१८५॥
विचित्ररूपाः शाकिन्यो योगिन्यो व्यन्तरस्त्रियः । आविःकिलकिलारावाः समयेनाऽमिलंस्तदा ॥१८६॥
तत्रैव काले क्षेत्रे च स्वभावादतिभीषणे । [10]निष्कम्पो भगवांस्तस्थावुद्यान इव निर्भयः ॥१८७॥
एवं ध्यानजुषस्तस्य सा व्यतीयाय यामिनी । तपोज्योतिरिवाऽमुष्योन्मिमील सवितुर्द्युतिः ॥१८८॥
ततः सूर्यकरस्पर्शाद् गतजन्तुनि भूतले । युगमात्रदत्तदृष्टिर्विहर्तुं सोऽचलन्मुनिः ॥१८९॥
अत्रान्तरे च पापर्द्ध्यै[11] निर्ययौ स **कुरङ्गकः** । व्याघ्रक्रूरो व्याघ्रचर्मवासाः कार्मुकतूणभृत् ॥१९०॥
तेनाऽऽपतंस्त[12]दाऽदर्शि **वज्रनाभो** महामुनिः । असावशकुनं भिक्षुरिति दू[13]रं च चुक्रुधे ॥१९१॥
क्रुद्धः प्राग्जन्मवैराच्च स दूराकृष्टकार्मुकः । कुरङ्गवन्महर्षिं तं निजघान **कुरङ्गकः** ॥१९२॥

---

१. **बाल्यचापल्य०** मु० । २. भारारोपणायेत्यर्थः । ३. अश्वाः । ४. हि ता० । ५. जातौ पक्षौ यस्य सः । ६. **०र्नरकाद् भ्रान्त्वा भवं तत्रैव चाभवत्** मु० । ७. **०श्चमर्याद्यैः** मु० । चमूरुप्रभृतिसत्त्वैः । ८. यथा क्रव्याद्-राक्षसः मांसभक्षी वा, कुलं रुणद्धि तथा । ९. दण्डैर्दुन्दुभिमिव । १०. **निःकम्पो** सं०ता० । ११. **पापर्द्धिर्नि०** मु० । १२. आपतन्-आगच्छन् । **०स्तथा** हे०ता० । १३. अतीव ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

'नमोऽर्हद्भ्य' इति गृणन् प्रतिलिख्य स भूतलम् । निषसाद प्रहारार्त्तोऽप्यार्त्तध्यानविवर्जितः ॥१९३॥
सिद्धेभ्यः सम्यगालोच्य प्रपेदेऽनशनं ततः । सर्वेषां क्षामणं चक्रे निर्ममः सन् विशेषतः ॥१९४॥
धर्मध्यानपरो मृत्वा मध्यग्रैवेयके सुरः । **ललिताङ्गो**ऽभिधानेन सोऽभवत् परमर्द्धिकः ॥१९५॥
**कुरङ्गको**ऽपि तं दृष्ट्वा मृतमेकप्रहारतः । महाधनुर्धरोऽस्मीति मुमुदे मदमुद्वहन् ॥१९६॥
आजन्ममृगयाजीवो मृत्वा सोऽपि **कुरङ्गकः** । [१]उत्पेदे सप्तमावन्यामावासे **रौरवा**भिधे ॥१९७॥
इतश्च **जम्बूद्वीपे**ऽस्मिन् **प्राग्विदेहेषु** विस्तृतम् । **पुराणपुर**मित्यस्ति पुरं सुरपुरोपमम् ॥१९८॥
तस्मिन् बभूव **कुलिशबाहुः** कुलिशभृन्निभः[२] । भूपतिर्भूपतिशतैर्माल्यवद्धृतशासनः ॥१९९॥
नाम्ना **सुदर्शना** तस्य रूपतोऽपि सुदर्शना । समभूदग्रमहिषी परमप्रेमभाजनम् ॥२००॥
रममाणस्तया सार्धं वपुष्मत्या भुवेव सः । अबाधितान्यपुमर्थोऽन्वभूद्वैषयिकं सुखम् ॥२०१॥
पूरितायुर्**वज्रनाभा**मरः कालेन गच्छता । च्युत्वा ग्रैवेयकात्तस्मात्तस्याः कुक्षाववातरत् ॥२०२॥
चतुर्दश महास्वप्नांश्चक्रभृज्जन्मसूचकान् । देवी **सुदर्शना**ऽपश्यन्[३]निशान्ते शयनस्थिता ॥२०३॥
पत्या च व्याकृतैः स्वप्नैः सा हृष्टा कालमत्यगात् । दिवाकरमिव प्राची समयेऽसूत चाऽऽत्मजम् ॥२०४॥
कृत्वा जन्मोत्सवं भूयोऽप्युत्सवेन महीयसा । **सुवर्णबाहु**रित्याख्यां तस्याऽकार्षीन्महीपतिः ॥२०५॥
अङ्कादङ्कं नीयमानो धात्रीभी राजभिश्च सः । बाल्यं ललङ्घे शनकैरध्वगो निम्नगामिव ॥२०६॥
सुखं प्राग्जन्मसंस्कारात् सोऽध्यैष्ट सकलाः कलाः । कलयामास चाऽनङ्गसदनं यौवनं नवम् ॥२०७॥
रूपेणाऽप्रतिरूपोऽभूत् **स्वर्णबाहु**र्जगत्यपि । पराक्रमेण चाऽधृष्यः सौम्यश्च विनयश्रिया ॥२०८॥
भवोद्विग्नः क्षमाधीशः क्षमं ज्ञात्वा च तं सुतम् । उपरुध्य न्यधाद्राज्ये प्रवव्राज स्वयं[४] पुनः ॥२०९॥
अखण्डिताज्ञो मेदिन्यां **सौधर्म** इव वज्रभृत् । तस्थौ भोगान् स भुञ्जानो मग्नः सुखसुधारसे ॥२१०॥
निर्ययौ क्रीडयाऽन्येद्युः सहस्रै[५]र्भूभुजां वृतः । अपूर्वं हयमारूढः सूर्याश्वानामिवाऽष्टमम् ॥२११॥
रयं जिज्ञासुरश्वस्य कशाघातं ददौ नृपः । मरु[६]द्यानं मृग इव सोऽप्यधावत सत्वरम् ॥२१२॥
यथा यथा नृपो वल्गामाचकर्ष तथा तथा । अधाविष्ट विपरीतशिक्ष[७]त्वात्सोऽधिकाधिकम् ॥२१३॥
गरुत्मान् पादचारीव नभस्वा[८]निव मूर्त्तिमान् । स तुरङ्गः क्षणेनाऽपि दूरे तत्याज सैनिकान् ॥२१४॥
भूस्पृग्व्योमचरो वेति नाऽलक्षि स हयो रयात् । सहोद्गत उताऽऽरूढ इति राजाऽप्यतर्क्यत ॥२१५॥
विचित्रतरुसङ्कीर्णं नानासत्त्वसमाकुलम् । वनमेकं क्षणात् प्राप दवीयो[९]ऽपि महीपतिः ॥२१६॥
ईक्षाञ्चक्रे सरश्चैकं राजा स्वाशयनिर्मलम् । तस्थौ तद्दर्शनाच्चाऽश्वस्तृषितः श्वासपूरितः ॥२१७॥
ततः पर्याणमुत्तार्य स्नपयामास तं हयम् । पयश्चापाययद्भूपः स्नात्वा च स्वयमप्यपात् ॥२१८॥
ततो निःसृत्य विश्रम्य क्षणं तीरे क्षमापतिः । चलितोऽपश्यदग्रे च रम्यमेकं तपोवनम् ॥२१९॥
[१०]उत्सङ्गविधृतैणार्भैर्बालतापसदारकैः । पूर्यमाणालवालद्रु तत्प्रेक्ष्य मुमुदे नृपः ॥२२०॥
पस्पन्दे दक्षिणं चक्षुस्तत्र प्रविशतः सतः । राज्ञो विचारि[११]कल्यस्य कल्याणं ज्ञापयन्नवम् ॥२२१॥
मुदितः सोऽग्रतो गच्छन् दक्षिणेन सखीयुताम् । सिञ्चन्तीं द्रून् पयस्कुम्भैर्ददर्श मुनिकन्यकाम् ॥२२२॥
सोऽचिन्तयदहो ! रूपं नेदृगप्सरसामपि । न [१२]नागीनां न [१३]नारीणां त्रैलोक्यादधिका ह्यसौ ॥२२३॥
ततश्च वृक्षान्तरितो यावत्तां स व्यचिन्तयत् । माधवीमण्डपं तावत् सह सख्या विवेश सा ॥२२४॥
दृढबद्धं श्लथीकृत्य वल्कलं तत्र बालिका । बकुलं सेक्तुमारेभे बकुलामोदभृन्मुखी ॥२२५॥
भूयोऽप्यचिन्तयद्राजाऽमुष्या [१४]राजीवचक्षुषः । क्वेदं रूपं ? क्व कर्मेदं प्राकृतस्त्रीजनोचितम् ? ॥२२६॥
न च तापसकन्येयं यदस्यां रागि मे मनः । काऽप्यसौ राजपुत्रीति कुतोऽप्यत्राऽऽगता ध्रुवम् ॥२२७॥

१. **उत्पन्नः** सं० । २. वज्रिसदृशः । ३. **०ऽदर्श०** सं०हे०ता० । ४. **पुनः स्वयम्** सं० । ५. **सहस्रै०** सं० । ६. पवनवेगेन इत्यर्थः । **मरुद्यान** सं० । ७. **०शिक्षित्वा०** मु० । ८. वायुः । ९. अतिदूरमपि । १०. उत्सङ्गे धारिता मृगबालका यैस्तैः । ११. विचारे कल्यश्चतुरस्तस्य । १२. **नारीणाम्** सं० । १३. **नागीनाम्** सं० । १४. कमलाक्ष्याः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्रान्तरे मुखे तस्याः पद्मभ्रान्त्या मधुव्रतः । पपातोत्पादयंस्त्रासं धुन्वत्याः पाणिपल्लवौ ॥२२८॥
यदा च तां जहौ नाऽलिः सखीमुद्दिश्य सा तदा । भ्रमराद्राक्षसादस्माद्रक्ष रक्षेत्यभाषत ॥२२९॥
सख्यप्यूचे रक्षितुं त्वां कोऽन्योऽलं **स्वर्णबाहुतः** । तमेवाऽनुसर क्ष्मापमर्थस्ते रक्षया यदि ॥२३०॥
को नाम व उपद्रोता पात्युर्वीं **वज्रबाहुजे** । इति ब्रुवंस्तयो राजा प्रस्तावज्ञः[1] प्रकट्यभूत् ॥२३१॥
अकस्मात्तं च ते प्रेक्ष्याऽवतस्थाते ससाध्वसे[2] । नोचितं चक्रतुः किञ्चिन्न च किञ्चिज्जजल्पतुः ॥२३२॥
भीते इति विदन् राजा ते भूयोऽपि ह्यभाषत । निःप्रत्यूहं[3] तपः कच्चिन्निर्वहत्यत्र वां शुभे !? ॥२३३॥
धैर्यमालम्ब्य सख्यूचे नरेन्द्रे **वज्रबाहुजे** । तापसानां तपोविघ्नमत्र कः कर्तुमीश्वरः ? ॥२३४॥
इयं तु केवलं बाला पद्मभ्रान्त्या मुखेऽलिना । दश्यमाना कातराक्षी रक्ष रक्षेत्यभाषत ॥२३५॥
तरुमूले तया दत्तासने राजोपवेश्य च । अपृच्छ्यत स्वच्छधिया गिरा पीयूषकल्पया ॥२३६॥
लक्ष्यसे त्वमसामान्यो मूर्त्याऽपि निरवद्यया । तदाऽप्याख्याहि कोऽसि त्वं देवो विद्याधरोऽथ वा ? ॥२३७॥
आत्मानमात्मनाऽऽख्यातुमक्षमः क्ष्माधवोऽवदत् । परिग्रहे[4]ऽहं **कनकबाहोर्वसुमतीपतेः** ॥२३८॥
तदादेशादिहाऽऽगच्छमाश्रमे विघ्नकारिणाम् । निवारणार्थं यत्नोऽत्र महांस्तस्य हि भूपतेः ॥२३९॥
अयं स एव राजेति ध्यायन्तीं तां सखीं नृपः । उवाच किमियं बाला क्लिश्यते कर्मणाऽमुना ? ॥२४०॥
अथ निःश्वस्य साऽवोचदियं **रत्नपुरेशितुः** । खेचरेन्द्रस्य **पद्मे**ति कन्या **रत्नावली**सुता ॥२४१॥
पिताऽस्यां जातमात्रायां विपेदे तत्पदार्थिनः । मिथः सुता युयुधिरे ततोऽभूद्राजविड्वरः[5] ॥२४२॥
**रत्नावली** गृहीत्वेमां बालां स्वभ्रातुराश्रमे । **गालवस्य** कुलपतेर्निकेतनमुपागमत् ॥२४३॥
अन्येद्युः साधुरेकोऽत्र दिव्यज्ञानी समागमत् । **पद्मायाः** कः पतिर्भावीत्यपृच्छद्**गालवश्च** तम् ॥२४४॥
अत्राऽऽगतोऽश्वापहृतश्चक्रभृद्**वज्रबाहुसूः**[6] । परिणेष्यत्यमूं बालामित्याख्यत् स महामुनिः ॥२४५॥
राजाऽपि दध्यावकस्मादश्वापहरणं मम । सहाऽनया सङ्घटनोपायः खल्वेष वेधसः ॥२४६॥
सोऽथाऽऽललाप क्वेदानीं भद्रे ! कुलपतिर्वद । तद्दर्शनेन मे भूयादधुनाऽऽनन्दकन्दलः ॥२४७॥
साऽप्याचख्यौ[7] विहर्तुं तं प्रस्थितं मुनिमन्यतः । अनुगन्तुं गतोऽस्त्यद्य तं नमस्कृत्य चैष्यति ॥२४८॥
**पद्मामानय हे नन्दे** ! कुलपत्यागमक्षणः । वर्ततेऽसाविति तदा काऽप्याख्यद्वृद्धतापसी ॥२४९॥
राजाऽप्यश्वखुररवज्ञातसैन्यागमोऽवदत् । यातं युवामहमपि रक्षामि बलमाश्रमात् ॥२५०॥
निन्येऽथ **नन्दया पद्मा** ततः स्थानात् कथञ्चन । पश्यन्ती वलितग्रीवा **स्वर्णबाहु**महीपतिम् ॥२५१॥
तदे[1]युषः कुलपते **रत्नावल्याश्च** सा सखी । **सुवर्णबाहु**वृत्तान्तं कथयामास सम्मदात् ॥२५२॥
अथोचे **गालवो** ज्ञानमतिसप्रत्ययं मुनेः । जैनर्षयो महात्मानो भाषन्ते न मृषा क्वचित् ॥२५३॥
आतिथेयेन तत्पूज्यो वर्णाश्रमगुरुर्ह्यसौ । **पद्मायाश्च** पतिर्भावी तं यामः **पद्मया** सह ॥२५४॥
ततो **रत्नावली-पद्मा-नन्दा**भिः सहितो ययौ । राज्ञः पार्श्वे कुलपती राज्ञा चोत्थाय सत्कृतः ॥२५५॥
अभ्यधाद्**गालवं** राजा द्रष्टुमुत्कण्ठितोऽद्य वः । अहमप्याजिगमिषं किं यूयं स्वयमागताः ? ॥२५६॥
बभाषे **गालवोऽ**प्येवमन्योऽपि ह्याश्रमागतः । आतिथेयेन पूज्यो नस्त्वं तु त्राता विशेषतः ॥२५७॥
जामेयी[2] मे त्वसौ **पद्मा** पत्नी ते ज्ञानिनोदिता । अस्याः पुण्यैस्त्वमायासीस्तदिमामुद्वहाऽधुना ॥२५८॥
इत्युक्तो मुनिना तेन **पद्मां** पद्मामिवाऽपराम् । गान्धर्वेण विवाहेन **स्वर्णबाहु**रुपायत ॥२५९॥
**रत्नावली** ततः प्रोचे राजानं जनितोत्सवम् । **पद्मा**हृदयपद्मस्य त्वं सूर्यीभव सर्वदा ॥२६०॥
सापत्न[3]स्तनयो **रत्नावल्याः पद्मोत्तर**स्तदा । सप्राभृतः खेचरेन्द्रो विमानैश्छादयन् दिवम् ॥२६१॥
तं प्रदेशमुपेयाय **रत्नावल्या** निवेदितः । **स्वर्णबाहुं** नमस्कृत्य जगादैवं कृताञ्जलिः ॥२६२॥ युग्मम् ॥

१. अवसरज्ञः । २. साध्वसं-भयम् । ३. निर्विघ्नम् । ४. **परिग्रहो०** मु० । ५. **राज्य०** मु० । विड्वरः - विप्लवः । ६. **०बाहुभूः** ता० । ७. **सख्याचख्यौ** मु० । १. **तदै०** मु० । २. भगिन्याः पुत्री । ३. **सपत्न** ता० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वद्वृत्तान्तमिमं ज्ञात्वा देव ! त्वामेव सेवितुम् । इहाऽऽगच्छं तदादेशं विशामीश ! प्रयच्छ मे ॥२६३॥
**वैताढ्याद्रौ** प्रतापाढ्य ! त्वमेहि च पुरे मम । तत्र विद्याधरैश्वर्यलक्ष्मीस्तुभ्यं हि तिष्ठते[1] ॥२६४॥
राजाऽपि तद्वचस्तस्योपरोधादन्वमन्यत । **पद्मा**ऽपि नत्वा जननीं जगादेति सगद्गदम् ॥२६५॥
पत्या सह गमिष्यामि मातर्नात: परं मम । स्थानमन्यत्र तद् ब्रूहि भूयोऽपि द्रक्ष्यसे कदा ? ॥२६६॥
भ्रातृनिवोद्यानतरून्मृगडिम्भान् सुतानिव । मुनिकन्याश्च भगिनीरिव त्यक्ष्यामि ही[2] कथम् ? ॥२६७॥
असौ गर्जति पर्जन्ये षड्जस्वरमनोज्ञवाक् । कलापी ताण्डवकलां कस्याऽग्रे दर्शयिष्यति ? ॥२६८॥
बकुला-ऽशोक-माकन्दानमून् सम्प्रति मां विना । का पाययिष्यति पयो मात: ! स्तन्यं सुतानिव ? ॥२६९॥
**रत्नावल्य**प्युवाचैवं वत्से ! त्वं चक्रवर्तिन: । पत्न्यभूर्विस्मर ततो धिग्वृत्तिं वनवासजाम् ॥२७०॥
भर्ता त्वयाऽनुगम्योऽद्य चक्र्यसौ भूमिवासव: । त्वं भविष्यसि देव्यस्य हर्षस्थाने कृतं शुचा ॥२७१॥
इत्युक्त्वा मूर्ध्नि चुम्बित्वा समालिङ्ग्य च निर्भरम् । अङ्कमारोप्य मुक्तास्त्रा[3]ऽन्वशाद्**रत्नावली**ति ताम् ॥२७२॥
गता पतिगृहं वत्से ! सदैव स्यां प्रियम्वदा । भुक्ते पत्यौ च भुञ्जीथा: शयीथा: शयिते तथा ॥२७३॥
चक्रिपत्नि ! सपत्नीषु सापत्न्याचारिणीष्वपि । भाव्यं त्वया दक्षिणया[4] महत्त्वस्योचितं ह्यद: ॥२७४॥
[5]नीरङ्गीच्छन्नवदना नित्यं नीचैर्विलोचना । वत्से ! कैरविणीव[6] त्वमसूर्यम्पश्यतां श्रये: ॥२७५॥
श्वश्रूपादाब्जसेवायां हंसीव त्वं समुद्वहे: । चक्रिपत्नीत्वजनितं गर्वं जात्वपि मा कृथा: ॥२७६॥
सापत्नान्यप्यपत्यानि पत्युर्मन्यस्व सर्वदा । स्तनन्धयानिव निजान् कुर्याश्च स्वाङ्कतल्पगान्[7] ॥२७७॥
आपीय कर्णाञ्जलिभिरिति शिक्षावच:सुधाम् । नत्वा प्रपच्छ जननीं स्वपत्युश्चाऽनुचर्यभूत् ॥२७८॥
नत्वा **रत्नावलीं पद्मोत्तरो**ऽपि पृथिवीपतिम् । अलङ्कुरुष्व[8] मे स्वामिन् ! विमानमिति चाऽवदत् ॥२७९॥
आपृच्छ्य **गालवं रत्नावलीं** चाऽथ महीपति: । **पद्मोत्तर**विमानेऽध्यारुरोह सपरिच्छद: ॥२८०॥
¶तत: **पद्मोत्तर: स्वर्णबाहुं पद्मा**समन्वितम् । **वैताढ्य**मौलिमुकुटेऽनैषीद्**रत्नपुरे** पुरे ॥२८१॥
प्रासादं रत्नघटितं विमानमिव नाकिनाम् । स खेचरोऽर्पयामास **स्वर्णबाहु**महीभुजे ॥२८२॥
आज्ञां प्रतीच्छन् पार्श्वस्थो भुजिष्य[9] इव भूभुज: । रचयामास स स्नान-भोजनादिभिरौचितीम्[10] ॥२८३॥
तत्र स्थित: **स्वर्णबाहु:** प्राज्यया पुण्यसम्पदा । सर्वविद्याधरैश्वर्यं प्राप श्रेणिद्वयेऽपि हि ॥२८४॥
तत्रोपयेमे बहुश: स विद्याधरकन्यका: । विद्याधरै: सर्वविद्याधरैश्वर्येऽभ्यषेचि च ॥२८५॥
**पद्मा**दिकाभिरूढाभि: खेचरीभि: समन्वित: । तत: सपरिवारोऽगात् **स्वर्णबाहु**र्निजं पुरम् ॥२८६॥
¶**सुवर्णबाहु**राजस्य विधिवच्छासतो महीम् । चतुर्दश[11]महारत्नी क्रमेण समपद्यत ॥२८७॥
चक्रमार्गानुग: सोऽथ षट्[12]खण्डं क्षोणिमण्डलम् । लीलया साधयामास सेव्यमान: सुरैरपि ॥२८८॥
क्रीडन् विचित्रक्रीडाभिस्तत्राऽस्थाद्**वज्रबाहु**ज: । प्रभाकर इवाऽऽक्रामन् विश्वतेजांसि तेजसा ॥२८९॥
¶अधिप्रासादमन्येद्यु: स्थित: सोऽपश्यदम्बरे । उत्पतन्निपतद्देवजातं सञ्जातविस्मय: ॥२९०॥
अश्रौषीच्च **जगन्नाथं** तीर्थनाथमुपागतम् । वन्दितुं च ययौ तत्र श्रद्धासम्बद्धमानस: ॥२९१॥
जिनेन्द्रं तत्र वन्दित्वा यथास्थानं निषद्य च । सोऽश्रौषीद्देशनां तस्मादाकस्मिकसुधानिभाम् ॥२९२॥
सम्बोध्य भूयसो भव्यान् भगवानन्यतो ययौ । **सुवर्णबाहु**राजोऽपि निजमेव निकेतनम् ॥२९३॥
तीर्थकृद्देशनायातान् स्मारं स्मारं सुरान्नृप: । क्वैते दृष्टा मयेत्यूहापोहाज्जातिस्मृतिं ययौ ॥२९४॥
दध्यौ च प्राग्भवान् पश्यन् प्रतिमर्त्यभवं मम । अपि प्रयतमानस्य भवान्तो नौ[13]ऽधुनापि हि ॥२९५॥
आस्रवान् देवभूयं य: स मर्त्यत्वेऽपि तृप्यति । कर्मच्छन्नस्वभावस्य विमोह: कोऽयमात्मन: ? ॥२९६॥

१. **विद्यते** ता० । २. **हा** ता० । ३. मुक्तानि अस्त्राणि-अश्रूणि यया सा । ४. दाक्षिण्यगुणवत्या । ५. वस्त्राञ्चलेन छन्नं-आवृतं वदनं यस्या: सा, 'लाज काढेली' इति भाषायाम् । ६. कैरविणी-रात्रिविकाशिकुमुदिनी । ७. स्वस्य अङ्क एव तल्पं- पल्यङ्क:, तत्र गतान्, स्वाङ्के शयनीया इत्यर्थ: । ८. **०कुरु मम** मु० । ९. दास: । १०. **रौचितिम्** मु० । ११. समाहारद्विगुरत्र । १२. **षट्खण्डक्षोणि०** मु० । १३. **नामुना** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वर्गे मर्त्ये तिर्यग्योनौ नरकेऽपि च गच्छति । जन्तुः शिवाध्वनो भ्रान्तोऽध्वनीनोऽध्वान्तरेष्विव ॥२९७॥
तस्माच्छिवपथायैव प्रयतिष्ये विशेषतः । [1]अनिर्वेदः श्रियो मूलं सामान्येऽपि प्रयोजने ॥२९८॥
निश्चित्यैवं सुतं राज्ये **स्वर्णबाहु**र्नृपो न्यधात् । तदा च विहरन्नाऽऽगा**ज्जगन्नाथो** जिनेश्वरः ॥२९९॥
तीर्थनाथान्तिकं गत्वा प्राव्राजी**द्वज्रबाहुजः** । तप्यमानस्तपश्चोग्रं गीतार्थः सोऽभवत् क्रमात् ॥३००॥
अर्हद्भक्त्यादिभिः स्थानैः कियद्भिः सेवितैः सुधीः । शनैरुपार्जयामास तीर्थकृन्नामकर्म [2]सः ॥३०१॥
¶एकदा विहरन् सोऽगादुप**क्षीरमहागिरि** । महाटवीं **क्षीरवणां** नानाश्वापदभीषणाम् ॥३०२॥
अर्कस्याऽभिमुखस्तत्र तेजसाऽर्क इवाऽपरः । कुर्वन्नातापनां तस्थौ स स्थिरप्रतिमाधरः ॥३०३॥
**कुरङ्गको**ऽपि नरकादुद्[3]वृत्तस्तत्र पर्वते । बभूव सिंहो भ्राम्यंश्च दै[4]वात्तत्र समाययौ ॥३०४॥
भोज्याप्राप्तेर्वासरेऽपि ह्यस्तने स बुभुक्षितः । दूरादपि महर्षि तं ददर्शाऽन्तकसन्निभः ॥३०५॥
क्रुद्धः प्राग्जन्मवैराच्चाऽधावत् स्फारीकृताननः । पञ्चाननोऽवनिं पुच्छाच्छोटनैः स्फोटयन्निव ॥३०६॥
उत्कर्णके[5]सरः स्फारबूत्कारापूर्णकन्दरः । उत्फालोऽभ्येत्य स तलप्रहारमकरोन्मुनौ ॥३०७॥
मुनिर्देहनिराकांक्षः सिंहे [6]तत्राऽऽपतत्यपि । चक्रे चतुर्विधाहारप्रत्याख्यानं समाहितः ॥३०८॥
आलोचनां सर्वसत्त्वक्षामणां चाऽकरोन्मुनिः । धर्मध्यानेऽवतस्थे च सिंहेऽप्यविकृताशयः ॥३०९॥
दीर्णः के[7]सरिणा विपद्य स मुनिर्विंशत्युद[8]न्वत्स्थितिः कल्पेऽभूद्दशमे **महाप्रभ**मिति ख्याते विमाने सुरः ।
सिंहः सोऽपि मृतश्चतुर्थनरकेऽगच्छद्दशाब्धिस्थितिस्तिर्यग्योनिषु चाऽभवद्बहुविधाश्चाऽऽसादयन् वेदनाः ॥३१०॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये [9]नवमे पर्वणि श्रीपार्श्वनाथपूर्वभ[10]ववर्णनो
नाम द्वितीयः[11] सर्गः ॥

१. **अनिर्वेदश्रियो** मु० । २. **च** ता० । ३. ०**दुद्धृत**० मु० । ४. **दैवादत्र** मु० । **तत्र दैवात्** ता० । ५. ०**केशरः** सं० । ६. **सिंहे तत्र पतत्यपि** ता० । **सिंहेन पातितो भुवि** मु० । ७. **केशरिणा** सं. । ८. ०**त्युदन्वस्थितिः** मु० । ९. **नवम**० सं०ता० । १०. ०**भवनवकवर्णनो** हे० ता० । ११. **प्रथमः** ता० ।

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

## ॥ अथ तृतीयः सर्गः ॥

तस्याऽथ जीवः सिंहस्य दुःखान्यनुभवन् भवे । सन्निवेशे क्वचिदभू[1]द्रोरद्विजकुले सुतः ॥१॥
पितृ-भ्रात्रादयस्तस्य जातस्याऽपि विपेदिरे । कृपया जीवितो लोकैः **कठ** इत्युदितश्च सः ॥२॥
उल्लङ्घ्य शैशवं प्राप्तयौवनो निःस्वदुःस्थितः । लोकैर्विडम्ब्यमानः सन् कथमप्याप भोजनम् ॥३॥
अन्येद्युरीश्वरान् पश्यन् रत्नालङ्कारधारिणः । सद्य उत्पन्नवैराग्यः **कठ** एवं व्यचिन्तयत् ॥४॥
सहस्रकुक्षिम्भरयो नानाभरणभूषिताः । देवा इवाऽमी तन्मन्ये प्राग्जन्मतपसः फलम् ॥५॥
अहं भोजनमात्रेऽपि साभिलाषः सदाऽपि हि । नाऽकार्षं तत्तपो नूनं तपस्याम्यधुनाऽपि तत् ॥६॥
एवं विचिन्त्य संवेगात् सोऽग्रहीत्तापसव्रतम् । पञ्चाग्न्यादितपस्तेपे कन्दमूलादिभोजनः ॥७॥
¶इतश्च **जम्बूद्वीपे**ऽस्मिन् **भरतक्षेत्र**भूषणम् । अनुगङ्गं नगर्यस्ति **वाराणस्य**भिधानतः ॥८॥
कल्लोला इव **जाह्नव्या**स्तस्यां चैत्येष्वभान् ध्वजाः । शा[2]तकुम्भमयाः कुम्भाः पद्मकोशा इवोच्चकैः ॥९॥
राका[3]हिमकरस्तस्यामधिप्राकारमागतः । निशीथे तनुते रूप्यकपिशीर्षकविभ्रमम् ॥१०॥
तत्रेन्द्रनीलबद्धासु वासमन्दिरभूमिषु । पयोबुद्ध्या क्षिप्तहस्ता हस्यन्तेऽतिथियोषितः ॥११॥
तस्यां चैत्यान्यभान् दग्धधूपधूमैः प्रसारिभिः । चक्षुर्दोषच्छिदे बद्धैर्विनीलवसनैरिव ॥१२॥
सङ्गीतमुरज[4]ध्वानैर्मेघध्वनिशङ्कि[5]नः । केकायन्ते प्रावृषीव सदा तत्र च केकिनः ॥१३॥
तस्यामिक्ष्वाकुवंशो(श्यो)ऽभूद**श्वसेनो** महीपतिः । अश्वसेनाभिरभितोऽजिरी[6]कृतदिगन्तरः ॥१४॥
तस्य तस्थौ वक्षसि श्रीर्वाग्देवी च मुखाम्बुजे । करतल्पे कृपाणश्च दोर्दण्डे च वसुन्धरा ॥१५॥
लीलयैव द्विषोऽजैषील्लीलयैवाऽशिषन्महीम् । लीलयैव ददौ वित्तं स सर्वं लीलया व्यधात् ॥१६॥
सदाचारनदीशैलो गुणपक्षिमही[7]रुहः । लक्ष्मीकरेणोरालानस्तम्भो भुवि बभूव सः ॥१७॥
नरेन्द्रपुण्डरीकस्य तस्याऽऽज्ञा न ललङ्घिरे । पन्नगा इव राजानो दुर्वृत्ता अपि सर्वदा ॥१८॥
बभूव महिषी तस्य वामाक्षीणां शिरोमणिः । सपत्नीष्वप्यवामैव **वामादेव्य**भिधानतः ॥१९॥
सा शीलं धारयामास पत्युर्यश इवाऽमलम् । नैसर्गिकेण शौचेन द्वैतीयीकीव **जाह्नवी** ॥२०॥
तैस्तैर्गुणैः समभवद्भर्तुः साऽत्यन्तवल्लभा । तथापि वाल्लभ्यमदं न मनागप्यधारयत् ॥२१॥
¶इतश्च **प्राणते** कल्पे भुक्त्वा देवर्द्धिमुत्तमाम् । **सुवर्णबाहु**राड्जीवो निजमायुरपूरयत् ॥२२॥
चैत्रे चतुर्थ्यां कृष्णायां **विशाखायां** ततश्च्युतः । निशीथेऽवातर**द्वामा**स्वामिन्या उदरेऽथ सः ॥२३॥
ददर्श च तदा देवी **श्रीवामा** विशतो मुखे । चतुर्दश महास्वप्नांस्तीर्थकृज्जन्मसूचकान् ॥२४॥
इन्द्रैः पत्या च तज्ज्ञैश्च स्वप्नेषु व्याकृतेषु सा । मुदिता बिभ्रती गर्भं कालं देव्यत्यवाहयत् ॥२५॥
¶पौषकृष्णदशम्यां सा **राधा**[8]यां सर्पलाञ्छनम् । रत्नं विडूरभूमीव नीलाभं सुषुवे सुतम् ॥२६॥
षट्पञ्चाद्दिक्कुमार्यस्तत्रोपेत्य क्षणादथ । अर्हतोऽर्हज्जनन्याश्च सूतिकर्माणि चक्रिरे ॥२७॥
**शक्रो**ऽप्यागात्तत्र देव्यां[9] दत्त्वाऽवस्वापनीं ततः । अर्हत्प्रतिकृतिं कृत्वा तस्याः पार्श्वे न्यधत्त च ॥२८॥
रूपाणि पञ्च सोऽकार्षीत्तत्रैकेनाऽऽददे[10] प्रभुम् । उभाभ्यां चामरे [11]चाऽन्येनाऽऽतपत्रं प्रभूपरि ॥२९॥

---

१. रोरो दीनोऽकिञ्चन इति यावत् । २. सुवर्णकुम्भाः । ३. पूर्णिमाचन्द्रः । ४. **०मुरुज०** सं० ता० । ५. **०शङ्किताः** मु० ता० । ६. **०ऽजरी०** ता० । अजिरं अङ्गणं, तदिव कृतानि दिगन्तराणि येन सः । ७. **०महाद्रुमः** मु० । ८. अनुराधानक्षत्रे । ९. **दत्त्वा देव्यापस्वा०** सं० । १०. **०केन दधौ** सं० मु० । ११. **अन्येना०** सं० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वज्रमुल्लालयन्नन्येनाऽग्रस्थो वल्गु[1]वल्गितः । स्वामिवक्त्रे वलद्ग्रीवं दत्तदृष्टिर्ययौ द्रुतम् ॥३०॥
क्षणान्**मेरावतिपाण्डुकम्बलामासदच्छिलाम्** । सिंहासने न्यषदच्च **शक्रो**ऽङ्कारोपितप्रभुः ॥३१॥
त्रिषष्टिर**च्युता**द्याश्च तत्रेन्द्रा द्रुतमाययुः । जन्माभिषेकं नाथस्य विधिवद्विदधुश्च ते ॥३२॥
**ईशानो**त्सङ्गमारोप्य प्रभुं **सौधर्म**वासवः । यथावत् स्नपयामास[2] वृषशृङ्गोत्थितैर्जलैः ॥३३॥
चर्चामर्चां रचयित्वा जगन्नाथस्य वासवः । कृताञ्जलिरिति स्तोत्रं पवित्रमुपचक्रमे ॥३४॥
नमः प्रियङ्गुवर्णाय जगतः प्रियहेतवे । तुभ्यं दुस्तरसंसारपारावारैकसेतवे ॥३५॥
ज्ञानरत्नैककोशाय व्याकोशे[3]न्दीवरत्विषे । भव्यारविन्दांशुमते तुभ्यं भगवते नमः ॥३६॥
फणभृल्लक्ष्मणेऽष्टाग्रसहस्रनरलक्ष्मणे । तुभ्यं नमः कर्मतमोविध्वंसशशलक्ष्मणे ॥३७॥
जगत्त्रयपवित्राय ज्ञानत्रितयधारिणे । कर्मस्थलखनित्राय सुचरित्राय ते नमः ॥३८॥
सर्वातिशयपात्रायाऽतिमात्रकरुणावते । सर्वसम्पद[4]मत्राय नमस्ते परमात्मने ॥३९॥
दूरीभूतकषायाय मुदितो[5]क्षीरवार्धये । रागद्वेषविमुक्ताय नमस्ते मुक्तिगामिने ॥४०॥
फलं त्वत्पादसेवाया यद्यस्ति परमेश्वर ! । तदेतदेव मे भूयात्त्वयि भक्तिर्भवे भवे ॥४१॥
स्तुत्वेत्यर्हन्तमादाय नीत्वा **वामा**न्तिकेऽमुचत् । जहेऽवस्वापनीं[6] तस्यास्तच्चाऽर्हत्प्रतिरूपकम् ॥४२॥
**शक्रो**ऽगात् स्वं ततः स्थान**मश्वसेनो**ऽपि हि प्रगे[7] । सूनोर्जन्मोत्सवं चक्रे कारामोक्षादिपूर्वकम् ॥४३॥
गर्भस्थितेऽस्मिञ्जननी कृष्णनिश्यपि पार्श्वतः । सर्पन्तं सर्पमद्राक्षीत् सद्यः पत्युः शशंस च ॥४४॥
स्मृत्वा तदेष गर्भस्य प्रभाव इति निर्णयन्[8] । **पार्श्व** इत्यभिधां सूनो**रश्वसेन**नृपोऽकरोत् ॥४५॥
धात्रीभिरिन्द्रादिष्टाभिर्लाल्यमानो जगत्पतिः । क्रमेण ववृधे राज्ञामङ्कतोऽङ्केषु **सञ्चरन्** ॥४६॥
नवहस्तप्रमाणाङ्गः क्रमात् प्राप च यौवनम् । अनङ्गलीलोपवनं कार्मणं हरिणीदृशाम् ॥४७॥
नीलोपलानां सारेण यद्वा नीलोत्पलश्रियाम् । निर्मितः शुशुभे **पार्श्वः** कायकान्त्या विनीलया ॥४८॥
बभौ विभुर्महाबाहुर्महाशाख इव द्रुमः । विशालदृढवक्षाश्च महातट[9] इवाऽचलः ॥४९॥
**आश्वसेनि**र्व्यराजिष्ट पाणि-पादास्य-चक्षुषा । विकस्वरेणाऽरविन्दवनेनेव महाह्रदः ॥५०॥
वज्रादि[10]लाञ्छनधरो वज्रमध्यः कृशोदरः । वज्रऋषभनाराचं दधौ संहननं प्रभुः ॥५१॥
तादृग्रूपं प्रभुं दृष्ट्वा चिन्तयामासुरङ्गनाः । यासां पतिरयं भावी धन्यास्ता एव भूतले ॥५२॥
**अश्वसेन**[11]नृपोऽन्येद्युर्जिनधर्मकथापरः । आस्थानस्थः प्रतीहारेणाऽभ्येत्य व्यज्ञपीदृशम् ॥५३॥
अस्ति द्वारि नरः कोऽपि नरेश्वर ! सदाकृतिः । विज्ञीप्सुः[12] स्वामिनः पादान् प्रसीदाऽऽदेशदानतः ॥५४॥
**अश्वसेन**नृपोऽप्यूचे प्रवेशय तमाश्वपि । विज्ञीप्सवो हि विज्ञाप्याः सर्वेऽपि न्यायिभिर्नृपैः ॥५५॥
प्रवेशितोऽथ द्वाःस्थेन नमश्चक्रे महीपतिम् । प्रतीहारविनिर्दिष्टे विष्टरे[13] निषसाद सः ॥५६॥
भूपतिस्तमभाषिष्ट भद्र ! कस्यासि ? कोऽसि वा ? । केन वा कारणेनेह मदन्तिकमुपागमः[14] ? ॥५७॥
स पुमानप्युवाचैवं स्वामिन्नस्तीह **भारते** । पुरं **कुशस्थलं** नाम क्रीडास्थ[15]लमिव श्रियाम् ॥५८॥
तत्राऽऽसीन्**नरवर्मे**ति वर्मेव शरणार्थिनाम् । अर्थिनामेककल्पद्रुमर्महौजाः पृथिवीपतिः ॥५९॥
सोऽसाधयद् बहून् राज्ञः स्वभूसीमान्तवर्तिनः । सांवर्त्तिक[16] इवाऽऽदित्यो राजंस्तीव्रेण तेजसा ॥६०॥
जैनधर्मे[17] रतो[18] नित्यं साधुशुश्रूषणोद्यतः । सोऽपालयच्चिरं राज्यमखण्डन्यायविक्रमः ॥६१॥

---

१. वल्गु-सुन्दरं वल्गितं-गमनं यस्य सः । २. **०स्नापया०** मु० । ३. व्याकोशं-विकसितं इन्दीवरं-कमलं तत्तुल्यकान्तये । ४. सर्वसम्पदां अमत्राय-पात्राय । ५. **मुदित०** मु० । **करुणाक्षीर०** हे० ता० । ६. **०ऽपस्वापिनीं** सं० । ७. प्रातः । ८. **निर्न्नयन्** सं० । **निर्णयम्** हे० ता० । ९. **महाचल०** मु० । १०. **वज्राहि०** मु० । लाञ्छनधरः-लक्षणधर इत्यर्थः । ११. **०सेनो** मु० । १२. विज्ञप्तिं कर्तुं इच्छुः । १३. आसने । १४. **०मुपागतः** सं० । १५. **क्रीडास्थान०** सं०ता० । १६. संवर्ते-प्रलये भवः-सांवर्त्तिकः सूर्यः । १७. **जैने** ता० । १८. **०धर्मरतो** हे० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवोद्विग्नः सोऽपरेद्युर्विहाय तृणवच्छ्रियम् । उपादत्त परिव्रज्यां सुसाधुगुरुसन्निधौ ॥६२॥
[1]तेनाऽर्धकथितेऽप्येवं राजा धार्मिकवत्सलः । मुदितो निजगादैवं सदस्यानपि मोदयन् ॥६३॥
अहो विवेकी धर्मज्ञो **नरवर्मा** नरेश्वरः । य एवं तृणवद्राज्यं त्यक्त्वा व्रतमुपाददे ॥६४॥
प्राणसंशयमारुह्य विविधायोधनोद्यमैः । यद्राज्यमर्ज्यते भूपैस्तत्प्राणान्तेऽपि दुस्त्यजम् ॥६५॥
आत्मना सम्पदा वाऽपि प्राणभूताश्च याः प्रियाः । रक्ष्यन्ते ये च पुत्राद्या दुस्त्यजास्तेऽपि [2]जीवता ॥६६॥
सर्वमेकपदेऽत्याक्षीत्त्यक्तुकाम इमं भवम् । **नरवर्मा**ऽकरोत् साधु तदूर्ध्वं ब्रूहि सम्प्रति ॥६७॥
भूयोऽपि स पुमानूचे राज्येऽभून्न**रवर्मणः** । सूनुः **प्रसेनजि**न्नाम सेनासिन्धु[3]र्महोदधिः ॥६८॥
तस्य **प्रभावती** नाम सम्प्रति प्राप्तयौवना । भुविष्ठा सुरकन्येवाऽद्वैतरूपाऽस्ति कन्यका ॥६९॥
[4]इन्दुक्षोदैरिव मुखं दृशाविन्दीवरैरिव । स्वर्णचूर्णैरिव वपुः पाद-पाण्यम्बुजैरिव ॥७०॥
रम्भागर्भैरिव चोरू नखाः शोणोपलैरिव । मृणालैरिव दोर्वल्ल्यौ धात्रा तस्याः प्रचक्रिरे ॥७१॥ युग्मम् ॥
अद्वैतरूप-लावण्यां तां पश्यन् प्राप्तयौवनाम् । अनुरूपवरस्याऽर्थे सचिन्तोऽभूत् **प्रसेनजित्** ॥७२॥
बहूनन्वेषयामास स कुमारान् महीभुजाम् । मेने स्वपुत्र्या उचितं रूपेण न तु कञ्चन ॥७३॥
¶**प्रभावत्य**न्यदोद्यानं सखीभिः सहिता गता । किन्नरीभिः पद्यगीतं गीयमानमदोऽशृणोत् ॥७४॥
श्री**मद्वाराणसी**भर्तु**रश्वसेन**स्य नन्दनः । **श्रीपार्श्वनाथो** जयति रूप-लावण्यसम्पदा ॥७५॥
यया स प्राप्स्यते भर्ता जयिनी साऽपि भूतले । स वल्लभो दुर्ल[5]भस्तु तादृक् पुण्योदयः कुतः ? ॥७६॥
एवं **श्रीपार्श्वनाथ**स्य शृण्वन्ती गुणकीर्तनम् । तद्रागविवशा जज्ञे तन्मयीव **प्रभावती** ॥७७॥
**पार्श्वेन** विजितो रूपात् कामस्तदनुरागिणीम् । अताडयत्तां विशिखैस्तद्वैरादिव निर्दयम् ॥७८॥
परित्यज्याऽपरां क्रीडां व्रीडां च हरिणीव सा । भूयो भूयश्च तद्गीतमश्रौषीदेकमानसा ॥७९॥
तद्गीताकर्णनेनैव **पार्श्वे** रागः सखीजनैः । अलक्ष्यत **प्रभावत्या** दक्षैः किं नोपलक्ष्यते ? ॥८०॥
किन्नरीषूत्पतितासूत्पश्या चिरमवास्थित । **प्रभावती** शून्यमनाः स्मरभूतवशंवदा ॥८१॥
सख्यो वेश्मन्यथाऽऽनैषुर्मनीषिण्यः [6]प्रवर्त्य ताम् । **श्रीपार्श्वनाथं** मनसा ध्यायन्ती योगिनीमिव ॥८२॥
[7]आकल्पो वह्निकल्पोऽभूद्दुकूलं च कुकूल[8]वत् । असिधारेव हारश्च तस्यास्तल्लीनचेतसः ॥८३॥
तस्याश्चाङ्गेऽभवत्तापः पानीय[9]प्रसृतिम्पचः । [10]प्रस्थम्पचकटाहानां पूरणी चा[11]श्रुधोरणी ॥८४॥
न प्रभाते न प्रदोषे न नक्तं न दिवाऽपि सा । अवाप निर्वृतिं बाला मदनज्वरजर्जरा ॥८५॥
तं च व्यतिकरं तस्या विज्ञायाऽसाध्यमात्मनः । सख्यो विज्ञपयामासुस्तत्पित्रोस्त्राणकाम्यया ॥८६॥
पितरौ मुमुदाते च **पार्श्वे** रक्तां विबुध्य ताम् । तदाश्वासनहेतोश्च मुहुरेवं जजल्पतुः ॥८७॥
साधु **पार्श्वकुमारो**ऽयं जगत्त्रयशिरोमणिः । स्वानुरूपो दुहित्रा मे वरो [12]वव्रे सुचेतसा ॥८८॥
अस्मद्वत्सा महेच्छानामेकैव धुरि वर्तते । ईदृङ् मनोरथोऽन्[13]यस्याः सम्भवत्यपि न क्वचित् ॥८९॥
वत्सामुद्वाहयिष्या[14]वः कुमारेणाऽऽ**श्वसेनि**ना । फलप्राप्त्यनुसारेण प्रायेण हि मनोरथः ॥९०॥
इत्थं पितृवचः सख्यो गत्वा तस्यै व्यजिज्ञपन् । तद्गिरा मुमुदे सापि स्तनितेनेव केकिनी ॥९१॥
[15]प्रत्याशयाऽनया स्वस्था साऽप्यहान्यत्यवाहयत् । अङ्गुलीभिर्गणयन्ती योगिनी जपमन्त्रवत् ॥९२॥

---

१. **तेनार्धे कथिते०** मु० । २. **जीविताः** मु० हे० । ३. सेना एव सिन्धवो नद्यस्तेषां महोदधिः । ४. चन्द्रचूर्णैः । ५. **दुर्लभश्च** हे० । ६. निश्चेष्टीभूतां तां सचेष्टां कृत्वा । ७. नेपथ्यपरिधानम् । ८. तुषाग्निवत् । ९. पानीयं जलं, तस्य प्रसृतिः - अञ्जलिः (चळु), तं पचतीत्येवंविधस्तापः । १०. प्रस्थो मानविशेषः । तत्प्रमाणं धान्यं येषु पच्यते तादृशा ये कटाहाः (कढाईया), तान् पूरयति तस्या अश्रुधारा । ११. अश्रुधारा । १२. **दध्रे** मु० । १३. **०ऽप्यस्याः** सं० ता० । १४. **०ष्यामः** सं० । १५. **पत्याशया०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिपच्चन्द्रलेखेव सा बभूव तथा कृशा । यथाऽलक्ष्यत कामस्य धनुर्यष्टिरिवाऽपरा ॥९३॥

¶दिने दिनेऽतिविधुरां पितरौ प्रेक्ष्य तां सुताम् । निश्चिक्याते प्रेषयितुमधि**पार्श्वं** स्वयंवराम् ॥९४॥

[1]तच्चाऽज्ञासीत् **कलिङ्गा**दिदेशानामेकनायकः । **यवनो** नाम दुर्दान्तः पर्षद्येवमुवाच च ॥९५॥

मयि सत्यपि किं कोऽपि **पार्श्वो** वोढा **प्रभावतीम्**? । कोऽयं **कुशस्थल**पतिर्यस्तां मह्यं न दास्यति? ॥९६॥

यदि वा याचका एव दत्तं गृह्णन्ति वस्त्विह । आच्छिद्यग्राहिणो वीरास्तेषां [2]सर्वं स्वमेव हि ॥९७॥

इत्युक्त्वा भूरिभिः सैन्यैरनन्यसमविक्रमः । **कुशस्थलपुरं** वेगा[3]देत्याऽरौत्सीदनेकधा ॥९८॥

न कस्याऽप्यभवत्[4]तत्र प्रवेशो [5]निष्क्रमोऽपि वा । नभस्[6]वत इव ध्यानस्थितयोगीन्द्र[7]वर्ष्मणि ॥९९॥

अहं तु प्रेषितो राज्ञा निशीथे निरगां पुरात् । **पुरुषोत्तम** इत्यस्मि मन्त्रि**सागरदत्त**सूः ॥१००॥

इमं वृत्तान्तमाख्यातुमिहाऽऽगममतः परम् । देवः करोतु यत्कृत्यं स्वजनेऽरिजनेऽपि च ॥१०१॥

¶ततः क्रुद्धोऽ**श्वसेनो**ऽपि [8]भ्रूकुटीविकटेक्षणः । इत्यु[9]वाच वचःसारं वज्रनिर्घोषभीषणम् ॥१०२॥

कोऽयं वराको **यवनः**? का भीर्वो मयि सत्यपि? । एषोऽभिषेणयिष्यामि पुरं त्रातुं **कुशस्थलम्** ॥१०३॥

इत्युक्त्वाऽवादयद् भम्भां जम्भा[10]रिरिव विक्रमात् । **अश्वसेनो**ऽथ तत्सेनास्तत्रादेनाऽमिलन् द्रुतम् ॥१०४॥

¶क्रीडन् क्रीडागृहे **पार्श्वो** भम्भायास्तं महाध्वनिम् । मिलतां सैनिकानां च शुश्राव तुमुलं तदा ॥१०५॥

किमेतदिति सम्भ्रान्तः **पार्श्वः** पार्श्वे पितुर्ययौ । तत्र चाऽऽगच्छतोऽपश्यद्रणसज्जांश्चमूपतीन् ॥१०६॥

प्रणम्य पितरं चैवं कुमारोऽवोचदुच्चकैः । दैत्यो यक्षो राक्षसो वा किमन्यो वाऽपराध्यति ? ॥१०७॥

यदर्थमभियोगोऽयं स्वयं तातस्य दोष्मतः । समं वाऽप्यधिकं वाऽपि न ते पश्यामि कञ्चन ॥१०८॥

**प्रसेन[11]जित्त**माचख्यौ त्रातव्यो **यवना**न्नृपात् । **अश्वसेन**नृपोऽङ्गुल्या दर्शयन् **पुरुषोत्तमम्** ॥१०९॥

भूयः कुमारोऽभाषिष्ट तातस्य पुरतो युधि । न सुरो नाऽसुरोऽप्यस्ति [12]नृमात्रं **यवनः** कियान् ? ॥११०॥

अलं तातस्य यानेन प्रयास्याम्यहमेव हि । तस्य स्वान्या[13]यानभिज्ञस्य करिष्ये शिक्षणं क्षणात् ॥१११॥

अवादीद**श्वसेनो**ऽपि वत्स ! क्रीडोत्सवेन ते । मन्मनः प्रीय[14]ते कष्टै रणयात्रादिभिर्न तु ॥११२॥

जानेऽहं स्वकुमारस्य जगत्रयजयक्षमम् । दोर्बलं किन्तु मे हर्षः सद्मनि क्रीडति त्वयि ॥११३॥

प्रत्यूचे **पार्श्वनाथो**ऽपि क्रीडेयमपि तात ! मे । नाऽऽयासमात्रमप्यत्र पूज्यास्तिष्ठन्त्विहैव तत् ॥११४॥

एवमत्याग्रहात् सूनोर्विदंस्तद्भुजविक्रमम् । तत्प्रत्यपादि वचनं वचनीयविवर्जितम् ॥११५॥

¶पित्रा विसृष्टः **श्रीपार्श्वो** द्विपारूढः शुभे क्षणे । तेनाऽनुयातः **पुरुषोत्तमेन** प्रास्थितोत्सवात् ॥११६॥

प्रदत्तैकप्रयाणे च प्रभौ **शक्र**स्य सारथिः । आगत्य नत्वा चोवाच रथोत्तीर्णः कृताञ्जलिः ॥११७॥

क्रीडयाऽपि युयुत्सुं त्वां स्वामिन् ! ज्ञात्वा पुरन्दरः । रथं साङ्ग्रामिकं प्रैषीन्मया सारथिना सह ॥११८॥

जगत्रयं तृणमिदं स्वामिवीर्यस्य वेत्त्यदः । तथापि **शक्रः** स्वां भक्तिं समये दर्शयत्यमूम् ॥११९॥

अ[15]परिस्पृष्टभूपृष्ठं विविधायुधपूरितम् । स्वामी **शक्रा**नुग्रहाय तमारोहन्महारथम् ॥१२०॥

तिग्म[16]तेजा इवोत्तेजा रथेन व्योमयायिना । **श्रीपार्श्वनाथः** प्रययौ स्तूयमानो नभश्चरैः ॥१२१॥

अन्वियाय च भूमिष्ठं रण[17]प्रष्ठं प्रभोर्बलम् । मुहुर्मुहुः प्रभुं द्रष्टुमुत्पश्यैः शोभितं भटैः ॥१२२॥

क्षणेनाऽपि क्षमो गन्तुमेकोऽपि विजयक्षमः । स्वामी सैन्योपरोधेन ययौ ह्रस्वैः प्रयाणकैः ॥१२३॥

दिनैः कतिपयैश्चाऽऽप **कुशस्थल**मथाऽवर्[18]सत् । उद्यानान्तः सुरकृते प्रासादे सप्तभूमिके ॥१२४॥

---

१. **तत्राज्ञा०** मु० । २. **सर्वस्व०** मु० । ३. **वेगादभ्यारौ०** मु० । ४. **०भवदत्र** मु० । ५. **निःक्रमो** सं०हे०ता० । ६. वायोः । ७. शरीरे । ८. **भृकुटी०** सं०ता० । ९. **प्रत्यु०** मु० । १०. कृष्णः । ११. **प्रसेनजित०** मु० विना । १२. **नृपोऽत्र** मु० । १३. **स्थामानभि०** मु० । १४. **प्रीतये** सं० । १५. अस्पृष्टभूतलम् । १६. तीव्रतेजाः-सूर्यः । १७. रणे दक्षम् । १८. **०थाऽविशत्** सं०

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

¶क्षत्रियाणां स्थितिरिति दयया चाऽऽदितः[1] प्रभुः । अनुशिष्योपयवनं प्रैषीद्दूतं सुमेधसम्[2] ॥१२५॥
स गत्वा **यवनं** स्माऽऽह स्वामिशक्त्या ससौष्ठवम् । श्रीमत्**पार्श्वकुमार**स्त्वां मन्मुखेनाऽऽदिशत्यदः ॥१२६॥
तातं शरणमापन्नो नरेन्द्रोऽयं **प्रसेनजित्** । मोच्यो रोधाद्विरोधाच्च तदिदानीं त्वया नृप ! ॥१२७॥
स्वयं प्रचलितं तातं निवार्य कथमप्यहम् । हेतुमात्रेणाऽमुनैव समागममिहाऽवनौ ॥१२८॥
व्यावर्तस्व निजं स्थानमाश्रयस्व झगित्यपि । सोढ एवाऽपराधोऽयं तवाऽपसरतः सतः ॥१२९॥
उत्कटभ्रु[3]कुटीभीमललाटो **यवनो**ऽप्यथ । अवदद्दूत ! किमिदमवादीर्मा न वेत्सि किम् ? ॥१३०॥
बालः क एष **पार्श्वो**ऽत्र य आगाच्चापलाद्युधि[4] । को वो**ऽश्वसेनः**[5] स्थविरश्चचाल प्रथमं च यः ? ॥१३१॥
तौ द्वावपि कियन्मात्रं तद्गृह्याश्चाऽपरे नृपाः । तद् गच्छ **पार्श्व** एवाऽपयातु स्वकुशलेच्छया ॥१३२॥
दूतत्वात्त्वमवध्योऽसि विवदन्नपि निष्ठुरम् । जीवन् विमुक्तस्तद् गच्छ सर्वं स्वस्वामिने वद ॥१३३॥
दूतो भूयोऽप्युवाचैवं त्वां[6] बोधयितुमेव माम् । कृपया प्राहिणोन्नाथो न त्वशक्त्या दुराशय ! ॥१३४॥
**कुशस्थल**नराधीशं यथा तित्रा[7]सते प्रभुः । न जिघांसुस्तथैव त्वां यद्याज्ञां विदधासि भोः ! ॥१३५॥
दिव्यप्यखण्डां स्वाम्याज्ञां खण्डयन्म्रियसे स्वयम् । स्पृशन्नुदर्चिषं वह्निं पतङ्ग इव मूढधीः ॥१३६॥
क्व खद्योतो विश्वविश्वोद्योती प्रद्योतनः[8] क्व च ? । क्व राजमात्रं त्वमसि क्व **पार्श्व**स्त्रिजगत्पतिः ? ॥१३७॥
इति ब्रुवाणं तं दूतं क्रुद्धा[9] **यवन**सैनिकाः । उदायुधाः समुत्तस्थुर्जजल्पुश्चैवमुच्चकैः ॥१३८॥
वैरं स्वस्वामिना सार्धमरे ! किमपि तेऽस्ति यत् । तद्द्रोहाय वदस्येवमुपायज्ञोऽसि साधु रे ! ॥१३९॥
तेष्वेवं विब्रुवाणेषु रोषाच्च प्रजिहीर्षुषु । वृद्धामात्योऽभ्यधत्तैवमाक्षेपपरुषाक्षरम् ॥१४०॥
नायं स्वस्वामिनो वैरी भवन्तो वैरिणः परम् । एवं ये स्वेच्छया भर्तुरनर्थं जनयन्ति हा ! ॥१४१॥
आज्ञाऽपि विश्वनाथस्य **पार्श्वनाथ**स्य लङ्घिता । न हि क्षेमाय वो मूढाः किं पुनर्दूतघातनम् ? ॥१४२॥
भृत्यैरेवंविधैः स्वामी दुर्दान्तैस्तुरगैरिव । आकृष्याऽनर्थकान्तारे क्षिप्यते हि क्षणादपि[10] ॥१४३॥
युष्माभिर्धर्षिता दूताः पुराऽन्येषां क्षमाभुजाम् । कुशलं तत्र वो जातं मल्लस्तेभ्यो हि नः प्रभुः ॥१४४॥
यस्य हीन्द्राश्चतुःषष्टिः सेवकास्तेन विग्रहः । कोऽयं स्वभर्तुरानीतो दुर्विनीतैर्नृकीटकैः[11] ? ॥१४५॥
इति ते शिक्षिताः सर्वे भीताः शान्तिं ययुर्भटाः । तं च दूतं करे धृत्वा मन्त्री साम्नेत्यवोचत ॥१४६॥
अज्ञानादेवमुक्तं ते शस्त्रमात्रोपजीविभिः । सोढव्यं तत्त्वया विद्वन् ! सेवकोऽसि क्षमानिधेः ॥१४७॥
शासनं **पार्श्व**पादानां प्रत्येष्टुं शिरसा स्वयम् । तवाऽनुपदमेष्यामो माऽऽख्यस्त्वं भर्तुरीदृशम् ॥१४८॥
इति सम्बोध्य सत्कृत्य तं दूतं विससर्ज सः । हितकामी निजं[12] नाथमित्यभाषिष्ट चाऽऽदरात् ॥१४९॥
¶किं [13]स्वामिन्नविमृश्येदं कृतमासीद्दुरायति[14] ? । इयताऽपि क्षतिर्नास्ति **पार्श्वनाथं** समाश्रय ॥१५०॥
देवताः सूतिकाकर्म धात्रीकर्म च देवताः । इन्द्राश्च सामरा जन्मस्नपनं यस्य चक्रिरे ॥१५१॥
सेन्द्राः [15]सुरासुरा यस्य पत्तयस्तेन विग्रहे । तव [16]ग्रेहिलता केयमुर्[17]भ्रस्येव दन्तिना ? ॥१५२॥
क्व गरुत्मान् क्व काकोलः? क्व सुमेरुः क्व सर्षपः?। क्व शेषाहिः क्व कङ्काहिः? क्व **पार्श्वः** क्व भवादृशः? ॥१५३॥
न यावज्ज्ञायसे लोकैस्तावदात्महितेच्छया । कण्ठे कुठारं विन्यस्योपतिष्ठस्वा**ऽश्वसेन**जम् ॥१५४॥
प्रतीच्छ शासनं **पार्श्व**स्वामिनो विश्वशासितुः । स्थास्यन्ति शासने येऽस्य तेऽत्राऽमुत्र च निर्भयाः ॥१५५॥
विमृश्य **यवनो**ऽप्यूचे साध्वहं बोधितस्त्वया । अस्मादनर्थाज्जडधीरन्धोऽ[18]न्धोरिव रक्षितः ॥१५६॥
इत्युक्त्वा सपरीवारः कण्ठे बद्ध्वा परश्वधम् । **यवनो**ऽगात्तदुद्यानं **श्रीपार्श्व**स्वाम्यलङ्कृतम् ॥१५७॥

---

१. **चोदितः** मु० । २. बुद्धिमन्तम् । ३. ०**भृकुटी**० सं. । ४. ०**द्युधे** मु० । ५. ०**सेनस्थवि**० मु. । ६. **त्वा** इति पाठः मुद्रितेऽन्य-प्रतिषु च; सोऽत्र संशोधितः 'त्वां' इति । ७. **तित्रासिते** सं० ता० । **तित्रायते** मु० । त्रातुमिच्छति । ८. सूर्यः । ९. **क्रुधा** मु० हे० । १०. **तत्क्षणा**० ता० विना । ११. ०**र्नृकण्टकैः** सं० । १२. **निजनाथ**० मु० । १३. **किं वा स्वामिन्** ! **वि**० मु० । १४. अशुभः आयतिः-उत्तरकालः यस्मात् तत्तथा । १५. **सुराः स्वयं यस्य** हे० । १६. उन्मत्तता । १७. अजस्य । १८. कूपात् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लक्षशः सप्तिभिः सप्तसप्तिसप्तिविडम्बिभिः । सहस्रशो भद्रगजैर्महेन्द्रगजसन्निभैः ॥१५८॥
रथैः सुरविमानाभैः पत्तिभिः खेचरोपमैः । भूषितं प्रेक्ष्य तत्सैन्यं **यवनो**ऽतिविसिष्मिये ॥१५९॥
भटैः सविस्मयावज्ञैर्वीक्ष्यमाणः पदे पदे । क्रमेण **यवनः** स्वामिप्रासादद्वारमासदत् ॥१६०॥
वेत्रिणा विज्ञपय्याऽथ सभायां स प्रवेशितः । दूरादपि नमश्चक्रे दिवाकरमिव प्रभुम् ॥१६१॥
स्वामिना मोचितग्रीवाकुठारो **यवनः** पुनः । नत्वाऽग्रत उपाविक्षज्जगाद च कृताञ्जलिः ॥१६२॥
"यस्याऽऽज्ञाकारिणः सर्वेऽपीन्द्रास्तस्य तवाऽग्रतः । कोऽहं नृकीटः कृपीटयोनेरिव तृणोत्करः ? ॥१६३॥
कृपां कुर्वन् प्रेष्य दूतमद्य मामशिषः खलु । तव भ्रूभङ्गमात्रेण भस्मसान्न भवामि किम् ? ॥१६४॥
गुणाय खलु जातोऽसौ स्वामिन्नविनयोऽपि मे । यदद्राक्षं भवत्पादाञ्जगत्त्रयपवित्रकान् ॥१६५॥
क्षमस्वेति कथं ब्रूयां? तव कोपोऽपि नास्ति यत् । तुभ्यं स्वयंग्रहेशाय[3] यच्छामीत्यपि नोचितम् ॥१६६॥
इन्द्रैस्ते सेव्यमानस्य सेवकोऽस्मीति किंवचः[4] । अभयं देहीति का वाक् स्वयं ह्यभयदायिनः ॥१६७॥
तथाऽप्यज्ञानतो वच्मि प्रसीदाऽऽदत्स्व मे श्रियम् । सेवकस्तेऽस्मि वितराऽभयं भीतस्य मे प्रभो ! ॥१६८॥
**श्रीपार्श्वनाथो**ऽप्यवदद्भद्र ! भद्राणि सन्तु ते । मा भैषीः शाधि राज्यं स्वं मा कार्षीः पुनरीदृशम् ॥१६९॥
तथेति प्रतिपेदानं तं सच्चक्रे जगद्गुरुः । प्राज्यप्रसाददानेन महतां हीदृशी स्थितिः ॥१७०॥
¶अभूदुद्वेष्टनं सद्यः **कुशस्थल**पुरस्य च । **पार्श्वनाथ**मनुज्ञाप्य ययौ च **पुरुषोत्तमः** ॥१७१॥
**प्रसेनजि**न्नरेन्द्राय तं वृत्तान्तं शशंस सः[5] । हर्ष एकातपत्रोऽभूत् तत्पुरे च तदैव हि ॥१७२॥
दध्यौ **प्रसेनजित्** प्रीतो भाग्यवानस्मि सर्वथा । सर्वथा भाग्यवत्येषा मम वत्सा **प्रभावती** ॥१७३॥
नाऽभून्मनोरथोऽप्येष यत्सुरासुरपूजितः । **पार्श्वनाथ**कुमारो मे नगरं पावयिष्यति ॥१७४॥
उपायनमिमामेव समादाय **प्रभावतीम्** । उपतिष्ठे **पार्श्वनाथ**कुमारमुपकारिणम् ॥१७५॥
¶**प्रसेनजि**द्विमृश्यैवमुपादाय **प्रभावतीम्** । हृष्टो हृष्टपरीवारः **पार्श्वनाथ**मुपाययौ ॥१७६॥
स **पार्श्व**स्वामिनं नत्वा प्रोवाचैवं कृताञ्जलिः । अनभ्रवृष्टिवद्दिष्ट्या स्वामिन्नागमनं तव ॥१७७॥
द्विषन्नप्युपकारी मे **यवनो** येन विग्रहे । अनुग्रहं मे व्यधित जगत्त्रयपतिर्भवान् ॥१७८॥
दययाऽन्वग्रहीर्नाथ ! यथैवाऽऽगमनेन माम् । **प्रभावती**विवाहेनाऽनुगृहाण तथैव हि ॥१७९॥
[6]दुष्प्रापप्रार्थिका चेयं दूरं त्वय्यनुरागिणी । कृपां कुरु तदेतस्यां कृपालुस्त्वं निसर्गतः ॥१८०॥
**प्रभावती** चेति दध्यौ किन्नरीभ्यः पुरा श्रुतः । दृष्टश्चाऽद्य कुमारोऽयं दृक् श्रुत्यौ[7] संवदत्यहो ! ॥१८१॥
दाक्षिण्यवान्[8] कृपालुश्च श्रूयते दृश्यतेऽपि च । उपरुद्धश्च तातेन मदर्थे साधु सम्प्रति ॥१८२॥
स्वभाग्याप्रत्ययादद्य तथापि चकिताऽस्म्यहम् । किं मंस्यते तातवचो न वेत्याशङ्कयाऽऽकुला ? ॥१८३॥
एवं तस्यां चिन्तयन्त्यां **प्रसेनजिति** चोन्मुखे । बभाषे **पार्श्व**कुमारो मेघनिर्घोषधीरवाक् ॥१८४॥
तातज्ञया त्रातुमेव त्वामायाताः **प्रसेनजित्** ! । भवतः कन्यकामेतामुद्वोढुं न पुनर्वयम् ॥१८५॥
तदत्र माऽऽग्रहं कार्षीः **कुशस्थल**पते ! वृथा । तातान्तिकं व्रजिष्याम: कृततातगिरो वयम् ॥१८६॥
तच्च **प्रभावती** श्रुत्वा विषण्णैवमचिन्तयत् । चन्द्रात्तदर्चिष्पतनं[9] यदस्मादीदृशं[10] वचः ॥१८७॥
अयं कृपालुः सर्वत्राऽभवन्मयि तु निष्कृपः[11] । कथं भविष्यसि हहा मन्दभाग्ये **प्रभावति** !? ॥१८८॥
सदाऽर्चिताः कुलदेव्यः सद्यस्तातस्य सम्प्रति । कैश्चिद्दर्शयतोपायं[12] क्षीणोपायोऽधुना ह्ययम् ॥१८९॥
¶दध्यौ **प्रसेनजि**च्चैवं स्वयं [13]सर्वत्र निःस्पृहः । **अश्वसेनोपरोधात्तु** कर्ताऽसौ मन्मनोरथम् ॥१९०॥

१. **सप्तसप्त०** सं० हे० । २. अग्नेः । ३. **स्वयंगृहे०** सं० विना । स्वयं ग्रहणे समर्थाय । ४. कुवचः । ५. **च** सं० । ६. **दुःप्राप** मु० विना । ७. **श्रुत्याः** मु० । ८. **दाक्षिण्यवाक्** मु० । ९. **०त्तदर्चि पतनं** सं० । १०. यद् अस्मात्-पार्श्वकुमाराद् ईदृशं वचो निर्गतं तत् चन्द्रादर्चिषोऽग्नेः पतनसदृशम् । ११. **निःकृपः** सं० । १२. **किञ्चि०** सं० । १३. **स्वयं तु सर्वनिःस्पृहः** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सह यास्याम्य**श्वसेन**दिदृक्षाच्छद्मना त्वहम् । उपरोत्स्येऽ**श्वसेनं** च[1] तत्समीहितसिद्धये ॥१९१॥
एवं चिन्तयता तेन कारयित्वाऽथ सौहृदम् । **श्रीपार्श्वनाथो** व्यसृजत् सत्कृत्य **यवनं** नृपम् ॥१९२॥
विसृज्यमानस्त्ववदत् **पार्श्वनाथं प्रसेनजित्** । अहमेष्याम्य**श्वसेन**पादान्नन्तुमनाः प्रभो ! ॥१९३॥
एवमस्त्वित्युक्तवता **श्रीपार्श्वेन** सहैव सः । **प्रभावती**मुपादाय ययौ **वाराणसीं** पुरीम् ॥१९४॥
तत्राऽ**श्वसेनं** शरणागतत्राणेन रञ्जयन् । उपेत्याऽऽनन्दयामास **पार्श्वनाथः** स्वदर्शनात् ॥१९५॥
स्वमन्दिरं गते **पार्श्वे चाऽश्वसेनं प्रसेनजित्** । उपतस्थे **प्रभावत्या** सहितः पुरतो[2]ऽनमत् ॥१९६॥
अभ्युत्थायाऽ**श्वसेन**स्तं लुठन्तं पादयोः पुरः । उद्धृत्य दोर्भ्यामालिङ्ग्य ससम्भ्रममदोऽवदत् ॥१९७॥
कच्चित्तवाऽजनि त्राणं? कच्चित्ते कुशलं नृप ! । आयासीर्यत्स्वयमिह शङ्के कि[3]मपि कारणम् ॥ १९८॥
**प्रसेनजि**दुवाचैवं त्राणं च कुशलं च मे । सदैव शासिता यस्य प्रतापतपनो भवान् ॥१९९॥
[4]दुष्प्रापार्थप्रार्थकता किं त्वे[5]को बाधतेऽद्य माम् । साऽपि च त्वत्प्रसादेन राजकुञ्जर ! सेत्स्यति ॥२००॥
कन्या **प्रभावती** मेऽसौ राजन् ! मदुपरोधतः । **पार्श्वनाथ**कुमारार्थे गृह्यतां माऽन्यथा कृथाः ॥२०१॥
**अश्वसेनो**ऽप्युवाचैवं कुमारः **पार्श्व** एष नः[6] । सदा विरक्तः संसारान्न जाने किं करिष्यति ? ॥२०२॥
असौ मनोरथोऽस्माकमप्यस्त्येव सदा हृदि । कदोचितवधूद्वाहोत्सवः सूनोर्भवेदिति ॥२०३॥
तवोपरोधादधुना **पार्श्वनाथं** बलादपि । उद्वाहं कारयिष्यामोऽनिच्छन्तमपि बाल्यतः ॥२०४॥
इत्युक्त्वा सह तेनैव **पार्श्व**पार्श्वं ययौ नृपः । इमां **प्रसेनजि**त्पुत्रीमुद्वहेति जगाद च ॥२०५॥
**श्रीपार्श्वो**ऽप्यब्रवीत्तात ! कलत्रादिपरिग्रहः । अपि प्रक्षीणकल्पस्य जीवा[7]तुर्भवशाखिनः ॥२०६॥
भवारम्भाय तत्कन्यां कथं तातोद्वहाम्यहम् । तरिष्याम्येष संसारं मूलतो नि[8]ष्परिग्रहः ॥२०७॥
**अश्वसेनो**ऽप्यभाषिष्ट पूरयाऽस्मन्मनोरथम् । **प्रसेनजि**न्नृपसुतापाणिग्रहणलक्षणम् ॥२०८॥
संसारोऽपि त्वया तीर्ण एव यस्येदृशं मनः । कृतोद्वाहोऽपि तज्जात ! समये स्वार्थमाचरेः ॥२०९॥
इत्थं पितृवचः **पार्श्वो**ऽप्युल्लङ्घितुमनीश्वरः । भोग्यं कर्म क्षपयितुमुदुवाह **प्रभावतीम्** ॥२१०॥
जनोपरोधादुद्यानक्रीडाशैलादिषु प्रभुः । रममाणस्तया सार्धं वासरानत्यवाहयत् ॥२११॥
अधिप्रासादमन्येद्युः **पार्श्वो** वातायनस्थितः । पुरीं **वाराणसीं** द्रष्टुं प्रवर्तत कुतूहलात् ॥२१२॥
बहिश्च निर्यतः[10] पुष्पोपहारपट[11]लीभृतः । ससम्भ्रमान्नागरांश्च नागरीश्चैक्षत प्रभुः ॥२१३॥
**पार्श्वो**ऽपृच्छच्च पार्श्वस्थान् कोऽयमद्य महोत्सवः ? । दृश्यते सत्वरो गच्छन् यल्लोको भूरिभूषणः ? ॥२१४॥
अथाऽऽचचक्षे कोऽप्येवं नाऽद्य कोऽपि महोत्सवः । किं त्वन्यत् कारणं देव ! वर्तते समुपस्थितम् ॥२१५॥
**कठो** नाम तपस्व्यद्य पुर्या बहिरि[12]हाऽऽगतः । पञ्चाग्न्यादितपास्तं चाऽर्चितुं पौरा व्रजन्त्यमी ॥२१६॥
तद् द्रष्टुं कौतुकं **पार्श्वनाथो**ऽपि सपरिच्छदः । ययौ **कठ**मपश्यच्च पञ्चाग्नितपसि स्थितम् ॥२१७॥
ज्ञानत्रयधरोऽपश्यन्महान्तमुरगं प्रभुः । दह्यमानं कुण्डमध्ये क्षिप्तकाष्ठान्तरस्थितम् ॥२१८॥
तद् दृष्ट्वा[13] करुणाम्भोधिर्भगवानभ्यधादिदम् । अहो ! अज्ञानमज्ञानं न दया यत्तपस्यपि ॥२१९॥
कीदृक् सरिद्विना तोयं ? कीदृगिन्दुं विना निशा ? । कीदृक् प्रावृड् विना मेघं? कीदृग्धर्मो दयां विना? ॥२२०॥
कायक्लेशसहस्यापि पशोरिव शरीरिणः । निर्दयस्य कथं धर्मो धर्मतत्त्वापरिस्पृशः ॥२२१॥
तदाकर्ण्य **कठो**ऽवोचद्राजपुत्रा हि जानते । हस्त्यश्वाद्येव धर्मं तु जानीमो मुनयो वयम् ॥२२२॥
ततः स्वाम्यादिदेश स्वान् कुण्डादाकृष्यतामिदम् । काष्ठं यत्नात् स्फोट्यतां च यथाऽस्य प्रत्ययो भवेत् ॥२२३॥

१. **हि** मु० । २. **०तोऽगमत्** मु० हे० । ३. **किमिह** मु० । ४. दुःप्रापा० मु० विना । ५. **त्वेषा** सं० । ६. **मे** सं० । ७. संसारवृक्षस्य जीवनौषधम् । ८. **निःपरि०** मु० विना । ९. तत् पुत्र ! इत्यर्थः । १०. निर्गच्छतः । ११. **०पटला०** मु० । १२. **बहिरुपागतः** सं० । १३. तं **दृष्ट्वा** ता० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते समाचकृषुः काष्ठं यत्नाच्च तददारयन् । [१]सुमहानुरगस्तस्मात् सहसा निर्जगाम च ॥२२४॥
तत्रेषद्दह्यमानस्य महाहेर्भगवान्नृभिः । अदापयन्नमस्कारान् प्रत्याख्यानं च तत्क्षणम् ॥२२५॥
नागः समाहितः सोऽपि तत्प्रतीयेष शुद्धधीः । वीक्ष्यमाणो भगवता कृपामधुरया दृशा ॥२२६॥
नमस्कारप्रभावेण स्वामिनो दर्शनेन च । विपद्य **धरणो** नाम नागराजो बभूव सः ॥२२७॥
अहो ! ज्ञानं कुमारस्य विवेकः कोऽप्यसावहो ! । जनैरिति स्तूयमानः स्वामी स्वसदनं ययौ ॥२२८॥
तद् दृष्ट्वाऽऽकर्ण्य च **कठो** विशेषेणाऽकरोत्तपः । बालं कष्टतरं [२]वाऽपि ज्ञानं मिथ्यादृशां कुतः ? ॥२२९॥
मृत्वा **मेघकुमारेषु कठो** [३]भवनवासिषु । असुरो **मेघमाली**ति नामतः समजायत ॥२३०॥
¶इतश्च **पार्श्वो** भगवान् कर्म भोगफलं निजम् । उपभुक्तं परिज्ञाय प्रव्रज्यायां दधौ मनः ॥२३१॥
भावज्ञा इव तत्कालमेत्य लोकान्तिकामराः । **पार्श्वं** विज्ञपयामासुर्नाथ ! तीर्थं प्रवर्तय ॥२३२॥
ततश्च वार्षिकं दानं स्वामी दातुं प्रचक्रमे ! धनैर्**वैश्रवणा**दिष्टजृम्भकामरपूरितैः ॥२३३॥
**शक्रा**द्यैर्वासवैर**श्वसेना**द्यैश्च नरेश्वरैः । दीक्षाभिषेको विदधे **पार्श्व**स्य परमेशितुः ॥२३४॥
**विशालां** नाम शिबिकामुद्वाह्यां देव-मानवैः । आरुह्य **श्रीपार्श्वनाथो**ऽगादा**श्रमपदे** वने ॥२३५॥
सान्द्रैर्मरु[४]वकस्तोमैर्मे[५]चकीभूतभूतलम् । प्र[६]शस्तिमिव कान्दर्पी दधानं कुन्दकुड्मलैः ॥२३६॥
मुचुकुन्दनि[७]कुरम्बचुम्बिरोलम्बडम्बरम् । अम्बरोद्भ्रान्तलवलीपरागसुरभीकृतम् ॥२३७॥
इक्षुक्षेत्रतटासीनगायदुद्यानपालिकम् । प्रविवेश तदुद्यानं भगवान**श्वसेन**सूः ॥२३८॥ ॥त्रिभिर्विशेषकम्॥
तत्रोत्तीर्य शिबिकाया भूषणादिकमत्यजत् । त्रिंशद्वर्षः प्रभुः **पार्श्वो** वासवार्पितदूष्यभृत् ॥२३९॥
पूर्वा[८]ह्णे पौषकृष्णैकादश्यां **राधा**गते विधौ । स्वाम्यष्टमेन प्राव्राजीत् समं राज्ञां त्रिभिः शतैः ॥२४०॥
**मनःपर्यय**संज्ञं च तदा ज्ञानमभूद्विभोः । दीक्षासहभवं ह्येतत् सर्वेषां श्रीमदर्हताम् ॥२४१॥
¶द्वितीयेऽह्नि प्रभुः **कोपकटा**[९]**क्षे** सन्निवेशने । अपारयत् पायसेन **धन्य**स्य गृहिणो गृहे ॥२४२॥
विदधुर्विबुधास्तत्र वसुधारादिपञ्चकम् । **धन्य**स्तु विदधे पादपीठं स्वामिपदावनौ ॥२४३॥
वायुरिवाऽप्रतिबद्धो ग्रामाकरपुरादिषु । युगमात्रदत्तदृष्टिर्ब्रह्मस्थो व्यहरत् प्रभुः ॥२४४॥
विहरन्नेकदा स्वामी नगरासन्नवर्तिनम् । तापसाश्रममागाच्च ययौ चाऽस्तं दिवाकरः ॥२४५॥
तत्रोपकूपं न्यग्रोधतरुमूले जगद्गुरुः । तत्पाद इव नि[१०]ष्कम्पस्तस्थौ प्रतिमया निशि ॥२४६॥
¶इतश्च मेघकुमारो **मेघमाली** महासुरः । अज्ञासीदवधेः पूर्वभवव्यतिकरं निजम् ॥२४७॥
**पार्श्वे** प्रतिभवं वैरं तच्च संस्मृत्य सोऽसुरः । अन्तः क्रोधेन जज्वाल वाडवेनेव सागरः ॥२४८॥
**पार्श्वनाथ**मुपद्रोतुं भेत्तुमद्रिमिव द्विपः । समाययावमर्षान्धो **मेघमा**[११]**ल्य**सुराधमः ॥२४९॥
दंष्ट्राक्रकचभीमास्यान् [१२]शूर्पाकारनखाङ्कुरान् । शार्दूलान् पिङ्गलदृशो विचक्रे तत्र सोऽमरः ॥२५०॥
पुच्छैरा[१३]स्फोटयामासुर्भूपीठं ते मुहुर्मुहुः । चक्रुर्बूत्कारमुच्चैश्च मृत्योर्मन्त्राक्षरोपमम् ॥२५१॥
तैर्न चुक्षोभ भगवान् ध्यानस्तिमितलोचनः । त एव प्रययुः क्वापि तद्ध्यानाग्निभयादिव ॥२५२॥
विकृतास्तेन चाऽपेतुर्गर्जन्तो मदवर्षिणः । उत्कराः करिणस्तुङ्गाः पर्वता इव जङ्गमाः ॥२५३॥
नाऽक्षुभ्यत्तैरपि स्वामी भीषणेभ्योऽपि भीषणैः । लज्जिता इव तेऽप्याशु प्रणश्य क्वचिदप्ययुः ॥२५४॥
हिक्कानादापूर्णदिक्का भल्लूकाः शू[१४]कवर्जिताः । अनेकशश्चित्रकाश्च क्रूरा य[१५]मचमूनिभाः ॥२५५॥
शिला अपि स्फोटयन्तः कण्टकाग्रेण वृश्चिकाः । तरूनपि निर्दहन्तो दृष्ट्या दृष्टिविषा अपि ॥२५६॥

१. **स महा०** सं० । २. **चापि** सं० ता० । ३. **भुवन०** मु० । ४. मरुवको वृक्षविशेषः भाषायां 'मरवो' । ५. श्यामीभूतभूतलम् । ६. **प्रशक्ति०** सं० । ७. **०निकुरुम्ब०** सं० ता० । ८. **पूर्वाह्ने** सं० । ९. **कोपकटाख्ये** मु० हे० । १०. **निःकम्प०** ता० । ११. **०माली सुरा०** सं० विना । १२. **शृण्याकार०** ता० विना । १३. **०राच्छोट०** मु० । १४. दयारहिताः । १५. **यमवसू०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*विचक्रिरे तत्र तेनोपद्रोतुमनसा प्रभुम्। नाऽचालीत्तैः प्रभुर्ध्यानान्मर्यादाया इवाऽर्णवः ॥२५७॥ त्रिभिर्विशेषकम् ॥*
वेतालान् कर्तिकाहस्तान्[1] सविद्युत इवाऽम्बुदान्। उच्चैः किलकिलारावानुद्दंष्ट्रान् व्यकरोत्ततः ॥२५८॥
प्रलम्बजिह्वाशिश्नास्ते लम्बिसर्पा इव द्रुमाः। दीर्घजङ्घांह्रयस्तालद्रुमारूढा इवोच्चकैः ॥२५९॥
ज्वाला मुखेन मुञ्चन्तो जठराग्नैरिवा[2]ऽऽयताः[3]। ते प्रभुं परितोऽधावन् सारमेया इव द्विपम् ॥२६०॥ युग्मम् ॥
प्रभुस्तैरपि नाऽक्षुभ्यल्लीनो ध्यानसुधाह्रदे। प्रणश्य तेऽप्ययुः क्वापि घूका इव दिवामुखे ॥२६१॥
विशेषेण ततः क्रुद्धो **मेघमाल्यसुरः** स्वयम्। मेघान् विचक्रे नभसि कालरात्रिसहोदरान् ॥२६२॥
गगने व्यद्युतद्विद्युत्[4]कालजिह्वेव भीषणा। ब्रह्माण्डं स्फोटयदिव स्तनितं व्यानशे दिशः ॥२६३॥
अन्धकारोऽभवद्धोरश्चक्षुर्व्यापारहारकः। द्यावापृथिव्यावेकत्र स्यूते इव बभूवतुः ॥२६४॥
एष प्राग्वैरिणममुं संहरामीति दुर्धिया। प्रारेभे वर्षितुं **मेघमाली** कल्पान्तमेघवत् ॥२६५॥
मुशलैरिव[5] धाराभिर्नाराचैरिव चा[6]ऽथवा। मेदिनीं ताडयामास स[7] खनित्रैः खनन्निव ॥२६६॥
उत्पेतुश्च निपेतुश्च तरुभ्यः सुप्तपक्षिणः। इतस्ततः प्रचेलुश्च वराह-महिषादयः ॥२६७॥
सत्त्वान्यकृष्यन्त पयःप्रवाहैर्वेगभीषणैः। मूलतोऽप्युदमूल्यन्त महान्तोऽपि महीरुहाः ॥२६८॥
क्षणादागुल्फमाजानु क्षणादाकटि च क्षणात्। क्षणादाकण्ठमम्भोऽभूच्छ्री**पार्श्व**स्वामिनस्तदा ॥२६९॥
सुदूरं[8] प्रसृते तस्मिन् शुशुभेऽम्भस्यपि प्रभुः। लक्ष्मीसद्म महापद्ममिव **पद्ममहाह्रदे** ॥२७०॥
स्वामी रत्नशिलास्तम्भ इवाऽम्भस्यपि निश्चलः। नासाग्रन्यस्तदृग्ध्यानान्मनागपि चचाल न ॥२७१॥
आनासाग्रं[9] यावदम्भः **श्रीपार्श्व**स्वामिनोऽभवत्। **धरण**स्योरगेन्द्रस्याऽऽसनं तावदकम्पत ॥२७२॥
सोऽज्ञासीदवधेश्चैवमरे बालतपाः **कठः**। स वैरिणं मन्यमान उपद्रवति मे प्रभुम् ॥२७३॥
ततः समं महिषीभिर्नागराजो जगद्गुरुम्। मानसेन स्पर्धमान इव वेगात् समाययौ ॥२७४॥
**धरणः** स्वामिनं नत्वाऽधस्तात्तत्पादयोर्न्यधात्। उन्नालमम्बुजं मुं[10]ण्डकेवल्यासनसन्निभम् ॥२७५॥
पृष्ठं[11] पार्श्वौ च पिदधे स स्वभोगेन भोगिराट्। फणैश्च सप्तभिश्छत्रं चकार शिरसि प्रभोः ॥२७६॥
तदम्भोमाननालेऽब्जे तस्मिन् सुखमवस्थितः। समाधिलीनो भगवान् राजहंस इवाऽऽबभौ ॥२७७॥
**धरणेन्द्र**महिष्योऽपि **श्रीपार्श्व**स्वामिनः पुरः। विदधुर्गीतनृत्तादि[12] भक्तिभावितचेतसः ॥२७८॥
वेणु-वीणाध्वनिस्तारो मृदङ्गध्वनिरुद्धतः। जजृम्भे[13] तत्र विविधतालपातानुहारकः ॥२७९॥
विचित्रचारुचारीकं हस्ताद्यभिनयोज्ज्वलम्। चित्राङ्गहारकरणं नृत्तं[14] तत्र व्यपञ्च्यत[15] ॥२८०॥
ध्यानलीनः प्रभुश्चाऽऽस्थान्निर्विशेषो द्वयोरपि। नागाधिराजे **धरणे मेघमालिनि** चाऽसुरे ॥२८१॥
एवं सत्यप्यमर्षेण वर्षन्तं **मेघमालिनम्**। निरीक्ष्य कुपितो नागराजः साक्षेपमब्रवीत् ॥२८२॥
अरे! किमिदमारब्धमात्मानर्थाय दुर्मते!। कृपालोरपि भृत्योऽहं सहिष्येऽतः परं न हि ॥२८३॥
काष्ठान्तर्दह्यमानाहिं प्रदर्श्य प्रभुणाऽमुना। तदा पापान्निषिद्धश्चेत् कोऽपराधः कृतस्तव? ॥२८४॥
जज्ञे सदुपदेशोऽपि तव वैराय रे! तदा। लवणायोषरा[16]वन्यां वारि वारिमुचामिव ॥२८५॥
निष्का[17]रणारिर्नाथेऽत्र त्वं निष्का[18]रणबान्धवे। रे! यदेवमपाकार्षीस्तदद्य[19] न भविष्यसि ॥२८६॥
तच्छ्रुत्वा वचनं **मेघमाल्य**धो निदधे दृशम्। तथास्थितमपश्यच्च **पार्श्वं** नागेन्द्रसेवितम् ॥२८७॥
स भीतोऽचिन्तयच्चैवं शक्तिस्तावन्ममेयती। सा वृथाऽस्मिंश्चक्रिणीव म्लेच्छ[20]गृह्यपयोमुचाम् ॥२८८॥

---

१. **कर्त्रिका०** मु०। २. **जठराग्नि०** मु०। ३. दीर्घाः। ४. **विद्युद्** मु०। ५. **मुसलै०** मु०। ६. **वाथवा** मु०। ७. **खनित्रैः खनयन्निव** सं० ता० विना। ८. **सुदूरप्र०** सं० ता०। ९. **आनाशाग्रं** सं०। १०. **तुङ्गं के०** मु०। ११. **पृष्ठपार्श्वोरः पि०** मु०। **पृष्ठं पार्श्वे च** हे०। १२. **०नृत्यादि** मु०। १३. **विजृम्भे** सं०। १४. **नृत्यं** मु०। १५. व्यस्तीर्यत। १६. क्षारभूमौ। १७-१८. **निःका०** मु० विना। १९. **०स्तदत्र** ता०। २०. म्लेच्छराजाधीनमेघानां चक्रवर्तिसैन्योपरि यथा वृष्टिर्वृथा तथा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अप्यद्रीन्मुष्टिना पेष्टुं क्षमोऽसौ करुणानिधिः । न भस्मसान्मां कुरुते **धरणेन्द्रा**त्तथापि भीः ॥२८९॥
त्रैलोक्येशेऽत्राऽपकारात् त्रैलोक्येऽपि न मे स्थितिः । शरणाय क्व यास्यामि ? शरणं यद्यसौ प्रभुः ॥२९०॥
एवं विचिन्त्य संहृत्य स सद्योऽम्भोदमण्डलम् । भीतः स्वामिनमेवाऽगान्नत्वा चैवमवोचत ॥२९१॥
अपकारिण्यपि क्रोधः प्रभो ! यद्यपि नास्ति ते । स्वकर्मणा[1] दूषितोऽहं भीतो नाथ ! तथापि हि ॥२९२॥
एवं कृत्वाऽपि [2]दुष्कर्म याचे त्वां विगतत्रपः । रक्ष रक्ष जगन्नाथ ! दीनं मां पा[3]तशङ्कितम् ॥२९३॥
इत्युक्त्वा क्षमयित्वा च जगन्नाथं प्रणम्य च । सानुतापो ययौ **मेघमालि**देवः स्वमास्पदम् ॥२९४॥
विज्ञाय नाथं निरुपसर्गं स्तुत्वा प्रणम्य च । नागराजो ययौ स्वौको विभाता च विभावरी ॥२९५॥
¶ततः स्थानाज्जगन्नाथो गत्वा **वा[4]राणसीं** पुरीम् । तदाऽऽ**श्रमपदो**द्यानेऽस्थात्तले **धातकी**तरोः ॥२९६॥
तदा च स्वामिनो दीक्षादिनादतिगतेषु तु । दिनेषु चतुरशीतौ घातिकर्माणि तुत्रुटुः ॥२९७॥
चैत्रकृष्णचतुर्थ्यां च **विशाखा**स्थे निशाकरे । [5]पूर्वाह्णे केवलज्ञानं **श्रीपार्श्व**स्योदपद्यत ॥२९८॥
विज्ञायाऽऽसनकम्पेन **शक्र**प्रभृतयोऽमराः । चक्रुः समवसरणं **श्रीपार्श्व**स्वामिनः क्षणात् ॥२९९॥
देवैर्जयजयारावकारिभिः परिवारितः । पूर्वद्वारेण समवसरणं प्राविशत् प्रभुः ॥३००॥
सप्तविंशतिधन्वोच्चं तत्र चैत्यमहातरुम् । स्वामी प्रदक्षिणीचक्रे मेरुशैलमिवाऽर्यमा ॥३०१॥
नमस्तीर्थायेति वदन् रत्नसिंहासनोत्तमे । पूर्वाशाभिमुखः श्रीमान् **पार्श्वप्रभु**रुपाविशत् ॥३०२॥
स्वामिनः प्रतिरूपाणि तिसृष्वन्यासु दिक्ष्वपि । सद्योऽपि तत्प्रभावेण विचक्रुर्व्यन्तरामराः ॥३०३॥
देवा देव्यो नरा नार्यः साधवः साध्व्य एव च । स्वामिपादान्नमस्कृत्य यथास्थित्यवतस्थिरे ॥३०४॥
¶तदा च वनपालस्तत्प्रेक्ष्य नाथस्य वैभवम् । गत्वाऽ**श्वसेन**भूपाय नत्वा चैवमवोचत ॥३०५॥
दिष्ट्याऽद्य वर्धसे स्वामिन् ! **श्रीपार्श्व**स्वामिनोऽधुना । उत्पेदे केवलज्ञानं जगदज्ञानघातकम् ॥३०६॥
महातिशयसम्पन्नः **शक्रा**दिपरिवारितः । दिव्ये समवसरणे निषण्णोऽस्ति जगत्पतिः ॥३०७॥
अथ तस्योचितं पारितोषिकं नृपतिर्ददौ । **वा[1]मा**देव्यै तदाख्यच्च तद्दिदृक्षाकृतत्वरः ॥३०८॥
**वा[2]मादेव्या** सहैवाऽथाऽ**श्वसेनः** सपरिच्छदः । ययौ समवसरणं तारणं भववारिधेः ॥३०९॥
प्रभुं प्रदक्षिणीकृत्य नमस्कृत्य च भूपतिः । अनु**शक्रं** निषसाद प्रमोदापूर्णमानसः ॥३१०॥
भूयोऽपि स्वामिनं नत्वा मूर्धन्यायोजिताञ्जलिः । **शक्रो**ऽ**श्वसेन**राजश्च स्तोतुमेवं प्रचक्रमे ॥३११॥
¶सर्वत्रापि भवद्-भूत-भाविभावावभासकृत् । भवतां केवलज्ञानमिदं जयति निर्मलम् ॥३१२॥
अस्मिन्नपारे संसारपारावारे शरीरिणाम् । यानपात्रं त्वमेवाऽसि निर्यामो[3]ऽपि त्वमेव हि ॥३१३॥
सर्ववासरराजोऽयं वासरस्त्रिजगत्पते ! । त्व[4]त्पाददर्शनमहोत्सवो यत्राऽजनिष्ट नः ॥३१४॥
विवेकदृष्टिलुण्टाकमज्ञानतिमिरं नृणाम् । त्वद्देशनौषधिरसं विना न हि निवर्तते ॥३१५॥
नद्यामिव नवं **तीर्थं** तव तीर्थं भवेऽधुना । उत्तारणाय भवति प्राणिनामहहोत्सवः ॥३१६॥
सिद्धानन्तचतुष्काय सर्वातिशयशालिने । औदासीन्यनिषण्णायैकप्रसन्नाय ते नमः ॥३१७॥
अत्यन्तोपद्रवकरे प्रतिजन्म दुरात्मनि । **मेघमालि**नि करुणा करुणा कुत्र ते न हि ? ॥३१८॥
तिष्ठतो यत्र कुत्रापि गच्छतो यत्र कुत्रचित् । त्वत्पादपद्म[10]स्मरणं माऽपयातु हृदो मम ॥३१९॥
इति स्तुत्वा विरतयोः **सौधर्मेन्द्रा-श्वसेन**योः । **श्रीपार्श्वनाथो** भगवान् विदधे धर्मदे[11]शनाम् ॥३२०॥
¶अस्मिन् भवमहारण्ये जरा-रुग्-मृत्युगोचरे । धर्मं विनाऽन्यो न त्राता तस्मात् सेव्यः स एव हि ॥३२१॥
स द्विधा सर्वविरति-देशविरतिभेदतः । संयमादिर्दशविधोऽनगाराणां स आदिमः ॥३२२॥

१. **स्वकर्मणोद्धर्षितो०** मु० । २. **दुःकर्म** मु० विना । ३. पतनशङ्कितम् । ४. **वाणारसीं** मु० । **वाराणसीपुरीम्** सं० । ५. **पूर्वाह्णे** °० हे० ता० । १.२. **वामदेव्यै** मु० । ३. नाविकः, निर्यामकः । ४. **तत्पाद०** मु० । ५. ०शरण्यं मु० । ६. **देशनामिति** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयोऽगारिणां पञ्चाऽणुव्रतानि गुणास्त्रयः । शिक्षाव्रतानि चत्वारीति द्वादशविधो मतः ॥३२३॥
व्रतानि सातिचाराणि सुकृताय भवन्ति न । अतिचारास्ततो हेयाः पञ्च पञ्च व्रते व्रते ॥३२४॥
क्रोधाद्[1]बन्धश्छविच्छेदोऽधिकभाराधिरोपणम् । प्रहारोऽन्नादिरोधश्चाऽहिंसायां परिकीर्तिताः ॥३२५॥
मिथ्योपदेशः सहसाभ्याख्यानं गुह्यभाषणम् । विश्वस्तमन्त्रभेदश्च कूटलेखश्च सूनृते ॥३२६॥
स्तेनानुज्ञा तदानीतादानं द्विड्राज्यलङ्घनम् । [2]प्रतिरूपक्रिया मानान्[3]यत्वं चाऽस्तेयसंश्रिताः ॥३२७॥
इत्व[4]रात्तागमोऽना[5]त्तागतिरन्यविवाहनम् । मदनात्याग्रहोऽनङ्गक्रीडा च ब्रह्मणि स्मृताः ॥३२८॥
धनधान्यस्य कुप्य[6]स्य गवादेः क्षेत्र-वा[7]स्तुनः । हिरण्य-हेम्नश्च संख्यातिक्रमोऽत्राऽपरिग्रहे ॥३२९॥
बन्धनाद्भावतो गर्भाद्योजनाद्दानतस्तथा । प्रतिपन्नव्रतस्यैष पञ्चधाऽपि न युज्यते ॥३३०॥
[8]स्मृत्यन्तर्धानमूर्ध्वाधस्तिर्यग्भागव्यतिक्रमः । क्षेत्रवृद्धिश्च पञ्चेति स्मृता दिग्विरतिव्रते ॥३३१॥
सचित्तस्तेन[9] सम्बद्धः [10]सन्मिश्रोऽभि[11]षवस्तथा । [12]दुष्पक्वाहार इत्येते भोगोपभोगमानगाः ॥३३२॥
अमी भोजनतस्त्याज्याः कर्मतः खरकर्म तु । तस्मि[13]न् पञ्चदश मलान् कर्मादानानि संत्यजेत् ॥३३३॥
अङ्गार-वन-शकट-भाटक-स्फोटजीविकाः । दन्तलाक्षा-रस-केश-विषवाणिज्यकानि च ॥३३४॥
यन्त्रपीडा निर्लाञ्छनमसतीपोषणं तथा । दवदानं सरःशोष इति पञ्चदश त्यजेत् ॥३३५॥
अङ्गारभ्राष्ट्रकरणं कुम्भा-ऽयः-स्वर्णकारिता । [14]ठठारत्वेष्टि[15]कापाकाविति ह्यङ्गारजीविका ॥३३६॥
छिन्नाच्छिन्नवनपत्र-प्रसून-फलविक्रयः । कणानां दलनोत्पेषा[16]द्वृत्तिश्च वनजीविका ॥३३७॥
शकटानां तदङ्गानां घट्टनं खेटनं तथा । विक्रयश्चेति शकटजीविका परिकीर्तिता ॥३३८॥
शकटोक्ष-लु[17]लायोष्ट्र-खराऽश्वतर-वाजिनाम् । भारस्य वाहनाद्वृत्तिर्भवेद्भाटकजीविका ॥३३९॥
सरःकूपादिख[18]नन-शिलाकुट्टनकर्मभिः । पृथिव्यारम्भसम्भूतैर्जीवनं स्फोटजीविका ॥३४०॥
दन्त-केश-नखा-स्थि-त्वग्-रोम्णो ग्रहणमाकरे । त्रसाङ्गस्य वणिज्यार्थं दन्तवाणिज्यमुच्यते ॥३४१॥
लाक्षा-मनःशिला-नीली-धातकी-टङ्कणादिनः । विक्रयः पापसदनं लाक्षावाणिज्यमुच्यते ॥३४२॥
नवनीत-वसा-क्षौद्र-मद्यप्रभृतिविक्रयः । द्विपाच्चतुष्पाद्विक्रयो वाणिज्यं रस-केशयोः ॥३४३॥
विषा-ऽस्त्र-हल-यन्त्रा-ऽयो-हरितालादिवस्तुनः । विक्रयो जीवितघ्नस्य विषवाणिज्यमुच्यते ॥३४४॥
तिलेक्षुसर्षपैरण्डजलयन्त्रादिपीडनम् । दल[19]तैलस्य च कृतिर्यन्त्रपीडा प्रकीर्तिता ॥३४५॥
नासावेधोऽङ्कनं मुष्कच्छेदनं पृष्ठगालनम् । कर्णकम्बलविच्छेदो निर्लाञ्छनमुदीरितम् ॥३४६॥
शारिका-शुक-मार्जार-श्व-कुर्कुट-कलापिनाम् । पोषो दास्याश्च वित्तार्थमसतीपोषणं विदुः ॥३४७॥
व्यसनात् पुण्यबुद्ध्या वा दवदानं भवेद् द्विधा । सरःशोषः सरः-सिन्धु-ह्रदादेरम्बुसंप्लवः ॥३४८॥
संयुक्ताधिकरणत्वमुप[20]भोगातिरिक्तता । मौखर्यमथ कौत्कुच्यं कन्दर्पोऽनर्थदण्डगाः ॥३४९॥
कायवाङ्मनसां दुष्टप्रणिधानमनादरः । स्मृत्यनुपस्थापनं च स्मृताः सामायिकव्रते ॥३५०॥
प्रेष्यप्रयोगाऽऽनयने पुद्गलक्षेपणं तथा । शब्द-रूपानुपातौ च व्रते देशावकाशिके ॥३५१॥
उत्सर्गादानसंस्तारा अनवेक्ष्याऽप्रमृज्य च । अनादरः स्मृत्यनुपस्थापनं चेति पोषधे[21] ॥३५२॥
सचित्ते क्षेपणं तेन[22] पिधानं काललङ्घनम् । मत्सरोऽन्यापदेशश्च तुर्यशिक्षाव्रते स्मृताः ॥३५३॥

१. **०द्बन्धच्छवि०** मु० । २. सदृशद्रव्यमेलनम् । ३. न्यूनाधिकमानकरणम् । ४. वेश्यागमनम् । ५. अपरिगृहीतस्त्रीगमनम् । ६. सुवर्णरूप्यातिरिक्तधातवः । ७. क्षेत्रं च वास्तु (गृहादि) च । ८. स्मृतेरन्तर्धानं विस्मृतिः । ९. सचित्तेनेत्यर्थः । १०. **सम्मिश्रो०** सं० । ११. अपक्वाहारः । १२. **दुःपक्वा०** सं० । १३. **अस्मिन्** हे० । १४. ठठारत्वं सुधापाककारित्वम् । १५. **०ष्टिका०** सं० । १६. **०त्पेषा वृत्ति०** सं० ता० । १७. **०लुलापो०** मु० । १८. **०खननं** मु० । १९. दलानां-पर्णानां तैलम् । २०. **०भोगोऽति०** मु० । २१. **पौषधे** मु० । २२. सचित्तपात्रेण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्रतान्येभिरतिचारै रहितान्यनुपालयन् । श्रावकोऽपि विशुद्धात्मा मुच्यते भवबन्धनात्[1] ॥३५४॥
¶तां भर्तुर्देशनां श्रुत्वा भूयांसोऽपि प्रवव्रजुः । श्रावक्यभूवन् भूयांसो नाऽर्हद्दीर्जातु निष्फला[2] ॥३५५॥
प्रतिबुद्धोऽश्वसेनोऽपि **हस्तिसेनाय** सूनवे । तत्रैव दत्त्वा स्वं राज्यं प्रवव्राज महामनाः ॥३५६॥
**वामादेवी-प्रभावत्याव**पि देशनया प्रभोः । भवोद्विग्ने जगृहतुः प्रव्रज्यां मोक्षसाधनीम् ॥३५७॥
बभूवु**रार्यदत्ताद्याः** प्रभोर्गणधरा दश । स्वाम्याख्यत् त्रिपदीं तेषां स्थित्युत्पादव्ययात्मिकाम् ॥३५
तया त्रिपद्या ते सर्वे द्वादशाङ्गीमसूत्रयन् । प्रज्ञावत्सूपदेशो हि स्याज्जले तैलबिन्दुवत् ॥३५९॥
पूर्णप्रथमपौरुष्यां देशनां व्यसृजत् प्रभुः । द्वितीयपौरुषी**मार्यदत्तो** व्यधित देशनाम् ॥३६०॥
¶अथ **शक्र**प्रभृतयः प्रणम्य परमेश्वरम् । स्थानं निजनिजं जग्मुः स्मरन्तः स्वामिदेशनाम् ॥३६१॥
तत्तीर्थभूरभूत् **पार्श्वयक्षः** कूर्मरथः शितिः[3] । गजाननः फणिफणाच्छत्रशोभी चतुर्भुजः ॥३६२॥
नकुलाही वामदोर्भ्यां बीजपूरोरगौ पुनः । दक्षिणाभ्यां दधद्दोर्भ्यां भर्तुः शासनदेवता ॥३६३॥
तथा **पद्मावती** देवी [4]कुक्कुटोरगवाहना । स्वर्णवर्णा पद्म-पाशभृद्दक्षिणकरद्वया ॥३६४॥
फलाङ्कुशधराभ्यां च वामदोर्भ्यां विराजिता । अभूद् द्वितीया **श्रीपार्श्व**[5]भर्तुः शासनदेवता ॥३६५॥

ताभ्यां प्रभुः शासनदेवताभ्यां निरन्तराधिष्ठितसन्निधानः ।
इमां व्यहार्षीदवनीं विनीतैर्देवैरथाऽन्यैरपि सेव्यमानः ॥३६६॥

॥ इत्याचार्यश्री**हेमचन्द्र**विरचिते **त्रिषष्टिशलाकापुरुष**चरिते
महाकाव्ये नवमे[6] पर्वणि **श्रीपार्श्वनाथ**कौमार-दीक्षाकेवलोत्पत्तिवर्णनो
नाम तृतीयः सर्गः [7]समाप्तः ॥

१. ०पञ्जरात् सं० । २. **निःफला** सं० । ३. श्वेतः । ४. **कुर्कुटो०** मु० । ५. **०प्रभोः** मु० । ६. **नवम०** सं० ता० । ७. हे० ता० न । हे० प्रतौ '**३७०**' इत्यधिकम् ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

## ॥ अथ चतुर्थः सर्गः ॥

विश्वविश्वानुग्रहाय विहरंस्त्रिजगद्गुरुः । भुवः पुण्ड्रायिते **पुण्ड्रे**[1]विषयेऽगमदन्यदा ॥१॥

इतश्चाऽऽसीत् पूर्वदेशे **ताम्रलिप्त्यां** तदा पुरि । कलावित् **सागरदत्तो** वणिक्पुत्रो युवा सुधीः ॥२॥

जातात् स जातिस्मरणाद्विरक्तः स्त्रीषु सर्वदा । इयेष परिणेतुं न स्त्रियं रूपवतीमपि ॥३॥

स हि जन्मान्तरे विप्रो भार्ययाऽन्यप्रसक्तया । दत्त्वा विषं नष्टसंज्ञस्तत्यजे क्वचिदन्यतः ॥४॥

जीवितो गोकुलिन्या च स परिव्राडजायत । मृत्वा जातिस्मरः श्रेष्ठिपुत्रः स्त्रीविमुखोऽभवत् ॥५॥

लोकधर्मरता साऽपि मृत्वा गोकुलिनी क्रमात् । वणिक्पुत्री रूपवती तस्यामेवाऽभवत् पुरि ॥६॥

दृष्टिरस्य रमेताऽस्यामिति सम्भाव्य बन्धुभिः । वव्रे **सागरदत्तार्थे** सा लब्धा च सगौरवम् ॥७॥

तस्यामपि मनस्तस्य विशश्राम तथा न हि । स हि स्त्रीः प्राग्भवाभ्यासाद् यमदूतीरमन्यत ॥८॥

वणिक्सुता साऽथ दध्यौ कोऽपि जातिस्मरो ह्ययम् । स्त्रिया कयाऽप्युन्मथितः पुंश्चल्या पूर्वजन्मनि ॥९॥

सम्प्राप्तकालं तदिदमित्यालोच्य हृदि स्वयम् । लिखित्वा पत्रके श्लोकं सा प्रैषीत्सोऽप्यवाचयत् ॥१०॥

"पुंसः पायसदग्धस्य न त्यक्तुं दधि युज्यते । किं स्वल्पाम्भःसम्भविनो दुग्धे स्युः पूतराः क्वचित् ?" ॥११॥

सम्यक् **सागरदत्तो**ऽपि भावार्थं विमृशन् हृदि । लिखित्वा प्राहिणोच्छ्लोकं साऽपि चैवमवाचयत् ॥१२॥

"अपात्रे रमते नारी नीचं गच्छति कूलिनी[2] । गिरौ वर्षति पर्जन्यो लक्ष्मीः श्रयति निर्गुणम्" ॥१३॥

विभाव्य साऽपि भावार्थं भूयस्तद्बोधहेतवे । लिखित्वा प्राहिणोच्छ्लोकं सोऽपि चैवमवाचयत् ॥१४॥

"क्व नै[3] स्याद्वाचिको दोषस्तत्त्यागस्तावताऽपि किम् ? । अनुरक्तां रविः सन्ध्यां न हि त्यजति जातुचित्" ॥१५॥

तै[4]यैवं **सागरदत्तो** वाचिकैरनुरञ्जितः । चक्रे विवाहं बुभुजे भोगांश्च मुदितोऽन्वहम् ॥१६॥

¶अथ **सागरदत्तस्य** सपुत्रः श्वशुरोऽन्यदा । वणिज्याहेतवेऽगच्छन्नगरं **पाटलापथम्** ॥१७॥

श्रेष्ठी **सागरदत्तो**ऽपि व्यवहर्तुं[5] प्रचक्रमे । कदाचित्परतीरेऽगाद्वहनेन महीयसा ॥१८॥

सप्तकृत्वः प्रवहणं तस्याऽभज्यत वारिधौ । अपुण्योऽसाविति जनैर्जहसे च स आगतः ॥१९॥

क्षीणार्थोऽप्युद्यमं नौज्झद् भ्रमन् सोऽपश्यदन्यदा । आकर्षन्तं कूपिकया पयः कमपि दारकम् ॥२०॥

सप्तवारान् पयो नाऽऽगादागाद्वारेऽष्टमे पुनः । तद् दृष्ट्वाऽचिन्तयत् सोऽथ फलदो ह्युद्यमो नृणाम् ॥२१॥

देवोऽपि शङ्कते तेभ्यो विघ्नान् कृत्वाऽऽपि खिद्यते । विघ्नैरस्खलितोत्साहाः प्रारब्धं न त्यजन्ति ये ॥२२॥

विचिन्त्यैवं स शकुनग्रन्थिं बद्ध्वाऽधि**सिंहलम्** । चचाल पोतेन **रत्नद्वीपं** चाऽऽप मरुद्वशात् ॥२३॥

विचिक्रिये तत्र भाण्डान्यक्रीणाद्रत्नसञ्चयान् । तैश्च पोतं स आपूर्य प्रतस्थे स्वपुरीं प्रति ॥२४॥

तद्रत्नलुब्धैर्निर्यामैः स नक्तं चिक्षिपेऽर्णवे । प्राग्भिन्नपोतफलकं दैवात्प्राप्योत्ततार च ॥२५॥

तच्च कूलस्थितं प्राप नगरं **पाटलापथम्** । वीक्षितश्च श्वशुर्येण[6] निन्ये च निजवेश्मनि ॥२६॥

स्नात्वा भुक्त्वा च विश्रान्तः **सागरो** मूलतोऽपि हि । निर्यामोदन्तमाचख्यौ श्वशुर्यो[7]ऽप्येवमब्रवीत् ॥२७॥

तिष्ठ त्वमत्र निर्यामास्त्वद्बन्धुजनशङ्कया । **ताम्रलिप्त्यां** न यास्यन्ति किं त्वत्रैष्यन्ति दुर्धियः ॥२८॥

प्रत्यश्रौषीत् **सागरस्तद्**च्छ्वशुर्येण[8] व्यजिज्ञपत् । तं वृत्तान्तं नरेन्द्राय न्यायोऽयं दीर्घदर्शिनाम् ॥२९॥

¶तच्चाऽन्यदा प्रवहणं तीरे तत्र समाययौ । अज्ञायि चाऽऽयुक्तनरैः **सागराख्यातलक्षणैः** ॥३०॥

---

१. तिलकायिते । **पुण्ड्रीयिते** हे० । २. नदी । ३. **नु** मु० । ४. **तथै०** मु० । ५. व्यापारं कर्तुम् । ६. **श्वशुरेण** मु० । ७. **श्वशुरो०** मु० । ८. **०च्छ्वशुरेण** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कोऽत्र भाण्डपतिर्भाण्डं ? किं किं कियदिहेत्यथ । पप्रच्छुरायुक्तनरास्तान् सर्वान् कर्णधारकान् ॥३१॥
ते चाऽन्यथाऽन्यथाऽऽख्यान्तः क्षुभिताश्चोपलक्षिताः । आयुक्तैः **सागरदत्त**स्तत्र चाऽकार्यत द्रुतम् ॥३२॥
**सागरं** प्रेक्ष्य ते भीता नत्वा चोचुरिदं तदा । अस्माभिः कर्मचण्डालैर्दुष्कर्म[1] विहितं प्रभो ! ॥३३॥
तथापि त्वं स्वपुण्येन रक्षितोऽसि वयं पुनः । वध्यकोटिं तव प्राप्ताः कुरुष्वं[2] स्वामितोचितम् ॥३४॥
कृपालुस्**सागर**स्तांश्च राजपुम्भ्यो व्यमोचयत् । प्रदाय किञ्चित् पाथेयं विससर्ज च शुद्धधीः ॥३५॥
पुण्यवानिति राज्ञोऽतिसम्मतः स महामतिः । तेन पोतस्थभाण्डेन बहु द्रव्यमुपार्जयत् ॥३६॥
¶सोऽदाद्दानमपृच्छच्च धर्मेच्छुर्धर्मतीर्थिकान् । देवदेवमहं रत्नैश्चिकीर्षे तं च शंसत ॥३७॥
नाऽभूत्तेषामेकवाक्यं देवतत्त्वापरिस्पृशाम् । अथाऽऽप्तः कश्चिदप्यूचे मुग्धान्मा पृच्छ मादृशान् ॥३८॥
कृत्वा तपोऽधिवास्यैकं रत्नं प्रणिहितो भव । देवताः कथयिष्यन्ति देवं ते पारमार्थिकम् ॥३९॥
तथैव **सागर**श्चक्रेऽष्टमान्ते काऽपि देवता । अदर्शयत्तीर्थकरप्रतिमां तस्य पावनीम् ॥४०॥
तमुवाच च भद्रैषा देवता पारमार्थिकी । सम्यक् स्वरूपं मुनयो यस्या जानन्ति नाऽपरे ॥४१॥
इत्युक्त्वा देवता साऽगात् प्रहृष्टः[3] **सागर**श्च ताम् । अर्हन्मूर्त्तिं स्वर्णवर्णां साधूनां समदर्शयत् ॥४२॥
आचख्युः साधवस्तस्य धर्मं[4] जिनवरोदितम् । बभूव श्रावकः सोऽपि साधून् प्रपच्छ चाऽन्यदा ॥४३॥
कस्येयमर्हतो मूर्त्तिः ? केन वा विधिना मया । प्रतिष्ठाप्या ? भगवन्तो यूयं शंसत मेऽधुना ॥४४॥
ऊचिरे साधवोऽप्येवं विषये **पुण्ड्रवर्धने** । **श्रीपार्श्वः** समवसृतस्तिष्ठत्यभ्येत्य पृच्छ तम् ॥४५॥
तदैव **सागरो** गत्वा **श्रीपार्श्वं** प्रणिपत्य च । प्रपच्छ रत्नप्रतिमोचितकार्याणि सर्वतः ॥४६॥
स्वाम्यप्याख्यत्समुद्दिश्य समवसरणं निजम् । सर्वानर्हदतिशयाञ्जिनोर्चा[5]स्थापनामपि ॥४७॥
जिनोक्तविधिना सोऽपि तीर्थकृत्प्रतिमेति ताम् । प्रत्यष्ठापयदन्येद्युः स्वाम्यन्ते प्राव्रजत्ततः ॥४८॥
ततश्च सपरीवारः सेव्यमानः सुरासुरैः । सर्वातिशयसम्पूर्णो भगवानन्यतो ययौ ॥४९॥
¶इतश्चाऽभून्**नागपुर्यां** पुर्यां धुर्यो यशस्विनाम् । नागपुर्यामिवाऽहीन्द्रः **सूरतेजा** महीपतिः ॥५०॥
इभ्यो **धनपति**र्नामाऽभूत्तत्र नृपतेः प्रियः । तथा **धनपतेः** पत्नी **सुन्दरी** शीलसुन्दरी ॥५१॥
कृतपैतामहाभिख्यो **बन्धुदत्त**स्तयोः सुतः । विनीतो गुणवांश्चापि प्रतिपेदे स यौवनम् ॥५२॥
**वत्सा**भिधाने विजये **कौशाम्ब्यां** पुरि भूपतिः । कृतारिमानभङ्गोऽभून्**मानभङ्गो**ऽभिधानतः ॥५३॥
इभ्यश्च **जिनदत्ता**ख्यो जिनधर्मरतोऽभवत् । तस्य भार्या **वसुमती** तत्सुता **प्रियदर्शना** ॥५४॥
तस्याश्चाऽऽसीत् सखी विद्याधराङ्गदतनूद्भवा । नाम्ना **मृगाङ्कलेखेति** निलीना[6] जिनशासने ॥५५॥
दिनानि व्यतियान्ति स्म तयोः सख्योर्द्वयोरपि । देवपूजा-गुरूपास्ति-धर्माख्यानादिकर्मभिः ॥५६॥
¶अन्यदा गोचरचर्यागतेनैकेन साधुना । द्वितीयसाधोरित्याख्याय्युद्दिश्यँ[7] **प्रियदर्शनाम्** ॥५७॥
जनयित्वा सुतमियं महात्मा प्रव्रजिष्यति । **मृगाङ्कलेखा** तच्छ्रुत्वाऽहृष्यन्नाऽऽख्यत्तु कस्यचित् ॥५८॥
स्वसूनवे **धनपति**श्**चन्द्रलेखा**मयाचत । पुत्रीं **नागपुरी**श्रेष्ठि**वसुनन्दा**द्ददौ च सः ॥५९॥
महीयसा महेनाऽथ शुभेऽहनि शुभे क्षणे । बभूव **बन्धुदत्त**स्य विवाहश्**चन्द्रलेखया** ॥६०॥
कङ्कणाङ्कितहस्तैव **चन्द्रलेखा**ऽपरेऽहनि । ददंशे दन्दशूकेन[8] निशायां च व्यपद्यत ॥६१॥
एवं च भार्याः षट् तस्य विवाहानन्तरे दिने । ऊढमात्रा व्यपद्यन्त परिणामेन कर्मणः ॥६२॥
**बन्धुदत्तो** विषहस्त इति याच्ञापरोऽपि सन् । ततो नाऽऽपाऽपरां कन्यां द्रविणैः प्रचुरैरपि[9] ॥६३॥

१. **०र्दुःकर्म** ता० । २. **कुरु स्वामिन् ! यथो०** ता० । **कुरुष्व स्वामिनो०** मु० । ३. **०त्सुहृष्टः** मु० । ४. **धर्मं** मु० । ५. **०ज्जिनार्चा** मु० । ६. **लीना च** मु० । ७. **०व्युपदिश्य** मु० । ८. सर्पेण । ९. **प्रभुतै०** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मम भार्याविहीनस्य किं श्रियेति स चिन्तयन् । दिने दिने क्षीयते स्म कृष्णपक्ष इवोडुपः ॥६४॥
दध्यौ **धनपतिर्दुः**खी मम पुत्रो विपत्स्यते । तद्व्यापारे क्षिपाम्येनं दुःखविस्मृतिहेतवे ॥६५॥
इति निर्णीय स श्रेष्ठी **बन्धुदत्तं** समादिशत् । व्यवहर्तुं **सिंहलेषु** व्रज वत्साऽन्यतोऽपि वा ॥६६॥
पित्राज्ञया **बन्धुदत्तो** भाण्डान्यादाय भूरिशः । पोतमारुह्य जलधिं लङ्घित्वा **सिंहलान्** ययौ ॥६७॥
स **सिंहलेशं** साराभिरुपदाभिररञ्जयत् । सोऽपि तस्याऽमुचच्छुल्कं प्रसादाद् व्यसृजच्च तम् ॥६८॥
तत्र विक्रीय भाण्डानि प्राप्य लाभं मनीषितम् । प्रतिभाण्डानि च क्रीत्वा प्रतस्थे स्वंपुरं[1] प्रति ॥६९॥
गच्छतो वार्धिमार्गेण स्वदेशान्तिकमीयुषः । दुर्वातान्दोलितं तस्य यानपात्रमभज्यत ॥७०॥
स प्राप्य काष्ठफलकं किञ्चिद्दैवानुकूल्यतः । **रत्नद्वीप**माससाद समुद्रतटभूषणम् ॥७१॥
उत्तीर्य वाप्यां स्नात्वा स फलिते चूतकानने । स्वादून्यास्वादयामास चूतानि क्षुद्रुजौषधम्[2] ॥७२॥
एवं मार्गे फलाहारी स ययौ **रत्नपर्वतम्** । तत्राऽऽरूढो रत्नमयं चैत्यमेकं ददर्श च ॥७३॥
प्रविवेश स तच्चैत्यं तत्र चाऽ**रिष्टनेमिनः** । ववन्दे प्रतिमां तत्र स्थितानथ[3] महामुनीन् ॥७४॥
तत्र स ज्येष्ठमुनिना पृष्टः स्वोदन्तमादितः । जगाद भार्यामरणपोतभङ्गादिकं शनैः ॥७५॥
मुनिना बोधितस्तेन जिनधर्मं स शिश्रिये । स्वकीयामागतिं[4] तत्र सफलामनुमोदयन् ॥७६॥
तत्र **चित्राङ्गदो** नाम विद्याधर उवाच तम् । अमुना जिनधर्मेण साधु साधर्मिकोऽसि मे ॥७७॥
**आकाशगामिनीं** विद्यां किं प्रयच्छाम्यहं तव? । त्वां स्थाने वा नयामीष्टे ? तुभ्यं कन्यां ददामि वा ? ॥७८॥
**बन्धुदत्तो**ऽवदद्या ते विद्या सा खलु मद्वशा । स्थानं तदेव मेऽभीष्टं यत्रेदृग्गुरुदर्शनम् ॥७९॥
इत्युक्त्वा तत्र[5] तूष्णीके चिन्तयामास खेचरः । कन्यामिच्छत्यसौ तत्राऽनिषेधेऽनुमतिर्ध्रुवम् ॥८०॥
अमुनोढा सती कन्या न हि या म्रियतेऽधुना । सम्यग्विज्ञाय तामस्मै ढौकयामि महात्मने ॥८१॥
इति निश्चित्य स स्थाने **बन्धुदत्तं** निजेऽनयत् । आनर्च चोचितैः स्नान-भोजनादिभिरुच्चकैः ॥८२॥
**चित्राङ्गदो**ऽथ पप्रच्छ स्वान् सर्वानपि खेचरान् । किं दृष्टा **भारते** वर्षे काऽपि कन्याऽस्य याऽर्हति ? ॥८३॥
**मृगाङ्कलेखा** तद्भ्रातुरङ्ग**दस्य** सुता ततः । ऊचे तात ! न किं वेत्सि मत्सखीं **प्रियदर्शनाम्** ? ॥८४॥
स्त्रीरत्नमिव सा रूपात् **कौशाम्ब्या**मस्ति मे सखी । **जिनदत्त**श्रेष्ठिसुता तत्पार्श्वेऽहमगां पुरा ॥८५॥
जनयित्वा सुतमियं[6] परिव्रज्यां ग्रहीष्यति । इत्याख्यन्मुनिरेकस्तामुद्दिश्याऽश्रावि तन्मया ॥८६॥
**चित्राङ्गदो**ऽथाऽऽदिदेशाऽ**मितगत्या**दिखेचरान् । दापयितुं **बन्धुदत्ता**योचितां **प्रियदर्शनाम्** ॥८७॥
ते **बन्धुदत्त**मादाय **कौशाम्ब्यां** खेचरा ययुः । आवात्सुर्बहिरुद्याने **पार्श्वचैत्य**विभूषिते ॥८८॥
**बन्धुदत्तो**ऽपि तच्चैत्यं प्राविशत् खेचरैः सह । **पार्श्वं** ववन्दे साधूंश्च तेभ्यो धर्ममथाऽशृणोत् ॥८९॥
तत्राऽऽयातो **जिनदत्तो**ऽप्यथः साधर्मिकप्रियः । निनाय स्वगृहेऽभ्यर्थ्य **बन्धुदत्तं** सखेचरम् ॥९०॥
**बन्धुदत्तं** खेचरांश्च **जिनदत्तः** सगौरवम् । स्नानासनाद्यैः सत्कृत्य पप्रच्छाऽऽगमकारणम् ॥९१॥
कामप्रयोजनमिदं कामाङ्गमनृतं खलु । इति ते खेचराः सद्यः समुत्पाद्येदमूचिरे ॥९२॥
तीर्थयात्रामुपक्रम्य **रत्नाद्रे**र्निर्गता वयम् । अगमामोज्ज**यन्ताद्रा**ववन्दिष्महि **नेमिनम्** ॥९३॥
तत्रत्येनाऽमुना **बन्धुदत्ते**न निजबन्धुवत् । साधर्मिका इति वयमर्चिता भोजनादिना ॥९४॥
असौ धर्मरतो दारविमुखश्च सदैव हि । इत्यभूदधिका प्रीतिरस्माकममुना सह ॥९५॥
**श्रीपार्श्वं** वन्दितुमिहोज्ज**यन्ता**दागता वयम् । **बन्धुदत्तो**ऽप्यसावागादस्मत्स्नेहनियन्त्रितः ॥९६॥

१. **स्वपुरीं** सं० । २. क्षुध् एव रुजा-रोगः, तस्या औषधम् । ३. **०नष्ट** मु० । ४. आगमनम् । ५. तस्मिन् बन्धुदत्ते तूष्णीके सति ।
६. **सुतमेषा** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खेचरोक्तिमिति श्रुत्वा **बन्धुदत्तं** निरीक्ष्य च । अचिन्तय**ज्जिनदत्तो** वरोऽसौ मत्सुतोचितः ॥९७॥

¶**जिनदत्तो** विमृश्यैवं खेचरं परोधयन् । **बन्धुदत्त**मभाषिष्ट ममोद्वह सुतामिति ॥९८॥

**बन्धुदत्तो**ऽपि मेने तदनिच्छामिव नाटयन् । तदैव चाऽ**मितगतिश्चित्राङ्गद**मजिज्ञपत् ॥९९॥

**चित्राङ्गदे** जन्ययात्रामुपादाय समागते । **जिनदत्तो बन्धुदत्तं** स्वपुत्र्या पर्यणाययत् ॥१००॥

**चित्राङ्गदो बन्धुदत्तं** शासित्वा स्वास्पदं ययौ । **बन्धुदत्त**स्तु तत्राऽस्थाद्रमयन् **प्रियदर्शनाम्** ॥१०१॥

स च **श्रीपार्श्वनाथ**स्य रथयात्रामकारयत् । एवं धर्मरतस्तत्र चै[1]तुरब्दीमत्रास्थित ॥१०२॥

कालेन गच्छता गर्भं दध्रे च **प्रियदर्शना** । ददर्श च गजं स्वप्ने प्रविशन्तं मुखाम्बुजे ॥१०३॥

¶अपरेद्यु**र्बन्धुदत्तः** स्वस्थानगमनं प्रति । मनोरथं समुत्पन्नं निजपत्नीमजिज्ञपत् ॥१०४॥

साऽप्याख्य**ज्जिनदत्ताय जिनदत्तो**ऽपि सम्पदा । भूयिष्ठया तं संवाह्य व्यसृजत् प्रियया सह ॥१०५॥

यास्याम्यहं **नागपुरी**मित्याघोषणया जनान् । सह प्रचलितानग्रे विधाय निजबन्धुवत् ॥१०६॥

गच्छन् शनैः शनैर्मार्गे स सन्मार्गमहाध्वगः । अनर्थैकमहासद्म-**पद्माख्या**मटवीं ययौ ॥१०७॥ **युग्मम्** ॥

सार्थं रक्षन्नर्निर्विण्णोऽटवीं तां वासरैस्त्रिभिः । लङ्घित्वैकस्य सरसस्तीरे सार्थमतिष्ठिपत् ॥१०८॥

तत्रोषितस्य सार्थस्य यामिन्यां प्रहरेऽन्तिमे । **चण्डसेनस्य** पल्लीशस्याऽव[2]स्कन्दः समापतत् ॥१०९॥

सार्थसर्वस्वमादाय तामपि **प्रियदर्शनाम्** । नीत्वा समर्पयामासु**श्चण्डसेनाय** तद्भटाः ॥११०॥

**चण्डसेनो**ऽपि दीनास्यां निरीक्ष्य **प्रियदर्शनाम्** । उत्कृषोऽचिन्तयदिमां स्वस्थाने प्रापयामि किम् ? ॥१११॥

इत्थं स चिन्तयं**श्चूतलतां** तत्पार्श्ववर्तिनीम् । चेटी[3]मपृच्छदेषा का कस्येत्याख्याहि मेऽखिलम् ॥११२॥

चेट्या[4]ख्या**ज्जिनदत्तस्य कौशाम्बी**श्रेष्ठिनः सुता । एषा **प्रियदर्शना**ख्येत्याकर्ण्य द्रागमुमूर्छ सः ॥११३॥

ऊचे च लब्धसंज्ञः सन् पल्लीशः **प्रियदर्शनाम्** । त्वत्पित्रा जीवितोऽस्मि प्राङ् मा भैषीः शृणु मूलतः ॥११४॥

¶प्रसिद्धोऽहं चौरराजोऽन्यदा चौर्याय निर्गतः । गतोऽस्मि **वत्स**विषये **गिरिग्रामे** निशामुखे ॥११५॥

चौरैर्वृतः पिबन्मद्यं तत्र प्राप्तोऽस्मि रक्षकैः । तैर्धृत्वा **मानभङ्ग**स्याऽर्पितस्तेनाऽस्मि घातितः ॥११६॥

वधाय नीयमानोऽहं त्वत्पित्राऽतिकृपालुना । पौ[5]षधान्ते पारणाय गच्छता मोचितोऽस्मि च ॥११७॥

दत्त्वा वस्त्राणि वित्तं च त्वत्पिता व्यसृजच्च माम् । उपकारिसुताऽसि त्वं तदादिश करोमि किम् ? ॥११८॥

**जिनदत्त**सुताऽप्यूचे तद् भ्रातर्मेलयाऽधुना । अवस्क[6]न्दे विप्रयुक्तं **बन्धुदत्तं** पतिं मम ॥११९॥

एवं करोमीत्युदित्वा पल्लीशः **प्रियदर्शनाम्** । गृहे नीत्वाऽत्यन्तभक्त्याऽपश्यत् स्वामिव देवताम् ॥१२०॥

अथ स्वयं **चण्डसेनो बन्धुदत्तं** निरीक्षितुम् । निर्जगामाऽभयदानैराश्वास्य **प्रियदर्शनाम्** ॥१२१॥

¶इतश्च **बन्धुदत्तो**ऽपि वियुक्तः प्रियया तया । हिन्तालवनमध्यस्थो[7]ऽस्वस्थ एवमचिन्तयत् ॥१२२॥

मया विरहितैकाहमपि प्रसृ[8]तिलोचना । सा जीवितुं नोत्सहते प्रिया मे तन्मृता भवेत् ॥१२३॥

प्रत्याशया ननु कया जीवाम्यहमतः परम्? । मरणं शरणं युक्तं तन्मेऽप्यन्या गतिर्न हि ॥१२४॥

इदानीमहमत्र स्वं स[9]प्तच्छदतरौ गुरौ । उद्बध्य पञ्चतां यामीत्यालोच्याऽभिससार सः ॥१२५॥

उपसप्तच्छदं प्राप्तो ददर्शाऽग्रे महासरः । तत्र चैकं राजहंसं प्रियाविरहदुःखितम् ॥१२६॥

तं पश्यन्नात्मवद्दीनं सोऽभूदत्यन्तदुःखितः । दुःखितो दुःखितानां हि पीडां जानाति मानसीम् ॥१२७॥

तथास्थिते **बन्धुदत्ते** राजहंसः क्षणेन सः । हंस्या कुवलयच्छायाऽऽसीनया युयुजेतराम् ॥१२८॥

तं प्रियामिलितं दृष्ट्वा **बन्धुदत्तो**ऽप्यचिन्तयत् । भूयोऽपि जीवतां योगो जायते जायया खलु ॥१२९॥

तद्यामि स्वां पुरीं निःस्वः कथं वा तत्र याम्यहम् । **कौशाम्ब्या**मपि गमनं नोचितं प्रियया विना ॥१३०॥

१. **चतुर्वर्षपर्यन्तम्** । २. धाटी । ३. **॰मपश्यदेषा** मु॰ । ४. **चेट्याख्या॰** मु॰ । ५. **पौष॰** मु॰ । ६. **अवस्कन्दैर्विप्र॰** मु॰ । ७. **॰मध्यस्थः स्वस्थ॰** सं॰ । ८. दीर्घलोचना । ९. **॰मत्रस्थसप्त॰** मु॰ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद् गत्वाऽहं **विशालायां** गृहीत्वाऽर्थं स्वमातुलात् । दत्त्वा च चोरसेनान्ये मोचयामि निजां प्रियाम् ॥१३१॥
समं च प्रियया गत्वा **नागपुर्यां** स्ववेश्मतः । अर्थं दास्ये मातुलस्याऽप्युपायेन कृतं स्मरन् ॥१३२॥
ध्यात्वेति पूर्वाभिमुखं गच्छन्नह्नि द्वितीयके । स्थानं **गिरिस्थलं** नाम जगामाऽत्यन्तदुःखितः ॥१३३॥
मार्गासन्ने तरुच्छन्ने व्यश्राम्यद् यक्षवेश्मनि । स यावत्तावदभ्यागात् पान्थ एकः श्रमार्दितः ॥१३४॥
कुतोऽभ्यागा इति पृष्टो **बन्धुदत्तेन** सोऽध्वगः । आचचक्षे **विशालायाः** पुर्या आगामिति स्फुटम् ॥१३५॥
सार्थवाहो **धनदत्त**स्तत्राऽस्ति कुशली स किम् ? । **बन्धुदत्ते**नेति पृष्टो दीनास्यः सोऽध्वगोऽब्रवीत् ॥१३६॥
**धनदत्ते** व्यवहर्तुं गते तत्सूनु[1]रौदिमः । गृहे पत्न्या सह क्रीडन् यान्तं नाजीगणन्नृपम् ॥१३७॥
सर्वस्वमग्रहीत्तस्य क्रुद्धस्तेनाऽऽगसा नृपः । [2]गुप्तौ पुत्र-कलत्रादितत्कुटुम्बं न्यधत्त च ॥१३८।
आयातो **धनदत्तो**ऽपि **बन्धुदत्तं** स्वसुः सुतम् । दण्डावशिष्टकोट्यर्थे व्यमोचि ह्यो व्रजन्मया ॥१३९॥
¶अथ दध्यौ बन्धुदत्तो दैवेन किमहो ! कृतम् ? । यत्राऽऽशा मेऽभवत् सोऽपि पातितो व्यसनार्णवे ॥१४०॥
भवत्वत्रैव हि स्थित्वा पश्यामि निजमातुलम् । गत्वा **नागपुरीं** तस्य साधयाम्यर्थमाशु च ॥१४१॥
¶विमृश्यैवं च तस्थौ स पञ्चमेऽह्नि तु मातुलः । सार्थेनाऽऽगात्कतिपयसहायो भृशमुन्मनाः ॥१४२॥
वने यक्षौकसस्तस्य तमालस्य तरोस्तले । उपाविशद्**धनदत्तो बन्धुदत्तेन** चैक्ष्यत ॥१४३॥
उपलक्षयितुं तं च **बन्धुदत्तो**ऽब्रवीदिति । कुतो यूयमिहाऽऽयाता ब्रूत यास्यथ कुत्र वा ? ॥१४४॥
उवाच **धनदत्तो**ऽपि **विशालाया** इहागतः । महापुरीं **नागपुरीं** गच्छन्नस्मि च सुन्दर ! ॥१४५॥
बभाषे **बन्धुदत्तो**ऽपि तत्राऽहमपि याम्यहो ! । **नागपुर्यां** परं तत्र को वस्तिष्ठति कथ्यताम् ॥१४६॥
[3]जामेयो **बन्धुदत्तो** मे तत्राऽस्तीति जगाद सः । प्रत्यूचे **बन्धुदत्तो**ऽपि **बन्धुदत्तः** सुहृन्मम ॥१४७॥
[4]तं ज्ञात्वा मातुलं **बन्धुदत्तः** स्वं त्वप्रकाशयन् । तत्रैवाऽस्थाद्बुभुजाते शिश्याते मिलितौ च तौ ॥१४८॥
¶प्रातश्च **बन्धुः** शौचाय नदीं यातो ददर्श च । कदम्बगह्वरे [5]रत्नच्छायाक्तरजसं भुवम् ॥१४९॥
सोऽखनत्तीक्ष्णशृङ्गेण तां क्षमामाससाद च । करण्डकं ताम्रमयं रत्नाभरणपूरितम् ॥१५०॥
करण्डं [6]छन्नमादाय **धनदत्त**मुपेत्य च । आख्याय च यथालब्धं [7]सप्रश्रयमदोऽवदत् ॥१५१॥
मया [8]कार्पटिकाल्लब्धा प्रवृत्तिर्भवतोऽखिला । त्वत्पुण्यैश्च करण्डोऽयं गृह्यतां मित्रमातुल ! ॥१५२॥
उभौ गत्वा **विशालायां** दत्त्वाऽर्थं [9]नृपतिग्रहात् । स्वमानुषान्मोचयावो यावो **नागपुरीं** ततः ॥१५३॥
इत्युदित्वा **बन्धुदत्तः** पुरो मुक्त्वा करण्डकम् । तूष्णीकः समभूत् सोऽपि **धनदत्तो**ऽब्रवीदिति ॥१५४॥
मोचितैर्मानुषैः किं मे द्रक्ष्यामः सुहृदं तव । **बन्धुदत्तं** महाभाग ! स प्रमाणं ततः परम् ॥१५५॥
**बन्धुदत्तः** प्रणम्याऽथ शशंस स्वं यथातथम् । उवाच **धनदत्तो** हा ! कथं प्राप्तो दशामिमाम् ? ॥१५६॥
स्ववृत्ते **बन्धुना**ऽऽख्याते **धनदत्तो**ऽभ्यधादिदम् । वत्साऽऽदौ मोचयिष्यामो भिल्लेभ्यः **प्रियदर्शनाम्** ॥१५७॥
¶अत्राऽन्तरे नृपभटा द्रुतमेयुरुदायुधाः । सर्वांस्तत्रोषितान् पान्थान् दध्रुस्तस्करशङ्कया ॥१५८॥
**धनदत्त-बन्धुदत्तौ** द्रव्यं यक्षालयान्तिके । यावच्चिक्षिपतुस्तावत्प्राप्तौ तौ राजपूरुषैः ॥१५९॥
किमेतदिति तैः पृष्टावूचतुस्ताविदं वचः । युष्मद्भयेन स्थगितमावाभ्यां वस्त्विदं निजम् ॥१६०॥
समं तेन करण्डेन तौ पान्थानपरानपि । ते निन्यिरे राजभटाः समीपे राजमन्त्रिणः ॥१६१॥
परीक्ष्य मुक्त्वाऽन्यान् पान्थान् मन्त्री जामेय-मातुलौ । युवां कुतस्त्यौ किं चेदमित्यपृच्छत् कृतादरः ॥१६२॥
आगताः स्मो **विशालायाः** पूर्वार्जितमिदं धनम् । गृहीत्वा **लाट**देशाय चलिताश्चाऽधुना वयम् ॥१६३॥
मन्त्र्यूचे यदि वोऽर्थोऽयं तर्ह्यभिज्ञानपूर्वकम् । सर्वं शंसत वेगेन यत्करण्डेऽत्र तिष्ठति ॥१६४॥
क्षुभितावनभिज्ञौ तावूचतुर्यद्ध्ययं हृतः । करण्डस्तत् स्वयं मन्त्रिन्नुद्घाट्य [10]ह्यवलोक्यताम् ॥१६५॥

---

१. ज्येष्ठः । २. कारागृहे । ३. भगिनीपुत्रः । ४. **तज्ज्ञात्वा** सं० हे० । ५. रत्नकान्त्याऽक्तं अङ्कितं रजो यस्यास्ताम् । ६. गुप्तम् । ७. सप्रणयम् । ८. **कर्प०** सं०हे० । ९. नृपबन्धनात् । १०. **प्रविलो०** सं० । **व्यवलो०** हे० ता० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वयमुद्घाटयामास तं मन्त्र्यथ करण्डकम् । राजनामाङ्कितान्यन्तर्भूषणानि ददर्श च ॥१६६॥
चिरकालप्रणष्टार्थान्[1] स्मृत्वा मन्त्री व्यचिन्तयत् । पुरा हृतेभ्यो ह्यर्थेभ्य आभ्यामेतन्निधीकृतम् ॥१६७॥
आभ्यामेतेऽपि लप्स्यन्ते[2] ताडिताभ्यां मलिम्लुचाः । ध्यात्वेत्यधारयत् सार्थं सोऽशेषमपि पूरुषैः ॥१६८॥
यमदूतैरिवाऽऽरक्षैः स तौ बाढमताडयत् । गाढप्रहारविधुरौ तावप्येवं जजल्पतुः ॥१६९॥
सार्थेन सममायातामावां हि ह्यस्तने दिने । यद्येवं न भवेन्मार्यौ विचार्य भवता तदा ॥१७०॥
**बन्धुदत्त**मथोद्दिश्योवाच स्थानपुमानिदम् । सार्थेऽत्र पञ्चमदिने वीक्षितोऽसौ मया खलु ॥१७१॥
अमुं वेत्सीत्यमात्येन पृष्टः सार्थाधिपोऽवदत् । ईदृक्कार्पटिकान्[3] सार्थे वहतो हन्त वेत्ति कः ? ॥१७२॥
इति श्रुत्वा च कुपितो मन्त्री जामेय-मातुलौ । नरकावासकल्पायां तौ कारायामधारयत् ॥१७३॥
¶इतश्च **चण्डसेन**स्तां भ्रान्त्वा **पद्माटवीं** चिरम् । **बन्धुदत्त**मसम्प्राप्य विलक्षः सदनं ययौ ॥१७४॥
पुरः **प्रियदर्शना**याः प्रत्यश्रौषीदिदं च सः । षण्मासान्तस्तव पतिमानयेऽग्नौ विशामि वा ॥१७५॥
प्रतिज्ञायेति पल्लीशः प्रैषीत् प्रच्छन्नपूरुषान् । **कौशाम्ब्यां नागपुर्यां** च **बन्धुदत्तं** निरीक्षितुम् ॥१७६॥
दिनैः कतिभिरप्येत्य **चण्डसेना**य तेऽवदन् । **बन्धुदत्तो** न सोऽस्माभिर्भ्रमद्भिरपि वीक्षितः ॥१७७॥
**चण्डसेनो**ऽचिन्तयच्च स प्रियाविरहातुरः । भृगुपाताग्निवेशादि कृत्वा नूनं मृतो भवेत् ॥१७८॥
ममाऽपि मासाश्चत्वारः स्वप्रतिज्ञावधेर्गताः । प्रविशाम्यधुनाऽप्यग्निं **बन्धुदत्तो** हि दुर्लभः ॥१७९॥
तावत्तिष्ठामि वा यावत् प्रसूते **प्रियदर्शना** । **कौशाम्ब्यां** तत्सुतं नीत्वा प्रवेक्ष्यामि हुताशने ॥१८०॥
तत्रैवं चिन्तयत्येव द्वाःस्थोऽभ्येत्येदमब्रवीत् । दिष्ट्याऽद्य वर्धसे सूनुं सुषुवे **प्रियदर्शना** ॥१८१॥
हृष्टश्च प्रददौ तस्मै पल्लीशः पारितोषिकम् । उचे **पद्माटवी**[4]देवीं **चण्डसेना**भिधां च सः ॥१८२॥
मासं चेत् सह पुत्रेण स्वसा कुशलिनी मम । तदा भवत्यै दास्यामि दशभिः पुरुषैर्बलिम् ॥१८३॥
सक्षेमेण व्यतीतायां दिनानां पञ्चविंशतौ । आनेतुं बलिपुरुषान् प्रत्यांशं[5] प्राहिणोन्नरान् ॥१८४॥
¶इतश्च तत्र कारायां **बन्धुदत्तः** समातुलः । मासान् षडतिचक्राम नारकायुः[6]सहोदरान् ॥१८५॥
महाभुजङ्गः[7] सम्प्राप्तस्तदा चाऽऽरक्षकैर्निशि । परिव्राट् सधनो बद्ध्वाऽर्पितस्तस्यैव मन्त्रिणः ॥१८६॥
नेदृग्द्रव्यं परिव्राजां तदसौ तस्करो ध्रुवम् । इति निर्णीय तं मन्त्री निषूदयितुमादिशत् ॥१८७॥
वधार्थं नीयमानेनाऽनुशयानेन तेन च । नाऽन्यथा स्यान्मुनिवच इति ध्यात्वाऽभ्यधाय्यदः ॥१८८॥
न मां मुक्त्वाऽपरेणेदं पर्यमुष्यत पत्तनम् । लोप्त्रं[8] च सर्वमस्त्यद्रि-नद्यारामादिभूमिषु ॥१८९॥
यस्य यस्य हृतं वित्तं तस्य तस्य तदर्प्यताम् । न्यस्तं कोश इवाऽस्त्येव निगृह्णीत ततश्च माम् ॥१९०॥
आरक्षा मन्त्रिणे व्याख्यन् मन्त्र्यप्याख्यातभूमिषु । सर्वं ददर्श तद् द्रव्यं तं विनैकं करण्डकम् ॥१९१॥
मन्त्र्यूचे तं परिव्राजं किमिदं चेष्टितं तव । विरुद्धं दर्शनाकृत्योः कृतिन्[9]नाख्याहि निर्भयः ॥१९२॥
¶परिव्राडप्यभाषिष्ट विषयासक्तचेतसाम् । इदमेवोचितं कर्म निर्धनानां स्ववेश्मनि ॥१९३॥
यद्याश्चर्यं तर्हि शृणु नगरे **पुण्ड्रवर्धने** । द्विजस्य **सोमदेव**स्य सुतो **नारायणो** ह्यहम् ॥१९४॥
जीवघातादिना स्वर्गं शंसन्नस्थां जनेष्वहम् । कदाऽप्यपश्यं दीनास्यांश्चौरबुद्ध्या धृतान्नरान् ॥१९५॥
महाभुजङ्गा हन्यन्ताममी इत्यवदं तदा । हा ! कष्टमज्ञानमिति तदैको मुनिरब्रवीत् ॥१९६॥
किमज्ञानमिति मया नत्वा पृष्टोऽब्रवीन्मुनिः । यत्परस्याऽतिपीडाकृदसद्दोषाधिरोपणम् ॥१९७॥
एते प्राक्कर्मणः पाकात् पतिता व्यसने खलु । महाभुजङ्गतादोषमसन्तं च तनोषि किम् ? ॥१९८॥

१. ०प्रनष्टा० मु० विना । २. **लभ्यन्ते** सं० हे० । ३. **०कर्प०** सं० हे० । ४. **पद्माटवीं** मु० । ५. प्रतिदिशम् । ६. **नरका०** सं० । ७. महाचौरः । ८. लुण्टितं धनम् । ९. कृतिन्- बुद्धिमन् ! ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

फलशेषं पूर्वजन्मकृतस्याऽपि हि कर्मणः । नचिराल्लप्स्यसे तन्माऽलीकं [1]दोषं परे निधाः ॥१९९॥
प्राक्कर्मफलशेषं तु भूयः पृष्टो मया मुनिः । ब्रूते स्माऽतिशयज्ञानी करुणाक्रान्तमानसः ॥२००॥
[2]इहैव **भरतक्षेत्रे** नगरे **गर्जना**भिधे । **आषाढो** नाम विप्रोऽभूत्तत्पत्नी **रच्छुका**भिधा ॥२०१॥
इतश्च पञ्चमभवे त्वं तयोस्तनयोऽभवः । **चन्द्रदेव** इति नाम्ना पित्रा वेदं च पाठितः ॥२०२॥
विद्वन्मान्यतिमान्योऽभूर्वी**रसेन**स्य भूपतेः । **योगात्मा** नाम तत्राऽऽसीत् परिव्राडपरः सुधीः ॥२०३॥
आसीच्च बालविधवा **विनीत**श्रेष्ठिनः सुता । **वीरमती** मालिकेन सहाऽऽगात् **सिंहलेन** सा ॥२०४॥
तस्याश्च पूज्यो **योगात्मा** दैवात्तद्दिन एव सः । निःसङ्गत्वादनाख्याय जगाम क्वचिदन्यतः ॥२०५॥
गता **वीरमती**त्यासीत् प्रघोषश्चाऽखिले जने । नूनं **योगात्म**ना सार्धं गतेति त्वमचिन्तयः ॥२०६॥
गता **वीरमती** क्वापीत्यभूद्राजकुलेऽपि गीः । गता **योगात्म**ना सार्धमित्यवादीश्च निश्चयात् ॥२०७॥
त्यक्तदारादिसङ्गः स इति राज्ञोदितेऽब्रवीः । अत एवाऽन्यदारान् स जह्रे पाखण्डधारकः ॥२०८॥
तच्छ्रुत्वाऽभूज्जनो धर्मे श्लथो दोषेण तेन तु । **योगात्मानं** बहिश्चक्रुः परिव्राजोऽपरे च तम् ॥२०९॥
एवं निकाचितं कर्म तीव्रं कृत्वा विपन्नवान् । [3]एडिकस्त्वं समभवः **कोल्लाके** सन्निवेशने ॥२१०॥
तत्कर्मदोषात्कुथितजिह्वः पञ्चत्वमाप्य च । **कोल्लाक**स्य महाटव्यामभूस्त्वं मृग[4]धूर्तकः ॥२११॥
जिह्वाकोथाज्जम्बुकोऽपि मृत्वा **साकेत**पत्तने । राड्[5]वारवेश्या**मदनलता**यास्तनयोऽभवः ॥२१२॥
युवैकदा सु[6]रामत्त आक्रोशन् राजमातरम् । वारितो राजपुत्रेण तमप्याक्रोश उच्चकैः ॥२१३॥
तेन च्छेदितजिह्वः सन् ह्रीणः सानशनो मृतः । अभूर्द्विजोऽधुना कर्मशेषं तेऽद्यापि विद्य[7]ते ॥२१४॥
तच्छ्रुत्वा जातवैराग्यः सुगुरोः पादसन्निधौ । अहं परिव्राडभवं गुरुशुश्रूषणोद्यतः ॥२१५॥
गुरुणा म्रियमाणेन **तालोद्घाटनिका**युता । विद्या **खगामिनी** दत्त्वा सादरं चाऽस्मि शिक्षितः ॥२१६॥
विना धर्मवपूरक्षामन्यस्मिन् व्यसनेऽपि हि । नेमे विद्ये प्रयोक्तव्ये वाच्यं हास्येऽपि नो मृषा ॥२१७॥
प्रमादाच्चेन्मृषोक्तं स्या[8]न्नाभिदघ्ने तदम्भसि । विद्ययोरुद्धुजोऽष्टाग्रसहस्रं जपमाचरेः ॥२१८॥
मया विषयसक्तेन विपरीतमिदं कृतम् । ह्योऽप्यजल्पं मृषाऽऽरामे स्थि[9]त आवसथान्तिके ॥२१९॥
ह्यः स्नात्वाऽऽवसथे देवार्चनार्थं काश्चिदागताः । मामपृच्छन् युवतयो व्रतग्रहणकारणम् ॥२२०॥
अभीष्टपत्नीविरहहेतुमाख्यं प्रमादतः । जपं गुरूपदिष्टं तं न चाऽकार्षं जले स्थितः ॥२२१॥
निशीथे चौरिकाहेतोः श्रेष्ठि**सागर**वेश्मनि । दैवादपिहितद्वारे सारमेय इवाऽविशम् ॥२२२॥
गृहीत्वा स्वर्ण-रूप्या[10]दि निर्गच्छन् राजपूरुषैः । धृतोऽस्मि नाऽस्फुरद्विद्या स्मृताऽ**प्याकाशगामिनी** ॥२२३॥
मन्त्री पप्रच्छ तं भूयः किं भूषणकरण्डकः । एक एव न सम्प्राप्तः ? स्थानाद् भ्रान्तोऽसि किं ननु ? ॥२२४॥
सोऽप्यभाषिष्ट यत्राऽऽसीन्निखातः स करण्डकः । दैवाज्ज्ञात्वा ततः स्थानाज्जह्रे केनाऽप्यु[11]पेयुषा ॥२२५॥
तच्छ्रुत्वा तं परिव्राजं मुमोच सचिवाग्रणीः । करण्डकहरौ तौ चाऽस्मरज्जामेय-मातुलौ ॥२२६॥
दध्यौ च नूनमज्ञाभ्यां ताभ्यां लब्धः करण्डकः । भीताभ्यां चाऽन्यथाऽऽख्यातं प्रष्टव्यावभयेन तौ ॥२२७॥
आहूयाऽभयपूर्वं तौ पृष्टौ तेन यथातथम् । आख्यातवन्तौ मुक्तौ च नीतिविज्ञेन मन्त्रिणा ॥२२८॥
क्षामत्वात्तौ द्व्यहं स्थित्वा तृतीयेऽहनि जग्मतुः । तै**श्चण्डसेन**पुरुषैः प्राप्तौ च [12]पुरुषेक्षिभिः ॥२२९॥
मध्ये क्षिप्तौ [13]बन्दपुंसां किरातैस्तावुभावपि । **चण्डसेना**देवतायाः समीपे बलिहेतवे ॥२३०॥
सहचेटीं सपुत्रां च गृहीत्वा **प्रियदर्शनाम्** । **चण्डसेना**र्चनकृते **चण्डसेनो**ऽप्युपाययौ ॥२३१॥

१. ०**लीकदोषं** सं० । २. **चण्डदेव** सं० । ३. **इडिक्क**० सं० । **एडक**० मु० । अजः । ४. शृगालः । ५. **राट्वार**० सं० ता० । राड्-राजा, तस्य वारवेश्या । ६. **सदामत्त** सं० । ७. **वर्तते** सं० । ८. नाभिप्रमाणे । ९. **स्थिते** मु० । १०. ०**रौप्या**० मु० । ११. आगतेन । १२. पुरुषगवेषिभिः । १३. **बन्दिपुंसां** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रष्टुं देवीमिमां भीमां क्षमा न हि वणिक्स्त्रियः । इति **प्रियदर्शनायाः** स दृशौ वाससा प्यधात् ॥२३२॥
पुत्रं च स्वयमादाय **चण्डसेनो**ऽक्षिसंज्ञया । आनायय**द्बन्धुदत्तं** दैवात् प्रथममेव हि ॥२३३॥
देव्यै पुत्रं प्रणमय्याऽर्पयित्वा रक्तचन्दनम् । अर्च्यतामिति पल्लीशः प्रोवाच **प्रियदर्शनाम्** ॥२३४॥
स्वयं तु[1] कोशात्त्रिंशमाचकर्षाऽतिनि[2]ष्कृपः । एवं विचिन्तयामास दीना तु **प्रियदर्शना** ॥२३५॥
धिग्देव्या मत्कृते पुम्भिर्बलिरित्ययशो मया । प्रापणीयं कथमहो ! हा ! जाताऽस्मि निशाचरी ॥२३६॥
आगतं **बन्धुदत्तो**ऽपि ज्ञात्वा मृत्युं विशुद्धधीः । प्रावर्तत नमस्कारान् परावर्त्तयितुं गुणी ॥२३७॥
तं च ध्वनिं समाकर्ण्य सद्योऽपि **प्रियदर्शना** । दृशावुद्घाटयामास ददर्श च पतिं निजम् ॥२३८॥
साऽवदच्**चण्डसेनं** च भ्रातः ! सत्यप्रतिश्रवः । जातोऽसि यदयं **बन्धुदत्त**स्ते भगिनीपतिः ॥२३९॥
**चण्डसेनः** पतित्वांऽह्र्यो[3]**र्बन्धुदत्त**मभाषत । अज्ञा[4]नागो मे सहस्व स्वाम्यसि त्वं समादिश ॥२४०॥
बभाषे **बन्धुदत्तो**ऽपि मुदितः **प्रियदर्शनाम्** । अपराधः क एतस्य यस्त्वया मामयोजयत् ॥२४१॥
¶**चण्डसेन**मथाऽऽज्ञाप्य **बन्धुदत्तो** व्यमोचयत् । बन्दी[5]त्तान् पुरुषांस्तं च किमेतदिति चाऽवदत् ॥२४२॥
[6]उपयाचितपर्यन्तं वृत्तान्तं स्माऽऽह भिल्लराट् । **बन्धुरप्यवदत्** पूजा जीवघातैर्न युज्यते ॥२४३॥
पुष्पाद्यैः पूजयेर्देवीं हिंसां परधन-स्त्रियौ । मृषोक्तिं च परिहरेर्भव सन्तोषभाजनम् ॥२४४॥
तथेति प्रतिपेदे स देवी चोवाच पा[7]त्रगा । अद्य प्रभृति मे पूजा कर्तव्या [8]कुसुमादिना ॥२४५॥
तच्छ्रुत्वा बहवो भिल्ला बभूवुर्भद्रकाः क्षणात् । **प्रियदर्शनया** पुत्रो **बन्धुदत्त**स्य चाऽर्पितः ॥२४६॥
आर्पय**द्धनदत्ताय बन्धुदत्तो**ऽपि नन्दनम् । ममाऽसौ मातुल इति निजपत्न्यै शशंस च ॥२४७॥
कृत[9]नीरङ्गिका साऽपि श्वशुरं दूरतोऽनमत् । दत्ताशीः सोऽप्युवाचैवं सूनोर्नामाऽद्य युज्यते ॥२४८॥
आनन्दको बान्धवानां यदसौ जीवदानतः । **बान्धवानन्द** इत्याख्यां पितरौ तस्य चक्रतुः ॥२४९॥
समातुलं **बन्धुदत्तं** नीत्वा स्वौकस्यभोजयत् । तदा गृहीतं लोप्त्रं चाऽर्पयति स्म किरातराट् ॥२५०॥
चि[10]त्रकत्वक्-चामरे-भ[11]र्दन्त-मुक्ताफलादिकम् । **बन्धुदत्तायो**पनिन्ये **चण्डसेनः** कृताञ्जलिः ॥२५१॥
व्यसृजद्बन्धुवद्**बन्धुर्ब**[12]न्दीनुचितदानतः । कृतकृत्यं **धनदत्तं** कृत्वा प्रैषीत् स्ववेश्मनि[13] ॥२५२॥
¶**बन्धुदत्तः** ससार्थोऽपि सपुत्र-**प्रियदर्शनः** । अन्वित**श्चण्डसेनेन** ययौ **नागपुरीं** पुरीम् ॥२५३॥
अभ्येत्य बन्धुभिः प्रीतै राज्ञा च बहुमानतः[14] । आरोप्य कुञ्जरस्कन्धं स्वयं पुर्यामवेश्यत ॥२५४॥
दानं ददानः सदनं **बन्धुदत्तो** निजं ययौ । भुक्तोत्तरे च बन्धूनां सर्वं स्वोदन्तमब्रवीत् ॥२५५॥
सर्वानूचे च भूयोऽपि मुक्त्वैकं जिनशासनम् । असारं सर्वमप्यत्र भवे स्वानुभवो ह्ययम् ॥२५६॥
जिनशासनरक्तोऽभूद् **बन्धुदत्त**गिरा जनः । **बन्धुदत्तश्चण्डसेनं** सत्कृत्य विससर्ज च ॥२५७॥
सुखे च **बन्धुदत्तो**ऽस्थाद् द्वादशाब्दानि तत्र च । अन्यदा समवासार्षीच्छ्रीमा[15]न् **पार्श्वः** शरत्क्षणे ॥२५८॥
महर्द्ध्या **बन्धुदत्तो**ऽपि गत्वा **सप्रियदर्शनः** । प्रणम्य **श्रीपार्श्वनाथ**मशृणोद्धर्मदेशनाम् ॥२५९॥
सोऽथाऽपृच्छत् प्रभुं केन कर्मणा षण्मृताः प्रियाः । ऊढमात्राः ? कुतश्चाऽभूद् विरहो बन्[16]दिता च मे ? ॥२६०॥
¶स्वाम्याख्यदत्र **भरते विन्ध्याद्रौ** शबराधिपः । नाम्ना **शिखरसेनो**ऽ[17]भूर्हिंसात्मा विषयप्रियः ॥२६१॥
इयं च **श्रीमती** नाम्ना प्रियाऽभूत् **प्रियदर्शना** । सहाऽनयाऽद्रिकुञ्जेषु त्वमस्था विलसंस्तदा ॥२६२॥

---

१. **च** मु० । २. **निःकृपः** मु० विना । ३. **पतित्वांऽङ्घ्र्यो०** मु० हे० ता० । ४. अज्ञानापराधम् । ५. बन्दित्वेन आत्तान् । ६. उपयाचितं भाषायां 'मानता' इति । ७. **पार्श्वगा** मु० । पात्रस्य 'भुवा' इत्याख्यया प्रसिद्धस्य शरीरे प्रविष्टा देवी उवाचेत्यर्थः । ८. **कुमदा०** मु० । ९. नीरङ्गी 'लाज' इति भाषायाम् । १०. चित्रकः 'चित्तो' इत्यभिधो हिंस्रः प्राणी, तस्य त्वक्-चर्म, व्याघ्रचर्मेति यावत् । ११. **०रेभ्यदन्त०** मु० । १२. **०द्बन्दी०** मु० । १३. **०वेश्मने** सं० । १४. **०मानितः** ता० । १५. **०च्छ्रीमत्पार्श्वः** मु० ता० । १६. **बन्दिता** मु० । १७. **०सेनोऽभूत्** मु० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मार्गेऽन्यदा साधुगच्छो मार्गभ्रष्टोऽटवीमटन् । तत्राऽऽयातस्त्वयाऽदर्शि सानुकम्पेन चेतसा ॥२६३॥
गत्वा साधूनपृच्छश्च यूयं भ्रमथ किं न्विह ? । मार्गभ्रष्टा वयमिति तुभ्यं तेऽप्याचचक्षिरे ॥२६४॥
उवाच **श्रीमती** त्वां च भोजयित्वा फलादिना । उत्तारय मुनीनेतान् **विन्ध्यारण्याद्** दुरुत्तरात् ॥२६५॥
कन्दादि त्वमुपानैषीस्तेऽप्यूचुर्नैतदर्हति । यद्यस्ति वर्ण-गन्धादिरहितं तत् प्रयच्छ नः ॥२६६॥
चिरकालगृहीतं वा कल्पते नः फलादिकम् । श्रुत्वेति तादृशैः कन्दादिभिस्तान् प्रत्यलाभयः ॥२६७॥
मार्गेऽनैषीश्च तान् साधूंस्ते धर्मं चाऽऽचचक्षिरे । दत्त्वा पञ्चनमस्कारमेवं च त्वय्युपादिशन् ॥२६८॥
पक्षस्य दिन एकस्मिंस्त्यक्तसावद्यकर्मणा । स्मर्तव्योऽयं नमस्कारस्त्वया रहसि तस्थुषा ॥२६९॥
तदा च यदि ते कोऽपि द्रुह्येत्तस्मै स्म मा कुपः । एवं ते चरतो धर्मं स्वर्गश्रीर्न हि दुर्लभा ॥२७०॥
आमेत्युक्त्वा कुर्वतश्च तथैव भवतोऽन्यदा । आगात्पञ्चाननस्तत्राऽभैषीच्च **श्रीमती** क्षणात् ॥२७१॥
मा भैषीरिति जल्पंस्त्वमगृहीर्धनुरुत्कटम् । **श्रीमत्या** स्मारितश्चाऽसि नियमं गुरुभाषितम् ॥२७२॥
ततश्च निश्चलोऽभूस्त्वं **श्रीमती** च महामतिः । जग्धौ सिंहेन **सौधर्मे**ऽभूतं पल्यायुषौ सुरौ ॥२७३॥
¶च्युत्वाऽपरविदेहेषु **चक्रपुर्यां** महीपतेः[1] । अभूः **कुरुमृगाङ्कस्य बालचन्द्राभवः** सुतः ॥२७४॥
**कुरुमृगाङ्कश्यालस्य सुभूषणमहीपतेः** । **कुरुमत्याम**भूत् पुत्री प्रच्युत्य **श्रीमती** दिवः ॥२७५॥
**वसन्तसेना-शबरमृगाङ्कौ** नामतश्च तौ । क्रमेण यौवनं प्राप्तौ स्वस्वस्थानं स्थितौ युवाम् ॥२७६॥
गुणश्रुत्या त्वयि रक्ता साऽभूत्तस्यां पुनर्भवान् । चारुचित्रकरानीततद्रूपालेख्यदर्शनात् ॥२७७॥
पित्रा ज्ञातानुरागेण तया त्वं परिणायितः । पिता ते तापसो जातस्त्वं पुनः पृथिवीपतिः ॥२७८॥
तिर्यग्वियोगजं कर्म तव **भिल्लभवोद्भवम्** । तदानीमुदगात्तच्च शृणु धीमन् ! यथातथम् ॥२७९॥
¶तत्रैव विजये दोष्मान् राजा **जयपुरेश्वरः** । **वर्धनो** नाम निर्हेतुं[2] क्रुद्धस्त्वामवदन्नरैः ॥२८०॥
**वसन्तसेनां** मे यच्छ प्रतीच्छ मम शासनम् । भुङ्क्ष्व राज्यं ततो नो वा त्वं युध्यस्व मया सह ॥२८१॥
श्रुत्वाऽमर्षेण युद्धाय निरगास्त्वं गजस्थितः । ससैन्यो वार्यमाणोऽपि लोकेनाऽशकुनेक्षणात् ॥२८२॥
तदा च **वर्धनो** राजा जितो नंष्ट्वा जगाम सः । युयुधे च त्वया सार्धं **तमो** नाम नृपो बली ॥२८३॥
तेन क्षीणबलस्त्वं तु योधयित्वा निर्बर्हितः[3] । रौद्रध्यानवशात् षष्ठ्यामवन्यां नारकोऽभवः ॥२८४॥
अग्निं **वसन्तसेना**ऽपि प्रविश्य विरहार्दिता । विपद्य जज्ञे तत्रैव तत्कालं नरकावनौ ॥२८५॥
उद्वृत्य[1] **पुष्करद्वीपभरते** रोरवेश्मनि[2] । सुतोऽभवस्त्वं त्वत्तुल्यजातिः[3] सा तु सुताऽभवत् ॥२८६॥
द्वयोरप्युद्यौवनयोर्बभूवोद्वाहकर्म च । सति दारिद्र्यदुःखेऽपि रेमाथे नितरां युवाम् ॥२८७॥
युवाभ्यां स्वगृहस्थाभ्यां साध्व्यो ददृशिरेऽन्यदा । उत्थाय भक्त्या पानान्नैः प्रत्यलाभ्यन्त चाऽऽदरात् ॥२८८॥
